सारस्वती सुषमा

सम्पूर्णानन्दसंस्कृतविश्वविद्यालयानुसन्धानपत्रिका

पण्डितश्रीसुरतिनारायणमणित्रिपाठिस्मृतिविशेषाङ्कः

CC-0. Sam… …ersity Collection. Digitized by eGangotri

सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयः

श्रुतम् मे गोपाय

CC-0. Sampurnanand University Collection. Digitized by eGangotri

सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयः
श्रुतम् मे गोपाय

CC-0. Sampurnanand University Collection. Digitized by eGangotri

सम्पूर्णानन्द-संस्कृत-विश्वविद्यालय
श्रुतम् मे गोपाय

CC-0. Sampurnanand University Collection. Digitized by eGangotri

सारस्वती सुषमा

सम्पूर्णानन्दसंस्कृतविश्वविद्यालयानुसन्धानपत्रिका

पण्डितश्रीसुरतिनारायणमणित्रिपाठिस्मृतिविशेषाङ्कः

प्रधानसम्पादकः

प्रो. बिन्दाप्रसादमिश्रः

कुलपतिः

सम्पादकः

प्रो. नरेन्द्रनाथपाण्डेयः

निदेशकः

अनुसन्धानसंस्थानस्य

शिक्षण-शोध-प्रकाशन-संस्थानस्य च

६३ वर्षे — **वार्षिकं मूल्यम् - १०० रूप्यकाणि**

१-४ अङ्काः — **जून-सितम्बर-दिसम्बर-मार्च, २००८-०९ ई.**

CC-0. Sampurnanand University Collection. Digitized by eGangotri

परामर्शदातृसम्पादकमण्डलम्

प्रो. बिन्दाप्रसादमिश्रः, कुलपतिः, अध्यक्षः

१. **प्रो. सदानन्दशुक्लः,**
वेदवेदाङ्गसङ्कायाध्यक्षः

२. **प्रो. रामकिशोरत्रिपाठी,**
दर्शनसङ्कायाध्यक्षः

३. **प्रो. गङ्गाधरपण्डा,**
साहित्य-संस्कृति-सङ्कायाध्यक्षः

४. **प्रो. यदुनाथप्रसाददुबे,**
श्रमणविद्या-सङ्कायाध्यक्षः

५. **प्रो. शारदा-चतुर्वेदी,**
आधुनिक-ज्ञान-विज्ञान-सङ्कायाध्यक्षः

६. **प्रो. नरेन्द्रनाथपाण्डेयः,**
संयोजकः

❖ ❖ ❖

प्रकाशकः —

प्रो. नरेन्द्रनाथपाण्डेयः
निदेशकः, शिक्षण-शोध-प्रकाशन-संस्थानस्य
सम्पूर्णानन्दसंस्कृतविश्वविद्यालये
वाराणसी - २२१००२

मुद्रकः —

श्रीजी प्रिण्टर्स
नाटी इमली
वाराणसी - २२१००२

प्राप्तिस्थानम्—

विक्रय-विभागः, सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य, वाराणसी-२२१००२

CC-0. Sampurnanand University Collection. Digitized by eGangotri

प्रस्तावना

सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य पूर्व-कुलपतयः स्वनामधन्याः **पण्डितश्रीसुरतिनारायणमणित्रिपाठिवर्य्या** यशःकायेन सर्वदा जीवन्तः स्वकार्य-कलापैरपूर्वतामश्नुवाना अस्य विश्वविद्यालयस्य राष्ट्रव्यापिस्वरूपताधिगमाय विद्यानां संरक्षणसंवर्धनयोः सामाजिकानाञ्चास्माद् विश्वविद्यालयात् किमप्या-दर्शभूतं शास्त्रेषु निहितं व्यवहारे तिरोहितं प्रेप्सितं प्रापयितुं चतुर्षु वर्षेषु कुलपतिरूपेण व्यवहारसमये यथा प्रायतन्त तन्निदर्शनभूतमद्यापि प्रेरणास्पदं वर्तते तत्पश्चाद्भाविनां संस्कृतहितचिन्तकानाम्। शास्त्रेषु अपूर्वां प्रतिभां वैदुषीञ्चानाकलयन्तोऽपि जन्मना संस्कृतानुरागचित्ताः संस्कृतविषये स्नातकोत्तर-परीक्षामुत्तीर्णा अपीमे अस्माकं छात्राणां विदुषाञ्च समुन्नतये यानि कर्माण्यकुर्वन् तानि न केवलं शास्त्राणामुन्नतय एवाभूवन्, अपि तु तैः संस्कृतज्ञानाम् आर्थिकसमृद्धिरपि जाता। अस्मिन् प्रसङ्गे निदर्शनरूपेण संस्कृताध्यापकानां वेतनवृद्धिः प्रस्तोतुं शक्यते।

अस्माकं संस्कृतविद्यालयेषु ब्राह्मणवृत्त्याऽध्यापयन्तः समेऽप्यध्यापकाः शास्त्रचिन्तया मर्यादापालनपुरःसरमाजीवनं प्रयतमाना अपि अतिन्यूनवेतन-लब्ध्या भोजनाच्छादनयोः कृतेऽपि परमुखापेक्षा भवन्ति स्म। इदमसामीचीन्यं स्वकुटुम्बभरणेऽप्यसक्तानां समानकार्यार्थमप्यसमानवेतनेन कथञ्चिज्जीवतां संस्कृतज्ञानामुद्धाराय परदुःखकातराँस्तानाकर्षत्।

'उत्थातव्यं जागृतव्यं योक्तव्यं भूतिकर्मसु' इति श्रुत्यर्थं शब्दतोऽर्थ-तश्चोभयथाऽभ्यस्यतां त्रिपाठिवर्य्याणां मनसि एतादृशी पीडा आसीद् यया प्रेरितास्ते अविरामेन प्रयत्य लक्ष्मणपुरस्थान् शिक्षासम्बद्धान् अधिकारिणो मन्त्रिणोऽन्याँश्च आनुकूल्येनानुरुध्य वेतनविसङ्गतिरूपम् अभिशापं न्यक्कृत्य स्वीयं लक्ष्यमवाप्तवन्तः। यद्यपि विद्यालयानां वर्गीकरणे जाते सत्यपि प्रथमश्रेणीस्थानां विद्यालयानां कृते विश्वविद्यालयानुदानायोगतो महाविद्यालयानां कृते लभ्यमानं प्राध्यापकवेतनमानमद्यापि प्रेप्सितं वर्तते; यतस्तदनन्तरम् अस्यां दिशि दृढतरप्रयाससत्त्वेऽपि साफल्यं नाधिगतम्, तथापि प्रथमद्वितीय-श्रेणीस्थविद्यालयानां कृते यद्वेतनं तैः प्रयत्य दापितं तदपि तदानीं चेतसा गणयितुमशक्यमासीत्।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

विश्वविद्यालयस्य भवनसम्पत्तौ नूतनविभागानां स्थापनायाञ्च किमप्यपूर्वं तैरकारि। विभागत्रयस्य नूतनस्यात्र योजनं तेषु च तदानीन्तनेषु विद्वत्सु श्रेष्ठतमां कोटिमाटीकतां विद्वत्तल्लजानां नियोजनं तेषां विद्यानुरागमपूर्वां कार्यपद्धतिञ्च द्योतयति। **पण्डितराजश्रीराजेश्वरशास्त्रिद्रविडवर्य्या** आजीवनं भृतकाध्यापनतो विरता अपि एतेषां प्रार्थनया प्राचीनराजशास्त्रस्योद्धाराय विभागस्य नूतनतया विश्वविद्यालये स्थापितस्याध्यक्षतामुदवाक्षुः। एवमेव योक्तॄन् त्रिपाठिवर्य्यान् प्राप्य विश्वविद्यालयोऽयम् अस्मिन् कलौ धन्वन्तरिकल्पान् महामहिम-राष्ट्रपतीनां **डॉ. राजेन्द्रप्रसादमहाभागानां** चिकित्सकान् तपसा विद्यया चिकित्सानैपुण्येन चासाध्यरोगिणोऽपि साधयतः **पण्डितश्रीसत्यनारायणशास्त्रिवर्य्यान्** वैद्यमणि-मालायाः सुमेरुभूतान् आश्चर्यकरान् चिकित्सकीयप्रयोगान् कर्तुं समर्थान् काष्ठौषधीनां प्रयोगे प्राप्तानितरसाधारणनैपुण्यान् चरकसंहिताया आयुर्वेद-मूलभूतायाः पतञ्जलिभाषितमहाभाष्याध्ययनलब्धधिषणया गभीराशयप्रकाशन-पटून् वटूनां संस्कृताध्ययनतत्पराणां तत्परेण चेतसा प्रोत्साहनपरान् अमत्सरान् आयुर्वेदसेवया यापितसर्वजीवनवत्सरान् चिकित्साजीवनान् अपि संस्कृतानुराग-भरजीवनान् सर्वब्राह्मणवर्गाननिष्क्रयौषधिप्रदानसोत्साहमानसान्—

अञ्जनस्य क्षयं दृष्ट्वा वल्मीकस्य च सञ्चयम्।
अवन्ध्यं दिवसं कुर्याद् दानाध्ययनकर्मभिः।।

इति चिरन्तनं वचोऽनुसृत्य दानाध्ययनकर्मभिर्विशेषतो दानप्रधानैर्दिवसान्नयतो विश्वविद्यालयस्याङ्गरूपेण त्रिपाठिवर्य्यैः प्रयासपूर्वकं योजितस्य आयुर्वेद-विभागस्य अध्यक्षरूपेण प्राप्तवान्।

अस्य संस्कृतविश्वविद्यालयस्य छात्राः संस्कृतप्रधान-स्नातकोपाधिभिः प्रतियोगितापरीक्षासु अन्यासु राजकीयसेवासु चाप्यन्वेतुमननुमता आसन्। स्वातन्त्र्यलब्धेः पूर्वमस्मिन् राष्ट्रे आङ्ग्लभाषाया विशिष्टसमादरेण इतरा भाषा उपेक्षिता अभूवन्। अत एव विपुलां साहित्यसमृद्धिं समृद्धं वाङ्मयं प्रसङ्गानुकूलनूतनशब्दानां सर्जनेऽद्भुतं सामर्थ्यमादधानाऽपि संस्कृतभाषा न केवलं बहोः कालाद् अव्यवहार्या अभूत्, अपि त्वस्याः सामर्थ्यमपि तिरस्कृतम् आसीत्। प्राकृताः प्रबुद्धाश्चान्यभाषाविदः संस्कृतं केवलं संस्कारेषु यज्ञेषु दर्शनानां च विवेचनेष्वेवोपयोक्तुं शक्यमिति मन्यन्ते स्म। एतादृशे समये त्रिपाठिवर्य्यैः प्रयत्य केन्द्रीयलोकसेवायोगस्य परीक्षासु प्रान्तीयलोकसेवायोगस्य परीक्षासु च च्छात्राणां प्रवेशाय पिहितानि द्वाराणि अपिहितानि कृतानि।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

विश्वविद्यालये तन्त्रसम्मेलनमेभिरायोजितम्। सम्मेलनस्यायोजने तान्त्रिक-सिद्धिप्रदर्शनेन लोकानामाकर्षणं तद्व्याजेन च योगतन्त्रयोरन्यत्र च संस्कृतवाङ्मये जनानुरागस्य प्रथनम् आसीत् मुख्यमुद्देश्यम्। भारतवर्षस्य सर्वेभ्यः कोणेभ्यस्तन्त्रस्य प्रयोगान् सर्वसमक्षं प्रदर्शयितुं क्षमास्तान्त्रिका अत्रागत्य तदानीन्तनराज्यपालमहोदयानां महामहिमशालिनां **श्रीविश्वनाथदास-महोदयानां** सन्निधौ स्वाः सिद्धीः प्रदर्श्य सम्मेलनस्य शोभाम् अवर्द्धयन्। मन्ये, द्वित्राणि वैदिकसम्मेलनान्यपि तैरायोजितानि। येषु वेदविद्वांसः समग्रमपि राष्ट्रं वेदघोषेण पावयन्तः स्वोपस्थित्या अतिशयदीप्तिमतीमपि वाराणसीं वेदघोषै-र्देवानामपि सस्पृहावलोकविषयाम् अकार्षुः।

स्थालीपुलाकेन त्रिपाठिवर्य्याणां स्मृतानि कार्याणि अस्माकं स्मृतिमपि पावयन्ति। एवं प्रेरणास्त्रोतोभूतास्त्रिपाठिवर्य्या विश्वविद्यालयेऽस्मिन् न केवलं यशःशरीरेण जीवन्ति, अपि तु तेषां कार्यशैलीं संस्कृतानुरागञ्च साक्षात्कृतवताम् अधुनाऽपि जीवतां संस्कृतानुरागवतां स्मृतिपथे सर्वदा विहरन्ति। अस्य विश्वविद्यालयस्य समुत्थाने तेषां प्रयत्नानां साफल्यविषयेऽस्माभिर्यत्किमप्युच्यते तत्तेषां यशोज्ञप्त्यै न्यूनमेव भवतीति वर्तते मम मतिः। यतो गोरखपुर-विश्वविद्यालयसदृशं नूतनं विश्वविद्यालयं संस्थापयितुस्तेषां सामर्थ्यं तेन गौरवातिशयं न प्राप्नोति; किन्त्वस्माभिः स्वकार्तज्ञं ख्यापयितुमेष प्रयासः क्रियते। यतो गुणाधिके वस्तुनि मौनिता वाग्जन्मवैफल्यं साधयति, अतो मन्ये, उद्यन् प्रकाशराशिर्भास्करो यथाऽनपेक्षोऽपि श्रद्धादीपान् गृह्णाति, उत्तमानि चक्षूंषि च प्रददाति दीपदर्शयितृभ्यस्तथास्माकं लघुरप्ययं प्रयासस्त्रिपाठिवर्य्याणां महते तोषाय भविष्यति। अन्ते चाऽहम् अनुसन्धानसंस्थानस्य प्रकाशनसंस्थानस्य च निदेशकान् अन्याँश्च कर्मव्यापृतान् साधुवादैर्योजयन्—

प्रवर्ततां प्रकृतिहिताय पार्थिवः।
सरस्वती श्रुतिमहती महीयताम्।।

इति प्रेरकं कविवचः स्मरन् त्रिपाठिवर्य्याणां पावनस्मृतौ शब्दचयचितां पुष्पमालां समर्प्य विरमामि।

(प्रो. बिन्दाप्रसादमिश्रः)
कुलपतिः
सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयस्य

वाराणस्याम्
श्रावणपूर्णिमायाम्,
२०६८ तमे वैक्रमाब्दे

CC-0. Sampurnanand University Collection. Digitized by eGangotri

CC-0. Sampurnanand University Collection. Digitized by eGangotri

सम्पादकीयम्

पण्डितश्रीसुरतिनारायणमणित्रिपाठिवर्य्या विश्वविद्यालयस्यास्य पूर्व-कुलपतयः वर्षचतुष्टयं यावद् अस्मिन् विश्वविद्यालये कुलपतिपदं विभूष्य इत एव सक्रियसेवाकार्याद् विरम्य प्राप्तावकाशाः सुदीर्घं यशोऽधिगम्यान्ते काश्यामेवावाप्तशिवसायुज्या अद्यापि यशःशरीरेण जीवन्तो विश्वविद्यालयममुं स्वकार्यकलापैः निर्दिशन्त इव लक्ष्यन्त इति महदिदमस्माकं कृते सौभाग्यकरम्। विश्वविद्यालयोऽयं राजकीयसंस्कृतमहाविद्यालयरूपेण यां भौतिकीं सारस्वतीञ्च समुन्नतिं प्राप्यानुदिनमेधमानमासीत् सा सम्यक्समुन्नतिः कथं रक्षिता स्यात्, कथञ्चास्य कलेवरविवृद्धिः स्यात्? कथमस्य छात्राध्यापककर्मकरवर्गः प्राप्तावसथादिसौविध्योऽधुनातनशिक्षणसंस्थानामनुकार्यो भवेत्, चतुर्दिक्षु चास्य सारस्वतं वैभवं प्रसरेदिति विचार्य, निरन्तरं प्रयतमानानां तेषामशिथिलप्रयत्नैः कामप्यनुपमां समुन्नतिं संस्थानमिदं सम्प्रापेति नास्ति तिरोहितं विश्वविद्यालयपरिवारस्य तदानीन्तनानां सामाजिकानाञ्च संस्कृताभिरुचीनाम्।

त्रिपाठिवर्याणां यशःकायं प्रेरणास्रोतोरूपेण संरक्षितुं विश्वविद्यालयस्य प्रकाशनसमितिघटकैर्विद्वद्भिः सारस्वतीसुषमायाः कञ्चन विशेषाङ्कं प्रकाशयितुं सङ्कल्पो गृहीतः। अयमुदात्तः सङ्कल्प इदानीं पूर्तिं गच्छन्नस्मान् प्रत्यर्पितन्यासान् विधाय प्रमोदभरेण मन्थरमानसगतिकान् करोति। तेषां जीवनैतिह्यं सविस्तरं प्रकाशयितुं नास्माकं यत्नो मूर्तरूपतां प्राप्नोतीति वक्तुं शक्यं स्मृतिसंरक्षणरूप-कार्यस्य दीर्घकालव्यवहितस्य त्रिपाठिवर्याणां समग्रं कार्यक्षेत्रमव्याप्नुवतः विशेषाङ्कव्याजेन सम्पूर्णयशःख्यापने सामर्थ्याभावात्; अपि तु—**'कुर्वन्नेवेह कर्माणि जिजीविषेत् शतं समाः'** इति श्रुताज्ञां शिरसा वहद्भिस्तैर्या कर्ममयी सपर्या भगवतो लीलाविहारस्य आर्यावर्तैकदेशस्योत्तरप्रदेशाङ्गभूतस्य पूर्वाञ्चलस्य स्वजनुषा सनाथस्य कृते विहिता, यया च सपर्यया प्रसन्नो भगवान् विश्वनाथ-स्तेभ्यो विदुषां विद्यानाञ्च सपर्यायाः कृते निर्बाधं चतुर्वर्षात्मकं कालखण्डम् अत्र विश्वविद्यालये कुलपतिपदे दत्तवान्, तां यशःपावनीं सपर्यां अनतिरेकतो स्मर्तुं वर्तते कश्चन कार्तज्ञख्यापकोऽयं प्रयासः।

देववर्याः शब्दस्यापभ्रंशरूपेण वचनार्हस्य देवरिया-मण्डलस्य वराणां श्रेष्ठानां पाररूपां कर्मसमाप्तिं तत्पुरस्सरज्ञाननिष्ठां द्योतयतः 'वरपार'ग्रामस्य

CC-0. Sampurnanand University Collection. Digitized by eGangotri

शाण्डिल्यगोत्राणां सरयूपारीणब्राह्मणानामभिजनभूतस्य एकस्मिन् लब्धपारम्पर्य-प्रतिष्ठकुले त्रिपुरुषानूकमणीत्युपनामसनाथानां पितृ-पितामह-प्रपितामहानां श्रीरामटहलमणि-विश्वेश्वरमणि-राममणिशर्मणां त्रिपाठीत्यान्तं नाम गृह्णतां यशो विपुलयितुं परीक्षिदिव प्राप्तभगवदनुग्रहाः पित्रोरानन्दकराः सोदरेषु कनिष्ठतमाः त्रिपाठिवर्या जनिमलभन्तेति श्रूयते। 'पारं प्रान्ते परतटे' इत्यमरकोशात् पारशब्दो नद्याः परतटस्य वाचको भवति। यदि सरयूनद्याः परतटो गृह्यते चेत् पारे भवाः पारीणाः 'राष्ट्रावारपारावाराद् घखौ' (४।२।९३) इति पाणिनिसूत्राद् अवारपाराद् विगृहीतादपि विपरीताच्चेति वक्तव्यमिति वार्तिकानुरोधात् पारीणशब्दनिष्पत्तौ जातायां सरय्वाः पारीणाः सरयूपारीणा इति व्युत्पत्तिः 'सरयूपारीण'-शब्दस्य वक्तुं शक्यते। यद्यपि सापेक्षमसमर्थवदिति सिद्धान्तात् समर्थः पदविधिरित्यनुशासनविरोधात् षष्ठ्यन्तस्य सरय्वा इत्यस्य पारीणशब्देन समासाभावात् सरयूपारीणशब्दो न समासेन शुद्धतया निष्पादयितुं शक्य इति वक्तुं शक्यम्, तथापि नित्यसापेक्षशब्दानां गुर्वादीनां सापेक्षत्वेऽपि 'देवदत्तस्य गुरुकुलम्' इत्यादौ समासदर्शनात्तस्यापि साधुत्वं वक्तुं शक्यते।

व्याकरणं शब्दसाधुत्वान्वाख्यानपरं शास्त्रं साध्वनुशासनं विदधद् पाणिनिसूत्रेण पारीणशब्दस्य साधुत्वं वक्ति। परतीरभवस्य पदार्थस्य बोधकोऽयं शब्दो नद्यादि-जलाशयवाचिशब्दसन्निधान एव निराकांक्षतया स्वार्थबोधनपरो भवति। अतो नदीवाचकस्य सरयूशब्दस्य विशेषणतयोपादानं मर्यादातिक्रमं कुर्वन्न लक्ष्यते।

यद्यपि सूत्रेण अवारपारशब्दात्, पारावारशब्दात्, अवारशब्दात्, पारशब्दाच्च 'ख'प्रत्ययो विधीयत इति वार्तिकार्थसङ्गत्या लब्धो भवति, तथापि एषु शब्देषु कस्यचनान्यशब्दस्य विशेष्यतया विशेषणतया वा योजने अनुशासनविरोध आपततीति वक्तुं शक्यते, तथापि न वयं 'सरयू'-शब्दं विशेषणतया संयोज्य 'सरयूपार'शब्दात् 'ख'-प्रत्ययोत्पत्तिं वक्ष्यामो येनानुशासनविरोधः कथञ्चिद् आपादयितुं शक्यः। वयं तु पारीणशब्दस्य सिद्ध्यनन्तरं नित्यसाकाङ्क्षताया उपशमाय विशेषणतया सरयूशब्दो योजयितव्य इति वदामः। तेन परपारभवार्थकस्य पारीणशब्दस्य विशेषणे साकाङ्क्षस्य निराकांक्षतोपपन्ना भवति। किञ्च पारशब्दात् साकांक्षात् तद्धितोत्पत्तिं वदताऽऽचार्येण नित्यसाकांक्षाणाम् असामर्थ्यं न भवतीति सूच्यते इत्यपि वक्तुं शक्यम्। इदं विवेचनं त्रिपाठिवर्याणां पूर्वपुरुषपरम्परां सूचयति यत्र वर्गविशेषे तेषां जन्म जातम्। इतोऽग्रे शिक्षादिकं वर्ण्यते।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

अक्षरारम्भानन्तरं प्राप्तभाषावाक्यपरिचयास्ते ग्राम्यप्राथमिकपाठशालां त्यक्त्वा गोरक्षपुरस्थ-सेन्ट एन्ड्रूज-कालेजेत्यभिधया ख्यातसंस्थानत इण्टमीडिएट-परीक्षामुत्तीर्योच्चाध्ययनस्य कृते लुप्तां सरस्वतीमन्वेष्टुमन्वर्थ-नामानं प्रयागं प्राप्तवन्तः, तत्रैव इलाहाबादविश्वविद्यालयस्य प्रकृतिभूतस्य म्योरसेन्ट्रलकालेजसंस्थानस्य सुरम्यशैक्षिकपरिवेशे वर्षद्वयं ससम्मानमधीत्य बी.ए. उपाधिं प्राप्य विश्वविद्यालयरूपेण परिणतात् तस्मादेव संस्थानात् एम.ए. उपाधिमपि संस्कृतविषयमधीत्याधिगतवन्तः। एम.ए.संस्कृतोपाधिं लब्धुं यतमानैस्तैर्विधिविषयेऽपि तस्मिन्नेव काले प्रवेशपुरस्सरमुपाधिर्गृहीतः। त्रिपाठि-वर्याणामिदं वैशिष्ट्यमासीद् यत्ते सूक्ष्मेक्षिकयाऽध्ययनविषयान् गृह्णन्तोऽपि छात्रव्यवहारमर्यादाम् औचित्यञ्च रक्षितुं सर्वदैव प्रयत्नपरा अभूवन्। न केवलं विद्याध्ययनकाल एवासीत् तेषामयं स्वभावः प्राप्तोद्रेको दृश्यते, अपि तु आजीवनमवहितैस्तैरौचित्यसंरक्षणार्थं कर्मणा सम्पूर्णजगज्जन्मस्थितिभङ्गकारणस्य भगवत आराधनार्थं तैः साफल्येन प्रयतितमिति तेषाम् अर्णव इवागाधस्य विपुलस्य च कर्मक्षेत्रस्य स्थालीपुलाकन्यायेन पीरक्षणेनापि स्फुटीभवति।

लोकहितकराणि प्रशास्तृपदानि विपुलानि तैः सनाथान्यभूवन्, येषां साधिकारं लाभाय निकषभूतां पी.सी.एस-प्रतियोगिपरीक्षां . पञ्चविंशत्यधिकै-कोनविंशतिशततमे वर्षे दिसम्बरमास उत्तीर्यानन्तरवर्षे (१९२६ वर्षे) तैः स्वकीयं प्रशास्तृसेवासम्बद्धं जीवनं गोरक्षपुरतः स्वारब्धम्। अल्पारम्भाः क्षेमकरा इति न्यायेन तेषां सेवारम्भकालोऽत्र पक्षमपि व्याप्तुं नाशकत्, यतो द्वितीयेन राजपत्रेणाज्ञापकेन ते 'बस्ती'-जनपदम् आर्याणां वसतिभूतं प्रापिताः।

तत्र सहकर्मिभिः स्वीयं कर्तव्यं निर्वहन्तस्ते तत एव प्रशिक्षणार्थं 'मुरादाबाद'-नगरस्थप्रशिक्षणस्थलं गताः, तत्र चाश्ववारादिसर्वकर्मजातं साफल्येन सम्पाद्य अपेक्षितं विशिष्टमध्ययनं च समाप्य ततः प्रतिनिवृत्य आजमगढ-जनपदे पदस्थापनमलभन्त। इत एवारभ्यते वस्तुतस्तेषां प्रशास्तृसेवासम्बद्धं जीवनम्, यत इतः पूर्वं बस्तीनगरे चतुर्मासपर्यन्तमेव तैः कर्म कृतमासीत्।

नास्तीदमविदितमस्माकं सर्वेषां यत् प्रान्तीयलोकसेवायोगतश्चिताः केन्द्रीयलोकसेवायोगतश्च चिताः समे प्रतियोगिनः प्रशिक्षणानन्तरं प्राप्ताधिकारा विभिन्नानि पदानि अधितिष्ठन्ते राजकर्माणि च निर्वहन्ति। राज्ञः कर्माणि 'प्रत्यक्षपरोक्षानुमेया हि राजवृत्तिः' इति सूत्रेणार्यकौटिल्यो निर्दिशति। यानि

CC-0. Sampurnanand University Collection. Digitized by eGangotri

कार्याणि राजा स्वयं पश्यति तानि प्रत्यक्षाणि, यानि परैः कारयति तानि परोक्षाणि भवन्ति, किन्तु तृतीयं तस्य कृत्यमनुमेयताविषयं वर्तते। केयमनुमेयतारूपा वृत्तिरिति विचार्यते चेत् कर्मणां स्वकृतानां परकृतानां वा फलाफलयोगित्वविचारोऽनुमेयतापदेन वक्तुं शक्यते। इदं मुख्यं वर्तनं कर्तव्यं वा वर्तते राज्ञो यतः स्वयं स्वसहायैर्वाऽऽरब्धानां कर्मणां फलाफलयोगित्वं विचार्यैव तेषां सातत्यं विच्छेदो वा कर्तुं शक्यते। अन्यथा हानिकराणां सातत्ये उद्देश्यहानिः स्यात्।

एभिः प्रत्यक्षपरोक्षानुमेयरूपैस्त्रिभिर्वृत्तै राजा न्यायेनार्थमर्जयति, अर्जितस्य च पालनं वर्धनञ्च कुर्वन् तस्य सत्पात्रे प्रतिपत्त्यर्थं यत्नपरो भवति। अतो वस्तुत इदमेव प्रधानं कृत्यं राज्ञो यत्र प्रत्यक्षपरोक्षानुमेयत्वरूपं त्रिविधं वर्तनं सहकारि भवति। यद्यप्येवं वक्तुं शक्यते प्रजापालनं मुख्यं कर्तव्यं भवति राज्ञो यतोऽयं भूपाल इत्युच्यते। अत एव महकविः कालिदासोऽपि वदति रघुवंशे—

'नृपस्य वर्णाश्रमपालनं यत् स एव धर्मो मनुना प्रणीतः'। इति।

अत्रैवकारेणान्यधर्माभावं सूचयन् कविस्तस्य प्राधान्यं द्योतयति, तथापीदं न विस्मर्तव्यं यत् प्रजापालनं कोशदण्डाभ्यां क्रियमाणं कोशाभावे दण्डस्य पोषणाभावात् कोशस्य प्राधान्यं सूचयति। किञ्च न्यायेनार्थार्जनपालन-वर्धनकर्माणि सत्पात्रप्रतिपत्तिसहितानि प्रजापालनमन्तर्गर्भतया सूचयन्ति लोक-कण्टकानामुद्वेजकत्वे स्वैरविहारायोग्ये राष्ट्रे वणिज्याया अन्यकरसंग्रहसाधनानाञ्च बाधे अर्थार्जनस्यैव विघातात्।

अधुनातनसन्दर्भेऽस्माभिरेवं वक्तुं शक्यते यत् प्रत्यक्षपरोक्षानुमेयत्वरूपं त्रिविधमपि वृत्तमुभयविधलोकसेवायोगतश्चिताः कर्मसु व्यापृताश्चाधिकारिणः स्व-स्व-क्षेत्रेऽनुतिष्ठन्तो दृश्यन्ते। अथवा एवं वक्तुं शक्यते यत् केन्द्रसर्वकारस्य प्रदेशसर्वकारस्य चेयं दृढतरापेक्षा भवति यदधिकारिणस्त्रिविधमप्यनुष्ठाय कर्मजातं राजकोशस्य वृद्धिं कुर्वन्तः प्रजापालनं कुर्युः।

इत्थं राजवृत्तमनुतिष्ठन्तस्त्रिपाठिचरणा राजाज्ञापारवश्याच्चक्रवदाजीवनं भ्रमन्तः सेवाकाले बस्ती-मुरादाबाद-आजमगढ़-सुल्तानपुर-सीतापुर-गोण्डा-प्रतापगढ़-लखनऊ-कानपुर-प्रभृति-जनपदेषु महत्त्वपूर्णानि सेवाकार्याणि कृतवन्तः। भूमिसम्बन्धिविवादाँश्च बहून् तत्त्वपक्षपातयुक्तया बुद्ध्या निर्णीय जनानुरागप्रभवां ख्यातिमवाप्तवन्तः।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

गोरखपुरजनपदस्य इलाहाबादजनपदस्य लखनऊजनपदस्य च जनपदाधीशपदमपि एतेऽलमकार्षुः। गोरक्षपुरं जनपदाधीशरूपेण सेवितुं वर्षद्वयात्मक एव काल एभिर्लब्धः; किन्तु अस्मिन्नेव कालखण्डे गोरखपुर-विश्वविद्यालयस्य स्थापनार्थम् एतैरविस्मरणीयः प्रयासः कृतः। पञ्चविंशति-लक्षपरिमितं धनमपि तैर्विश्वविद्यालयस्य कृते विभिन्नस्रोतोभ्यः संगृहीतम्। अष्टवर्षाणि यावद् विश्वविद्यालयस्य कृते निरन्तरप्रयासस्येदं फलमभूद् यत् १९५६ ई. वर्षे 'गोरखपुरविश्वविद्यालय ऐक्ट' इति नाम्ना ख्यातो विधेयकः सर्वकारेण स्वीकृतः। अस्य विश्वविद्यालयस्य प्रथमे कुलपतयः श्रीमन्तो वी.एन.झा-महोदयाः, अवैतनिकाश्च कोषाध्यक्षाः पण्डितश्रीसुरतिनारायणमणि-त्रिपाठिवर्य्या अभूवन्। त्रिपाठिवर्याणां नैरन्तर्येण कृतस्य श्रमस्यं फलरूपेण विश्वविद्यालयोऽयमुद्गत इति दृष्ट्वा वक्तुं युज्यते **'क्लेशः फलेन हि पुनर्नवतां विधत्ते'** इति।

आरभेतैव कर्माणि श्रान्तः श्रान्तः पुनः पुनः।
कर्माण्यारभमाणं हि पुरुषं श्रीर्निषेवते।। इति च।

क्लेशः फलेन फलयोगेन नवतां नूतनफलयोगाकांक्षया नवां कर्मारम्भ-योग्यतां विधत्ते इति कालिदासीया सूक्तिर्मनस्विनां कर्मसातत्यफल-योगयोरविच्छिन्नं क्रमं दर्शयति। तेन स्वभावतस्ते कर्मभ्यो विरता कदापि न भवन्तीति वक्तुं शक्यते। त्रिपाठिवर्या अप्याजीवनं महोत्साहेन कर्मतत्परा अभूवन्। अतः सर्वदैव लक्ष्मीस्तं वासहेतोर्मार्गिति स्म।

उत्साहसम्पन्नमदीर्घसूत्रं क्रियाविधिज्ञं दृढसौहृदञ्च लक्ष्मीर्वासहेतोर्मार्गतीति शास्त्रसिद्धान्ते लक्ष्मीः फलयोगनियम इति वक्तुं शक्यते। यतो क्रियाविधिज्ञा मित्रसम्पत्सम्पन्नाः अदीर्घसूत्राः कार्यारम्भे अपरिहार्यं विलम्बमसहमानाः फलभागिनो भवन्तीत्ययं फलयोग एव लक्ष्म्या वासो वक्तुं शक्यते। एवं लक्ष्मीशब्दस्य वृद्धिवाचकत्वं शोभार्थकत्वञ्चोभयं सङ्गतं भवति। फलयोगेन हि कर्माणि शोभन्ते। वृद्धिरपि कर्मणां फलसम्पत्त्या भवतीति वर्तते रहस्यं कर्मविदाम्। क्रियाविधिज्ञं वासार्थं लक्ष्मीर्मार्गतीत्यपि तत्र उच्यते। एतस्य बलाधायकं व्युत्पत्तिवचनं 'लक्षयति पश्यति नीतिज्ञमिति लक्ष्मी'ति वक्तुं शक्यते। अमरकोशटीकाकर्तुर्वचनमिदं क्रियाविधिज्ञं नीतिज्ञशब्देन क्रोडीकरोति। यतो नयनान्नीतिरुच्यत इति कामन्दकवचने नयनात्फलप्रापणात् नीतिर्भवतीत्युच्यते। अतो लक्ष्मीर्नीतिज्ञं पश्यतीति कथनेन फलयोगसाधनवेत्तारं पश्यतीत्यर्थो विवक्षित इति वक्तुं युज्यते।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

त्रिपाठिवर्या यावज्जीवं **श्रिया दुरापः कथमीप्सितो भवेदि**त्युक्ति-निदर्शनभूता लक्ष्म्या वासस्थानान्यभूवन्, यतस्तेषां सङ्कल्पा विघ्नितप्रसरा अविघ्नितप्रसरा वा भवेयुः, प्रारम्भे मध्ये वा, किन्त्वन्ततः पूर्तिं गच्छन्ति स्म। अतस्ते सङ्कल्पेनैव फलजयिन आसन्निति कथनं नातिरेकं स्पृशति। कथनस्यास्यात्युक्तितामपाकर्तुं सत्स्वपि नैकेषु दृष्टान्तेषु कर्णपुरस्थ-वी.आई.सी. संस्थाया वैदेशिकैर्नियन्त्रिताया: कालक्रमेण प्राप्ताधोगतिकाया वाणिज्येन व्यवहरन्त्या अपि धनाभावग्रस्ताया ऋणभारमपाकृत्य समृद्ध्या योजनं निदर्शनरूपेण वक्तुं शक्यते। प्रयागस्थस्योच्चन्यायालयस्यादेशरूपमाशीः स्वीकृत्य त्रिपाठिवर्या वी.आई.सी. संस्थायाः प्रबन्धनिदेशका उपाध्यक्षाश्च जाताः।

अत्र संस्थायाः प्रबन्धनिदेशकरूपेण व्यवहरन्त इमे वणिज्यायां पाटव-प्रदर्शनेन पद्मपतिसिंहानियाप्रभृतिश्रेष्ठवार्ताजीविनोऽपि कर्णपुरस्थान् अनायासेन स्वानुगतिकानकार्षुः। **गुणैर्हि सर्वत्र पदं निधीयत** इति सूक्तिः त्रिपाठिवर्याणां सम्पूर्णं कार्यक्षेत्रं व्याप्नुवन्ती दृश्यते। गुणप्रकर्षाभावे राजधान्यां लक्ष्मणपुरे डिप्टी-कमिश्नर-पदे सार्धपञ्चवर्षाणि यावद् बहुजनसम्मोहनपूर्वकमवस्थानं न स्यात्। प्रशासनकौशलस्य सूक्ष्मेक्षिकायाः, बुद्धिचातुर्यस्य वर्तमानसमीक्षणपूर्वकं भाविनः कालस्याकलनक्षमतायाश्चायं प्रभाव आसीद् यत् मुख्यमन्त्रिणः डॉ. सम्पूर्णानन्दमहाशया **गुणाः पूजास्थानमिति** धियैतानाहूयोत्तरप्रदेश-लोकसेवायोगस्य सदस्यरूपेण नियोजितवन्तः। २४ अक्टूबर, १९५६ तः पञ्चवर्षाणि यावद् अत्रापि साफल्येन चयनकार्याणि कृत्वा भोगनियन्त्र-कादृष्टपारवश्येन लभ्यमानानि पदानि योग्येभ्यः प्रतियोगिभ्यो दातुं प्रयत्य इत एव कर्णपुरस्थां वी.आई.सी. संस्थां स्वास्तित्वं प्रत्यपि सन्दिहानाम् उज्जीवयितुं कर्णपुरं प्रति प्रस्थाय ३१ मई, १९६१ दिनाङ्के आत्मानं संस्थया समभान्त्सुस्त्रिपाठिवर्याः। इदं बन्धनमुत्साहेन कृतमासीदतः पञ्चदशमासात्मक एव काले सत्स्वपि बहुषु स्पर्धिषु संस्थानेषु स्वीयं पुरातनं यश आर्थिकं साम्राज्यं प्रभूततरं धनसञ्चयञ्च संस्थानं प्राप्तवत्।

न रत्नमन्विष्यति मृग्यते हि तदिति सूक्तिः किमप्येतादृशं सनातनं सत्यं विवृणोति यत् खलु विवेचकानां गुणगणलुब्धधियां स्वाभाविक्याः प्रवृत्तेः सूचकं वर्तते। अत एव वाराणसेयसंस्कृतविश्वविद्यालयस्य शैशवावस्थायामेव अपूर्णत्वेऽपि राहोर्ग्रासत्रासमनुभवतो दुरवस्थाभिर्भारतीयायाः संस्कृतेः संस्कृतसमाजस्य शास्त्राणाञ्च मूलोच्छेदाय कृतापसर्पाभिः खिद्यमानमानसौ

CC-0. Sampurnanand University Collection. Digitized by eGangotri

द्वावपि नेतारौ मुख्यमन्त्रिराज्यपालमहाभागौ त्रिपाठिवर्यान् विश्वविद्यालयस्यान्त:कलहप्रशमपूर्वकमुन्नतिपथे स्वच्छन्दगतिकतया स्थापयितुं प्रेषितवन्तौ। उभाभ्यां सर्वोच्चाभ्यां राजनेतृभ्यां वाराणसेयसंस्कृतविश्वविद्यालयस्य कुलपतिपदार्थं चयने तेषामद्भुतं कौशलमेवासीत् कारणम्।

स्वातन्त्र्यदिवसोत्तरं १६ अगस्त, १९६२ त: चतुर्वर्षाणि यावत् त्रिपाठिवर्या: कुलपतिपदमभूषयन्। अयं कालखण्ड: विश्वविद्यालयस्य कीर्तिचन्द्रिकामद्यापि विकिरन्निव लक्ष्यते स्मर्तृणां साक्षात्कर्तृणाञ्च मनसि। अस्मिन् कालखण्डेऽन्त:कलहाग्निरिन्धनाभावे स्वयमेवाशमत्। विश्वविद्यालयस्य सर्वविधोन्नत्यै बीजावापोऽस्मिन् कालखण्डे कृत:, कालिदासीयं पद्यमिमं स्मारयति—

शशाम वृष्ट्याऽपि विना दवाग्निरासीद्विशेषा फलपुष्पवृद्धि:।
ऊनं न सत्त्वेष्वधिको बबाधे तस्मिन् वने गोप्तरि गाहमाने।।

अस्तु, दिगन्तव्याप्ताभ्य: परोक्षाभ्यो यशोगाथाभ्योऽत्रैव विरम्य संस्कृताभ्युन्नतये विश्वविद्यालयस्य वास्तवस्वरूपाविष्काराय च कृतानि कार्याणि प्रस्तोतुं प्रक्रमे।

वाराणसेया अन्ये च विद्वांस: श्रौतपरम्परया श्रुतिं रक्षन्तोऽपि 'सारस्वतीसुषमे'त्यभिधया ख्यातां पत्रिकां प्रकाशयतो विश्वविद्यालयस्य गौरववर्धनाय नानाशास्त्रसम्बद्धानां रहस्यानां स्फोरकान् निबन्धानलेख्यया लेखभाषया विरचय्य ददति स्म। तेषाम् अपूर्वान्वेषणपरा ग्रन्था अपि प्रचिकाशिषिता अभूवन्, अत: प्रकाशनसौविध्याय विश्वविद्यालयानुदानायोगतो धनं प्राप्य मुद्रणालयस्य व्यवस्था तै: कृता।

विश्वविद्यालयस्य सारस्वतं वैभवं तितंसन्तस्ते भौतिकसारस्वतोभयविधकलेवरवृद्ध्यै अयतन्त। त्रिपाठिवर्याणामदम्यस्योत्साहस्याविच्छिन्नप्रयासस्यैव फलरूपेणाभिनव: **सरस्वतीभवनग्रन्थागारो** मूर्तरूपतामभजत्। यत्र छात्राणामध्ययनस्य कृते पृथक् प्रकोष्ठादिव्यवस्था: कृता वर्तन्ते।

ग्रन्थागारस्य नातिदूरे **शिवकुमारशास्त्रिच्छात्रावास**स्तेषामेव प्रयासेन निर्मितो वरीवर्ति। द्विशतसंख्याकच्छात्रान् सर्वसौविध्यपूर्वकं स्वान्तर्निधाय विदितवेदितव्येभ्य: शास्त्रनिधिभ्य आचारपूतेभ्यो गुरुभ्यो नियमपूर्वकं विद्याध्ययनार्थं प्रेरयदिदं भवनं संस्कृताध्येतृणां निर्धनच्छात्राणामल्पद्रव्यसाध्यां

CC-0. Sampurnanand University Collection. Digitized by eGangotri

पाकादिव्यवस्थामुद्दिश्य निर्मितमपि वाचनालयादियुक्त्या स्वस्याभिनवतां ख्यापयति।

विश्वविद्यालयस्य **मुख्यभवनम्** आङ्ग्लशासकैर्निर्मितं शिल्पनैपुण्यस्य कृतेऽतीवप्रसिद्धं विदुषां मनोऽभिरामम् एतादृशं स्थानमासीद् यत्र प्रविश्याध्यापनाय लब्धावसरा विद्वांसो आत्मनो धन्यतां मन्यन्ते स्म। किन्तु स्थानसङ्कीर्णतां तत्रानुभवद्भिस्त्रिपाठिवर्यैर्विश्वविद्यालयानुदानायोगसाहाय्येन नूतनं द्विभूमिकं भवनं स्नातकोत्तरकक्षाणां कृते विनिर्मातुं प्रयासो विहितः।

शिक्षाविदां विदुषां वासार्थं सर्वसौविध्ययुक्तं द्विभूमिकं भवनमेभिर्निर्मितं यच्चतुर्विंशतिसंख्याकान् शिक्षकानन्तर्वासयितुं समर्थं वर्तते। एताभिर्नूत्नाभि-र्निर्मितिभिस्तेषां विश्वविद्यालयसमुन्नतिचिन्तनपरं मानसं परिचेतुं शक्यते। विश्वविद्यालये कोषागारस्य बैंक-पदवाच्यस्य निर्माणमपि एषां सूक्ष्मेक्षिकां सूचयति।

इतो व्यतिरिक्तं किमप्यपूर्वं तैः कृतं यच्चिरस्थायि वर्तते। विश्वविद्यालये त्रयाणां नूतनानां विभागानां स्थापना तेषां शास्त्रसंरक्षणसंवर्द्धनदृष्टिं स्फोरयति। त्रिपाठिमहोदयानामुदयात् प्राग् आयुर्वेदस्तन्त्रागमाः प्राचीनराजशास्त्रार्थशास्त्रञ्च नासन्, स्वातन्त्र्येणाध्यापनीयतया गृहीताः।

कुलपतिरूपेण षाण्मासिके प्राथमिकावसर एव त्रिपाठिवर्यैः **आयुर्वेद-महाविद्यालयस्य** स्थापनार्थं सङ्कल्प्य विद्यापरिषत्कार्यपरिषदोः साम्मत्यमपि प्राप्तम्। एवं विशुद्धायुर्वेदस्यार्षज्ञानं सुरक्षितुं तेषां प्रयासः सफलतामगमत्। आयुर्वेदमहाविद्यालयस्य न केवलं स्थापनमभूत्, तदानीन्तना आयुर्वेद-परम्परायाम् आर्षसम्मानभाजो वाराणसेया भारतराष्ट्रपतिचिकित्सकाः **पण्डित-श्रीसत्यनारायणशास्त्रिवर्या** उपज्ञत्वेनाध्यक्ष्यमपि स्व्यकार्षुः।

एवमधुनातनमानवसमाजस्य आङ्ग्लचिकित्सापद्धत्या रोगापहारव्याजेन निगीर्णसर्वदेहसौख्यस्य जिजीविषोरपि मुमूर्षत उद्धाराय आयुर्वेदरक्षणपूर्वकं संस्कृतरक्षणद्वारा कश्चन नूतनः प्रयासोऽनुष्ठितस्तैः। एतस्य कृते नूतनं भवनमपि विश्वविद्यालयेन निर्मितम्।

प्राचीनभारतीयराजनीतेर्महत्त्वं प्रचारयितुं त्रिपाठिवर्यैः **प्राचीनराज-शास्त्रार्थशास्त्रविभागस्य** स्थापना कृता। पूर्वं गुरुकुलेषु भाविनां राज्ञां कृते राजनीतेरपि पाठनं भवति स्मेति श्रूयते। भगवन्तौ बलरामकृष्णौ गुरोः

CC-0. Sampurnanand University Collection. Digitized by eGangotri

सान्दीपनेः सकाशाद् षड्विधां राजनीतिमधीत्य मथुरामागतौ। अत्र च प्रमाणभूताविमौ श्लोकौ द्रष्टव्यौ—

तयोर्द्विजवरस्तुष्टः शुद्धभावानुवृत्तिभिः।
प्रोवाच वेदानखिलान् साङ्गोपनिषदो गुरुः।।
सरहस्यं धनुर्वेदं धर्मान्न्यायपथाँस्तथा।
तथा चान्वीक्षिकां विद्यां राजनीतिं च षड्विधाम्।।

(श्रीमद्भागवतम्-१०.४५.३३-३४)

मन्ये, विश्वविद्यालयस्य सर्वविद्याधिष्ठानतां ख्यापयितुमेतादृशाः प्रयासास्त्रिपाठिवर्याणां भवन्ति स्म, येन सर्वार्थकविश्वशब्दघटितं विश्वविद्यालय इति नाम सार्थकं भवेत्। धर्मार्थकाममोक्षेषु चतुर्षु पुरुषार्थेषु अर्थस्य सर्वविदितं महत्त्वमपि तत्प्राप्त्युपायवेदनेन दृढां काष्ठां गच्छेदितिधिया प्राचीनराजशास्त्रार्थ-शास्त्रविभागस्य प्रारम्भः पद्मभूषणोपाधिभूषितानां सर्वदर्शनकाननपञ्चाननानाम्—

तपो विद्या च विप्रस्य निःश्रेयसकरावुभौ।
तपसा किल्विषं हन्ति विद्ययाऽमृतमश्नुते।।

इति वचनस्य निदर्शनरूपेण साक्षात् तपोविद्यामूर्तीनां **पण्डित-राजश्रीराजेश्वरशास्त्रिद्रविडमहाशयानां** यशःख्यापकाध्यक्ष्येणाभूत्।

तन्त्रागमेषु प्रकीर्णानि उपासनारहस्यानि योगक्षेमसाधनानि च निरन्तराध्ययनाध्यापनाभ्यामाविष्कर्तुं तैश्च राष्ट्रं समुन्नीयाध्यात्मिकादिदुःखत्रयाद् विमोक्तुं सुखभरे स्थापयितुं तीव्रेच्छावद्भिस्त्रिपाठिवर्यैः **योगतन्त्रागमविभागो** विश्वविद्यालये स्थापितः। **महामहोपाध्यायगोपीनाथकविराजवर्या** विद्याव्यसनेन नूतनचिन्तनैश्च वैदेशिकानपि चमत्कुर्वन्त आत्मसाक्षात्कारेण प्राप्तमानवदेहलक्ष्या न केवलं शास्त्रत एव लब्धयोगतन्त्ररहस्याः, अपि तु गुरुभ्यः प्रातः-स्मरणीयेभ्यः परमयोगिवर्येभ्यः **श्रीविशुद्धानन्दस्वामिपादेभ्यः** नियोगप्राप्त्या साक्षात्कृतयोगतन्त्रागमरहस्या अप्यासन्। गार्हस्थ्यमनाकुलं वहन्तोऽपीमे आत्मानं साक्षात्कृतवन्त इत्यासीत् तेषां वैशिष्ट्यम्। एतादृशानां श्रोत्रियब्रह्मनिष्ठानां गुरूणां सान्निध्यादेतद्विभागीयाश्छात्रा अध्यापकाश्च नितरां प्रमोदं विद्याप्रकर्षञ्च अलभन्त।

महामहोपाध्यायगोपीनाथकविराजवर्यैः राजकीयसंस्कृतमहाविद्यालयस्य प्राचार्यपदं स्वीयसाधनायां बाधकं मत्वा त्यक्तमासीत्, तथापि पुनस्तान्

CC-0. Sampurnanand University Collection. Digitized by eGangotri

सम्प्रार्थनेनाध्यक्षपदमधिष्ठातुं प्रेरितवन्तस्त्रिपाठिवर्याः। एतानि विश्वविद्यालय-सम्बद्धानि संस्कृतस्य संस्कृतेश्च संरक्षणार्थं कृतानि तेषां कार्याणि अविस्मरणीयानि सन्ति। तैः संस्कृतविद्याया धर्मस्य च प्रचाराय विश्वविद्यालयस्थविदुषां सुदूरक्षेत्रेषु भाषणानि आयोजितानि, येन सामान्य-जनेष्वपि धर्मानुराग उदितः सन् वर्धेत, भारतीयसंस्कृतेः प्रचारेण च राष्ट्रे परस्परं सौहार्दं सौमनस्यञ्च दृढीकृते स्याताम्।

न केवलं विश्वविद्यालयस्यैव समुन्नत्यै एते प्रायतन्त, संस्कृत-विद्यालयानाम् अधोगतेरुद्धरणमपि एतैरेव कृतम्। संस्कृतविद्यालयान् भागत्रये विभज्य अतिन्यूनवेतनान् तान् इण्टरमीडिएट-विद्यालयैस्तुल्यं वेतन-सौविध्यमपि प्रयत्य प्रादायिषत तैः।

प्रसिद्धं तन्त्रसम्मेलनम्, यत्र राष्ट्रस्य प्रतिभागतो विद्वांस आगताः, एतैरेव कारितम्। वेदानां ज्ञाननिधिभूतानां रक्षणार्थं तैः वैदिकसम्मेलनमपि कतिधाऽऽयोजितम्। न केवलं विश्वविद्यालय एव राजभवनेऽपि लक्ष्मणपुरे महामहिम्नो राज्यपालमहोदयस्येच्छानुविधानार्थं संस्कृतसम्मेलनमायोजितं तैः। इदं सर्वं स्मारं स्मारं लेखनीव्यापाराद् विरमन्—

सृजति तावदशेषगुणाकरं पुरुषरत्नमलङ्करणं भुवः।
तदपि तत्क्षणभङ्गि करोति चेदहह कष्टमपण्डितता विधेः।।

इति स्मरन् त्रिपाठिमहाभागानां स्मृतिं नुत्या योजयन् भगवन्तं तेषां संस्कृतसेवायै पुनराविर्भावाय प्रार्थयन् विरमामि।

नरेन्द्रनाथपाण्डेयः

(प्रो. नरेन्द्रनाथपाण्डेयः)
निदेशकः
शिक्षण-शोध-प्रकाशन-संस्थानस्य
सम्पूर्णानन्द-संस्कृत-विश्वविद्यालये

वाराणस्याम्
गुरुपूर्णिमायाम्,
२०६८ तमे वैक्रमाब्दे

CC-0. Sampurnanand University Collection. Digitized by eGangotri

विषयानुक्रमणी

१. **आतङ्कवादोन्मूलने संस्कृतसाहित्यस्य भूमिका**
मिश्रोऽभिराजराजेन्द्रः १-१२

२. **अर्थविज्ञानम्**
प्रो. शारदा-चतुर्वेदी १३-२८

३. **भाषासु वेदानां प्रभावः**
डॉ. रामाशीषपाण्डेयः २९-४०

४. **तं तु औपनिषदं पुरुषं पृच्छामि**
गोस्वामी श्याममनोहरः ४१-४८

५. **यज्ञस्य महत्त्वं तद्विकासक्रमश्च**
डॉ. चूडामणित्रिवेदी 'वेदाचार्यः' ४९-५४

६. **महाभाष्ये वर्णिता विद्याविशेषाः**
आचार्य-वि. मुरलीधरशर्मा ५५-७०

७. **पाणिनीयोत्कर्षविमर्शः**
डॉ. हरिवंशकुमारपाण्डेयः ७१-७८

८. **विभिन्नदार्शनिकाभिमतशाब्दबोधविमर्शः**
डॉ. दिव्यचेतन(स्वरूप)ब्रह्मचारी ७९-९०

९. **स्फोटपदार्थः**
डॉ. सुधाकरमिश्रः ९१-९४

१०. **वेधपरम्परायां स्वस्त्ययनमन्त्रे च ज्योतिस्तत्त्वान्वेषणम्**
विद्यावाचस्पतिः डॉ. रामजीवनमिश्रः ९५-१०८

११. **श्रीमदाद्यशङ्कराचार्य्यभगवत्पादानां मठाम्नायव्यवस्थापनस्य दार्शनिकं व्यावहारिकं च रहस्यम्**
प्रो. विन्ध्येश्वरीप्रसादमिश्रो 'विनयः' १०९-११६

१२. **भगवद्गीतोक्तकर्मवादविशेषः कर्मयोगः**
डॉ. जया-मिश्रा ११७-१२२

१३. **ब्रह्मण आनन्दमयत्वविचारः**
डॉ. धनञ्जयकुमारपाण्डेयः १२३-१३०

CC-0. Sampurnanand University Collection. Digitized by eGangotri

१४. अर्थ एव प्रधान इति कौटिल्यः
डॉ. हेतराम-कछवाहः १३१-१४४

१५. राजविद्यायां कूटनीतिः
डॉ. दिनेशकुमारगर्गः १४५-१६४

१६. अध्वा समस्त एवायं श्रीशिवाभेदवृत्तिमान्
डॉ. कमलेश-झाः १६५-१७०

१७. तन्त्रदृष्ट्याऽज्ञानस्वरूपम्
श्रीशशिशेखरनाथपाण्डेयः १७१-१७८

१८. श्राद्धस्वरूपविमर्शः
डॉ. हिमांशुशेखरत्रिपाठी १७९-१८२

१९. साहित्यशास्त्रे चिदानन्दसमीक्षणम्
प्रो. छोटेलालत्रिपाठी १८३-२००

२०. महाकविबाणभट्टस्य सौन्दर्यदृष्टेः परिशीलनम्
डॉ. बालकृष्णशर्मा २०१-२१०

२१. मानवचित्तविकृतिं धर्षयितुं संस्कृतबौद्धजातक-साहित्यस्योपयोगित्वम्
डॉ.धर्मदत्तचतुर्वेदी २११-२२२

२२. साहित्यशास्त्रे ध्वनिविज्ञानम्
डॉ. शरच्चन्द्रद्विवेदी २२३-२३०

२३. रस-सिद्धान्तः
डॉ. वृजेशमणिपाण्डेयः २३१-२३८

२४. केशवमिश्रकृतालङ्कारशेखरसमीक्षणम्
डॉ. राजुकमारमिश्रः २३९-२४२

२५. पण्डितश्रीसुरतिनारायणमणित्रिपाठिवर्य्याणां वाग्वैभवम् २४३-२९६

लघु-ग्रन्थमाला

१. श्रीरामस्तवः १-८२
ले. 'पद्मश्री' पण्डितश्रीरघुनाथशर्मा
सं. प्रो. नरेन्द्रनाथपाण्डेयः

CC-0. Sampurnanand University Collection. Digitized by eGangotri

सारस्वती सुषमा
सम्पूर्णानन्दसंस्कृतविश्वविद्यालयानुसन्धानपत्रिका

६३ वर्षे	ज्येष्ठ-भाद्र.-मार्ग.-फा.पू., वि.सं. २०६५	१-४ अङ्काः

आतङ्कवादोन्मूलने संस्कृतसाहित्यस्य भूमिका

मिश्रोऽभिराजराजेन्द्रः
पूर्व-कुलपतिः
सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य
वाराणसी

❀❀❀

कोऽयमातङ्कवादः? किमस्य कारणम्? किमस्य समाधानम्? इत्यनेके प्रश्नाः साम्प्रतं समस्तमेव विश्वं भीषयन्तितराम्। इतः कतिपयदशकेभ्यः प्राक् श्रूयते स्म यदमेरिकादेशो निखिलभूतले आत्मप्रभुत्वं संस्थापयितुमातङ्कं प्रसारयति देशान्तरेषु। तत्क्रूरकर्मनिमित्तं तेन स्थापिताऽऽसीत् काचित्स्वतन्त्रा संस्थाऽपि यन्नामश्रवणमात्रेण जनाः कम्पन्ते स्म। परन्तु स एवाऽमेरिकादेशस्सम्प्रति स्वयमेवातङ्कवादेन संग्रस्तो दृश्यते। २००१ मितख्रिस्ताब्दस्य एकादशसेप्टेम्बर-दिवसेऽकस्मादेव यदाऽल्कायदाभिधाया आतङ्कवादसंस्थाया आत्मघातिभिर्वायुयान-चालकैः न्यूयार्कनगरे मैनहट्टनक्षेत्रस्थितस्य शताधिकभूमिकस्य वाणिज्य-भवनस्योपरितनभागो धराशायिकृतस्तदाऽमेरिकावासिनः स्वयमपि संस्तब्धाः किंकर्तव्यविमूढाश्च सञ्जाताः। अयमासीत् शठे समाचरितस्य शाठ्यस्य दृष्टान्तः। इदानीमपि अल्कायदासाध्वसवशान्न सुखं स्वपित्यमेरिका।

वस्तुत आतङ्को नाम केनचिन्निमित्तविशेषेण समुत्पादितं नृशंसं भयम्। यद् भयं परिस्थितिजन्यं नैसर्गिकं वा भवति तद् भवत्येव सह्यम्। यथा रोगव्याधिजनितं, भूकम्पमहाप्लावनजनितं, महामारीप्रभृतिसङ्क्रामकरोगजनितं, दुर्भिक्षादिजनितं वा भयं परिस्थितिजन्यं भवति। तद्भयं सर्वेऽपि जानपदा एकीभूय सधैर्यं सहन्त एव। परन्तु यद् भयं प्रसह्योत्पाद्यते, यच्च नृशंसतामूलं पापमूलं वा भवति तदसह्यं जायते। तादृशभयस्य निवारणार्थमेव प्रायेण जायते महापुरुषावतारो, भगवदवतारो वा। तदेव भयमातङ्क इत्युच्यते। तमेवातङ्कमुपलक्ष्य योगेश्वरकृष्णोऽभिधत्ते—

CC-0. Sampurnanand University Collection. Digitized by eGangotri

यदा यदा हि धर्मस्य ग्लानिर्भवति भारत ।
अभ्युत्थानमधर्मस्य तदाऽऽत्मानं सृजाम्यहम् ।।

परित्राणाय साधूनां विनाशाय च दुष्कृताम् ।
धर्मसंस्थापनार्थाय सम्भवामि युगे युगे ।।

विरुद्धधर्मयोः संश्लिष्टिरियं सृष्टिः। पापं-पुण्यम्, धर्मः-अधर्मः, सत्यम्-असत्यम्, परोपकारः-परपीडनम्, दानं-कार्पण्यम्, महत्त्वं-लघुत्वम्, शौर्यं-भीरुत्वम्, दिवसः-रात्रिः, उच्चता-नीचता, बुद्धिमत्ता-मूढता, सरलता-वक्रतेत्येवमादिरूपेण पदे पदे संसारेऽस्मिन् विरुद्धधर्मान्वितिर्दृश्यते। अनया दृशा तु सति निर्भयत्वे, सति समञ्जसत्वे आतङ्केन भाव्यमेव। अयमेव सृष्टेर्नियमो यत् शिवत्वाऽशिवत्वयोः, मङ्गलाऽमङ्गलयोः, सत्याऽनृतयोर्यात्रा सहैव प्रवर्तते। कदाचिच्छिवत्त्वं, लोकमङ्गलं, सत्यं वा प्रभवति, समाजनियामकं लोकप्रतिष्ठितं च जायते, कदाचित्पुनस्तद्विरुद्धधर्मः। इयमेव परिपाटी समस्तेऽपि विश्वेतिहासे समवलोक्यते। संस्कृतवाङ्मयं तावदस्यैतिह्यस्य साक्षिभूतम्।

ऋग्वेदमन्त्रेषु देवासुरसङ्ग्रामस्य बृहती चर्चा समवाप्यते। देवसेनानायको मघवा निरन्तरमेवाऽऽतङ्कवादिनां दानवानां विनाशाय बद्धपरिकरो दृश्यते। बल-नमुचि-बृङ्गद-वृत्र-अहि-रौहिण-पणिप्रभृतीनामसुराणां पुराणि मघवा विनाश्य पुरभित् पुरन्दरो वा जातः। सः शत्रूणां नवनवतिमितान् आयसान् दुर्गान् ध्वस्तानकरोत्। आङ्गिरसधेनुहारकान् पणीन्, वृष्टिरोधकं वृत्रञ्च वज्रप्रहारेणाऽच्छिनत्। एते सर्वेऽपि दानवा असुरा लोकोद्वेजकाः सन्तापका आतङ्कसमुत्पादकाश्चासन्। मरुद्गणैः सहकृतः वरुणाग्निसमन्वितः, दुर्धर्षवज्रायुधहस्तश्शचीपतिरिन्द्रस्तान् सर्वान् दानवान् रणशिरसि निपात्य त्रिलोकरक्षको जायते। गृत्समदादयः ऋषयः सोमसत्रेषु तमेवारातिविजयिनं शतक्रतुं गायन्ति—

यः पृथिवीं व्यथमानामदृंहद् यः पर्वतान् प्रकुपितानरम्णात् ।
यो अन्तरिक्षं विममे वरीयो यो द्यामस्तभ्नात्स जनास इन्द्रः ।।

यो हत्वाऽहिमरिणात्सप्तसिन्धून् यो गा उदाजदपधा बलस्य ।
यो अश्मनोरन्तरग्निं जजान संवृक्समत्सु स जनास इन्द्रः ।।

यः शम्बरं पर्वतेषु क्षियन्तं चत्वारिंश्यां शरद्यन्वविन्दत् ।
ओजायमानं यो अहिं जघान दानुं शयानं स जनास इन्द्रः ।।

(ऋग्वेदः, २.१२.२, ३, ११)

एतेषु मन्त्रेषु यत्रैकतो वज्रहस्तेन मघोना कृतस्य शत्रुविनाशस्य रुचिरं वर्णनमवाप्यते, तत्रैवाऽपरतो दानवैः प्रसारितस्यातङ्कस्यापि लोमहर्षकं विवरणं

CC-0. Sampurnanand University Collection. Digitized by eGangotri

दृश्यते। दानवानामत्याचारैः पृथिवी व्यथमानाऽऽसीत्। पर्वताः प्रकुपिता आसन्। अन्तरिक्षमपि सङ्कटापन्नं जातम्। सप्त सिन्धवोऽवरुद्धा आसन्नहिना। शम्बरेण च पर्वताः परिगता आसन्। एतत्सर्वमेवाऽऽसीदातङ्कस्यैव दृश्यम्। इन्द्रः सर्वान् आतङ्ककारिणो निहत्य लोके सामञ्जस्यं, सुखं, शान्तिं, सौराज्यं, सौमनस्यं च स्थापितवान्।

लोकमाङ्गल्यसंस्थापनार्थमेव स्थापिताऽभूत् शासनव्यवस्था। देवतेजोमयो राजा भवत्येव लोकसौराज्यसंस्थापकः। कविकुलगुरुः कालिदासोऽभिज्ञानशाकुन्तले राजानं प्रस्तौति—

नियमयसि विमार्गप्रस्थितानात्तदण्डः
प्रशमयसि विवादान् कल्पसे रक्षणाय।
अतनुषु विभवेषु ज्ञातयस्सन्तु नाम
त्वयि तु परिसमाप्तं बन्धुकृत्यं प्रजानाम्।।

अविश्रमोऽयं लोकतन्त्राधिकार इत्यपि कथयति तत्रैव कालिदासः। लोकतन्त्रस्य लोकप्रशासनस्याधिकारो भवत्येव विश्रामरहितः। कुतः? अस्यैव गूढसूत्रस्य विस्तृता व्याख्याऽवलोक्यते पद्ये। राजा किं करोति? आत्तदण्डः गृहीतदण्डो विमार्गप्रस्थितान् नियमयति। विमार्गेण श्रुतिस्मृतिविरुद्धेन मार्गेण ये प्रस्थितास्तान् नियन्त्रयति दण्डबलेन। यतो हि, परमार्थतस्तु दण्ड एव शास्ति प्रजाः, न राजा। राजा तु तस्या दण्डव्यवस्थायाः प्रतीकमात्रं भवति। मनुष्यस्सन् राजाऽपि क्वचित्कृपावशगो दण्ड्यमदण्डयेत्। परन्तु दण्डस्य न भवति हृदयं, यत् करुणं जायेत। दण्डस्य न भवति मनो, यत् सङ्कल्पविकल्पाभ्यां द्वैधमनुभवेत्। दण्डस्य कृते तु दण्ड्यो जनो दण्डनीय एव। राजा विवादानपि, दुर्मत्यारूढान् कलहानपि प्रशमयति, लोकरक्षणाय च कल्पते।

दुष्यन्तप्रसङ्गे प्रस्तुतमिदं कालिदासीयं पद्यं सम्यक्तया विवृणोत्यातङ्कवादम्। विमार्गप्रस्थिता जना एव आतङ्कवादिनः। यदा ते ग्रामे, समाजे, नगरे, जनपदे, राष्ट्रे, विश्वे वा प्रभवन्ति, तदाऽऽतङ्कवादो भैरवरूपतामुपयाति। कालिदासः प्रायेण स्वोपज्ञेषु सर्वेष्वेव काव्यनाट्यग्रन्थेषु एतादृशं लोकसामञ्जस्यविघातकमातङ्कसन्दर्भं ससमाधानं प्रस्तौति। शाकुन्तलस्य षष्ठेऽङ्केऽपि दुर्जयकालकेयाभिधा-नामातङ्कजनयितॄणां दानवानां चर्चा समवाप्यते, येषामुन्मूलनार्थं स्वयं दुष्यन्तोऽमरावतीं प्रतिष्ठते।

विक्रमोर्वशीयनाटकारम्भ एव केशिदानवकृत उर्वश्यपहरणप्रसङ्गः समवाप्यते। तत्रापि उर्वशीसखीनां क्रन्दनं श्रुत्वा नरपतिः पुरूरवा आतङ्कवादिनो दमयति, देवाङ्गनामुर्वशीं दानवहस्तान्मोचयति च। कुमारसम्भवकथानकेऽपि कविः

CC-0. Sampurnanand University Collection. Digitized by eGangotri

दानवराजस्य तारकस्यातङ्कमुपवर्ण्य, तन्निवारणार्थं कुमारस्य कार्त्तिकेयस्य सम्भवं प्रस्तौति।

वस्तुतोऽराजकत्वमेव भवत्यातङ्कमूलम्। यदि राज्ञो दण्डव्यवस्था साधीयसी न स्यात्, राजा स्वार्थसिद्धिलिप्तः स्यात्, मद्यपो दुश्चरित्रोऽनार्जवशीलो वा स्यात् तदैवाऽऽतङ्कः प्रभवति, प्रसरति च।

वाल्मीकिरामायणेऽयं सन्दर्भो महताऽभिनिवेशेन सूक्ष्मेक्षिकया च वर्णितो दृश्यते। रामे सभार्यानुजमरण्यमुपगतेऽयोध्याधिपतौ दशरथे दिवङ्गते च, मातामहनगरादयोध्यामुपावृत्तो भग्नहृदयो भरतो यदा राजपदं नाङ्गीकुरुते तदा कुलगुरुर्वशिष्ठस्तं प्रबोधयन् **अराजकस्य राष्ट्रस्य दुरवस्था**मवगमयति। इयं दुरवस्थाऽऽतङ्कवादस्यैवोपलक्षणं, नान्यत् किञ्चित्। यदा राष्ट्रे राजा न भवति, शासनव्यवस्था न भवति, दण्डभयं वा शिथिलं जायते, तदा सर्वतोग्रासी महादारुणः स्वैराचारस्समुद्भवति, येन मर्यादा नश्यन्ति, समाजः पङ्गुर्निर्गतिकश्च जायते। सर्वत्रापि **मत्स्यन्यायः** प्रभवति। इयं दुरवस्थैव समुच्यते तावदातङ्कः। पश्यन्तु,

नाराजके जनपदे विद्युन्माली महास्वनः ।
अभिवर्षति पर्जन्यो महीं दिव्येन वारिणा ।।

नाराजके जनपदे बीजमुष्टिः प्रकीर्यते ।
नाराजके पितुः पुत्रो भार्या वा वर्तते वशे ।।

अराजके धनं नास्ति नास्ति भार्याप्यराजके ।
इदमत्याहितं चान्यत्कुतः सत्यमराजके ।।

नाराजके जनपदे कारयन्ति सभां नराः ।
उद्यानानि च रम्याणि हृष्टाः पुण्यगृहाणि च ।।

नाराजके जनपदे यज्ञशीला द्विजातयः ।
सत्राण्यन्वासते दान्ता ब्राह्मणाः संशितव्रताः ।।

नाराजके जनपदे महायज्ञेषु यज्वनः ।
ब्राह्मणा वसुसम्पूर्णा विसृजन्त्याप्तदक्षिणाः ।।

नाराजके जनपदे प्रहृष्टनटनर्तकाः ।
उत्सवाश्च समाजाश्च वर्धन्ते राष्ट्रवर्धनाः ।।

नाराजके जनपदे सिद्धार्था व्यवहारिणः ।
कथाभिरभिरज्यन्ते कथाशीलैः कथाप्रियैः ।।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

नाराजके जनपदे तूद्यानानि समागताः ।
सायाह्ने क्रीडितुं यान्ति कुमार्यो हेमभूषिताः ।।

नाराजके जनपदे धनवन्तः सुरक्षिताः ।
शेरते विवृतद्वाराः कृषिगोरक्षजीविनः ।।

नाराजके जनपदे वाहनैः शीघ्रवाहिभिः।
नरा निर्यान्त्यरण्यानि नारीभिः सह कामिनः ।।

नाराजके जनपदे बद्धघण्टा विषाणिनः ।
अटन्ति राजमार्गेषु कुञ्जराः षष्टिहायनाः ।।

नाराजके जनपदे शरान् सन्ततमस्यताम् ।
श्रूयते तलनिर्घोष इष्वस्त्राणामुपासने ।।

नाराजके जनपदे वणिजो दूरगामिनः ।
गच्छन्ति क्षेममध्वानं बहुपण्यसमाचिताः ।।

नाराजके जनपदे चरत्येकचरो वशी ।
भावयन्नात्मनाऽऽत्मानं यत्र सायंगृहो मुनिः ।।

नाराजके जनपदे योगक्षेमः प्रवर्तते ।
न चाप्यराजके सेना शत्रून् विषहते युधि ।।

नाराजके जनपदे हृष्टैः परमवाजिभिः ।
नराः संयान्ति सहसा रथैश्च प्रतिमण्डिताः ।।

नाराजके जनपदे नराः शास्त्रविशारदाः ।
संवदन्तोपतिष्ठन्ते वनेषूपवनेषु च ।।

नाराजके जनपदे माल्यमोदकदक्षिणाः ।
देवताभ्यर्चनार्थाय कल्प्यन्ते नियतैर्जनैः ।।

नाराजके जनपदे चन्दनागुरुरूषिताः ।
राजपुत्रा विराजन्ते वसन्ते इव शालिनः ।।

यथा ह्यनुदका नद्यो यथा वाऽप्यतृणं वनम् ।
अगोपाला यथा गावस्तथा राष्ट्रमराजकम् ।।

नाराजके जनपदे स्वकं भवति कस्यचित् ।
मत्स्या इव जना नित्यं भक्षयन्ति परस्परम् ।।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

ये हि सम्भिन्नमर्यादा नास्तिकाश्छिन्नसंशयाः ।
तेऽपि भावाय कल्पन्ते राजदण्डनिपीडिताः ।।

यथा दृष्टिः शरीरस्य नित्यमेव प्रवर्तते ।
तथा नरेन्द्रो राष्ट्रस्य प्रभवः सत्यधर्मयोः ।।

राजा सत्यञ्च धर्मश्च, राजा कुलवतां कुलम् ।
राजा माता पिता चैव राजा हितकरो नृणाम् ।।

यमो वैश्रवणः शक्रो वरुणश्च महाबलः ।
विशिष्यन्ते नरेन्द्रेण वृत्तेन महता ततः ।।

अहो तम इवेदं स्यान्न प्रज्ञायेत किञ्चन ।
राजा चेन्न भवेल्लोके विभजन्साध्वसाधुनी ।।

(वा.रा. अयोध्या. सर्गः ६७)

वाल्मीकिरामायणस्य रचना वर्तमानमन्वन्तरस्य चतुर्विंशतितमत्रेता-द्वापरयुगयोः सन्धिकाले निर्व्यूढा[1]। कालगणनादृष्ट्याऽसौ कालः इतः अष्टपञ्चाशदुत्तरसप्तशताधिकषट्पञ्चाशत्सहस्राधिकपञ्चचत्वारिंशल्लक्षाधिकैककोटि-वर्षेभ्यः प्राक् स्थितो (१४५५६७५८ वर्षम्) ज्ञायते–

त्रेतायुगे चतुर्विंशे रावणस्तपसः क्षयात् ।
रामं दाशरथिं प्राप्य सगणः क्षयमेयिवान् ।। (वायु. ७०.४८)

चतुर्विंशे युगे वत्सः त्रेतायां रघुवंशजः ।
रामो नाम भविष्यामि चतुर्व्यूहस्सनातनः ।।

(ब्रह्माण्ड. २.३.३६.३०)

सन्धौ तु समनुप्राप्ते त्रेताया द्वापरस्य च ।
रामो दाशरथिर्भूत्वा भविष्यामि जगत्पतिः ।।

(महा. शान्ति. ३४८.१९)

अहो नु, महदाश्चर्यम्, यत् तादृक्प्राचीनकालेऽपि समाजे, लोके, राष्ट्रे, भूतले चासीदेवाऽऽतङ्कवादः। अत एव, स्वीकरणीयमिदं तथ्यं यत् सृष्टिधर्मत्वात् सर्वेऽपि भावा नित्याश्चिरन्तना एव। यथा सुखं नित्यं तथैव दुःखमपि नित्यम्। यथा सौराज्यं नित्यं तथैवाऽराजकताऽपि नित्या। अत एव संसारे विरुद्धधर्मयोः संघर्षस्सनातनः शाश्वतः प्रतीयते।

१. सम्प्रति वैवस्वतमन्वन्तरस्य अष्टाविंशतितमकलियुगस्य प्रथमचरणं प्रवर्तते यस्मिन् केवलं ५११२ वर्षाणि व्यतीतानि सन्ति।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

यतोऽभ्युदयनिःश्रेयससिद्धिः स धर्मः। धर्मो धारयते प्रजा इति कृत्वा प्रारम्भत एव भूपतिभिः ऋषिभिर्मुनिभिः क्रान्तदर्शिभिः कविभिः धर्मो रक्षितः, अधर्मश्च निन्दितः, परित्यक्तोऽसमर्थितश्च। एवं कृतेऽपि, कदाचिद्धर्मस्य प्रतिष्ठा जायते स्म, कदाचिदधर्मस्यापि। यदा मान्धातृनहुषययातिपृथुरामनलयुधिष्ठिरादयो राजानस्सञ्जातास्तदा धर्मस्य वृद्धिर्जाता। परन्तु हिरण्यकशिपुरावणकंसजरासन्धादिषु प्रतपत्सु नग्नताण्डवमासीदधर्मस्यैव, अनाचारस्यैव। यथा चोपवर्णितं महाकविना माघेन रावणादिप्रवर्तितमातङ्कवादमभिलक्ष्य—

पुराणि दुर्गाणि निशातमायुधं बलानि शूराणि घनाश्च कञ्चुकाः।
स्वरूपशोभैकगुणानि नाकिनां गणैस्तमाशङ्क्य तदादि चक्रिरे ।।

पुरीमवस्कन्द लुनीहि नन्दनं मुषाण रत्नानि हरामराङ्गनाः ।
विगृह्य चक्रे नमुचिद्विषा वशी य इत्थमस्वास्थ्यमहर्दिवं दिवः ।।

तपेन वर्षाः शरदा हिमागमो वसन्तलक्ष्म्या शिशिरः समेत्य च ।
प्रसूनक्लृप्तं ददतः सदर्तवः पुरेऽस्य वास्तव्यकुटुम्बितां ययुः ।।

बलावलेपादधुनापि पूर्ववत्प्रबाध्यते तेन जगज्जिगीषुणा ।
सतीव योषित्प्रकृतिः सुनिश्चला पुमांसमन्वेति भवान्तरेष्वपि ।।

तदेनमुल्लङ्घितशासनं विधेर्विधेहि कीनाशनिकेतनातिथिम् ।
शुभेतराचारविपक्त्रिमापदो विपादनीया हि सतामसाधवः ।।

(शिशुपाल. प्रथमसर्गः)

रामायणतः, कालिदासरचनाभ्यः, शिंशुपालवधाद् वा यावन्त्युदाहरणानि मया समुद्धृतानि, तेषु आतङ्कवादस्य स्वरूपमतिस्पष्टतया प्रदत्तम्। महाकविमाघ-दृष्ट्याऽऽतङ्कोऽस्ति **विधिशासनोल्लङ्घनम्।** श्रुतिस्मृतिधर्मशास्त्रसम्मतसमुदाचार-स्यातिक्रमणमेव जनयत्यातङ्कम्। यथोपरिनिर्दिष्टेषु पद्येषु हिरण्यकशिपुरावण-शिशुपालदुष्कर्मणां माध्यमेन सङ्केतितम्।

कविकुलगुरुः कालिदासोऽपि **विमार्गप्रस्थानम्** (नियमयसि विमार्गप्रस्थितानात्तदण्ड इति) एवाऽऽतङ्कं मनुते।

रामायणकारः प्राचेतसो वाल्मीकिस्तु सविस्तरं वर्णयति आतङ्कवादम्। वाल्मीकिदृष्ट्या **सम्भिन्नमर्यादत्वमेव भवत्यातङ्को** यस्मिन् प्रभवति मात्स्यन्यायः। मर्यादाप्रतिष्ठापकः, मर्यादापालकः, मर्यादारक्षको वा केवलं शास्ता, यो हि दण्डबलेन सर्वमिदं लीलया सम्पादयति। परन्तु यदा शासनमेव अन्धबधिरपङ्गुवदशक्तं जायते तदा स्फारीभवत्यातङ्कः।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

मर्यादारक्षामहिम्नैव राजा देवानपि इन्द्रादीनतिशेते—

यमो वैश्रवणः शक्रो वरुणश्च महाबलः ।
विशिष्यन्ते नरेन्द्रेण वृत्तेन महता ततः ।।

परन्तु यदि शासनं स्वयमेव निर्मर्यादं स्यात्तर्हि का कथा सौराज्यस्य? एभिर्दृष्टान्तैर्व्याख्यानैश्च सर्वं दर्पणप्रतिबिम्बवत् सुस्पष्टं जायते। आतङ्कस्य भूमिका पृष्ठभूमिर्वा का, स्वरूपं किम्, परिणामाः के? इति महता खलु विस्तरेण विशदयति रामायणकारः। वाल्मीकिरिदमपि निगदति यदातङ्के प्रभवति न केवलं राष्ट्रमरक्षितं जायते, प्रत्युत सर्वाः संस्कृतयः, सर्वाः ललितकलाः, सर्वेऽपि लोकसमुदाचाराः सहसा विनश्यन्त्येव।

अराजकस्थितौ आतङ्कवादे च न किमप्यन्तरम्। यतो हि उभयोर्वातावरणयोः कारणमेकमेव—**दण्डव्यवस्थाया अपक्षयः, शैथिल्यं** वा। दण्डभयादेव कुमार्गे प्रवृत्तिर्न भवति लोकानाम्। सन्मार्गानुसरणादेव च संवर्धन्ते धर्मः सदाचारो जनानुरागश्च। रामायणे याऽराजकस्थितिर्वर्णिता साऽद्यापि चरितार्थोपलक्ष्यते। तस्यां स्थितौ आध्यात्मिकाधिदैविकस्तरेण योऽपक्षयो जायते, कामं स विश्वसनीयो न स्यात्; परन्तु आधिभौतिकदृष्ट्याऽपि च समाजे यत्संस्खलनं जायते, तत्सर्वथा युक्तियुक्तं प्रतीयते। अराजकस्थितौ नराः सभां, रम्योद्यानानि, पुण्यगृहाणि च न कारयन्ति। यज्ञयागादिकाः समाप्तिमुपयान्ति। नृत्याभिनयोत्सवाः क्षीयन्ते। हेमभूषिताः कुमार्यः सन्ध्याकाले क्रीडितुमुद्यानानि न जातु गच्छन्ति। धनवन्तस्सुरक्षिता न भवन्ति। कृषिगोरक्षजीविनो जना विवृतद्वारा न सुखं शेरते। कामिनो नागरजना नारीभिस्सार्धम् अरण्यं नोपगच्छन्ति मनोविनोदार्थम्। दूरगामिनो वणिजः क्षेममध्वानं न गच्छन्ति। एकचरो वशी मुनिरपि न सुरक्षितोऽराजकस्थितौ। शास्त्रविशारदानां पण्डितानां संवादोऽपि क्षयमुपैति। एवं हि, सर्वत्रापि समाजेऽराजके **मात्स्यन्यायो** विवर्धते।

अयमस्ति रामायणवर्णिताया अराजकस्थितेः सारांशः। प्रायेणाऽऽतङ्कवादे समुज्जृम्भमाणेऽपि इयमेव स्थितिर्जायते। आतङ्कवादग्रस्तेषु राज्येष्वद्यापि तत्रस्थनागरिकग्रामीणानां जीवनं न सुरक्षितम्। एकाकिन्या रमण्याः क्वचिदपि गमनं न तावत् सुरक्षितम्। व्यापारिणो व्यवसायिनः सर्वथाऽसुरक्षिताः। यत्र कुत्रापि **नक्सलवादस्य** हिंस्रप्रभावस्तत्रैव पर्याकुलं संलक्ष्यते जनजीवनम्। निगूढविस्फोटैर्निर्दोषाः पौरा हन्यन्ते। **'फिरौती**काण्डानां' प्राचुर्यं दृश्यते। लक्षाधिपानां व्यवसायिनां दुग्धमुखा दारका मध्येमार्गमपह्रियन्ते, लक्षमितानि रूप्यकाणि चाहृत्य निर्यात्यन्ते। अतथाभूते घात्यन्ते चापि। आतङ्कवादधर्षिते जनपदे क्व कलानुष्ठानं, क्व साहित्यसङ्गमः, क्व वा समाजोत्सवः? हन्त, तीर्थानि,

CC-0. Sampurnanand University Collection. Digitized by eGangotri

मन्दिराणि, छविगृहाणि चापि न सन्ति विस्फोटमुक्तानि। नक्तन्दिवम् एतादृश्यो घटना घटन्ते एव। यथोक्तम्मया स्वोपज्ञविस्मयलहर्याम्—

न्यायो हि मात्स्यो ग्रसते समाजं यथा शशं सोऽजगरो विषोग्रः ।
प्रशासनं पङ्गु विलोक्यतेऽद्धा दृष्ट्वेति मे विस्मयमेति चित्तम् ।।

उत्कोचदानैः परितोष्य सम्यक् न्यायालयं न्यायपतिं विधिज्ञम् ।
भ्रमन्ति मुक्ता वधिकाः समाजे दृष्ट्वेति मे विस्मयमेति चित्तम् ।।

सीमामतिक्रम्य गृहे प्रविष्टा अनर्थजातं विदधत्यनल्पम् ।
अरातयो हन्त, वयञ्च मूका दृष्ट्वेति मे विस्मयमेति चित्तम् ।।

किमत्र नो सैन्यबलं यथेष्टं चिकर्तिषा वा रिपुमस्तकानाम् ।
क्लैव्यं कुतः किङ्कृतमार्जवं वा दृष्ट्वेति मे विस्मयमेति चित्तम् ।।

दुःखार्दितायां ननु मातृभूमौ धिग्जीवनं हन्त तदात्मजानाम् ।
राष्ट्रे विपन्ने कुशलं नु केषां दृष्ट्वेति मे विस्मयमेति चित्तम् ।।

अस्माकं मित्रवर्या डॉ. रमाकान्तशुक्ला अपि आतङ्कजनितां तां दुरवस्थां प्रकारान्तरेण वर्णयन्ति—

पश्यामि यदा कुटिलैः क्लृप्तां मूढैश्च कृतां विघटनसरणिम् ।
विलपामि तदा खिन्ना-खिन्ना चिन्ताकुलभारतजनताऽहम् ।।

देशे निरागसां संहारं लुण्ठनं सताञ्च वधूदाहान् ।
श्रावं-श्रावं दर्शं-दर्शं व्यथमाना भारतजनताऽहम् ।। (भारतजनताऽहम्)

रामादिवद् वर्तितव्यं न रावणादिवदिति काव्यरचनोद्देश्यं निश्चिन्वताऽऽचार्यमम्मटेनैव संस्कृतरचनाधर्मितायाः सञ्जीवनरसायनं प्रस्तुतम्। वेदेषु पुराणेषु इतिहासेषु काव्यनाट्यकथाचम्पूगीतादिविलसितेष्वभिजातसंस्कृतसाहित्येषु सर्वत्रापि सत्यशिवसुन्दरतत्त्वानां प्रतिष्ठापनं दृश्यते। एकतस्तावद् हिरण्यकशिपुहिरण्याक्षतारकान्धकहयग्रीवरावणकुम्भकर्णकंसशिशुपालादीनां लोकशोककराणि वृत्तानि पाठकानां चित्तमुद्वेजयन्ति; परन्त्वपरतस्समायाति तद्विध्वंसदक्षानां नृसिंहवराहकार्तिकेयशिवविष्णुरामकृष्णादीनां स्फटिकोज्ज्वलं चरितं यदनुशीलनमात्रेण हरिचन्दनाश्च्योतनसुखमिव जायते। एते हि नायकाः खलनायकोत्थापितमातङ्कं विध्वंस्य भूयोऽपि लोकं निरातङ्कं विदधति, धर्मं चाभिनवसरण्या संस्थापयन्ति।

परन्तु कथं जायते विनाश आतङ्कस्य? आतङ्कवादस्य किं वा समाधानम्? अयं प्रश्न आतङ्कवादादपि महत्तरः प्रतिभाति। प्राचीनभारते कथं

CC-0. Sampurnanand University Collection. Digitized by eGangotri

निरासोऽजायतातङ्कस्य? इदानीं वा कथमातङ्कोऽयं लघूकर्तुं समूलमुन्मूलयितुं वा शक्यते? अत्रापि संस्कृतसाहित्यमेव शरणम्। कारणनाशादृते कार्यनाशः कथमपि न सम्भवति। यावदग्नेरेकाऽपि कणिकाऽवशिष्टा तावद्दाहस्य सम्भावनाऽक्षता तिष्ठत्येव।

अत एवाऽऽतङ्कवादिनां विनाश एवाऽऽतङ्कस्यापि विनाशोपायः। हिरण्यकशिपौ हिरण्याक्षे रावणे कंसे हयग्रीवे मृते सति तन्निमित्तक आतङ्कस्स्वयमेव परिसमाप्तः। यतो हि छिन्ने मूले नैव शाखा न पत्रम्। तदेवेदानीं शासनेन न क्रियते। **अत एव निरातङ्कस्तिष्ठत्यातङ्कवादः।** यावद् भारते श्रुतिस्मृतिपुराणादि-सम्मता दण्डव्यवस्था न प्रयोक्ष्यते तावदातङ्कवादस्य विसर्जनं न सम्भवति। साक्षादपराधलिप्ता अपि, नृशंसकर्मसंलग्ना अपि सम्मुखयुद्धे निगृहीताः न्यायालयं नीयन्ते न्यायार्थम्। हन्त, कीदृशमिदं मौढ्यम्। कथं न तत्क्षणमेव निहन्यन्ते? काऽपेक्षा वादस्थापनस्य, वादनिर्णयस्य वा? अफजलगुरोर्वादे निर्णीते सत्यपि कथमसौ मरणाद्वार्यते? धिगेतादृशं क्लीबं शासनं यन्नृशंसापराधिनमपि यत्नेन रक्षति! ईदृशं शक्तिहीनं, द्वैधग्रस्तं, निर्वीर्यशासनमेव पल्लवयत्यातङ्कम्। **शासनस्य क्रोधे तु मृत्योर्निवास इति कथयति मनुस्मृतिकारः—**

यस्य प्रसादे पद्मा श्रीर्विजयश्च पराक्रमे ।
मृत्युश्च वसति क्रोधे सर्वतेजोमयो हि सः ।।

सौराज्यमूलं धर्मः। धर्ममूलं दण्डः। दण्डस्य च कारको भवति शास्ता भूपतिः शासनं वा (लोकतन्त्रात्मकम्)। दण्ड एव प्रभवति लोकशासने लोकानुशासने च—

तस्यार्थे सर्वभूतानां गोप्तारं धर्ममात्मजम् ।
ब्रह्मतेजोमयं दण्डमसृजत्पूर्वमीश्वरः ।।
तस्य सर्वाणि भूतानि स्थावराणि चराणि च ।
भयाद् भोगाय कल्पन्ते स्वधर्मान्न चलन्ति च ।।

(मनु. ७.१४,१५)

मनुस्मृतेः सप्तमेऽध्याये **राजधर्मनिरूपणाख्ये** दण्डव्यवस्थाया विस्तृतविवेचनमवाप्यते। मन्ये, तत्सर्वमिदानीं यथावत् समाजे प्रयोजनीयं न प्रतिभाति। तथापि तस्या दण्डव्यवस्थाया उपादेयोंऽशोऽधुनापि ग्रहीतुं शक्यते। विलक्षणमिदं विवरणं यस्यानुपालनं कौटिल्ययुगेऽपि यथायथं समजायत। अन्ते च मनुः स्पष्टं भाषते—

CC-0. Sampurnanand University Collection. Digitized by eGangotri

अनुबन्धं परिज्ञाय देशकालौ च तत्त्वतः ।
सारापराधौ चालोक्य दण्डं दण्ड्येषु पातयेत् ।।
अदण्ड्यान् दण्डयन् राजा दण्ड्यांश्चैवाप्यदण्डयन् ।
अयशो महदाप्नोति नरकं चैव गच्छति ।। (मनु. ८.१२६,२८)

प्राचीनभारतीयदण्डव्यवस्थायामपराधानुसारेण शारीरा दण्डा निश्चिता आसन्। नासाकर्तनं, हस्तकर्तनम्, पादकर्तनम्, कर्णयोश्छेद इत्येवमासन् शारीरा दण्डाः। एभिर्दण्डैर्दण्डिता अपराधिनः प्राणैरपि न वियोज्यन्ते स्म, अपरतश्च स्वापराधं स्मारयन्तस्ते मध्येसमाजं धिक्कृतं जीवनं जीवन्ति स्म। तदासीदन्येषां कृते महद्भयकारणम् ।

परन्तु तत्सर्वमिदानीं स्मरणविषयतामुपगतम्। इदानीं तु नृशंसापराधिनोऽपि आजीवनकारावासेनदण्डिताः सन्तः **कारागारे सुखं जीवन्ति।** किन्नु कष्टं तेषाम्? सायं प्रातः स्वादु भोजनम्! स्वास्थ्यचिन्ताऽपि शासनेन क्रियत एव। कुटुम्बिनः समये-समये द्रष्टुमागच्छन्त्येव, कारागारेऽपि स्वजनसमूहो वर्तत एव। हन्त, शासनस्य समाजस्य वा कृते दण्डभोक्तारस्ते। आत्मदृष्ट्या तु परमसुखिन एव।

आजीवनकारावासदण्डोऽपि प्रशस्ताचरणव्याजेन लघूक्रियते। परन्तु कतिपयवर्षाणि यावद् येषां कारावासदण्डस्ते द्विगुणितोत्साहेन, नृशंसतरसङ्कल्पैश्च सार्धं बहिरायान्ति मनोऽभिलषितमातङ्कवादं प्रवर्तयितुम् । दण्डस्तु शरीरेण भुक्तः। तेन किम्? मनस्तु सर्वथाऽदण्डितमेव तिष्ठति तेषाम्। यावन्मनो न संस्क्रियते, परिवर्त्यते, तावत्क्व नृशंसाचरणान् मुक्तिः? विमानापहारिणं यमपराधिनं भारतशासनं मुक्तमकरोत्, किम्मनस्तस्य भारतं प्रति कृतज्ञं जातम्? किमसावेव भूयोऽप्यातङ्ककर्मणि संलग्नो न जातः? चिन्त्यमिदम्। वस्तुतो दण्डस्य लक्ष्यं भवति दण्डितस्य मनश्शौचम्—

यथा यथा मनोऽधर्मं स्वयं कृत्वाऽनुभाषते ।
तथा तथा त्वचेवाहिस्तेनाऽधर्मेण मुच्यते ।।
यथा यथा मनस्तस्य दुष्कृतं कर्म गर्हति ।
तथा तथा शरीरं तत् तेनाऽधर्मेण मुच्यते ।।
कृत्वा पापं हि सन्तप्य तस्मात्पापात्प्रमुच्यते ।
नैवं कुर्यां पुनरिति निवृत्त्या पूयते तु सः ।।
(मनु. ११.२२८,२९,३०)

CC-0. Sampurnanand University Collection. Digitized by eGangotri

परन्तु क्वाऽऽतङ्ककर्मनिरतानामीदृशी बुद्धिः? निसर्गत एव ते राक्षसाः। तामसी बुद्धिस्तेषाम्। न तस्याः परिमार्जनं सम्भवति। तेषामात्यन्तिकविनाश एव परिमार्जनं तेषाम्। यथोक्तं गीतायाम्—

यया स्वप्नं भयं शोकं विषादं मदमेव च।
न विमुञ्चति दुर्मेधाः धृतिस्सा पार्थ तामसी।।
अधर्मं धर्ममिति या मन्यते तमसाऽऽवृता।
सर्वार्थान् विपरीतांश्च बुद्धिः सा पार्थ तामसी।।

(गीता, अ. १८)

अद्भुतमिदं मनोविज्ञानमातङ्कवादिनाम्! आतङ्कवादिनस्ते कामं **नक्सलवादिनः** स्युः, **पृथग्वादिनो** वा। **खालिस्तान**याचकाः स्यु**र्गोरखालैण्ड**-पक्षधरा वा। **लिट्टे**समर्थकाः स्युः **स्वतन्त्रकाश्मीर**स्वप्नदर्शिनो वा। सर्व एवेमे तामसबुद्धयः। सर्वेऽप्यधर्ममेव धर्मं मन्यन्ते। आत्मचिन्तितमेव श्रेयस्करं तेषां कृते। आत्मदृष्टिरेव श्लाघीयसी।

स्वामी विवेकानन्दो **व्यावहारिकवेदान्तेन** (Practical Vedanta) आतङ्कवादस्य प्रशमनं मेने। कोऽयं व्यावहारिकवेदान्तः? समुच्यते। वेदान्तः प्रतिपादयति—ब्रह्म सत्यं जगन्मिथ्या जीवो ब्रह्मैव नाऽपरः। यथा वा गीतायां कृष्णेनोक्तम्—**ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठतीति**।

स्वामिवर्यः कथयति यद् हिन्दवः खैस्तास्तुरुष्काः सर्वेऽपि स्वाभिमतामुपासनापद्धतिं पालयन्तोऽपि चेत् सत्यमिदमङ्गीकुर्युर्यदेक एवेश्वरोऽस्माकं समेषां हृदयेषु प्रतिष्ठितस्तर्हि कः कं किमर्थं वा हन्यात्? तुरुष्क एव हिन्दुं द्वेष्टि। हिन्दुरेव तुरुष्कं द्वेष्टि। कुतः? यतो हि एकस्य हृदये **ईश्वरो**ऽपरस्य हृदये**ऽल्लाह**स्तृतीयस्य चापि हृदये **गॉडनामा** कश्चिन्निवसति। परन्तु यदीश्वराल्लाह-गॉडसंज्ञानां परमेश्वराणामैक्यं सर्वैः स्वीक्रियेत तर्हि सकलोऽपि संसार एकाराध्यः एकधर्मः एकजातिश्च जायते। एवंभूते सति क्व स्थास्यत्यातङ्कः?

तेरापन्थजैनसम्प्रदायस्य नवम आचार्यस्तुलसी **अनेकान्तदर्शन**-मेवाऽऽतङ्कवादसमाधानं मन्यते स्म। स्वप्रस्तावमसौ प्रधानमन्त्रिनेहरूसमक्षमपि स्थापितवान्। वस्तुनः सत्यस्य परिस्थितेर्वा भवन्त्यनेकेऽन्ताः पक्षा वा। यदा जनो वस्तुतः कमप्येकमेव पक्षं पश्यति, तमेव चान्तिमं मत्वाऽऽत्मसात्कुरुते. तदैव. जायते तद्विरोधो वस्तुपक्षान्तरविद्भिः सह। अनेन निर्बन्धेनैव समुद्भवत्यातङ्कः। तत्सर्वं संस्कृतसाहित्यानुशीलनेनैव ज्ञातुं शक्यते।

●

CC-0. Sampurnanand University Collection. Digitized by eGangotri

अर्थविज्ञानम्

प्रो. शारदा चतुर्वेदी
अध्यक्षा, भाषाविज्ञान-विभागस्य
सम्पूर्णानन्दसंस्कृतविश्वविद्यालये
वाराणस्याम्

❋ ❋ ❋

विकासोऽर्थस्य तद्भेदाः परिवृत्तेश्च हेतवः।
एकानेकार्थसंज्ञानम् अर्थविज्ञानमिष्यते॥

भाषा किल शब्दसमूहरूपा। तत्र शब्दाश्च वर्णसमूहरूपा वर्णरूपा वा। एतैश्च शब्दैस्सह अर्थस्य सम्बन्धो नितरां प्रगाढः। तथा चोक्तं कालिदासेन तुलसीदासेन च क्रमशः—

वागर्थाविव सम्पृक्तौ वागर्थप्रतिपत्तये।
जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ॥ (रघुवंशः, १.१)

'गिरा अर्थ जल वीचि सम कहियत भिन्न अभिन्न'।

यास्ककृते निरुक्तग्रन्थेऽपि शब्दानाम् अर्थस्य महत्त्वं वर्णितम्। तद्यथा—

यदगृहीतमविज्ञातं निगदेनैव शब्द्यते।
अनग्नाविव शुष्केन्धो न तज्ज्वलति कर्हिचित्॥
(निरुक्तः, १.१८)

यथा अर्थज्ञानं विना कृतं शब्दमात्रग्रहणं निष्फलं यथा शुष्काण्यपि इन्धनानि अग्निं विना न ज्वलन्ति, तथैव सम्यग् अभ्यस्तान्यपि वाक्यानि लोकव्यवहारप्रवृत्तये असमर्थानि। अस्मिन्नेव विषये निरुक्ते अन्योऽपि श्लोकः पठ्यते—

स्थाणुरयं भारहारः किलाभूदधीत्य वेदं न विजानाति योऽर्थम्।
योऽर्थज्ञ इत् सकलं भद्रमश्नुते नाकमेति ज्ञानविधूतपाप्मा॥
(निरुक्तः, १.१८)

CC-0. Sampurnanand University Collection. Digitized by eGangotri

भाषाया बहून् शब्दान् अन्यस्यापि अर्थज्ञानाभावे तेषां शब्दानां वास्तविकं किमपि प्रयोजनं नैव सिद्ध्यते। शब्दाः किल अर्थज्ञानसाधनभूताः शब्दः भाषायाः शरीरम्, अर्थश्च तस्या आत्मा। वेदादिशब्दानां अर्थान् यः जानाति सैव कल्याणं प्राप्नोति। सैव अध्ययनस्य सम्पूर्णं फलम् अश्नुते। वाक्यपदीये भर्तृहरिविरचिते कः शब्दार्थः? इति प्रश्ने अयं श्लोकः पठ्यते—

यस्मिंस्तूच्चरिते शब्दे यदा योऽर्थः प्रतीयते।
तमाहुरर्थं तस्यैव नान्यदर्थस्य लक्षणम्॥

(वाक्यपदीयम्, २.३३०)

येन शब्देन उच्चारितेन यो यः अर्थः प्रतीयते सैव तस्य शब्दस्य अर्थः। नातो भिन्नं किमपि अर्थलक्षणम्। लोकव्यवहारेण व्याकरणं विना च तच्छब्दैः प्रतीयमानास्ते ते अर्थाः तत्तच्छब्दार्थतया ज्ञायन्ते व्यवह्रियन्ते च। शब्दद्वारा अर्थज्ञानन्नाम। सूक्ष्मबुद्धिनिष्पाद्यं वा कर्म। तस्मादेव पशुपक्ष्यादीनां शब्दशक्तिग्रहो यथा मानवानां तथा न भवति।

पाश्चात्यभाषावैज्ञानिकैः अर्थतत्त्वसम्बन्धे कृतानि कार्याणि बहुविध-नामभिः व्याहृतानि। तद्यथा—

प्रो. पोस्ट-गेटः अर्थविचारसम्बन्धिकार्याणि रिहमेटोलॉजि इति नाम्ना गृह्णाति। ब्रीलनामा विद्वांस्तु सेमेन्टिक-(Sementic) नाम्ना अन्यस्तु सेमसोलॉजि-नाम्ना गृह्णाति। शब्दार्थविज्ञानम्, अर्थविज्ञानम्, अर्थविचार इवादि-नामभिः सोऽयं विषयो वर्णितोऽस्ति इदानीमर्थविज्ञानम्, अर्थविचार इति च नामद्वयं लोके अतीवप्रसिद्धमस्ति।

अर्थविज्ञानस्य इतिहासः

पुराकालादेव भारतवर्षे शब्दः कः? अर्थश्च कः? इत्यस्मिन् विषये गभीरा विषयाः प्रस्तुता अभूवन्। तथा च गोपथब्राह्मणे 'रूपसामान्यादर्थसामान्यं नेदीयः'। रूपशब्दो शब्दपरः। तस्माद् रूपाद् अर्थो ज्यायान् इति तदर्थः। शतपथब्राह्मणे च 'वाग्वै मनसो ह्रसीयसी' इत्युक्त्या वाण्यपेक्षया मनश्शब्दलक्षितस्य अर्थस्य श्रेष्ठतमत्त्वं प्रतिपादितम्।

महर्षियास्ककृतनिरुक्तेऽपि शब्दनिर्वचनप्रसङ्गे अर्थविषयको विचारः विहितः। तथा च तत्रोक्तम्—'अथानन्वितेऽर्थेऽप्रादेशिके विकारेऽर्थो नित्यः परीक्ष्यते केनचिद् वृत्तिसामान्येन' इति।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

संस्कृतवाङ्मये व्याकरणन्यायसाहित्यादिग्रन्थेषु शब्दार्थयोः सम्बन्धे अतीवसूक्ष्मतया विचारितम्। आधुनिकयुगे पाश्चात्त्योपज्ञः तुलनात्मकः वैज्ञानिकः दृष्टिकोणः यथा प्रवर्तते तथा संस्कृतवाङ्मये नैव प्रवर्तितः। भाषावैज्ञानिकदृष्ट्या ईसवीये ऊनविंशशतके माइकेल-ब्रिल-महोदय एव इदं प्रथमतया अर्थविज्ञानविषये उल्लेखनीयं कार्यम् अकरोत्। टकर-रिचर्ड्स-बालपॉल-हेमन्तकुमारसरकार-डॉ. हरदेवबाहरी-विजनविहारीभट्टाचार्य-कपिलदेवद्विवेदि-प्रभृतयः भारतीयाः पाश्चात्त्याश्च विद्वांसः अर्थविज्ञानविषये महान्ति कार्याणि अकार्षुः।

अर्थविज्ञानविषयः

शब्दार्थयोः अभेदसम्बन्ध इति बोध्यबोधकभावसम्बन्धश्चेति उच्यते। बोध्यः अर्थः बोधकः शब्दः। शब्दे अर्थबोधिका शक्तिर्भवति। श्रुतश्शब्दः सपदि स्वसम्बन्धिनमर्थं समुपस्थापयति। व्याकरणमपि सार्थान् शब्दानेव साधयितुमीहते। तस्मादेव पाणिनिसूत्रे वार्त्तिककारः कात्यायनः सिद्धे शब्दार्थ-सम्बन्धे इति वार्त्तिकं लिखति। तस्य अयमर्थः—'शब्दशास्त्रस्य (व्याकरणस्य) प्रवृत्तिः शब्दस्य अर्थस्य शब्दार्थयोः सम्बन्धस्य च सिद्धौ सत्यामेव भवति। शब्दार्थयोः अभेदस्तादात्म्यं वा सम्बन्ध इत्यपि प्रवादः अस्ति। अयं सम्बन्धः कथं कुत्र वा भवति? इति प्रश्ने एवमुच्यते गौः इत्ययमाह, अनुकरणस्थले शब्दोऽपि अर्थरूपेण परिणमति। एवञ्च शब्दार्थयोः अभेदसम्बन्धो भवति।

पाणिनीयव्याकरणे वार्त्तिककारेण कात्यायनेन शब्दार्थयोः सम्बन्धविषये 'सिद्धे शब्दार्थसम्बन्धे' इत्यभिहितम्। अत्र सिद्धशब्दः नित्यपर्यायः, शब्दोऽपि नित्य इति पूर्वोक्तवार्त्तिकस्य आशयः। शब्दस्य नित्यत्वं न ध्वनिरूपस्य शब्दस्य अपि तु स्फोटात्मकस्य। तेन नित्येन स्फोटरूपेण शब्देन अभिधीयमानः अर्थोऽपि नित्य एव भवितुमर्हति। इत्थं सति शब्दार्थ-सम्बन्धस्यापि नित्यता अवर्जनीयतया आपतति। एवञ्च शब्दार्थयोः, तत्सम्बन्धस्य च नित्यता सिद्धा।

अर्थविज्ञानस्य महत्त्वं

भाषाविज्ञाने मुख्यतया ध्वनिविज्ञानं पदविज्ञानं वाक्यविज्ञानमर्थ-विज्ञानञ्चेति चत्वारः स्कन्धाः, तत्र वर्णपदवाक्यानां विज्ञानम् अर्थविज्ञानं विना व्यर्थमिव। तस्माद् वर्णादीनिति त्रीणि विज्ञानानि शरीरस्थानीयानि अर्थविज्ञानन्तु आत्मस्थानीयम्। आत्मरहितं शरीरं यथा निरर्थकं भवति तथैव अर्थरहितमपि वर्णादिकं शब्दजातम्।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

वर्णपदवाक्यविषये अध्ययनानन्तरम् अर्थविषये अध्ययनं नितरां शोभते। यथा शरीरज्ञानानन्तरम् आत्मज्ञानमपेक्षितं भवति तथैव अत्रापि बोद्धव्यम्।

अर्थविज्ञाने अन्तर्गता विषयाः

अर्थविज्ञाने संकेतग्रहः, अर्थविकासः, अर्थविकासस्य भेदाः, अर्थविकासकारणानि, अर्थपरिवर्तनकारणानि, अर्थसङ्कोचः तत् कारणानि, अनेकार्थकशब्दानाम् अर्थविशेषनिर्णये हेतवः, एवमेव अर्थसम्बद्धा अन्ये च विषयाः समापतन्ति।

अर्थविज्ञानमिति नामकरणविषये किञ्चित्

फ्रांसदेशस्य मिशेल-ब्रेआल-नामा कश्चन विद्वान् अर्थविज्ञानस्य कृते 'सीमेन्टिक्स' इति नाम अकरोत्। अस्य शब्दस्य हिन्दीभाषायाम् अर्थविचारः, शब्दार्थविचारः, शब्दार्थविज्ञानमित्यादिशब्दैः अनुवादः क्रियते स्म। इदानीम् अर्थविज्ञानमित्येव नाम सर्वप्रियं प्रचलितं चास्ति। आङ्ग्लभाषायामपि पुरा सीमेन्टिक्स इत्यस्यार्थे र्‌हेमेटालॉजि (Rhemetology), सीमेसिआलॉजि (Semasiology), र्‌हेमेटिक्स (Rhematics), सिमेटोलॉजि (Sematology) इत्यादयः बहवः शब्दाः प्रयुज्यन्ते स्म। इदानीं तु 'सीमेन्टिक्स' इति शब्दस्यैव प्रयोगोऽवशिष्टः।

को नाम अर्थः?

आर्यैः आचार्यैः वैदेशिकैश्च विद्वद्भिः शब्दतः प्रतीयमानस्य अर्थस्य बहूनि बहुविधानि लक्षणानि कृतानि। वाक्यपदीयकृता भर्तृहरिणा अर्थस्य अष्टादशलक्षणानि कृतानि। ऑग्डेन-महोदयः, आई.ए. रिचर्ड्समहोदयश्च 'मीनिंग ऑफ मीनिंग'-पुस्तके अर्थस्य षोडशलक्षणानि अलिखताम्। भर्तृहरिश्च—

'यस्मिंस्तूच्चरिते शब्दे यथा योऽर्थः प्रतीयते।
तमाहुरर्थं तस्यैव नान्यदर्थस्य लक्षणम्'॥

यस्मिन् शब्दे उच्चरिते यस्मिन् काले यः किल अर्थः प्रतीयते स एव तदा तस्य शब्दस्य अर्थो भवति। अन्यथा प्रकरणादिभेदाद् वृत्तिभेदाद् वा तस्मादेव शब्दाद् अर्थान्तरस्य प्रतीतिरपि भवितुमर्हति। यथा—अश्व-लवण-रूपार्थद्वयवाचकस्य सैन्धवशब्दस्य प्रकरणभेदात् तत्तदर्थवाचकता भवति।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

अर्थविषयकम् अध्ययनं कदा प्रभृति कुत्र कुत्र प्रारब्धम्

स्वतन्त्रविषयरूपे अर्थविज्ञानस्य अध्ययनम् अतीवपश्चात् प्रारब्धम्। ईसवीये एकोनविंशतिशतके एव आधुनिक-भाषाविज्ञानस्य प्रारम्भः अभूत्। प्रारम्भे ध्वनि-पदवाक्यानामेव विज्ञानानि भाषाविज्ञानतया अधीयन्ते स्म। तदात्वे अर्थविज्ञानं दर्शनशास्त्रविषयोऽयम् इति मत्वा भाषावैज्ञानिकैः विषयोऽयं परित्यक्तः आसीत्। गच्छता कालेन विषयोऽयं सादरं भाषावैज्ञानिकैः अपि स्वीकृतः।

भारतीयैस्तु विद्वद्भिः ऋग्वेदकालादारभ्य अर्थविज्ञानविषये अध्ययनं प्रारब्धम्। वेदेषु इन्द्र-वृत्र-वृत्रहन्-नद्यादि-शब्दानां निरुक्तिर्मिलति। ऋग्वेदे अर्थस्य महत्त्वं वर्णितमस्ति। उपलब्धेषु ग्रन्थेषु विश्ववाङ्मये यास्काचार्यकृतं निरुक्तमेव अर्थविज्ञानस्य सर्वप्रथमो ग्रन्थः अस्ति। यास्ककालः ईसापूर्वं पञ्चमशतकमिति ऐतिहासिकाः वर्णयन्ति। अस्मिन् ग्रन्थे निर्वचनस्य नियमाः मन्त्राणामर्थकरणविधिः, अर्थानां महत्त्वं प्रकरणादिवशात् अर्थभेद इत्यादयः विषयाः सम्यग्विवेचिताः। भारतीयेषु ग्रन्थेषु पतञ्जलिकृतं महाभाष्यं भर्तृहरिकृतं वाक्यपदीयम् अर्थविज्ञानाय नितरामुपयोगिनौ ग्रन्थौ। नैतावदेव गौतम-कणाद-जैमिनि-प्रभृतीनां दर्शनेषु यत्र तत्र शब्दशक्ति-शब्दार्थक-ज्ञान-स्वतःप्रामाण्य-परतःप्रामाण्यादिविषयेषु अत्यन्तं गभीरम् आधुनिक-भाषावैज्ञानिकानामपि मनोमोहकं चिन्तनं प्रस्तुतमभूत्।

शब्दात् प्रतीयमानस्य अर्थस्य महत्त्वम्

संस्कृतव्याकरणे सार्थकानामेव शब्दानां शास्त्रविषयता दर्शिता। निरर्थकानां शब्दानां व्याकरणे प्रवेश एव न भवति। तथा च सूत्रम् 'अर्थवत् अधातुः अप्रत्ययः प्रातिपदिकम्' इति। अत्र सूत्रे अर्थवत् एव शब्दस्य प्रातिपदिकसंज्ञा विहिता। अनर्थकात् शब्दात् स्वादयः विभक्तयः नोत्पद्यन्ते। महर्षिः यास्कस्तु अर्थस्य महत्त्वं विशदतया प्रत्यपादयत्। तथा च यास्कः निरुक्ते—'अर्थं वाचः पुष्पफलमाह' वाण्याः पुष्पं फलञ्च अर्थ एव। यथा पुष्पफलाभ्यां विहीनः वृक्षः व्यर्थ एव भवति तथैव अर्थहीना वाणी निरर्थिका एव। अन्यत्र अयमेव आचार्यः अर्थनित्यः परीक्षेत् इत्याह। अयमाशयः आचार्यस्य—शब्दानां परीक्षायां=निर्वचने अर्थनित्यः=अयं शब्दः अर्थवान् अस्तीति निश्चित्य शब्दस्य निर्वचनं क्रियात्। एतेन सार्थकशब्दानामेव निर्वचनं कर्त्तव्यमिति स्पष्टं भवति। अर्थज्ञानं महते श्रेयसे भवति इति दृढं प्रत्यपादयत् अयमाचार्योऽन्यत्र, तथा च—

CC-0. Sampurnanand University Collection. Digitized by eGangotri

स्थाणुरयं भारहारः किलाभूदधीत्य वेदं न विजानाति योऽर्थम्।
योऽर्थज्ञ इत् सकलं भद्रमश्नुते नाकमेति ज्ञानविधूतपाप्मा।। इति।

एवञ्च—सकलमपि शब्दशास्त्रं अर्थज्ञानायैव इति सिद्ध्यति। एतेन भाषाविज्ञानेऽपि अर्थविज्ञानं महतीं प्रतिष्ठां लभते इति आयाति।

अर्थस्य ज्ञानं कथम्?

कस्माच्चन शब्दात् कश्चिदेवार्थः प्रतीयते न तु सर्वेभ्यः एव शब्देभ्यः सर्वे अर्थाः प्रतीयन्ते। अत्र किं कारणम्? इति जिज्ञासायां शब्दविशेषे अर्थ-विशेषस्य बोधिका काचन शक्तिर्भवति। तामेव शब्दशक्तिं ब्रूमः। सार्थके एकैकस्मिन् शब्दे केषाञ्चन अर्थानां कयोश्चन अर्थयोः कस्यचन अर्थस्य वा बोधिका काचन विशिष्टा शक्तिर्भवति। तया शक्त्या विशिष्टं तं शब्दं श्रुत्वा गृहीतशब्दशक्तिकः जनः तच्छब्दसम्बन्धिनम् अर्थम् अवगच्छति। संस्कृत-भाषायां निबद्धेषु दर्शनग्रन्थेषु ज्ञानानां (प्रमाणानां) तपसाधनानाञ्च (प्रमाणानां) चातुर्विध्यमुक्तं तानि ज्ञानसाधनानि च प्रत्यक्षानुमानोपमानशब्दभेदात् चत्वारि। एतैः साधनैः साध्यमानानि ज्ञानानि अपि प्रत्यक्षानुमिति-उपमिति-शाब्दबोध-भेदात् चत्वारः। अयमेव शाब्दबोधात् शब्दाज्जायमानो ज्ञानविशेषः।

शब्दस्य अर्थेन सह सम्बन्धः कथं ज्ञायत इति प्रश्ने 'शब्दशक्ति-प्रकाशिका' इति ग्रन्थे आचार्यजगदीशः श्लोकमेकमपठत्, तथा च—

शक्तिग्रहं व्याकरणोपमान-कोशाप्तवाक्याद् व्यवहारतश्च।
वाक्यस्य शेषाद् विवृतेर्वदन्ति सान्निध्यतः सिद्धपदस्य वृद्धाः।।

व्याकरणम्, उपमानं, कोशः, आप्तवाक्यं, व्यवहारः, वाक्यशेषः (प्रकरणम्), विवृतिः, प्रसिद्धपदसन्निधिः इत्येतानि अष्टौ शब्दशक्तिग्रहणे साधनानि।

व्याकरणम्

व्याकरणं प्रकृतिप्रत्यययोः अर्थबोधनेन शब्दार्थज्ञाने अत्यन्तमुपकारं करोति। यथा कर्त्ता इति शब्दस्य अर्थज्ञानाय प्रवृत्तं व्याकरणं कृ इति धातोः करणम् अर्थः। डुकृञ् करणे इति धातुपाठात्। ततः परं विद्यमानस्य तृच्-प्रत्ययस्य कर्त्तार्थः। एवञ्च करणक्रियायाः सम्पादक इति कर्त्ता इति पदं स्यात्। एवमेव पठति, पठिष्यति, अपठत् इत्यादिषु धातोरेकत्वेऽपि प्रत्ययानां भेदात् कालभेदः प्रतीयते। एतत्सर्वं व्याकरणादेवावगम्यते। एवमेव 'वासुदेव'शब्दात्

CC-0. Sampurnanand University Collection. Digitized by eGangotri

योऽयं वसुदेवपुत्ररूपः अर्थः प्रतीयते, अपत्यार्थकतद्धितप्रत्ययविमर्शेन व्याकरणादेव अवगम्यते।

उपमानम्

उपमानं सादृश्यम्। यथा—कोऽपि जनः गवयशब्दस्य अर्थं न जानाति। गोशब्दस्य अर्थं तु जानाति। अस्य बोधाय गोसदृशः गवयः इति उपदिशति। एवम् उपमानमपि अर्थबोधकं भवति।

कोशः

कोशग्रन्थेभ्यः शब्दानामर्थज्ञानाय महत् साहाय्यं भवति। तद् यथा एकस्य इन्द्रशब्दस्य अर्थः ज्ञातः विडौजा, पाकशासन-मघवा इत्यादि शब्दानामर्थाः अज्ञाताः। यदा कोशे इन्द्रशब्देन सह मघवादीनां शब्दानामपि पर्यायत्वेन कोशे सङ्ग्रहं पश्यति तदा एषामपि शब्दानाम् इन्द्रशब्दार्थ एव वाच्यः इति बोधो भवति। एवञ्च शब्दनिष्ठार्थबोधनशक्तिग्रहणे कोशस्य उपकारकत्वमुक्तम्।

आप्तवाक्यम्

आप्तवाक्यं शब्दशक्तिग्रहे हेतुर्भवति, आप्तो नाम यथार्थवक्तृत्वेन अभिमतः कोऽपि जनः। वेदादिशास्त्राणि मुखः पित्रादयश्च आप्ता इत्युच्यन्ते, एषामेव वाक्याद् बालः बहूनां शब्दानामर्थबोधिकां शक्तिं गृह्णाति। अलौकिकानाम् अदृश्यानां पुण्यपापादीनां शब्दानां शक्तिग्रहणमपि आप्तवाक्यादेव।

व्यवहारः

व्यवहारो नाम समाजे स्थितानां पित्रादीनां पारस्परिकः शब्दप्रयोगः। शब्दार्थज्ञानमभिलषन् कश्चन बालः क्वचन उपविष्टः तत्र आगत्य जनान् तान् तान् शब्दान् प्रयुञ्जन्तः तान् तान् अर्थान् गृह्णन्तश्च पौनःपुन्येन पश्यति। तेन च लोकव्यवहारेण बालः क्रमशः तेषां तेषां शब्दानां तत्र तत्र अर्थे शक्तिं गृह्णाति। संस्कृतवाङ्मये सोऽयं व्यवहारः शक्तिग्राहकशिरोमणिरित्युच्यते।

वाक्यशेषः

वाक्यशेषः प्रकरणमित्यपि उच्यते। नानार्थकशब्देषु अर्थविशेषनिर्णयाय प्रकरणमिदम् अत्यन्तमुपयुज्यते। एकस्मात् शब्दात् यत्र बहवः अर्थाः प्रतीयन्ते तत्र सर्वेषाम् अर्थानां वाक्ये अन्वयः असम्भवः। तस्मात् वाक्ये प्रयुक्तानां

CC-0. Sampurnanand University Collection. Digitized by eGangotri

तदतिरिक्तानां शब्दानाम् अर्थे सहसम्पर्कमिच्छन् एव कश्चनार्थः गृह्यते नान्यः। यथा रसशब्दः परमात्मानं काव्यरसान् शृङ्गारादीन्, मधुरादींश्च अर्थान् अभिधत्ते। प्रकरणानुरोधेनैव एतेषु अर्थेषु अन्यतमो ग्राह्यः। सरसं भोजनमित्यत्र भोजने विद्यमानस्य रसस्य मधुरादिरूपता एव भवतीति तत्र रसशब्दो मधुरादिपरक एव। एवं सरसं काव्यम् इत्यत्र तु रसशब्दः शृङ्गारादिपर एवेति स्पष्टम्। एवं सर्वत्र ज्ञेयम्।

विवृतिः

विवृतिरिति विवरणं व्याख्यानं वा। एतेन विवरणेनापि शब्दशक्तिर्गृहीता। पारिभाषिकशब्देषु विशेषतः विवरणमपेक्षितम्। तत्र तेनैव शब्दशक्तेरग्राह्यत्वात्।

प्रसिद्धपदसन्निधिः

ज्ञातार्थानां पदानां समीपे विद्यमानानि अज्ञातार्थानि पदानि ज्ञातार्थ-पदसान्निध्यवशात् गृहीतार्थानि भवन्ति। यथा 'सुधासिक्तं भवनम्' इत्यत्र प्रसिद्धार्थक-भवनशब्दसन्निधानेन धातुरागविशेषं 'चूना' इति पदवाच्यं कञ्चनार्थं सुधाशब्दः उपस्थापयति। 'सुधापायिनो देवाः' इत्यत्र सुधाशब्दः प्रसिद्धार्थक-देवशब्दसान्निध्यात् पीयूषरूपमर्थं ब्रूते।

एवं व्याकरणादीनि अष्टौ शब्दशक्तिग्राहकानि तत्त्वानि संस्कृतनिबद्ध-ग्रन्थानुसारेण लिखितानि।

अत्र पाश्चात्त्यमतम्

पाश्चात्त्या विद्वांसस्तु शक्तिग्रहणसाधनत्वेन त्रीणि एव तत्त्वानि व्याख्यातवन्तः। तानि चेहोपन्यस्यन्ते—

१. व्यवहारः (Demonstration)

पाश्चात्त्यानां विचारेण व्यवहारो नाम किमपि वस्तु बोधयितुं बोद्धव्यं जनं प्रतिबोधविषयस्य वस्तुनः पुनः पुनः दर्शनम् अथवा तं प्रति इङ्गितकरणं व्यवहारो नाम। एवम् उक्तविधेन व्यवहारेण लेखनी, पुस्तकम्, उत्तरपुस्तिका, गौः, मनुष्यः आदिशब्दानाम् अर्थबोधः जायते।

२. विवरणम् (Cercumlocution)

विवरणेन पाश्चात्त्यमतानुसारेण शब्दानामर्थं बोधयितुं शक्यते। विवरणेन समुद्र-पर्वत-वन-दुर्ग-प्रभृतीनां शब्दानाम् अर्थाः ज्ञातुं शक्यन्ते। अत्र विवरणं

CC-0. Sampurnanand University Collection. Digitized by eGangotri

नाम कस्यापि पदस्य अर्थबोधनाय तत्र पदबोध्यार्थस्य स्वरूपगुणादिविषये विशेषतया परिचयप्रदानम्।

३. अनुवादः (Translation)

पाश्चात्यानां मते अनुवादोऽपि कस्यापि शब्दस्य अर्थबोधाय कारणं भवति। अत्र अनुवादो नाम अज्ञातार्थस्य शब्दस्य तदर्थकेन तद्भाषीयेन भाषान्तरीयेण वा शब्देन अर्थबोधनम्। यथा संस्कृतभाषायाः विडौजाशब्दस्य अर्थमजानन्तम्प्रति तस्य शब्दस्य अर्थबोधनाय तत्पर्यायस्य सुगमार्थस्य इन्द्रशब्दस्य प्रयोगः। अयमनुवादः समानभाषीयः। भाषान्तरीयानुवादस्तु यत्र बोद्धव्यो जनः अनेकभाषाभिज्ञो भवति तत्रैव। यथा हिन्दी-आङ्ग्ल-भाषाभिज्ञं प्रति 'पुस्तक लाओ' इति उक्ते तस्य च अर्थबोधाभावे पुस्तकशब्दार्थम् अयं न जानाति इति जानन् बोधयिता पुस्तकशब्दस्य पर्यायशब्दं भिन्नभाषीयं बुक (Book) इति प्रयुङ्क्ते। अयमेव भाषान्तरीयानुवादः। एवम् अनुवादद्वारा शक्तिग्रहो भवतीति सर्वैरपि अभ्युपगन्तव्यम्।

सङ्केतग्रहस्य बाधकानि तत्त्वानि

अधोलिखितानां तत्त्वानां सद्भावे अस्याप्यर्थस्य सङ्केतग्रहो बाध्यते—

१. साम्याभावः

वक्तुः श्रोतुश्च मध्ये यदि साम्यं न भवेत् तदा सङ्केतग्रहो न भवति। सोऽयं साम्याभावः हेतुभेदात् त्रैविध्यं लभते—

(क) **भाषासाम्याभावः**—वक्तृश्रोतारौ परस्परम् अन्योन्यौ भाषानभिज्ञौ यदि भवतः तर्हि भाषिकसाम्याभावात् सङ्केतग्रहः (अर्थबोधो न भवति)। यथा—जापान्यादिभाषावता सह हिन्द्यादिभाषावतः जनस्य पारस्परिकः अर्थबोधो न भवति।

(ख) **बुद्धिशक्तिसाम्याभावः**—यदि वक्तृ-श्रोतारौ समानशक्तिक-बुद्धिमतौ न भवेतां तर्हि तयोः पारस्परिकः संलापः परस्परोक्त-पद-वाक्यार्थ-ज्ञानाय नालम्। यथा—अत्यल्पशिक्षिताधिकशिक्षितयोर्मध्ये समानः नैवार्थबोधः।

(ग) **अन्यतरस्य सहृदयत्वाभावः**—वक्तृश्रोत्रोर्मध्ये यदि कश्चन सहृदयतम इतरस्य असहृदयतमः स्यात् तदापि तयोः संलापो नार्थबोधकः।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

२. भिन्नार्थप्रतीतिः

अनेकार्थस्य शब्दस्य संवदतोर्मध्ये एकतरः भिन्नमर्थं प्रत्याययितुं किञ्चन पदं वाक्यं वा प्रयुङ्क्ते चेत् तत्र अर्थबोधः दुष्करः, यथा संस्कृतस्य वर्णीशब्दः वर्णवति, ब्रह्मचारिणि च वर्तते। तस्यास्य शब्दस्य यदि वक्ता वर्णवति प्रयोगाभिप्रायेण प्रयोगं करोति, श्रोता तु ब्रह्मचारिणि प्रयोगाभिप्रायेण गृह्णाति चेत् तत्र नार्थबोधः। एवमेव श्रोत्रियशालीनादिशब्देष्वपि बोध्यम्।

३. सङ्केतविस्मृतिः

पूर्वं गृहीतोऽपि सङ्केतः कालदैर्घ्यादिना यदि विस्मृतो भवति तर्हि विस्मृतसङ्केतेन पदेन नैवार्थबोधः। यथा लोकेऽप्रसिद्धाः आपोद्धारपरिदेवनान्वय-व्यतिरेकादिशब्दाः शैघ्र्येण विस्मृतसङ्केतार्थाः भवन्ति। तेभ्यः यथायथमर्थबोधो न भवति।

४. सङ्केतग्रहस्य दार्ढ्याभावः

कदाचित् कृतः सङ्केतग्रहः पौनःपुन्येन आवृत्त्यभावात् शैथिल्यं प्राप्तः विस्मृतप्रायो भवति। एवञ्च पूर्वं गृहीतशक्तिकोऽपि शब्दः स्वार्थमुपस्थापयितुं समर्थो न भवति।

सांख्यकारिकायाम् ईश्वरकृष्णेन प्रत्यक्षज्ञानबाधकतया अष्टौ हेतवः एकया कारिकया व्याख्याताः। ते च सङ्केतग्रहस्यापि बाधकाः भवितुमर्हन्तीति तेऽपीह प्रदर्श्यन्ते। तथा च तत्र कारिका—

अतिदूरात् सामीप्याद् इन्द्रियघातान्मनोऽनवस्थानात्।
सौक्ष्म्याद् व्यवधानादभिभवात् समानाभिहाराच्च।।७।।

५. अतिदूरता

वक्तृश्रोत्रोर्मध्ये यदि अत्यन्तं दूरता भवति तर्हि प्रोक्तशब्दस्य ग्रहणाभावाद् अर्थबोधो न भवति।

६. अतिसमीपता

अत्यन्तं समीपतः यदि कश्चन कश्चन किमपि ब्रूते तत्र सम्यक् शब्दग्रहणाभावात् अर्थबोधाभावः सर्वानुभूतः।

७. इन्द्रियाघातः

केनापि कारणेन मन्दशक्तिकम् अशक्तिकञ्च ज्ञानेन्द्रियं कर्णरूपं यदि भवेत् तदा शब्दग्रहणाभावात् नार्थबोध इत्यत्रापि न कस्यापि विमतिः।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

८. मनसोऽवधानता

इन्द्रियाणां शक्तिमत्त्वेऽपि मनसोऽनवधाने सति कर्णाभ्यां शब्दग्रहणं न भवति। सावहितमनःसंयुक्तेन्द्रियाणामेव तत्तद्विषयप्रत्यक्षे हेतुत्वात्।

९. अतिसूक्ष्मता

वक्तुर्ध्वनेरतिसूक्ष्मत्वेऽपि शब्दग्रहणाभावात् नार्थबोधः।

१०. व्यवधानम्

वक्तुः श्रोतुश्च मध्ये भित्त्यादेः अवरोधस्य सद्भावेऽपि शब्दग्रहणाभावात् सङ्केतग्रहाभावेन नार्थबोधः।

११. अभिभवः

केनापि उच्चैस्तमेन शब्देन नीचैस्तमः शब्दः अभिभूतः सन् अर्थबोधकतां न लभते।

१२. समानाभिहारः

अपेक्षितानपेक्षितानां समानानां ध्वनीनां समभिहारे (सम्मिश्रणे) सति कस्यापि शब्दस्य सम्यग् बोधाभावात् सङ्केतग्रहाभावेन अर्थबोधाभावः सुतरां सिद्धः।

शब्दशक्तिः

शाब्देषु काश्चन शक्तयो भवन्ति। ताभिः शक्तिभिः सहिता एव शब्दा अर्थान् बोधयितुं प्रभवन्ति, नान्ये। आभिः शक्तिभिस्ताँस्तान् अर्थान् बोधयित्वा शब्दा निवर्तन्ते। अर्था एव व्यवहारे उपयुज्यन्ते। यथा 'त्वं दुग्धं पिब' इति वाक्ये त्वमिति शब्दः कश्चन पुरोऽवस्थितं वस्तु बोधयित्वा निवर्तते युष्मदर्थस्तु पुरोऽवस्थितं मनुष्यरूपं तत्रैव अवतिष्ठते। एवमेव दुग्धपदमपि गवादिप्रसूतं किमपि तरलं श्वेतं वस्तु बोधयित्वा निवर्तते, तादृशं वस्तु तु तत्रैव तान् क्रियाकर्मत्वेन बोधयति। एतेन लोके शब्दार्थयोर्मध्ये अर्थ एव विशेषत उपयुज्यत इति सिद्धम्। शब्दार्थयोर्मध्ये बोध्यबोधकभावरूपः कश्चन सम्बन्धो भवति। संस्कृतज्ञाः काव्यशास्त्रिणः शब्दशक्तिविषये शब्दार्थसम्बन्धविषये च स्वकीयान् गभीरान् विचारान् उपस्थापयामासुः शब्दशक्तिनिरूपणं वृत्तिनिरूपणम् इत्यादिनामभिः काव्यशास्त्रेषु शब्दगतायाः अर्थबोधिकायाः वृत्तेः निरूपणं संस्कृतकाव्यशास्त्रेषु बहुधा दृश्यते। सा च शब्दशक्तिः अभिधा लक्षणा व्यञ्जना

CC-0. Sampurnanand University Collection. Digitized by eGangotri

चेति त्रिधा। केचन चतुर्थीं तात्पर्याख्यां शक्तिमपि स्वीकुर्वन्ति। तत्र अभिधाख्या शक्तिः शब्दरूपस्य पुरुषस्य, पत्नीत्रयवतः पुरुषस्य ज्येष्ठा पत्नीव प्रथमतया उपतिष्ठन्ती शक्तिः अभिधा इत्युच्यते। तया शक्त्या उपस्थापितोऽर्थः अभिधेयः मुख्यः शक्तश्चेति नामभिः व्यवह्रियते। यथा गर्दभशब्दात् अभिधया वृत्त्या समुपस्थापितः तस्य विशेषरूपोऽर्थः अभिधेयो भवति। अस्यैव प्रसिद्धि-बाहुल्यात् सर्वानुभाव्यत्वाच्च मुख्यत्त्वम्। अभिधया उपस्थाप्यमानस्य मुख्यार्थस्य अनुपपत्तौ द्वितीयया लक्षणावृत्त्या उपस्थाप्यमानोऽर्थः लक्ष्यार्थ इत्युच्यते। तृतीयया व्यञ्जनावृत्त्या उपस्थाप्यमानोऽर्थः व्यंग्य इत्युच्यते। सेयं व्यञ्जनावृत्तिः मुख्यार्थबाधमन्तरा कमपि कमनीयतमम् अर्थविशेषं बोधयति। यथा—

'गतोऽस्तमर्कः' इत्यादौ वक्तृबोधव्यवैशिष्ट्यात् मुख्यार्थभिन्नाः सन्ध्यावन्दनादेः कर्त्तव्यत्वबोधकाः शतशोऽर्थाः प्रतीयन्ते। सेयं व्यञ्जनाया महिमा। लक्ष्यार्थोपस्थितौ तु गर्दभ इत्यादिपदेन गुणादिभिः गर्दभसादृश्यवतः पुरुषस्य बोधत्वे मुख्यार्थबाधः मुख्यार्थसामीप्यं चेति परमावश्यकम्। एवञ्च अभिधालक्षणाव्यञ्जनावृत्तिमन्तः शब्दाः क्रमशः अभिधायकलक्ष्यकव्यञ्जका इति उच्यन्ते।

एकार्थका नानार्थकाश्च शब्दाः

येषां शब्दानां मुख्यार्था बहवो भवन्ति ते किल शब्दा नानार्थका इत्युच्यन्ते। ये किल एकमेव मुख्यमर्थं बिभ्रति ते शब्दाः एकार्था इत्युच्यन्ते। लक्ष्यव्यङ्ग्याद्यर्थभेदैस्तु सर्वेऽपि शब्दा नानार्थका एव। यथा पुस्तक-नदी-वृक्षादि-शब्दाः प्राय एकार्थकत्वेन गृह्यन्ते। इमे एकार्था अपि शब्दा व्यञ्जनादिवृत्तिभेदेन प्रकरणभेदाद् विभिन्नान् अर्थान् लभन्त इति अन्यदेतत्।

पर्यायशब्दाः

यदा एकस्मिन्नेवार्थे अनेके शब्दाः प्राप्यन्ते तर्हि ते सर्वेऽपि शब्दाः परस्परं पर्यायशब्दाः इत्युच्यन्ते। आङ्ग्लभाषायां ते शब्दाः 'सिनोनिम्स' (Synonims) इत्युच्यन्ते, तत्र 'सीन'शब्दः सानार्थकः 'ओनीम'-शब्दश्च अर्थपर्यायः। तयोः एकीभूतस्य 'सिनोनिम'शब्दस्य समानार्थक इत्यर्थो भवति। हिन्दी-संस्कृतादिषु भाषासु पर्यायशब्दा बहव उपलभ्यन्ते। तद्यथा राजानृप-भूपतिभूपनृपति इत्यादयः शब्दाः राजन्शब्दस्य समानार्थकाः। पर्यायशब्दा अपि पूर्णापूर्णपर्यायभेदेन वैविध्यं लभन्ते।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

पूर्णपर्यायशब्दाः

पूर्णपर्यायशब्दानाम् अन्योन्यं स्थानपरिवर्तनं सम्भवति। यथा—'राजा गच्छति' इत्यत्र भूपतिर्गच्छति इत्यपि प्रयोक्तुं शक्यम्।

अपूर्णपर्यायशब्दाः

इमे शब्दा अर्थानुरोधेन समानार्थका इत्युच्यन्ते। किन्तु अर्थसाम्येऽपि तेषाम् अन्योन्यं स्थानपरिवर्तनं न भवति। अपूर्णपर्यायशब्दा अपि त्रिविधा भवन्ति—

१. **शैलीमूलकभेदः**—अयं भेदः शैलीमूलको भवति। हिन्दीभाषायाम् अधोलिख्यमानानां शब्दानां परस्परं पर्यायभूतानामपि शैलीमूलको भेदो भवति। यथा आज्ञा-इज़ाजत, प्रसन्नता-खुशी, दया-रहम, कृपालु-रहीम, शुद्ध-पाक, अशुद्ध-नापाक। उक्तं युगलषट्कं पर्यायभूतमपि शैलीमूलकभेदयुक्तमिति भाषाविज्ञानविदां स्पष्टम्।

२. **विचारमूलकभेदः**—यथा प्रायः एकमेव विषयं प्रतिपादयितुं प्रयुज्यमानास्तथापि भिन्न-भिन्नसिद्धान्तनिष्ठैः भिन्नभिन्नस्थानेषु कृतप्रयोगाः शब्दाः विचारमूलकभेदभिन्नाः इत्युच्यन्ते। यथा—ईश्वर-अल्लाह-गॉड, रानी-बेगम-क्वीन, मन्दिर-मस्ज़िद-चर्च, प्रार्थना-नमाज़-प्रेयर; वैद्य-हकीम-डॉक्टर, विद्यालय-मक़तब-स्कूल।

३. **प्रयोगमूलकभेदः**—समानार्थके सत्यपि कश्चन शब्दः तादृशो भवति यः अन्यस्य स्थाने प्रयोक्तुं न शक्यते। यथा—जलपान इति हिन्दीभाषायां प्रचलितस्य शब्दस्य पर्यायतया 'वारिपान' इति शब्दः प्रयोक्तुं न शक्यते। तथैव 'यज्ञवेदि' इति शब्दस्य स्थाने 'यज्ञचबूतरा' इति शब्दोऽपि नैव प्रयुज्यते। एवमेव 'नीरक्षीरविवेक' इति शब्दसमुदायस्थाने 'जलदूधविवेक' इति प्रयोक्तुं नैव शक्यते। अयं प्रयोगमूलकभेद इत्युच्यते। एवं एकार्थकशब्दविषये किञ्चिच्चिन्तितम्।

अथ नानार्थकशब्दविषये किञ्चिदुच्यते। केचन शब्दा एकाधिकार्थवन्तो भवन्ति। ते नानार्थका अनेकार्थका वा उच्यन्ते। एक एव शब्दः एकस्मिन्नेव काले अनेकानर्थान् कथमभिधत्ते इतीयं शङ्का स्थाने। तथापि अस्य प्रश्नस्य यथायथं समाधानं नाद्यावधि समजनि। सामान्यतया क्रियायाः अर्थस्य साम्येन गुणानां साम्येन सादृश्यात् संसर्गादिभिर्वा एक एव शब्दः नानाविधान् अर्थानभिधत्ते। तद्यथा संस्कृते विद्यमानः 'कर'शब्दः हस्तं सूर्यादीनां किरणं राजदेयद्रव्यं (Tax) गजस्य शुण्डादण्डं चाभिधत्ते। एवमेव शृङ्गशब्दः गवादीनां

CC-0. Sampurnanand University Collection. Digitized by eGangotri

शृङ्गं, पर्वतानां शिखरं च बोधयति। तथैव नरशब्दः वृक्षान् पर्वतांश्च समानार्थकैः शब्दैः बहुभिः एक एव अर्थः अभिधीयते। नानार्थकशब्देन तु एकेनैव बहवः अर्थाः बोध्यन्ते। अनयोः द्विविधशब्दयोः विषये महावैयाकरणः भर्तृहरिः वाक्यपदीये द्वितीये काण्डे एवमुल्लिखति—

बहुष्वेकाभिधानेषु सर्वेष्वेकार्थकारिषु।
यत् प्रयोक्ताऽभिसन्धत्ते शब्दस्तत्रावतिष्ठते।।२-४०।।

समानार्थक-नानार्थयोः शब्दयोः मध्ये यत्र योऽर्थः विवक्षितः तमेव प्रयोक्ता गृह्णातीति भर्तृहरिर्वदति।

एकार्थकशब्दानामर्थनिर्णयप्रकारः

यद्यपि पूर्वमस्माभिः एकार्थकनानार्थकभेदेन शब्दद्वैविध्यं प्रतिपादितम्। तथापि गभीरतया विचारे तु सर्वेऽपि शब्दा अनेकार्थका एव भवन्ति। प्रकरण-प्रसङ्गादिभेदात् सर्वेऽपि शब्दाः अनेकार्थका एव भवन्ति। इदं शब्दस्य अनेकार्थीभवनं भाषावैज्ञानिकाः प्रकरणभेदेनार्थपरिवर्तनमिति वदन्ति। संस्कृत-साहित्यकारास्तु आर्थी-व्यञ्जनानां वदन्ति। एवञ्च वस्तुतः एकमात्रार्थको न कोऽपि शब्द इति सिद्धान्तः श्रेष्ठः प्रतीयते।

एकार्थकस्यापि शब्दस्य प्रकरणादिवशाद् अनेकानर्थानभिव्यञ्जयतः अभिव्यज्यमानेषु बहुष्वर्थेषु कतमः अर्थः ग्राह्य इति निर्णयार्थं साहित्यदर्पणे विश्वनाथः दशसाधनानि अर्थनिर्णायकानिं प्रस्तौति। तानि च अत्र अपेक्षितत्वात् उपन्यस्यन्ते। तथा च तत्र श्लोकः—

वक्तृ-बोद्धव्य-वाक्यानामन्यसन्निधिवाच्ययोः।
प्रस्ताव-देश-कालानां काकोश्चेष्टादिकस्य च।।
वैशिष्ट्यादन्यमर्थं या बोधयेत् साऽर्थसम्भवा।।

(सा.दर्पणे, प. २.१६,१७)

अस्यायमर्थः वक्तुः बोद्धव्यस्य (श्रोतुः) वाक्यस्य वाच्यस्य अन्य-सन्निधेः प्रकरणस्य, देशस्य, कालस्य, काकोः चेष्टादीनाञ्च वैशिष्ट्यात् बहुष्वर्थेषु एकस्यार्थस्य ग्रहणं भवति। इयमेव आर्थी-व्यञ्जना इत्युच्यते।

१. वक्तृभेदेनार्थभेदः

यथा—'सन्ध्या आगता' इति वाक्यस्य वक्तृभेदात् अर्थो भिद्यते। यदि वक्ता वैदिकः पण्डितः स्यात् तर्हि सन्ध्यावन्दनवेला इति प्रतीयते। कश्चन

CC-0. Sampurnanand University Collection. Digitized by eGangotri

मन्दिरार्चकः वक्ता स्यात् तर्हि पूजाकाल इति जायते। क्रीडकः यदि वक्ता स्यात् तर्हि क्रीडा समाप्यताम् इति अर्थो विद्यते। कर्मकरः यदि वक्ता स्यात् कार्यं त्यजेयमिति अर्थः प्रतीयते। एवमेव वक्तृभेदात् तस्य तस्य वाक्यस्य भिन्ना भिन्नास्ते ते अर्था भवन्ति।

२. श्रोतृभेदेनार्थभेदः

एवमेव श्रोतृभेदेनापि अर्थभेदः निरूपणीयः। देव! कदा आगमिष्यसि? इति वाक्यस्य श्रोत्रियभेदेनापि अर्थो भिद्यते।

३. वाक्यप्रयोगभेदेन अर्थभेदः

यथा 'अपि कुशलम्'? इति वाक्ये समुच्चयार्थोऽपि अपिशब्दः। आदौ प्रयुज्यमानत्वात् प्रश्नार्थकत्वम्। एवमेव हिन्दीवाक्ये 'आपने खा लिया है न'? इत्यत्र वाक्यभेदेन 'न'शब्दः न निषेधार्थकः अपि तु प्रश्नार्थकः। समग्र-वाक्यस्यान्ते यदा 'न'शब्दो भवति तदा हिन्दीभाषायां निषेधार्थो नशब्दो न भवति। वस्तुतः प्रश्नार्थको संस्कृतभाषायाः नु-शब्द एव रूपपरिवर्तनेन हिन्द्यादिषु न इति रूपं प्राप्तवान्। भोजपुरीभाषायां तु अद्यापि नु इत्येव वाक्यान्ते शब्दो दृश्यते। यथा 'रउवा खइलीं हँ नु'?

४. वाच्यार्थभेदादपि अर्थभेदः

वक्तव्यः अर्थः यादृशो भवति तादृशः अर्थः भवति। यथा—हिन्दी-भाषायां 'अच्छा हुआ पापी चला गया' अत्र वक्तव्यस्य अर्थस्य पापित्वात् 'चला गया' इति क्रियायाः मृत इत्यर्थः।

५. अन्यसन्निधिनार्थभेदः

अन्यस्य उपस्थित्याऽपि अर्थभेदः भवति यथाभिज्ञानशाकुन्तले यदा दुष्यन्तशकुन्तलयोः प्रेमवार्ताप्रसङ्गे नेपथ्यतः सङ्केतो मिलति 'चक्रवाकवधुके आमन्त्र्यस्व सहचरमुपस्थिता रजनी' इत्यत्र रात्रिशब्दो 'गौतमी'परः अन्यसन्निधेः।

६. प्रकरणभेदेनार्थभेदः

प्रकरणभेदेन अर्थभेदो बहुधा भवति। यथा सूर्यः उदित इति वाक्येन बहवः अर्थाः प्रकरणानुसारेण बोध्याः भवन्ति। सूर्यः उदित इति वाक्येन शय्यां जहीहीति, विद्यालयं गच्छेति, भ्रमणाय याहीति, स्नानं कुरु इति, सन्ध्योपासनं विधेहि इत्येवमादयः सहस्रशः अर्थाः। ओग्डेन-रिचर्ड्स इति विद्वद्भ्यां पाश्चात्यदेशे प्रकरणस्य (Context) महत्त्वं भाषाशास्त्रिषु सम्यक् प्रदर्शितम्।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

७-८. देशकालभेदेनार्थभेदः

देशकालयोः भेदेनाप्यर्थभेदः भवति। एक एव शब्दः भिन्ने देशे, भिन्ने काले भिन्नमेवार्थं बोधयति। तस्य शतशः उदाहरणाः लोके उपलभ्यन्ते।

९. काकुभेदेनार्थभेदः

काकुर्नाम ध्वनिभेदो यथा हिन्दीभाषायामुच्यते 'आपने अच्छा पत्र भेजा' इति। अत्र काक्वा मया पत्रप्रेषणाय पुनः पुनः प्रार्थितोऽपि भवान् पत्रं नैव अप्रेषयत् इति बोध्यते। एवमेव 'आप तो अच्छे व्यक्ति हैं' इत्यत्रापि काक्वा भवान् दुष्टोऽस्ति इति बोध्यते।

१०. चेष्टाभेदेनापि अर्थभेदः

आङ्गिकाभिनयः चेष्टा इत्युच्यते। चेष्टयापि बहवः अर्थाः बोध्यन्ते। एवञ्च एकार्थकतया प्रतीयमानोऽपि शब्दः प्रकरणादिभेदात् अनन्तान् अर्थान् अभिव्यञ्जयति। क्वचित् निषेधार्थकतया प्रतीयमानवाक्यं विधिपरकतया अवसीयते। अन्यत्र च निषेधपरकतया प्रतीयमानं वाक्यं विधिपरकतया अवसीयते। एतेन अयं शब्द इममेवार्थं बोधयतीति निश्चित्य वक्तुं न शक्यते। एवञ्च संस्कृतविदुषां 'सर्वे सर्वार्थवाचकाः' इतीयम् उक्तिः यथार्था प्रतीयते। सर्वेऽपि शब्दाः तत्तत् सन्दर्भादिभेदेन तत्तदर्थान् बोधयितुं क्षमन्ते। तस्मादयं शब्दः इममेवार्थं वदतीति साग्रहं न वक्तव्यम्।

●

CC-0. Sampurnanand University Collection. Digitized by eGangotri

भाषासु वेदानां प्रभावः

डॉ. रामाशीषपाण्डेयः
पूर्वाचार्योऽध्यक्षश्च, संस्कृतविभागस्य
मारवाड़ी-महाविद्यालयः
विद्यानगरम् (पश्चिम) हरमू
राँची (झारखण्ड-प्रदेशः)

***

भाष्यते या सा भाषा, यद्वा भाष्यते शास्त्रव्यवहारादिना प्रयुज्यते या सा भाषा[१]। भाष् व्यक्तायां वाचि धातोरप्रत्ययेन ततष्टाप्-प्रत्ययेन[२] निष्पन्ना समग्रभाषणव्यवहारस्य ग्रन्थादौ प्रयुक्तस्य शब्दविशेषस्य च बोधिका विद्यते।[३] भाषाजगति समुपलब्धेषु ग्रन्थेषु वेदस्य भाषा एव सर्वप्राचीना वर्तते।[४] वेदा हि ब्रह्मणो निःश्वासभूता ऋषिभिर्दृष्टानां मन्त्राणां संहितारूपाः श्रुतिपरम्परया मन्त्ररक्षणोपायेन विकृतिपाठायोजनेन च संरक्षिता भारतीयविचारकाणां पाश्चात्त्यानाञ्च गौरवभूता विद्यन्ते। प्रायः सर्वे चिन्तका वेदस्यैव प्राचीनत्वं स्वीकुर्वन्ति।[५]

वेदस्य भाषा वेदभाषा वैदिकभाषा वा लौकिकसंस्कृतात् पूर्वमेव ब्रह्मणः कण्ठान्निर्गता तस्य निःश्वासभूता सर्वत्र प्रसृता वेदसंहितायामुपलभ्यते। निरुक्तानुसारेण—"साक्षात्कृतधर्माण ऋषयो बभूवुः। तेऽवरेभ्योऽसाक्षात्कृतधर्मेभ्य उपदेशेन मन्त्रान् सम्प्रादुः। उपदेशग्लायन्तोऽवरे बिल्सग्रहणायेमं ग्रन्थं समाम्नासिषुर्वेदं च वेदाङ्गानि च।[६] कथनेनानेन ऋषीणां साक्षात्कृतधर्मत्वं तेषां

---

१. अमरकोषः, चौखम्भा संस्कृत सीरीज़ आफिस, वाराणसी, वि.सं. २०२६, पृ. ८०।
२. अष्टाध्यायी-पाणिनिः ३/३/१०३।
३. हलायुधकोषः–हिन्दी समिति, सूचना विभाग, उत्तर प्रदेश, लखनऊ, १९६७ ई., पृ. ४९५।
४. अनादिनिधना नित्या वागुत्सृष्टा स्वयंभुवा। आदौ वेदमयी दिव्या यतः सर्वाः प्रवृत्तयः॥
(महाभारतम्, शान्तिपर्व, २५३)
५. वायोग्राफी आफ वर्ड्स् होमा ऑफ आर्यान्, पृ. ३५,९४।
६. निरुक्तम्, मेहरचन्द्र लक्ष्मणदास, दिल्ली, १९६४ ई., १/६।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

वेदमन्त्राणामुपदेशदानत्वं तथा कालान्तरेऽवरेभ्यः ऋषिभ्योऽसाक्षात्कृतधर्मेभ्यः संहिताया मन्त्राणामुपदेशत्वमनन्तरं वेदवेदाङ्गरूपेण च प्रसृतत्वादीनि तत्त्वानि नूनमेव वेदमन्त्राणां प्राचीनत्वं प्रमाणयन्ति। पाश्चात्त्या अपि विद्वांसः आधुनिका अपि भारतीया वेदमन्त्राणां प्रागैतिहासिकतां विवेचयन्ति।

अष्टाविंशतिशताब्द्या उत्तरार्द्धे एकोनविंशतिशताब्द्याः पूर्वार्द्धे च कतिपये भाषाविदः विलियमजोन्स-श्लेगेस-ब्लूमफिल्ड-मैक्समूलर-प्रभृतयः पाश्चात्त्या विद्वांसो भाषाणां तुलनात्मकाध्ययनेन प्राप्तवन्तो यद् जर्मन-केल्टिक-ग्रीक-लैटिन-लिथुआनियन-स्कैण्डीनेवियन-इरानियन-संस्कृतभाषाणाञ्च शब्देषु न केवलं सामीप्यसम्बन्धो विद्यतेऽपि तु व्याकरणस्य नियमेष्वपि आश्चर्यकरं साम्यं दृश्यते। निष्कर्षरूपेण ते कथितवन्तो यदेताः सर्वा भाषा नूनमेव कस्मादपि एकस्माद् भाषाविशेषान्निष्पन्ना विद्यन्ते। ते कामप्यनवस्थितां शशविषाणवदनुपलब्धां सर्वासां भाषाणां मूलभाषां प्राग्भारोपीयभाषामेव स्वीकुर्वन्ति। तेषां मते भवतु नाम काऽपि एतादृशी भाषा यया सर्वा भाषा निर्गता भवेयुस्तथा सा एव सर्वासां भाषाणां मूलभाषा भवेत् परं ध्यातव्यमिदमस्ति यन्न काऽपि प्राग्भारोपीयभाषा जगतीतले प्राप्यते, न वा तस्यां भाषायामेकपत्रात्मकमेकशब्दात्मकमपि साहित्यं विद्यते येन भाषाया अस्तित्वबोधो जायेत। पाश्चात्त्यभाषाविदां कल्पिता मिथ्यानुमानाधारिता खपुष्पायिता वा भाषा कथं सर्वासां भाषाणां व्युत्पादिका मूला वा भवितुमर्हतीति मादृशा विचारयन्ति।

भाषात्मकदृष्ट्या विविधज्ञानविज्ञानसमन्विता वैदिकसंहिताया भाषा वेदभाषा एव सर्वप्राचीनभाषा विद्यते, यया सर्वा भारोपीयभाषा व्युत्पन्ना निर्गता वा विद्यन्ते। अन्यासां भाषाणामुपरि वैदिकभाषायाः प्रभावोऽपि नितरामत्यधिको दृश्यते। भाषावैज्ञानिकदृष्ट्या परीक्षणेन प्राप्यते यत् समग्रा भारतीया, इरानीया, यूरोपीयाश्च भाषा वैदिकभाषातो निर्गता व्युत्पन्नाः प्रभाविता वा सन्ति। वैदिकभाषायाः प्राचीनत्वाद् भारोपीयपरिवाराद्व्यतिरिक्ता अपि भाषाः प्रायो वैदिकभाषया प्रभाविता विद्यन्ते।

देशकालपात्रानुसारं भाषायां परिवर्तनं स्वाभाविकं भाषापरिवर्तन-सिद्धान्तानुकूलमेव भवति। यदा वेदानां प्रातिशाख्यग्रन्थेषु स्थानविशेषाश्रिते ध्वनिपरिवर्तनसिद्धान्ते षकारस्य खकारे[१] कृते 'सहस्रशीर्षा' इत्यस्योच्चारणं

१. षो खष्टुमृते, प्रातिशाख्ये द्रष्टव्यम्।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

'सहस्त्रशीर्खेति' भवति। अनेनैव यकारस्य जकारे[१] रकारस्य लकारे क्वचिल्लकारस्य रकारे परिवर्तनं जायते। पुनः स्वराणामर्द्धस्वरेषु अर्द्धस्वराणां स्वरेषु विविधवर्णानां विविधवर्णेषु परिवर्तनानि लभ्यन्ते[२]। तदा आर्यावर्तांद् बहिर्गता वेदभाषा ध्वन्यन्तरतां प्राप्तवतीति किमाश्चर्यकरम्। ऐतिहासिकज्ञान—स्याभावेनाज्ञानोपनेत्र-प्रयोगेण च ये कथयन्ति यदार्या बहिः प्रदेशाद् भारते समागतास्ते वैदिकभाषां सम्यक् न जानन्ति। अनुवादमाध्यमेन वैदिकभाषाया अध्ययनं कृत्वा किमपि किमपि जल्पन्ति वा कामप्यन्यां भाषां प्रति रागात्मिकां दृष्टिं दधति।

वेदे विहितानि सांस्कृतिकभौगोलिकादीनि तत्त्वानि प्रकाशयन्ति यदार्या भारतादेव विविधसमुदायेषु विभक्ता विविधसम्प्रदायं समाश्रिताः समये समये इरान-यूरोप-प्रभृतिदेशान् प्रति गच्छन्तः केचन तत्र निवासं चक्रिरे केचन समस्तभारोपीयप्रदेशे व्याप्ता अभूवन्। तदानीं तेषु स्थलेषु सभ्यताया विकासो नासीत्। आर्याणां गमनेनैव तत्र सभ्यता प्रादुर्भूता। आर्यैः सह वैदिकभाषाऽपि तत्र गता तथा स्थानकालपात्रप्रभावेण प्रभाविता परिवर्तितरूपा विविधस्थानाश्रितानि नामानि सम्प्राप्य स्थिता वर्तते। अद्यापि आर्याणां मुख्यशाखा भारतवर्ष एव विराजते। भारते वैदिकसंस्कृतभाषा आर्याणां धर्मभाषात्वेन श्रुतिपरम्परया विकृति-पाठप्रयोगेण च पूर्णतो रक्षिता वर्तते।[३] उच्चारणे कुत्रापि ध्वन्यन्तरतां गताऽपि भाषेयं लेखने सम्पादने च पूर्ववदेव तिष्ठति। अतो भारते संहितायां सर्वत्र एकरूपत्वमेव दृश्यते। भारताद् बहिः सैव वैदिकभाषा स्वाभाविकेन भाषा-वैज्ञानिकपरिवर्तनेन ध्वन्यात्मकमर्थात्मकं रूपात्मकञ्च परिवर्तनं समवाप्य विविध-नाम्ना विविधा भूत्वाऽन्या इव संलक्ष्यते। हिमालयान्निःसृता गङ्गा विविधस्थानमाश्रित्य स्थानाश्रितं महत्त्वं समवाप्य विविधनदीभिः सम्मिलन्ती समुद्र एव गत्वा एकरूपतामधिगच्छति। समुद्रे सङ्गतं गङ्गाजलं स्वकीयं माधुर्यं त्यक्त्वा स्वीयां वास्तविकतां प्रति भ्रममुत्पादयद् दूरगमनेन तत्र स्थितं क्षारत्वमधिगृह्णाति परं तत्रापि गङ्गाजलस्य स्थितिर्भवत्येव। तस्य दर्शनं क्षारत्वदोषहारकस्य क्षीरत्व-शोधकस्य हंससदृशस्य गवेषकस्य संयुक्तप्रयासैर्भवितुमर्हति।

---

१. शुक्लयजुः, माध्यन्दिनशाखीयरुद्रपद्धतौ सम्पादकीये, पृ. ३।

२. वर्णागमो वर्णविपर्ययश्च द्वौ चापरौ वर्णविकारनाशौ।
घातोस्तदर्थातिशयेन योगस्तदुच्यते पञ्चविधं निरुक्तम्।। (नि.दु.नृ. १/१)

३. जटा माला शिखा रेखा रथो दण्डो ध्वजो घनः।
अष्टौ विकृतयः प्रोक्ताः स्वयमेव स्वयंभुवा।। (शु.यजुः, मा.सं. रुद्रपद्धतौ, पृ. २०५)

CC-0. Sampurnanand University Collection. Digitized by eGangotri

वैदिकभाषायां प्रयुक्ता नामाख्यातोपसर्गनिणताश्च शब्दा व्याकरणनियमाश्च विविधभाषासु कथं मूलरूपेण रूपान्तरेण च युक्तास्तत्र वर्तमाना सन्तीति इरानीय-यूरोपीयाषु भारतीयासु च कतिपयभाषासु विचार्य्यते—

वैदिकभाषा भारोपीयपरिवारस्य प्राचीनतमा भाषा विद्यते। भारोपीयपरिवारे भारतीया यूरोपीया चेति भाषाया विभागद्वयं वर्तते। भारतीया भाषाऽपि भारतीया इरानीया चेति द्विविधा। यूरोपीयभाषासु ग्रीक-लैटिन-उच्चजर्मन-निम्नजर्मन-प्रभृतिभाषाः प्रसिद्धाः। निम्नजर्मनभाषा सम्प्रति आंग्लभाषारूपेण विराजते या हि सम्प्रति भाषात्मकदृष्ट्या राजानति। समग्रे विश्वे आंग्लभाषायाः प्रयोगस्याधिक्यमेव तत्र कारणमस्ति।

भारतीयभाषापरिवारे वैदिकसंस्कृतं-लौकिकसंस्कृतं-प्राकृतं-पाली-अपभ्रंशं-मैथिली-मगही-भोजपुरी-बंगाली-पंजाबी-मराठी-गुजराती-असमी-उडिया-प्रभृतिभाषा विद्यन्ते। भारतीयपरिवारस्य सर्वासु भाषासु वैदिकसंस्कृतस्य प्रभावः पूर्णरूपेण विद्यते यतो हि इमाः सर्वा भाषावैदिकसंस्कृंता देव प्रत्यक्षाप्रत्यक्षरूपेण निर्गताः। वैदिकसंस्कृतस्य समयः सामान्येन ४००० ई. पूर्वं विद्यते। भारतीयमतेन वैदिकसंस्कृतमनादिभूतमस्ति। वेदस्यापौरुषेयत्वमेव[१] ब्रह्मणो निःश्वासभूतत्वं वेदस्यानादित्वमस्ति। लौकिकसंस्कृतस्य समयः ८०० ई. पूर्वं विद्यते। ततः प्राकृतपालीभाषे प्रादुर्भूतौ। एतयोः समयः सामान्यरूपेण ५०० ई. पूर्वं मन्यते। प्रकृतिः संस्कृतं तत्र भवा तत आगता वा भाषा प्राकृतभाषा[२] विभिन्नस्थानाश्रिता शौरसेनी महाराष्ट्री मागधी अर्द्धमागधी पैशाचीरूपेण ख्याता। शूरसेनस्य शौरसेनी, महाराष्ट्रस्य महाराष्ट्री, मगधस्य मागधी, मगधशूरसेनयोर्मध्यस्यार्द्धे मागधी, अफगानिस्तानस्य पैशाची सर्वाः प्राकृत भाषा एव सन्ति। सर्वासु प्राकृतभाषासु वैदिकसंस्कृतस्यैव शब्दा ध्वन्यन्तरेण युक्ताः प्रायः सर्वत्र प्रचलन्ति। अतो वैदिक-संस्कृतस्य प्रभावः सर्वत्र दृश्यत एव।[३] मागधी-प्राकृतादेव मगही-भोजपुरी-बंगाली-असमी-प्रभृतिभाषा विकसिताः। दशमशताब्द्यामपभ्रंशभाषा प्राकृतपालीभाषातः प्रादुर्भूताः। तस्मात् हिन्दी-गुजराती-मराठी-उड़िया-राजस्थानी-प्रभृतिभाषा निर्गताः। वैदिकभाषायाः शब्दाः संस्कृत-प्राकृत-पाली-अपभ्रंश-भाषासु रूपात्मकपरिवर्तनेन विराजन्ते। सर्वत्र वैदिकभाषायाः प्रभावो दृश्यते। वैदिकभाषाया गच्छति-कथय-इक्षु-

---

१. ऋग्वेदभाष्यभूमिका, सायणः।

२. प्राकृतसर्वस्वम्–१/१।

३. प्राकृतभाषाओं का तुलनात्मक व्याकरण एवं उनमें प्राक् संस्कृत तत्त्व, डॉ. के. आर. चन्द्र, प्राकृत विद्यामण्डल, अहमदाबाद, १९८२ ई., पृ. १२२-१२५।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

जलद-प्रभृतयः शब्दाः शौरसेनी-प्राकृते क्रमशः गच्छदि-कधोहि-इक्खु-जलदरूपेण प्राप्यन्ते। वैदिकसंस्कृतस्य गच्छति-क्रोधः-कथयति पाषाणप्रभृतयः शब्दा महाराष्ट्री-प्राकृते क्रमशः गच्छइ-कोहो-कहेइ-पाहाण रूपेण जायन्ते। वैदिकसंस्कृतस्य गगनं मेघः-रुद्रं-कुमारः-तिष्ठति-प्रभृतयः शब्दाः पैशाची-प्राकृते क्रमशः गकन-मेखो-लुद्धं-कुमासो-चिश्तदि-प्रभृतयो भवन्ति। वैदिकसंस्कृतस्य रजत-स्थित-चिकित्सा-सागरप्रभृतयः शब्दा अर्धमागधी-प्राकृते क्रमशः रयद-ठिय-तेइच्छा-तिगिच्छा-सायर-प्रभृतयो दृश्यन्ते। वैदिकसंस्कृतस्य पुरुष-राजा-जानाति-उपस्थित-प्रभृतयः शब्दा मागधीप्राकृते क्रमशः पुसिश-लाजा-याणादि-उवस्तिद-प्रभृतयः सन्ति। प्राकृतव्याकरणानुसारं[१] वैदिकसंस्कृतस्य क-ग-च-ज-त-द-प-य-व-वर्णाः प्राकृतभाषायां प्रायः लुप्ता भवन्ति। अनेनैव वैदिकभाषायां ख-घ-थ-ध-भ-वर्णानां प्राकृते प्रायः हवर्णो भवति।[२] पुनश्च ल-व-र-वर्णाः प्राकृते सर्वत्र लुप्यन्ते।[३] प्राकृतभाषायामुपसर्गाणां प्रत्ययानाञ्च योजनं वैदिकभाषातः प्रभावितमस्ति।

वैदिकसंस्कृतस्यापभ्रंशभाषया सहापि सम्बद्धता दृश्यते। येन वैदिकभाषायाः प्रभावस्तत्र प्राप्यते। भाषेयं वैदिकभाषातः संस्कृतभाषातः प्राकृतभाषातो वापभ्रष्टा विद्यते। वैदिकभाषायाः कीकट-गर्भिणी-प्रभृतयः शब्दाः प्राकृतभाषायां कीड-गम्भिणि-रूपेण प्राप्यन्ते। एवमेव वैदिकभाषाया विना-समं-यत्र-सह-सम्मुख-प्रभृतयः शब्दाः प्राकृतभाषायां क्रमशः विणा-समं-यत्थ-सह-समुहं तथापभ्रंशभाषायां विणु-सऊँ-जहि-सहु-सुमुहं भवन्ति।[४]

वैदिकभाषायाः प्रभावः पालिभाषायामपि द्रष्टव्यः। वैदिकभाषाया धर्म-कर्म-स्त्री-चरित्र-प्रभृतयः शब्दाः पालिभाषायां क्रमशः धम्म-कम्म-इत्थि-चरिउ-प्रभृतयो भवन्ति। प्रत्ययादिसमायोजनं वाक्यविन्यासादिकञ्च वैदिकभाषावदेव प्रायो दृश्यते।

भारतस्य विविधप्रदेशेषु प्रचलिता आधुनिकभारतीयभाषाः प्रान्तीया भाषाश्चापि वैदिकभाषातः प्रभाविता विद्यन्ते। प्राकृतादपभ्रंशाद् पालिभाषातो निर्गता मराठी-गुजराती-पंजाबी-राजस्थानी-बंगाली-उड़िया-मैथिली-प्रभृतिभाषा वैदिक-संस्कृतेन भृशं प्रभाविताः सन्ति। प्राकृतापभ्रंशादिभाषा वैदिकभाषातः प्रभाविताः,

---

१. क ग च ज त द पययां प्रायो लोपः, प्राकृ. सर्व. २/२।

२. ख घ थ ध भां ह., तत्रैव, २/२५।

३. सर्वत्र लवराम, तत्रैव, ३१३।

४. प्राकृ. भा. का तुल. व्या., पृ. ११४-११५।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

अत: कालान्तरे विकसिता: क्षेत्रीयभाषा अपि वैदिकभाषात: प्रभाविता विद्यन्ते। सर्वासां भाषाणामुत्स: वैदिकभाषा एव।

इरानीभाषाया धर्मग्रन्थ: 'अवेस्ता' वैदिकभाषातो भृशं प्रभावितो विद्यते। इरानशब्दोऽपि आर्याणामित्यस्य विकृतरूप:। वैदिकभाषाया: केचन शब्दा: सामान्यध्वन्यन्तरेणावेस्तायां प्रयुक्ता विद्यन्ते। अवेस्ताया वाक्यमपि वैदिकभाषया प्रभावितमिति वाक्यद्वयं द्रष्टव्यम्[१]।

(१) वै.भा.– यो यथा पुत्रं तरुणं सोमं नन्दते मर्य:।
अवे.– यो यथा पुथ्रम् तऊरुणम् हमोमम् वन्दएता मय्यो।

(२) वै.भा. – शूरं धामसु शविष्ठम्।
अवे.– शूरं दामोहू शविस्तम्।

एवमेव वैदिकभाषाया ओजस्-नभस्-अस्थि-आप-प्रभृतय: शब्दा अवेस्तायां क्रमश: ओज:-नवह-अस्ति-अप-प्रभृतयो भवन्ति। वैदिकभाषाया ददामि-अनु-अन्य-प्रभृतय: शब्दा अवेंस्तायामपि तादृशा एव रूपसम्पन्ना अर्थयुक्ताश्च विराजन्ते। वैदिकसंस्कृतस्य स ध्वनि: अवेस्तायां हरूपेण प्राप्यते। परिणामतो वैदिकभाषाया असुर-सप्त-वसिष्ठ-असि-प्रभृतय: शब्दा अवेस्तायां क्रमश: अहुर-हप्त-वहिस्त-अहि-रूपेण लभ्यन्ते। उपसर्गप्रत्ययानां योजनं वाक्यविन्यासच्छन्दोयोजनादिकञ्च वैदिकभाषावदेवावेस्तायामपि प्राप्यन्ते। अनेन स्पष्टं भवति यद् वैदिकभाषाया अवेस्ताया उपरि प्रभूत: प्रभावो विद्यते।

वैदिकसंस्कृतस्य प्रभाव: प्राचीनफारसीभाषाया उपरि विद्यते। वैदिक-संस्कृतस्य अभरत्-क्रिया अवेस्तायाम् अवरत् तथा प्राचीनफारसीभाषायाम् अवर-रूपेण प्राप्यते। वैदिकसंस्कृतस्य 'अहम्' अवेस्तायाम् 'अजेम' तथा प्राचीनफारसी-भाषायाम् 'अदेम', वैदिकभाषाया यदि अवेस्तायां येनो प्राचीनफारसीभाषायां यदी-रूपेण प्राप्यते।[२]

भारोपीयपरिवाराद्व्यतिरिक्तपरिवारस्य भाषा अपि भारते प्रचलिता: सन्ति। द्रविडपरिवारस्य भाषासु तेलगु-तमिल-कन्नड़-मलयालम-प्रभृतिभाषा: क्रमश आन्ध्रप्रदेशे तमिलनाडुप्रदेशे कर्नाटकप्रदेशे केरलप्रदेशे च व्यवहृता भवन्ति। वैदिकसंस्कृतस्य चत्वारिंशत्-प्रतिशतं शब्दा तमिलभाषायां पञ्चाशत्प्रतिशतं

---

१. भाषाविज्ञान (डॉ,. भोलानाथ तिवारी), पृ. १५८-१५९।

२. तत्रैव, पृ. १६८।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

शब्दास्तेलगुभाषायां षष्टिप्रतिशतं शब्दाः कन्नड़भाषायां सप्ततिप्रतिशतं शब्दा मलयालमभाषायां विद्यन्ते। यद्यपि वाक्यविन्यासक्रियापदादिकञ्च तासु भाषासु भिन्नं विद्यते तथापि प्रभूतशब्दप्रयोगेण वैदिकभाषायाः प्रभावोऽत्यधिको लक्ष्यत एव।

यूरोपीयपरिवारस्य इरानीपरिवारस्य च प्राचीनभाषासु रूपगतं वैशिष्ट्यं वैदिकसंस्कृतादभिन्नम्। संख्यावाचकशब्दाः सम्बन्धवाचकशब्दास्तदानीं प्रचलिताः प्राचीनशब्दा नामाख्यातोपसर्गनिपातादयो वैदिकभाषातः प्रायः सम्बद्धा विद्यन्ते। संख्यावाचकशब्दा वैदिकसंहितायां प्रथमं द्रष्टव्याः। संहितासु काठकसंहितायां तैत्तिरीयसंहितायां वाजसनेयिसंहितायामन्यत्रापि प्राप्यते संख्याया विवेचनम्।

काठकसंहितायां यथा—एका च दश च। दश च शतं च। शतं च सहस्रं च। सहस्रं चायुतं च। अयुतं च प्रयुतं च। प्रयुतं च नियुतं च। नियुतं चार्बुदं च। अर्बुदं च समुद्रश्च। मध्यं च अन्तश्च परार्धश्च।[१] अत्र दशगुणात्मकाः शब्दा एकतः परार्धपर्यन्तं विवेचिताः।

तैत्तिरीयसंहितायां यथा—एका च शतं च, सहस्रं च अयुतं च, नियुतं च प्रयुतं च, अर्बुदं च न्यर्बुदं च, समुद्रश्च मध्यं च अन्तश्च परार्धश्च।[२]

वाजसनेयिसंहितायां यथा—एका च मे तिस्रश्च मे, तिस्रश्च मे पञ्च च मे, पञ्च च मे सप्त च मे, सप्त च मे नव च मे, नव च मे एकादश च मे... यज्ञेन कल्पन्ताम्।[३] चतस्रश्च मे अष्टौ च मेऽष्टौ च मे द्वादश च मे, द्वादश च मे षोडश च मे षोडश च मे विंशतिश्च मे...यज्ञेन कल्पन्ताम्।[४] एवमेव वैदिकभाषायामन्यत्रापि संख्याया गुणात्मकस्य त्रिगुणात्मकस्य चतुर्गुणात्मकस्य विविधयोगादिकस्य वर्णनं लभ्यते। वेदेषु वर्णिता एकतो दशपर्यन्तं संख्या कथं भारोपीयपरिवारस्य विविधासु भाषासु ध्वन्यन्तरेण प्रचलिता इति निम्नलिखित-तालिकायां द्रष्टव्यम्—

वैदिकभाषा	अवेस्ता	ग्रीक	लैटिन	आंग्लभाषा
एकः	अएव	एइस (eis)	अनुस (onus)	वन (one)
द्वि	द्व	ड्वो (Duo)	ट्वा (Twa)	टू (Two)
त्रि	थ्रि	तेइस (Treis)	ट्रेस (Tres)	थ्री (Three)
चतुर्	चथ्रु	चेटर्स (Teitares)	क्वाटुर (Quattuor)	फोर (four)
पञ्चन्	पंचन्	पेण्टा (Penta)	क्विंक (Quinque)	फाइव (Five)

१. काठक-संहिता, १६/१०
२. तैतिरीयसंहिता, ४/४/१
३. वाजसनेयिसंहिता, १८/२४
४. तदेव, १८/२५

CC-0. Sampurnanand University Collection. Digitized by eGangotri

षष्	श्वस्	हेक्स (Hex)	सेक्स (Sex)	सिक्स (six)
सप्तन्	हप्तन्	हेप्ता (Hepta)	सप्तेम (Septem)	सेवेन (Seven)
अष्टन्	अशतन्	आक्टो (Octo)	आक्टो (Octo)	एट (Eight)
नवन्	नवन्	इनीय (Ennea)	नोभेन (Noven)	नाइन (Nine)
दशन्	दसन्	डेका (Deka)	डेसेम (Decem)	टेन (Ten)

अनेन प्रकारेण शतमित्यस्य ग्रीकभाषायां हेक्टा (Hecta) लैटिनभाषायां केन्तुम् (Centum) आंग्लभाषायां हण्ड्रेड (Hundred) इति प्राप्यते।

वैदिकभाषायां प्रयुक्ताः तृच्-प्रत्ययान्ताः सम्बन्धवाचकाः शब्दा विविध-भाषासु कथं स्थिता वर्तन्त इति द्रष्टव्यम्—

वैदिकभाषा	अवेस्ता	ग्रीक	लैटिन	आंग्लभाषा
दुहितृ	दोख़्तर	थुगथर (Thugather)	तोख्तर (Tockter)	डाटर (Doughter)
पितृ	पितर	पातेर (Pater)	पातेर (Pater)	फादर (Father)
मातृ	मातर्	मातेर (Mater)	मातेर (Mater)	मदर (Mother)
भ्रातृ	व्रातर	फ्रातेर (Phrater)	फ्रातेर (Phrater)	ब्रदर (Brother)

एवमेव वैदिकभाषायाः स्वसृ लैटिनभाषायां सोरोर (Soror) आंग्लभाषायां सिस्टर (Sister) वैदिकभाषायां विधवा ग्रीकभाषायां विदर (Vither) लैटिनभाषायां विडुओ (Viduo) आंग्लभाषायां विडो (Widow) प्राप्यते।[१] वैदिकभाषायाः प्रभावस्तु सर्वत्र दृश्यत एव।

भारोपीयपरिवारस्याङ्ग्लभाषायां महत्त्वं प्रयोगधिक्यादधिकं वर्तते विश्वस्मिन् विश्वे। वैदिकभाषायाः प्रभावस्तस्या उपरि विशेषरूपेण द्रष्टव्यः।

वैदिकभाषाया गृहवाचको 'दम'-शब्दः लैटिनभाषायां दमूस (Domus) तथाङ्ग्लभाषाया डोम्स (Domes) इति प्राप्यते। आंग्लभाषायाः डोमेस्टिक (Domestic) शब्दे दम-शब्दस्य स्थितिर्दृश्यते। लौकिकसंस्कृतेऽपि दम्पतिशब्दे दम इति शब्दस्य दर्शनं भवति। वैदिकभाषायाः स्तृ-शब्दस्ताराया वाचकः। ऋग्वेदे

१. व्यु.वि. और आ.यास्क, पृ. २१८,२२१।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

विविधस्थलेषु स्तृभिः शब्दस्तृतीयाबहुवचने ताराया: कृते प्रयुक्तः[१]। स्तृशब्दस्य प्रथमाबहुवचने, स्तारः रूपं जायते। स्तारःपदं फारसीभाषायां सितारा तथा आंग्लभाषायां स्टार-(Star) रूपेण प्राप्यते। वाजसनेयिसंहितायाम् उष्ट्रशब्दस्य प्रयोगः प्राप्यते।[२] उष्ट्रशब्दः क्रमेलकशब्दश्च समानार्थकौ। उष्ट्रशब्दः उष्-वर्णयोर्विपर्यासेन षुटर 'सुतर' इति फारसीभाषायां पुनः क्रमेलशब्दः कैमल-(Camel) रूपेणाङ्ग्लभाषायां गमतरूपेण मिश्रीभाषायां जमलरूपेण अरबीभाषायां प्राप्यते।[३] वैदिकभाषायां प्रयुक्तः सूनु-शब्दः[४] आंग्लभाषायां सन-(Son) रूपेण प्राप्यते। अर्थे किमपि वैषम्यं नास्ति उच्चारणे ध्वन्यन्तरत्वमपि न्यूनमेव। वैदिकभाषाया द्वारशब्दः[५] ग्रीकभाषायां थुरा (Thura) तथाऽऽङ्ग्लभाषायां डोर-(Door) रूपेण प्राप्यते। एवमेव वैदिकभाषायां नाम-नक्र-हस्त-वयः-शब्दाः आंग्लभाषायां क्रमशः नेम-(Name) नाइट-(Night) हैण्ड-(Hand) बर्ड-(Bird) रूपेण प्राप्यन्ते, ध्वन्यात्मकताऽर्थात्मकता च सामीप्यसम्बन्धेन भृशं युक्ताः प्रतीयन्ते।

वैदिकभाषाया धातुरूपस्यापि प्रभावः आंग्लभाषायां भृशं दृश्यते। वैदिकभाषाया अस्ति-आसीत्-अस्मीति स्थले आंग्लभाषायां इज-(Is) वाज-(Was) एम-(Am) शब्दाः प्राप्यन्ते। वैदिकभाषाया भू-गम्-अद्-पलाय-प्रभृतिधातूनां स्थाने आंग्लभाषायां बी-(Be) गो-(Go) इट-(Eat) फ्लाइ-(Fly) प्रभृतीनि क्रियारूपाणि प्राप्यन्ते। वैदिकभाषाया मुष् स्तेये धातोरेवाङ्ग्लभाषायामेकवचने माउस (Mouse) बहुवचने माइस (Mice) इति प्राप्यते।[६]

'उपसर्गाः क्रियायोगे'[७] 'प्रादयः'[८] इति सूत्राभ्यां प्रादय उपसर्गाः क्रियायोगे भवन्ति। पूर्वप्रत्यया इमे भाषायां महत्त्वपूर्णं स्थानं दधति। वैदिकभाषाया उपसर्गाणां प्रभावो ग्रीकाङ्ग्लभाषायां द्रष्टव्यः—

वैदिकसंस्कृतस्य प्र-परा-उप-परि-अभि-प्रभृतयः उपसर्गा ग्रीकभाषायां क्रमशः प्रास-(Pros) परा-(Para) हुपा-(Hupa) एपि-(Epi) अव-(Awa) परि-(Peri) अम्पि-(Amphi) प्रभृतयो भवन्ति।[९]

---

१. ऋ.सं. १/६८/५, १/८७/१, १/१६३/१।
२. वाज. संहि. २४/२८,३९।
३. संस्कृत व्याकरणशास्त्र का इतिहास (मीमांसक), भाग-१ पृ. १२,१३।
४. ऋ.सं. १/१४३/१, ३/३३/५, १/१/९; ५. तत्रैव-१०/११०/५।
६. Chamber's compact dictionery 1954, p. 410.
७. अष्टा. १/४/५९; ८. तत्रैव, १/४/५८।
९. संस्कृतभाषा का भाषाशास्त्रीय अध्ययन (डॉ. भोलाशंकर व्यास), पृ. २५२-२५३।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

वैदिकभाषाया उपसर्गा ग्रीकतो निःसृतायामाङ्ग्लभाषायां केन प्रकारेण विराजन्त इति द्रष्टव्यम्—प्र अस्यार्थो भवति विस्तारः, प्राथम्यं, प्रधानः, प्रकृष्टः, प्रक्रमः। उपसर्गोऽयं लैटिनभाषायां पारा-(Para) रूपेणाङ्ग्लभाषायां प्रि एवं प्रा-(Pre and Pra) रूपेण प्राप्यते। यथा—Pre-eminance, Pre-eminent, सर्वश्रेष्ठः प्रिफिक्स (Prefix) पूर्वसर्गः प्रेफेस (Preface) प्राक्कथनं, प्रेसिडेण्ट (President) अध्यक्षः, प्रैभिटी (Pravity) भ्रष्टता-प्रभृतयः। परा—उपसर्गोऽयं कर्मसमाप्तौ, परमार्थेऽन्यार्थेऽत्यन्तार्थे च प्रयुज्यते। यथा—पराभवः, पराकाष्ठा, पराधीनम्, पराक्रमप्रभृतयः। अयं हि ग्रीकभाषायामाङ्ग्लभाषायाञ्च पारा-(Para) रूपेण प्राप्यते। यथा—पाराडाक्स (Paradox) विपरीतता, परासाइट (Parasite) परजीवी, परापिट (Parapit) सहायकभित्तिका-प्रभृतयः।

अप—उपसर्गोऽयं प्राप्ताप्राप्तौ दूरीकरणे, अपादानार्थके च प्रयुज्यते। आंग्लभाषायाम् अप (Up) एवं आफ (off) रूपेण प्राप्यते। यथा—अपवार्ड (Upward) ऊर्ध्वः, अपहेल्ड (Upheld) स्थापितम्, अपब्रिंगिंग (Upbringing) शिक्षा, अपवियर (Upbear) मर्षणम्, आफेन्स (Offence) अपराधः, आफसाइड (Offside) दूरदेशप्रभृतयो द्रष्टव्यः।

सम्—उपसर्गोऽयं सम्यगर्थे समानार्थे सहार्थे अवैकल्ये च प्रयुज्यते। लैटिनभाषायां कम (com) तथाङ्ग्लभाषायां सम (Sum) रूपेणायं प्रयुज्यते। यथा—काम्बैट (Combat) समाघातः, कन्फर्म (Conform) समनुरूपः, समराइज (Summarise) संक्षेपीकरणम्, समसन (Sumson) बलवान् मानवप्रभृतयः।

अनेनैव प्रकारेणानेके उपसर्गाः लैटिनभाषायां ग्रीकभाषायामाङ्ग्लभाषायाञ्च विविधरूपेण प्रयुज्यन्ते। वैदिकसंस्कृते नञर्था अपि उपसर्गरूपेण प्रयुज्यन्ते। तत्र स्वरात्पूर्वं 'अन्' तथा व्यञ्जनात् पूर्वम् 'अ' प्रयोगो दृश्यते[१], यथा—अकालः, अनागतम्, अनादरमित्यादयः। आंग्लभाषायामपि नञर्थाः प्रयुज्यन्ते, परं संस्कृतस्य नियमास्तत्र न सर्वथा पाल्यन्ते। अन् इत्यस्य योगः स्वराद् व्यञ्जनाद् वा पूर्वं दृश्यते—अनैवल (Unable) अयोग्यः, अनिक्वल (Unequal) असदृशः, अनास्क्ड (Unasked) अकथितम्, अनहैप्पी (Unhappy) अप्रसन्नः, अननैचुरल (Unnatural) अप्राकृतिकः, अनट्र्यु (untrue) असत्यम्। वैदिकसंस्कृते नञर्थस्य न अपि प्रयुज्यते यथा—नकुलम्, नखः, नासत्या, नपुंसकम्, नाक-प्रभृतयः।[२] आंग्लभाषाया नन (Non) नानसेंस (Nonsence) अज्ञानी-प्रभृतयः शब्दाः प्राप्यन्ते।

---

१. अष्टा. २/२/६, ६/३/७३, ६/३/७४; २. तत्रैव, ६/३/७५।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

निपाता उच्चावचेष्वर्थेषु निपतन्ति।[१] वैदिकभाषायां प्रयुक्ता निपाता विविधार्थेषु प्रयुक्ता अव्ययभूता भवन्ति।[२] एतेषां निपातानां रूपपरिवर्तनं न जायते। च वा ह तु अथवा यथा तथा प्रभृतयोऽनेके निपाता वेदेषु प्रयुक्ताः। आंग्लभाषायामपि निपातानां दर्शनं भवति। तेऽपि अव्ययभूतास्तत्र प्रयुक्ताः सन्ति। एण्ड (And) एवम्, आर (Or) अथवा, आइदर (Either) अथवा, नाइदर (Neither) निषेधार्थकः, ऐज (As) तथा-प्रभृतयोऽनेके निपाता भवन्ति।

ग्रीकलैटिनाङ्ग्लभाषायामुच्चारणे केचन वर्णा लुप्ता भवन्ति। वैदिकभाषातः प्राकृतभाषायामपि तथैव वर्णाः लुप्यन्ते। अनेन वर्णलोपेन प्रतीयते यद् वेदभाषा प्रकृतभाषा विद्यतेऽन्याः सर्वा भाषाः प्राकृतभूता विराजन्ते। प्रकृतिः संस्कृतं तत्रभवं तत आगतं वा प्राकृतमिति[३] आंग्लभाषीया न जानन्ति यदेते वर्णाः केन नियतेनाङ्ग्लभाषायां लुप्ता भवन्ति। प्राकृतव्याकरणानुसारं वैदिकभाषायाः क-ग-च-ज-त-द-प-य-व-वर्णाः प्रायः लुप्ता भवन्ति[४], पुनश्च ल-व-र-वर्णाः सर्वत्र लुप्यन्ते।[५] आंग्लभाषायां ग्रीकादिभाषायाञ्च नियमस्यास्य प्रचलनं द्रष्टव्यम्—

कलोपः—Know नो (कलोपे), Knowledge नालेज (कलोपे) ज्ञानम्, Knight नाइट (कलोपे) शूरः, Knief नाइफ (कलोपे) क्षुरिका, Kneel नील = जानुः, Knit नीट = वयनम्। सर्वत्र K (क) लोपः।

गलोपः—Knight नाइट = शूरः, Light लाइट = प्रकाशः, Right राइट = उचितम्, Hight हाइट = उन्नतम्। सर्वत्र g (ग) लोपः।

चलोपः—Yacht याट = नौका, चलोपः।

जलोपः—Daughter डाटर = कन्या, Light लाइट = प्रकाश, Fight फाइट = युद्धम्। सर्वत्र g जलोपः।

तलोपः—Match मैच = दीप-शलाका, क्रीडा, Catch कैच = ग्रहणम्, Pitcher पिचर = घट। सर्वत्रैव (T) त-वर्णलोपः।

दलोपः—Knowledge नालेज = ज्ञानम्, Trudge ट्रूज = पदातिगमनम्, Judge जज = न्यायाधीशः। सर्वत्र (D) दवर्णलोपो दृश्यते।

---

१. नि., १/२;
२. अष्टा., १/१/३७।
३. प्राकृ. सर्व. १/१;
४. तत्रैव, २/२।
५. तत्रैव, ३/३।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

पलोपः—Psychology साइकालॉजी = मनोविज्ञानम्, Psalm साम = स्तोत्रम्, Psalmist सामिष्ट = स्तोत्रगायकः, Psalmodist सामोडिष्ट = भजनगायकः, Psychol साइकल = आत्मसम्बद्धः। सर्वत्र पवर्णस्य लोपो विद्यते।

यवर्णलोपः—Year इयर = वर्षम्, Yesterday एस्टर्डे = ह्यः (कल इति हिन्दीभाषायाम्)। सर्वत्र Y यवर्णस्य लोपो विद्यते।

ववर्णलोपः—Write राइट = लेखनम्, Writer राइटर = लेखकः, Wrist रीष्ट = 'कलाई' इति। सर्वत्र व-(W) वर्णस्य लोपो दृश्यते।

लवर्णलोपः—Calm काम = शान्तिः, Psalm साम = स्तोत्रम्, Malm माम = प्रस्तरः, Calmly कामली = शान्तिपूर्वकम्। सर्वत्र ल-(L) वर्णस्य लोपो दृश्यते।

रवर्णलोपः—Yarn = यान = सूत्रम्, Labour लेवर = कर्मकरः, Darling डार्लिंग = परमप्रिया-प्रभृतिपदेषु र-R वर्णस्य लोपो दृश्यते।

उपर्युक्तकथनेन प्रतीयते यद् वैदिकभाषा मूलभाषा प्रकृतभाषा विद्यते यस्याः प्रभावो विविधरूपेण भारोपीयपरिवारस्य भाषायां दृश्यते। अतः सर्वा भाषाप्रकृतिः वेदसंस्कृतं तत्र भवं तत आगतं वा प्राकृतमिति अन्या भाषा विद्यन्ते।[१] वेदस्य सर्वप्राचीनत्वाद् भारोपीयभाषापरिवारस्य प्रायः सर्वासां भाषाणामुपरि प्रभावो विद्यत एव। भारोपीयपरिवारस्य या भाषाः प्राचीना वर्तन्ते तासामुपरि भौतिकमर्थात्मकं वा रूपं विशेषेण दृग्गोचरी-भवति। या आंग्लादि आधुनिकभाषा विद्यन्ते तासु रूपात्मकं परिवर्तनं विशेषेण जातम्। परिवर्तनसत्त्वेऽपि प्रभावस्यानुमानं भवत्येव। अर्थात्मकपरिवर्तनं तु विविधकारणाद् वैदिकभाषायाः केषुचित् शब्देष्वपि प्राप्यते अतो वैदिकभाषातो निर्गतानामन्यभाषाणां शब्देषु यदि भवति परिवर्तनं तर्हि किमाश्चर्यकरम्? अतो भाषात्मकदृष्ट्या आर्याणां भाषा वैदिकभाषा एव सर्वत्र व्याप्ता रूपान्तरेण मूलरूपेण च स्थिता विद्यत इति दिक्।

●

---

१. संस्कृतं नाम दैवी वागन्वाख्याता महर्षिभिः। तद्भवस्तत्समो देशीत्यनेकः प्राकृतक्रमः॥
(काव्यादर्शः, १/१३)

पुनश्च—
अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम्। विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः॥
(वा.प. १/१)

शब्दस्य परिणामोऽयमित्याम्नायविदो विदुः। छन्दोभ्य एव प्रथममेतद्विश्वं व्यवर्तत॥
(वा.प. १/१२०)

CC-0. Sampurnanand University Collection. Digitized by eGangotri

तं तु औपनिषदं पुरुषं पृच्छामि

गोस्वामी श्याममनोहरः
६३, स्वस्तिक सोसायटी. ४था रस्ता,
जुहूस्कीम, पार्ले
मुंबई-४०००५६

❋❋❋

वाच्यं ब्रह्मेति बोद्धव्यं वचनमपि च तद्बोधकं ब्रह्मतत्त्वं
बोद्धा जीवस्तदंशो वचनकरणता वाचि या सापि चैवम्।
कर्मज्ञानाद्युपायैर्विविधवचनगैः प्राप्यमप्येतदेवं
ब्रह्मैवेदं हि सर्वं श्रुतिरिति वदति ब्रह्मवादं सदैवम्॥१॥

नाधीतवानहं न्यायं सम्यङ् नोदितोऽपि हि।
गुरुभिर्गुरुकल्पानां 'हरिरामा'ख्यशास्त्रिणाम्॥२॥

श्रीमता स्मारिकायां वै लेखनार्थमतोऽत्र हि।
ब्रह्मणः सर्वरूपस्य निरूरूपयिषा मम॥३॥

कामये तुष्टये भूयात् 'बलिरामा'ख्यशास्त्रिणः।
श्रीमतः न्यायशास्त्राब्धिपारगम्यसुहृन्मणेः॥४॥

तदिह 'ब्रह्मपद-तदर्थयोः मीमांसायां किम् इदं पदं तावद् अर्थविशेषवाचकम् आहोस्वित् शब्दराशिविशेषवाचकं वा? इति भवति खलु विचिकित्सा।

कुत एतद् एवम्? इति जिज्ञासायां ब्रूमः : उभयथापि पदप्रयोगोपलब्धेः, तथा हि श्वेताश्वतरोपनिषदि श्रूयते "ब्रह्मवादिनो वदन्ति, किं कारणं ब्रह्म? कुतः स्म जाताः, जीवामः केन, क्व च सम्प्रतिष्ठाः? अधिष्ठिताः केन सुखेतरेषु वर्तामहे ब्रह्मविदो व्यवस्थाम्?" (श्वेता. उप १/१) इति। तदिह न 'ब्रह्म' पदेन

CC-0. Sampurnanand University Collection. Digitized by eGangotri

श्रुत्यादिशास्त्राणि विवक्षितानि किमुत श्रुत्यादिशास्त्रप्रतिपाद्यं परमं किल तत्त्वमेव। तथा च उक्तं श्रीमच्छङ्कराचार्यैः "ब्रह्मवादिनो ब्रह्मवदनशीलाः सर्वे सम्भूय वदन्ति 'किं कारणं ब्रह्म', 'किम्' इति स्वरूपविषयोऽयं प्रश्नः' (श्वे.उ.शां. भा.) इति तैत्तिरीयारण्यके तु छान्दोग्योपनिषदि च पुनः "ब्रह्म वदिष्ये", "ब्रह्मवादिनो वदन्ति यद् वसूनां प्रातःसवनम्, रुद्राणां माध्यन्दिनं सवनम्, आदित्यानां च विश्वेषां देवानां तृतीयसवनम्" (तैत्ति. आर. ४।१।१, छान्दो. उप. २।२४।१) इति हि एवमादिषु वचनेषु 'ब्रह्म'पदं स्वाध्यायापरपर्यायवेदादिशास्त्रवाचकमेव श्रीसायणाचार्यैः अभ्युपेतम्।

तत्र "यज्ञः कर्मसमुद्भवः, कर्म ब्रह्मोद्भवं विद्धि, ब्रह्म अक्षरसमुद्भवं, तस्मात् सर्वगतं ब्रह्म नित्यं यज्ञे प्रतिष्ठितम्", "अक्षरं ब्रह्म परमं...भूतभावोद्भवकरो विसर्गः 'कर्म'सञ्ज्ञितः" (गीता. ३।१४-१५, ८।३) इति भगवद्वचनाभ्यां 'ब्रह्म'पदं यथा कर्मोपदेशपरवेदापरपर्यायरूपं च, इत्थंभूतवेदोपादानरूपाक्षरब्रह्मापरपर्यायरूपं चापि इति प्रतिपित्सितम्। तथा हि "वेदैः च सर्वैः अहमेव वेद्यः" (गीता. १५।१५) इति वचनोक्तस्य वेदादिशास्त्राणां परमवाच्यार्थभूतस्य परब्रह्मणो वाचकम् इदं 'ब्रह्म'पदं यथा अभ्युपगतं गीतोपदेष्ट्रा तथैव "सर्वे वेदाः यत्पदम् आमनन्ति" (कठोप. १।२।१५) इति श्रुतिवचनोक्त्या च वेदरूपपरमप्रमाणभूतशब्दराशेरपि वाचकम् इदं 'ब्रह्म'पदम् इति अध्यवसीयते।

ननु किम् एतावता यदि चैतत् पदं उभयवाचकं भवेद् आहोस्विद् एकतरवाचकं वा? अयम् आशयः : उभयवाचकत्वे तु 'ब्रह्म'पदमपि स्वपरवाचकं भवेदिति। यथा च औपनिषदं ब्रह्म स्वपरानुभासकं "तमेव भान्तम् अनुभाति सर्वं तस्य भासा सर्वम् इदं विभाति" (कठोप. ५।१५, मुण्ड. उप. २।२।१०, श्वेता. उप. ६।१४) इत्येवमादिवचनैः अङ्गीकृतम्। अत्र आशङ्कते, भवतु स्वपरवाचकं एतद् 'ब्रह्म'पदं किं तेनापि? इति। इदम् इह सूक्ष्मेक्षिकया अवधेयम् : यथा हि "अत्र अयं पुरुषः स्वयञ्ज्योतिः भवति" (बृह. उप. ४।३।९) इति स्वयञ्ज्योतिष्ट्वं जीवात्मविषये प्रतिपादितम्, तथैव वेदवेदान्तादिशब्दराशेः 'ब्रह्मा'त्मकपदरूपतावद् 'ब्रह्म'रूपार्थवाचकतायामपि न खलु ब्रह्मणः स्वयञ्ज्योतिष्ट्वे काचन हानिः भवित्री, ब्रह्मण एव स्ववाचकवेदादिशब्दरूपेण आविर्भावाभ्युपगमात्।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

तदेतद् उक्तं श्रीमद्वल्लभाचार्यचरणैः—"शब्दब्रह्मव्यतिरेकेण परब्रह्मणः प्रकाशनं न भवति। शब्दब्रह्मणैव परब्रह्म प्रकाश्यते स्वप्रकाशमपि। स्वप्रकाशत्वमपि तस्य वेदेनैव उक्तम् 'अनुपलब्धे तत् प्रमाणम्' इति न्यायात्। 'पराञ्चि खानि' इति वाक्याद् अनुपलब्धत्वम्। स्वप्रकाशमपि सौरं तेजः दिवाभीतेन न दृश्यते। न च व्यवधानं किञ्चिद् अपेक्ष्यते, इन्द्रियाणामेव अग्राहकत्वात्। न हि आकाशाग्रहणे, चक्षुषा रसाग्रहणे वा व्यवधायकम् अस्ति। यदपि 'अन्यद् युष्माकम् अन्तरं बभूव' इति व्यवधानम् उक्तं तदपि स्वप्रकाशस्य सर्वात्मकस्य मनसि चक्षुषि च घटे प्रकाशमानस्य व्यवधायकं न भवति, अतः शब्देनैव ब्रह्मणो भानम्। 'यतो वाचो निवर्तन्ते' इति तु इन्द्रियरूपा वाक् लौकिकः च शब्दः, लौकिकं च मनः; अन्यथा 'तं तु औपनिषदं पुरुषं पृच्छामि', 'मनसैव इदम् आप्तव्यम्' इति विरुद्धम् आपद्येत। माहात्म्यार्थं वा द्वयम्। उभयमपि शब्दब्रह्मण एव ज्ञायते..." (भाग. सुबो. ३।१२।४६)।

तस्मात् सच्चिदानन्दाद् ब्रह्मणो जाताया रूपसृष्टेः सद्रूपतेव नामसृष्टेः चैतन्यरूपताया अपि अङ्गीकारेण तयोरेतयोश्च अव्याकृतनामरूपयोः सच्चिदानन्दे ब्रह्मण्येव किल ब्रह्मात्मकतया अवस्थितयोः 'व्याकरणमात्रं हि सृष्टिः' इति श्रौतसिद्धान्तरहस्याधिगमात्। तद् उक्तं "तद्धा इदं तर्हि अव्याकृतम् आसीत्। तद् नामरूपाभ्यामेव व्याक्रियत 'असौ नामा' अयम् 'इदं रूपः' इति" (बृह. उप. १।४।७) इति।

न च मृदि अव्याकृतयोः 'घट'-नाम-तद्रूपयोः व्याकर्ता कुम्भकार इति न खलु तयोः कुम्भकारात्मकता वक्तुं युक्ता इति वाच्यं, यदि कुम्भकारवद् अनात्मभूतमृतो हि ब्रह्मणापि स्वव्यतिरिक्ताद् अनात्मभूतात् कस्माच्चित् खलु उपादानाद् नाम-रूपयोः व्याकृतिरूपा सृष्टिः कृता इति मतं वाचनिकं स्यात्। श्रुतयस्तु पुनः बह्व्यः "आत्मैव इदम् अग्रे आसीत् पुरुषविधः। सो अनुवीक्ष्य न यद् आत्मनो अपश्यत्। सो 'अहम् अस्मि' इति अगदे व्याहरत्। ततो 'अहं'नामा अभवत्... स यत्पूर्वो अस्मात् सर्वस्मात् सर्वान् पाप्मानः औषत्", "तद् आत्मानं स्वयम् अकुरुत" (बृह. उप. १।४।१, तैत्ति. उप. २।७) इत्येवमादयो हि आत्मन एव आत्मनि नामरूपकर्मव्याकरणात्मिकां सृष्टिं प्रतिपिपादयिषन्ति, तेन तेषां ब्रह्मात्मकत्वे न काचन बाधा सम्भावयितुमपि शक्या। यथा च उक्तं "त्रयं वा इदं

CC-0. Sampurnanand University Collection. Digitized by eGangotri

नाम रूपं कर्म... ब्रह्म एतद्धि सर्वाणि नामानि... रूपाणि... कर्माणि बिभर्ति, तदेतत् त्रयं सद् एकम् अयम् आत्मा। आत्मा उ एकः सन् एतत् त्रयम्'', ''यद् वै किञ्च अनुक्तं तस्य सर्वस्य 'ब्रह्म' इति एकता'' (बृह. उप. १।६।१-३, बृह. उप. १।५।१७) इति। ताभ्यामेताभ्यां उपनिषद्वचनाभ्यां ''अन्तः प्रविष्टः शास्ता जनानाम् एकः सन् बहुधा विचारः। शतं शुक्राणि यत्र एकं भवन्ति, सर्वे वेदाः यत्र एकं भवन्ति, सर्वे होतारो यत्र एकं भवन्ति... सर्वात्मा सर्वाः प्रजाः यत्र एकं भवन्ति'' (तैत्ति. आर. ३।११।१) इति आरण्यकवचनरहस्यम् आविष्कृतं वेदनीयम्।

न च एतत् साम्प्रतम् : एतैः वचनोदितैः खलु एकत्वैः, अपारमार्थिकद्वित्वभ्रमाधिष्ठानचन्द्रमसो द्वित्वबाधकपारमार्थिकैकत्वसाधारणतयैव भाव्यम्, इति, ''स वा अयम् आत्मा ब्रह्म, विज्ञानमयः मनोमयः प्राणमयः चक्षुर्मयः श्रोत्रमयः पृथिवीमयः आपोमयः वायुमयः आकाशमयः तेजोमयो अतेजोमयः काममयो अकाममयः क्रोधमयो अक्रोधमयः धर्ममयो अधर्ममयः सर्वमयः तदेतद् इदंमयो अदोमय इति यथाकारी यथाचारी तथा भवति, साधुकारी साधुः भवति, पापकारी पापो भवति, पुण्यः पुण्येन कर्मणा भवति, पापः पापेन'' (बृह. उप. ४।४।५) इत्येवमादिवचनेषु जीवात्मस्वपि ब्रह्मैकत्वबुद्ध्यैव यत्र सर्वमयत्वस्य बाधसम्भावनारहितः तत्तद्धर्ममयताव्यपदेशः, न च मनोमयत्वादिधर्माः चिदेकरसस्य आत्मनः स्वाभाविकाः न वक्तुं शक्या इति शङ्कनीयं, प्रायपाठविरोधात्। अन्यथा विज्ञानमयत्वरूपधर्मोऽपि चिदेकरसस्य आत्मनो अस्वाभाविक इति आपद्येत। सति चैवं परस्मिन् ब्रह्मणि स्वाभाविकसर्वमयत्वन्तु कथङ्कारं शङ्काभारं निर्वोढा? यस्माद् ''ब्रह्म वा इदम् अग्रे आसीत् तद् आत्मानमेव अवेद 'अहं ब्रह्म अस्मि'। तस्मात् तत् सर्वम् अभवत्। तद् यो देवानां प्रत्यबुध्यत स एव तद् अभवत्; तथा ऋषीणां तथा मनुष्याणाम्, तद्ध एतत् पश्यन् ऋषिः वामदेवः प्रतिपेदे 'अहं मनु अभवं सूर्यः च' इति। तदिदमपि एतर्हि य एवं वेद 'अहं ब्रह्म अस्मि' इति सः इदं सर्वं भवति'' (बृह. उप. १।४।१०) इति श्रुतौ ब्रह्मत्वभानमूलिकैव सेयं ब्राह्मी सर्वमयता नहि केवले तस्मिन्नेव किमुत देवर्षिमनुष्यसाधारण्येव किल असौ समुपदिष्टा। तस्मादेव सामान्यलक्षण-प्रत्यासत्तिप्रक्रियापि न इह लब्धपदा भवितुम् अर्हति। यस्मात् ''सर्वं खलु इदं

CC-0. Sampurnanand University Collection. Digitized by eGangotri

ब्रह्म'', ''ऐतदात्म्यम् इदं सर्वं, तत् (ऐतदात्म्यं) सत्यं स आत्मा, तत् (ऐतदात्म्यं) त्वम् असि'' (छान्दो. उप. ३।१४।१, ६।८।७) इत्येवमादिषु श्रुतिवचनेषु चिदचिद्रूप-द्रष्टृदृश्यसाधारणी ब्रह्मात्मकता या निर्दिष्टा सापि निरस्तसमस्तस्वेतर-रोपाधिरहितसर्वात्मकतायामेव खलु प्रमाणम् इति आस्थेयम्।

अत एव तैत्तिरीयोपनिषदि बृहदारण्यके च ''सो अकामयत 'बहु स्यां प्रजायेय' इति... इदं सर्वम् असृजत् यदिदं किञ्च, सच्च त्यच्च अभवत्, निरुक्तञ्च अनिरुक्तञ्च निलयनञ्च अनिलयनञ्च, विज्ञानञ्च अविज्ञानञ्च, सत्यञ्च अनृतञ्च सत्यम् अभवत्'', ''द्वे वाव ब्रह्मणो रूपे : मूर्तञ्चैव अमूर्तञ्च, मर्त्यञ्चैव अमृतञ्च, स्थितञ्च यच्च, सच्च त्यच्च'' (तैत्ति. उप. २।६, बृह. उप. २।३।१) इति निरूपितम्।

न च एतदग्रिमवचन एव प्रतिषेधार्थमेव प्रसक्तयोः एतयोः द्वयोरपि रूपयोः ''अथात आदेशो 'न' इति-'न' इति'' (बृह. उप. २।३।६) इति वीप्सया बाधितत्वेन उभयविधरूपरहितं केवलं स्वप्रकाशरूपमेव ब्रह्मेति तद्बोधार्थं ''यद् रजतं तत् शुक्तिशकलम्'' इति न्यायेन बाधनीयार्थबोधकं वचनम् इदम् इति शङ्कनीयम्, अनुपपत्तेः, तथा हि ऋक्संहितायां तावत् ''पुरुष एव इदं सर्वं यद् भूतं यच्च भाव्यम् उत अमृतत्वस्य ईशान यद् अन्नेन अतिरोहति'' (ऋक्संहि. १०।९०।२) इति श्रुतौ बाधितार्थानुवृत्तिप्रक्रियाया बाधकस्य वचनस्य समुपलम्भात्। बाधितार्थस्य हि 'स्वप्रतिपन्नोपाधौ त्रैकालिकनिषेधप्रतियोगि'त्वेन अभ्युपगतत्वात्, इह तु ब्रह्मणि त्रैकालिकसर्वरूपतायाः कण्ठोपदिष्टत्वाच्च।

ननु ''...अन्यत्र भूताच्च भव्याच्च यत् तत् पश्यसि तद् वद!'' (कठोप. १।२।१४) इति उपदेशप्रार्थने ''अजो नित्यः शाश्वतो अयं पुराणः'', ''न संदृशे तिष्ठति रूपम् अस्य... नैव वाचा न मनसा प्राप्तुं शक्यो न चक्षुषा। 'असत्यः' इति ब्रुवतो अन्यत्र कथं तद् उपलभ्यते?'' (कठोप. १।२।१८, २।३।९-१२) इति आत्मस्वरूपबोधके वचने अजत्वनित्यत्वशाश्वतत्वपुराणत्वादीनां चक्षुरादिबाह्याभ्यन्तरकरणाग्राह्यत्वादेः च उपदेशात् मूर्तामूर्तरूपयोस्तु पुनः प्रत्यक्षेण उत्पत्तिनाशोपलम्भाच्च न ब्रह्मणः सर्वरूपत्वं सर्वमयत्वं वा साहजिकं सम्भवति इति चेत्, अत्र प्रतिविधास्यामः : पूर्वोदाहृते पुरुषसूक्त एव तावत् ''पुरुष एव इदं सर्वं यद् भूतं यच्च भाव्यम्। उत अमृतत्वस्य ईशानः यद् अन्नेन अतिरोहति। एतावान् अस्य महिमा अतो ज्यायान् च पुरुषः, पादो अस्य विश्वा भूतानि त्रिपादस्य अमृतं

CC-0. Sampurnanand University Collection. Digitized by eGangotri

दिवि. त्रिपाद् ऊर्ध्वम् उदैत् पुरुषः, पादो अस्य इह अभवत् पुनः। ततो विश्वं व्यक्रामत साशनानशने अभि' (तैत्ति. आर. ३।१२।१-२) इति प्रतिपाद्य अग्रिमे त्रयोदशानुवाके "अजायमानो बहुधा विजायते तस्य धीराः परिजानन्ति योनिम्" (तैत्ति. आर. ३।१३।१) इति वचने कस्मिन् अंशे स परमपुरुषः बाह्याभ्यन्तरकरणैः गृह्यमाणो जायमानः चापि सर्वथा अमृत एव तिष्ठति, केषु च अंशेषु पुनः अग्राह्यो अजायमान एव अवतिष्ठते, अन्नतया च नाश्य-मर्त्यत्वेऽपि अमृतत्वेशतया क्वचिदपि कदाचिदपि न तिरोहति इत्यादि सर्वं श्रुतावेव समाहितमिति श्रुत्येकग्राह्ये तत्त्वे शुष्कतर्कैः नैव भ्रमितव्यम्। किञ्च "अणोः अणीयान् महतो महीयान्... आसीनो दूरं व्रजति शयानो याति सर्वतः, कः तं मदामदं देवं मदन्यो ज्ञातुम् अर्हति' (कठोप. १।२।२०-२१) इति श्रुत्यादिप्रमाणैकगम्यस्य तदितरप्रमाणा-गम्यस्य च विरुद्धसर्वधर्माश्रयत्वेन प्रतिपादनोपलम्भादपि न विरोधः कश्चन।

प्रकृतम् अनुसरामः : अत एव "ब्रह्म परिवृढं सर्वथा' (निघ. निरु. १।३।६) इत्यत्र निरुक्तविवृतिकारैः "ब्रह्म' वेदान्तप्रतिपाद्यम्, ऋगादि वा, उभयमपि एतत् परिवृढं व्याप्तम्" इति निरुक्तविवृतौ निरूपितम्। ततश्च ब्रह्मसूत्रकृद्भिः महर्षिबादरायणैरपि 'अथातो ब्रह्मजिज्ञासा" (ब्र.सू. १।१।१) इति सूत्रे जिज्ञास्यत्वेन निर्दिष्टं ब्रह्म किं वेदवेदान्तप्रतिपाद्यम् अर्थरूपम् आहोस्वित् वेदवेदान्तरूपं शास्त्रमेव 'ब्रह्म'पदेन विवक्षितम् इति विचारणीये वस्तुनि नैके भाष्यकारा वेदान्तप्रतिपाद्यं परमतत्त्वमेव 'ब्रह्म'पदाभिप्रेतम् अस्ति इति मतम् आतिष्ठन्ते, तत्तु शुद्धाद्वैतवादप्रतिष्ठापकानां श्रीवल्लभाचार्याणां सर्वथैव अभिमतमपि, तैः "इदम् अत्र विचार्यते वेदान्तानां विचारः आरम्भणीयो न वा" (ब्र.सू.भा. १।१।१) इति प्रतिपादयद्भिः जिज्ञासाधिकरणस्य विषयसंशयौ विलक्षणावेव प्रदर्शितौ।

तस्माद् ब्रह्माधिगमे यद् वै किञ्चित् प्रमाणं प्रमेयं साधनं फलं वा अपेक्षितं तत् सर्वं खलु एकस्यैव ब्रह्मणो बहुभवनसामर्थ्य-सङ्कल्पप्रयुक्तिमिति सर्वस्यापि ब्रह्मात्मकत्वादेव न जातु ब्रह्मणः स्वयञ्ज्योतिष्ट्वे कस्मिंश्चिदपि रूपे वा नाम्नि वा कर्मण्यपि वा कस्याञ्चिदपि अवस्थायां बाधसम्भावना नाम। तदिदम् उक्तं भाष्यकारैः।

"स वै नैव रेमे तस्माद् एकाकी न रमते। स द्वितीयम् ऐच्छत्। स ह एतावान् आस' (बृह. उ. १।४।३) इत्यादिश्रुतिभिः, 'एष उ एव' (कौषि. उप.

CC-0. Sampurnanand University Collection. Digitized by eGangotri

३।८) इति श्रुतेः च तानि-तानि साधनानि कारयित्वा तानि-तानि फलानि ददद् भगवान् स्वक्रीडार्थमेव जगद्रूपेण आविर्भूय क्रीडति इति वैदिकैः निर्णीयते, एतदेव काण्डद्वयेऽपि प्रतिपाद्यते, अन्यथा जीवस्य साधनफले निरूपयन्त्याः श्रुतेः जीवपरत्वमेव स्यात्, न ब्रह्मपरत्वम्। कर्मब्रह्मणोरपि जीवशेषत्वं न अपेयात्। एवं सति पूर्वकाण्डे अवान्तरफलानि उक्त्वा 'एतस्यैव आनन्दस्य अन्यानि भूतानि मात्राम् उपजीवन्ति' (बृह. उप. ४।३।३२) इति श्रुतेः निरवध्यानन्दात्मकमेव परमं फलम् इति तद् विवक्षमाणः पूर्वं सामान्यतः आह ससाधनं तैत्तिरीये 'ब्रह्मविद् आप्नोति परम्' (तैत्ति. उप. २।१) इति। अक्षरब्रह्मवित् परं ब्रह्म आप्नोतीत्यर्थः (ब्र.सू.भा. १।१।११)।

अत एव श्रीमद्वल्लभाचार्यचरणैः सोऽयं श्रौतो ब्रह्मवादः स्वकीयेषु ग्रन्थेषु बहुधा प्रतिपादितः :

१. "भगवच्छास्त्रे भगवानेव प्रमाणादि(प्रमेयसाधनफलरूप)चतुष्टयम्" (भाग. सुबो. १०।२।३८)।

२. 'प्रत्यक्षादृष्टविषये पदार्थाः श्रुतिबोधिताः परस्परं विरुद्धाः ते नैकशेषं भजन्ति हि उभयोः वैदिकत्वेन कः स्याद् अत्र नियामकः? विचारकाणां बुद्धिस्तु सोपजीव्या श्रुतेः सदा। क्रियाविद्यापरत्वे तु विकल्पेन एकवाक्यता, दुष्टोऽपि आश्रीयते पक्षो विकल्पाख्यः श्रुतेः बलात्। तथैव भगवद्रूपं यथा हस्तादयः पृथक्। यथा सर्वाविरोधः स्यात् तथैव अत्र विचारणम्। सर्वरूपसमर्थत्वम् अतो ब्रह्मणि गीयते, अन्यथा प्रतिभानं यद् उच्चनीचादिभेदतः, तद्भानं तस्य कर्ता च हरिरेव तथाविधः। यत् किञ्चिद् दूषणन्तु अत्र दूष्यं चापि हरिः स्वयम्। विरुद्धपक्षाः सर्वेऽपि सर्वम् अत्रैव शोभते, 'यो अवशिष्यते सो अस्मि अहम्' इति" (भाग. सुबो. २।९।३२)।

३. "जगतः समवायि स्यात् सदैव च निमित्तकं, कदाचिद् रमते स्वस्मिन् प्रपञ्चेऽपि क्वचित् सुखं, यत्र येन यतो यस्य यस्मै यद् यद् यथा यदा स्याद् इदं भगवान् साक्षात् प्रधानपुरुषेश्वरः...सर्ववादानवसरं नानावादानुरोधि तद् अनन्तमूर्ति तद् ब्रह्म कूटस्थं चलमेव च, विरुद्धसर्वधर्माणाम् आश्रयं युक्त्यगोचरम्, आविर्भावतिरोभावैः मोहनं बहुरूपतः, इन्द्रियाणान्तु सामर्थ्याद् अदृश्यं स्वेच्छया तु तत् (दृश्यम्)" (त.दी.नि. १।६८-७२)।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

४. 'सर्ववादानवसरम्' इति, वस्तुतः श्रुतौ नानावाक्यानाम् एकवाक्यता निरूपिता, सर्वभवनसामर्थ्येन विरुद्धधर्माश्रयत्वात्। नैवंवादिनां वाक्यानि तत्तदंशवाक्यपराणि भवितुम् अर्हन्ति, तेषां तथा हृदयाभावात्। अतः सर्वे वादाः स्वभ्रान्तिकल्पितत्वेन वस्तुस्पर्शाभावाद् अनवसरपराहता एव। अस्तु वादिनां हृदयं यथा-तथा वाक्यानां सरस्वतीरूपत्वात् कथं न एकवाक्यता? इति आशंक्य आह 'नानावादानुरोधि तद्' इति। एकैको वादो ब्रह्मणः एकैकधर्मप्रतिपादकवाक्यशेष इति भगवान् तान् सर्वानेव अनुसरति' (त.दी.नि. प्र. १।७०)।

सोऽयं श्रुतिगीताब्रह्मसूत्रभागवतादिशास्त्रोदितो ब्रह्मवादः महाप्रभुश्रीमद्वल्लभाचार्याणां नैकेषु ग्रन्थेषु उपपादित इति सङ्क्षेपः।

●

CC-0. Sampurnanand University Collection. Digitized by eGangotri

यज्ञस्य महत्त्वं तद्विकासक्रमश्च

डॉ. चूडामणित्रिवेदी 'वेदाचार्यः'
संस्कृत-विभागः
वनस्थली-विद्यापीठम्, टोंक-जनपदः
राजस्थान-प्रदेशः

❋ ❋ ❋

भारतीयसंस्कृतिर्यज्ञप्रधानात्मिकाऽस्ति। यज्ञोऽयं मर्त्यलोके साक्षाद् ऐश्वर्यरूपात्मकः[१]। परलोके च स्वर्गप्राप्तेः साधनम्[२], अमरत्वस्य च प्रापको[३] विद्यते। अत एव वेदं श्रेष्ठतमं कर्म[४]। अस्य कर्मण उत्पत्तिः प्रजापतिना सृष्टेः आरम्भकाले देवानां मनुष्याणाञ्च निःश्रेयसे कृता विद्यते[५]। अतो जन्य-जनकसम्बन्धस्य अभेदेन यज्ञस्यापरं नाम प्रजापतिर्[६]विद्यते। उपयोगस्य वैविध्येन यज्ञशब्दो यज्-धातुना निष्पाद्यते। तस्यार्था देवपूजासङ्गतिकरणदानादयो भवन्ति।

अस्मिन् धात्वर्थे वैदिकयज्ञस्य आधारभूतधारणाया आशयोऽव्यक्त एव। शतपथ-ब्राह्मणे[७] 'विस्तृतो भूत्वा य उत्पद्यते स यज्ञः' इति निगदितम्। अतो यज्ञस्योत्पत्तिपरकमर्थं[८] मत्वा भारतीयवेदवेत्ता एव हि; न अपि तु आधुनिक-पाश्चात्यवेदवेत्तापि[९] यज्ञस्य मुख्यसम्बन्धं निरन्तरक्रियाशीलसृष्टेरुत्पत्तिविधया स्वीकरोति।

---

१. शत.ब्रा. १.७.१.९-१४।
२. मै.सं. १.१०.१०-१४, शी. ३.३, कौ. ५.१, गौ.नु. १.१९१।
३. तै.सं. ६.३४.७, श.ब्रा. १.७.३.१, ऐ. १.१९।
४. मै.सं. १.१०.१७, तै. १.६.८, का.सं. ३६.११।
५. य.वे. १.१.१.१, ४.१; ६. गीता ३.१०।
७. श. १.७.४.४, कौ. १०.१.१३।
८. श. ३.९.४.२३।
९. ऐ.अनु., पृ. ७।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

तेषां मते वैदिकयज्ञो वेदानुसारमस्य ब्रह्माण्डस्य पिण्डस्य च वैदिकाधारेण प्रतीकात्मकशैल्या अवबोधने साधनभूतः। अग्निचितियागस्य विविधब्राह्मणाख्यानेनाप्यस्य प्रतीतिर्भवति[१]। क्रान्तदर्शिन ऋषयः कृतयुग-त्रेतायुगयोः सन्धिकाले[२] वेदस्य आधिदैविकार्थस्य[३] रक्षणायेदं साधनमधि-कृतवन्तः। उपलब्धयाज्ञिककर्मकाण्ड एतत् सृष्टिविज्ञानस्य वाहक इति वक्तुं न पारयामः; किन्तु एतेन यज्ञस्यान्वेषणीयताऽत्यधिका भवतीत्यत्र नास्ति सन्देहावसरः।

यज्ञस्वरूपविमर्शः—शब्दनिर्वचनदृष्ट्या 'यज्ञ'शब्दः 'यज्-देवपूजासङ्गति-करणदानेषु' इति धातोः 'विच्छप्रच्छरक्षो नङ्'[४] इति सूत्रेण नङ्-प्रत्यये कृते निष्पाद्यते। एतस्यायमर्थः कर्तुं शक्यते यद् इन्द्रादिदेवतानिमित्तं यत् पूजन-हवन-प्रदानात्मकं कर्म तद्यज्ञशब्देनाभिधीयते। अपि च देशधर्मरक्षायै वेदादि-शास्त्रमर्यादायै च क्रियमाणः श्रुतिस्मृतिप्रतिपाद्यविचारसामञ्जस्यरूपो व्यापार-विशेषो यज्ञः। एवमेव ऋग्वेदाद्यार्षग्रन्थानां नियमपूर्वकं गुरोः सान्निध्येऽध्ययनं पुनश्च योग्यशिष्येभ्यस्तत्प्रदानमपि स्वाध्याययज्ञ उच्यते। एवमेव जपयज्ञः, ज्ञानयज्ञः, दानयज्ञ इति विविधो यज्ञप्रकारो वक्तुं शक्यते।

सम्पूर्णेऽपि भूमण्डले परमात्मनः पूजनमर्चनञ्च येन केनापि प्रकारेण क्रियते तद् 'यज्ञ'पदेनैवोच्यते। संक्षेपेणेदं वक्तुं शक्यते यद् ईश्वरार्पणबुद्ध्या क्रियमाणं निखिलमपि कर्म यज्ञं भवति, ईश्वरविरहितं कर्म लोकबन्धकं जायते। यथोक्तं गीतायाम्—

यज्ञार्थात् कर्मणोऽन्यत्र लोकोऽयं कर्मबन्धनः।
तदर्थं कर्म कौन्तेय मुक्तसङ्गः समाचर॥

एतदतिरिक्तं श्रौतसूत्रकारेण महर्षिणा कात्यायनेन 'अथ यज्ञं व्याख्यास्यामः' इति प्रतिज्ञायाग्रे यज्ञस्वरूपं 'द्रव्यदेवतात्यागः' इति सूत्रेण निरूपितं प्राप्यते, तदनुसारं देवतामुद्दिश्य हविष्यान्नादिपदार्थानां सोमरसादि-विधिविहितद्रव्याणां वा अग्नौ परित्यागो याग उच्यते। अत्र भाट्टदीपिका-

---

१. डॉ. हीस्टर मैन।

२. श. ६.९, मै.सं. ३.१.५।

३. ऐ.अनु. (पृ. ८ उद्धृतं महा.भा.), श. २.३२.३२।

४. अष्टाध्यायी ३.३.१०।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

कारेणाप्युक्तं यद् यत्र प्रक्षेपाङ्गो देवतोद्देश्यपूर्वको द्रव्यत्यागोऽनुष्ठीयते स यागपदार्थः[१]। भगवता वेदव्यासेनापि मत्स्यपुराणे यज्ञस्वरूपं तथैव परिभाषितमस्ति। तद्यथा—

देवानां द्रव्यहविषाम् ऋक्सामयजुषां तथा।
ऋत्विजां दक्षिणानाञ्च संयोगो यज्ञ उच्यते।।[२]

यज्ञस्य विकासः—वैदिकयज्ञः स्वीयमहत्तायां यादृशोऽप्रतिमः, वैविध्ये जटिलतायाञ्च तादृश एवानुपमः। अग्निहोत्रयागोऽन्ययज्ञस्य कल्पनाया उद्गमः। अनेके विद्वांसो मन्यन्ते यद् व्यष्टेः समष्टित्वप्राप्तिरेव यज्ञस्य विकासः[३]।

दैनन्दिनोपासनया सह प्रजोत्पत्तये, रोगनिवारणार्थम्, अमृतत्वप्राप्तेश्च नवीनाकांक्षया दर्शपूर्णमासयज्ञ-चातुर्मास्ययज्ञयोः कल्पना सञ्जाता। दर्शपूर्णमासयज्ञो मुख्यतया प्रजोत्पत्तिविषयकः शरीररचनाया विषयेऽप्यस्य प्रयोजनमस्ति[४]। चातुर्मास्यस्य वैश्वदेवः, वरुणप्रघासः, साकमेधस्तदन्तर्गतः पितृयज्ञश्च क्रमशो मृत्युरोगशत्रूणां सामूहिकप्रयासान्[५] सम्पादयन्ति।

अत एवैतत्त्रिविधयज्ञस्य मूलभावना प्राचीनतमा विद्यते[६]। सोमयज्ञस्य प्रवर्त्तनं पश्चादेव जातम्, यतो हि सोमस्य आहुतिरनन्तरकाले आरब्धा[७]; किन्तु ऋग्वेदे यजमानाय 'सुन्वतः' इति विशेषणम्, 'अद्रिग्रावा' इत्यादिशब्दानां प्रयोगाश्च एतद्विषये स्पष्टं प्रमाणयन्ति यद् ऋग्वेदकाले एव सोमयागस्य प्रवर्त्तनं जातम्। ऋग्वेदे[८] अश्वमेधप्रकरणेन पशुयागस्यापि अस्तित्वं सिद्ध्यति। इदं वक्तुं शक्यते यत् प्रायः समेषां यज्ञानां प्रचलनम् ऋग्वेदकाले एव सञ्जातम्। यज्ञस्य जटिलतया व्ययसाध्यतया च एतस्य बहुरूपत्वं[९] समापितम्।

---

१. गीता ३.९।

२. भट्टदीपिका-टीका, ४.२.२।

३. Sacrifice in the Ṛgveda, p. 284-285.

४. श., प्रथणखण्डः, मै.सं. ४.१, तै.सं. ३.२-९, ३.१-११।

५. मै.सं. ९.१.१०.५-१७।

६. दर्शं च पौर्णमासं च अग्निहोत्रं च धीमतः। चातुर्मास्यानि चैवासन् तेषु धर्मः सनातनः।। (म.भा. २६९.२०)

७. Sacrifice in the Ṛgveda, p. 284.

८. ऐ.अनु., पृ. १०; ९. ऐ.अनु., पृ. १०।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

एतत् परिवर्तन-परिवर्धनस्य पुष्टिः अन्यरीत्यापि भवति। प्रथमा रीतिस्तु इयं यत् सामान्यतया यज्ञो द्विविधः[१]—एकः प्रकृतियज्ञः, अत्र च अन्य-यज्ञानां परिवर्धितरूपस्य निदर्शनं भवति। दर्शपूर्णमासयज्ञः इष्टियागस्य प्रकृतियज्ञः, अग्निष्टोमश्चात्यग्निष्टोमः प्राचीनयागो विद्यते। निरुक्तस्य 'पूर्वयाज्ञिक'शब्दोऽपि[२] अत्र प्रमाणम्। अयं हि शब्दः पूर्ववर्त्ती परवर्त्ती वा याज्ञिकानां परस्परं मतभेदस्य साधकोऽस्ति। स्वतन्त्रमुख्यदृष्ट्या यज्ञो द्वादशविधः। तत्र सप्त हविर्यागाः। ते यज्ञाः निम्नाङ्किताः सन्ति—

१. अग्निहोत्रयागः।
२. दर्शयागः।
३. पूर्णमासयागः।
४. वैश्वदेवयागः।
५. वरुणप्रघासयागः।
६. साकमेधयागः।
७. सुनासीरीययागश्च।

चत्वारः सोमयागाः। ते च—

१. अग्निष्टोमयागः।
२. राजसूययागः।
३. वाजपेययागः।
४. अश्वमेधयागः।

एतदतिरिक्त एक इष्टकायागोऽग्निचितिरिति। एतेषु द्वादशविधेषु यागेष्वनेकेऽङ्गभूतयागा आसन्, ते कालान्तरे स्वतन्त्रयागरूपेण प्रसिद्धा अभवन्। यथा पितृयज्ञः, हविर्यज्ञो वा साकमेधस्य अङ्गयागः, यो हि कालान्तरे पितॄणां शिवस्य चोपासनायां स्वतन्त्रतया व्यवहृतः[३]।

एतावता उपर्युक्तद्वादशविधो यज्ञः कालान्तरे स्वतन्त्ररूपेण ख्यातिलब्धानां चतुर्विधयागानां मेलनेन षोडशविधो जातः। ते च ख्यातिलब्धा इमे चत्वारो यज्ञाः सन्ति—१. पितृयागः, २. पशुयागः, ३. प्रवर्ग्ययागः, ४. सौत्रामणीयागः।

---

१. तै.सं. भाष्ये १.७; २. नि. ७.६।
३. मा.श्रौ.सू. १.१.२।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

एतदतिरिक्ता अग्निष्टोमस्य पञ्च विकृतियज्ञाः[१] सन्ति—उक्थ्ययागः, अतिरात्रयागः, षोडशीयागः, अत्यग्निष्टोमयागः, आप्तोर्यामयागश्च।

शतपथब्राह्मणे[२] सूत्रग्रन्थे च द्वादशाहयाग-षडहयाग-अभिसवनयाग-विश्वजिद्यागप्रभृत्यनेकेषां सोमयागानां विवरणमुपलभ्यते। सोमयागानां विस्तारक्रमे तेषां त्रिधा विभागो जातः, एकाह-अहीन-सत्रभेदेन[३] च। एकस्मिन्नेव दिवसे त्रितयसवनस्य पूर्तौ एकाहः, यदि एकस्मिन् दिवसे न यज्ञस्य पूर्तिस्तदा अहीनः, वर्षपर्यन्तावधिपूर्तौ सति सत्रयागः।

अश्वमेधाधारितपुरुषमेधः सर्वमेधश्च मुख्ययागौ; किन्तु एतयोः मन्त्राः वाजसनेयिसंहितायां[४] ब्राह्मणेषु च तैत्तिरीयब्राह्मण[५] एव उपलभ्यन्ते। शतपथब्राह्मणश्च[६] अस्याख्यानं प्रस्तौति।

सूत्रेषु चेमे सांख्यायने वैताने च उल्लिखिताः[७] सन्ति। अस्य पूर्ववर्तित्वं परवर्तित्वं च विवादास्पदम्[८]। ऋग्वेदीयपुरुषसूक्तस्य भावना[९] पुरुषमेधं प्राचीनमेव समर्थयति। अग्न्याधानयागो न स्वतन्त्रः; अपि तु सर्वेषां यज्ञानामाधारभूतः; किन्तु स्वतन्त्रफलत्वेन[१०] स्वीयां स्वतन्त्रां सत्तां विधत्ते। अतोऽस्य त्रिविध-भेदस्यापि स्वतन्त्रतया व्याख्यानं भवति। अस्य त्रिविधभेदो निम्नाङ्कितः—

१. अग्न्याधानम्, २. अग्न्युपस्थानम्, ३. पुनराधानञ्च। सर्वं मिलित्वा एकविंशतिसंख्याका यज्ञा भवन्ति। गोपथब्राह्मणेऽपि[११] यज्ञस्य एकविंशति-भेदाः स्वीकृताः सन्ति।

अग्निहोत्रयागादारभ्य सर्वमेधयज्ञपर्यन्तं यज्ञस्य विकासक्रमे श्रीमद्भगवद्गीतायाः एष क्रमो द्रष्टव्यः—

ब्रह्मार्पणं ब्रह्महविर्ब्रह्माग्नौ ब्रह्मणा हुतम्।
ब्रह्मैव तेन गन्तव्यं ब्रह्मकर्मसमाधिना।।

---

१. य.त.प्र.पृ. ८१-८६, अत्र वाजपेयस्यापि उल्लेखोऽस्ति।
२. श. ४.५.४.१४
३. तै.सं.मा. १.२००।
४. वा.सं. ३०
५. तौ. ३.४।
६. श. १३.६
७. शा.सू. १६.१०.९।
८. वै.ध.द. २.४३०
९. ऋग्वेदः १०.९०।
१०. मै.सं. १.६.८, का.सं. ८.१;
११. गो.पू. १.१२, ५.२५।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

दैवमेवापरे यज्ञं योगिनः पर्युपासते।
ब्रह्माग्निपरं यज्ञं यज्ञेनैवोपजुह्वति।।
श्रोत्रादीनीन्द्रियाण्यन्ये संयमाग्निषु जुह्वति।
शब्दादीन्विषयानन्यः इन्द्रियाग्निषु जुह्वति।।
सर्वाणीन्द्रियकर्माणि प्राणकर्माणि चापरे।
आत्मसंयमयोगाग्नौ जुह्वति ज्ञानदीपिते।।
द्रव्ययज्ञास्तपोयज्ञा योगयज्ञास्तथापरे।
स्वाध्यायज्ञानयज्ञाश्च यतयः संशितव्रताः।।
अपाने जुह्वति प्राणं प्राणेऽपानं तथापरे।
प्राणापानगती रुद्ध्वा प्राणायामपरायणाः।।
अपरे नियताहाराः प्राणान्प्राणेषु जुह्वति।
सर्वेत्येते यज्ञविदो यज्ञः क्षपितकल्मषः[१]।।

भगवता श्रीकृष्णेन तपोयज्ञ-योगयज्ञ-प्राणयज्ञ-स्वाध्याययज्ञ-ज्ञानयज्ञादि-निरूपणं विधाय यज्ञविकासक्रमं प्रतिपादितम्।

१. श्रीमद्भगवद्गीता-४.२४-३०।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

महाभाष्ये वर्णिता विद्याविशेषाः

आचार्य-वि. मुरलीधरशर्मा
आचार्यः, शिक्षाविभागः
राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः

❋❋❋

पातञ्जलं महाभाष्यं नन्वत्यन्तप्रमाणभूतो ग्रन्थः संस्कृतव्याकरणस्य। न्यायमीमांसादिशास्त्रटीकाग्रन्थानां केवलभाष्यशब्देनैव व्यवहारः। परमस्य श्रीमद्भगवत्पतञ्जलिप्रणीतस्य महाभाष्यशब्देन व्यवहार इतरभाष्यवैलक्षण्येन तन्महत्त्वं बोधयति।

कृतेऽथ पतञ्जलिना गुरुणा तीर्थदर्शिना।
सर्वेषां न्यायबीजानां महाभाष्ये निबन्धने ॥ इति।

वाक्यपदीयकारिकाव्याख्यावसरे तथा चोक्तं पुण्यराजेन—"तच्च भाष्यं न केवलं व्याकरणस्य निबन्धनं यावत्सर्वेषां न्यायबीजानां बोद्धव्यमित्यत एव सर्वन्यायबीजहेतुत्त्वादेव महच्छब्देन विशिष्य महाभाष्यमित्युच्यते लोके" इति।

अलब्धगाधे गाम्भीर्यादुत्तान इव सौष्ठवात्।
तस्मिन्नकृतबुद्धीनां नैवावस्थितनिश्चयः ॥

इति भर्तृहर्युक्तदिशा महाभाष्यस्य रचनासरण्याः प्रसादगुणमयत्त्व-निसर्गरमणीयत्वसंवादमोहकत्त्वानि, भाषायाश्च सारल्यार्थगाम्भीर्यव्यङ्ग्यमयत्त्वानि विशिष्य नैकविद्याकरत्त्वमित्यमूनि वैलक्षण्यानि तन्महत्त्वं पुष्णान्ति नितराम्। धर्म-यज्ञ-कृषि-वैद्यादिविभिन्नविद्या अस्मिन् तत्तत्सूत्रव्याख्यानावसरे विकीर्णोदाहरण-प्रत्युदाहरणमुखेन संवर्ण्य स्वीयविविधविद्यावैदुष्यातिशयं निरतिशयं प्रकाशयामास भगवान् भाष्यकारः। विविधविद्याविषयिणीं पतञ्जलेः प्रकाण्डपाण्डितीं प्रकाशयितुमेवायं परिमितः प्रयासः।

योगेन चित्तस्य पदेन वाचां मलं शरीरस्य च वैद्यकेन।
योऽपाकरोत्तं प्रवरं मुनीनां पतञ्जलिं प्राञ्जलिरानतोऽस्मि ॥

योगसूत्रप्रणयनेन मानसं, महाभाष्यनिबन्धनेन वाचां, चरकसंहितारचनया शारीरञ्च मलं योऽपाकरोत्स खलु भगवान् पतञ्जलिः। भर्तृहरिणाप्यभाणि—

CC-0. Sampurnanand University Collection. Digitized by eGangotri

कायबुद्धिविषया ये मला हि समवस्थिताः।
चिकित्सालक्षणाध्यात्मशास्त्रैस्तेषां विशुद्धयः।। (वा.प. ४.१.१४८)

इत्थं मानसशारीराध्यात्मविद्याविशारदस्य भगवतो भाष्ये वैद्यविद्या-विशेषोल्लेखनं ननु नितरां नैसर्गिकम्। महाभाष्ये तत्र तत्र समुल्लिखितैः शारीरिकविकृति-सौन्दर्य-रोगौषध्यादिसम्बद्धैः नानोदाहरणैः स्फुटं भवति यद् भगवतो वैद्यविद्यावैशद्यं निरुपममिति। तथा हि—

स्वाङ्गपरिभाषा

स्वाङ्गानां पतञ्जलिप्रतिपादिता परिभाषा ह्यत्यन्तवैज्ञानिकी। अवयवानां वैशिष्ट्यषट्कस्य विवृतिः भगवतः सूक्ष्मेक्षिकामक्षिसात्कारयति। तथा हि— 'स्वाङ्गाच्चोपसर्जनादसंयोगोपधात्' (४.१.५४) इत्यस्य सूत्रस्य भगवतो भाष्यम्—

अद्रवं मूर्तिमत्स्वाङ्गं प्राणिस्थमविकारजम् ।
अतत्स्थं तत्र दृष्टञ्च तस्य चेत्तत्तथायुतम् ।।

अद्रवम्। मूर्तिः = काठिन्यम्, अथवा असर्वगतद्रव्यपरिमाणम्, सा यस्यास्तीति मूर्तिमत् (अविभु द्रव्यपरिमाणम्) अविकारजमिति। विकारो वातादिवैषम्यम्, तस्मात् यन्न जातम् इत्यर्थः। तथा अप्राणिस्थमपि सम्प्रति, यत्पूर्वं प्राणिनि दृष्टं तदपि स्वाङ्गम्। यथा रथ्यां पतिताः केशाः। तस्य चेदिति— अप्राणिनोऽपि मुखं स्वाङ्गं भवति, यथा प्राणिना सम्बद्धं तथैव अप्राणिनापि सम्बद्धम्।

एतत्परिभाषानुसारं रक्तकफादि द्रवत्वात्, मनोबुद्ध्यादीनि अमूर्तत्वात्, शालासेनादीनामङ्गरूपेण प्रचलितमुखजंघनादीनि अप्राणिस्थत्त्वात्, पिटकशोफादीनि विकारजत्त्वात् स्वाङ्गानि न। रथ्यायां पतितानि केशश्मश्र्वादीनि, मूर्तीनां नासिकादीनि स्वाङ्गानि।

स्वाङ्गमदो ध्रुवमध्रुवञ्चेति द्विप्रकारकम्। येषां छेदनेन प्राणी निष्प्राणो भवति तानि ध्रुवाणि, प्राणी जीवितो भवति तान्यध्रुवाणीति। इत्थं भाष्यकृतो मतमनुसृत्य मुखोदरस्फिक्पृष्ठललाटपर्शुशीर्षादीनि स्वाङ्गानि ध्रुवाणि, नखकेशबाहुदन्ता-दीन्यध्रुवाणि।

सुन्दरविकृताङ्गवाचकशब्दाः

महाभाष्ये अवलोक्यमानास्सुन्दरविकृताङ्गवाचकशब्दा भगवतः पतञ्जलेः शरीरविज्ञानपाण्डितीपरिचायकाः। तादृशाः कतिचन शब्दा अत्र दिङ्मात्र-मुदाह्रियन्ते।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

सुन्दरवाचकाः

अवनतललाटं यस्याः सा प्रत्यग्ललाटा (४.१.६०), विशालललाटः प्रललाटः (६.२.१७७), विशालपृष्ठः प्रपृष्ठः।

विकृताङ्गवाचकाः

घाटः = अत्यन्तप्रांशुः (६.१.१५८), दन्तुरः दीर्घदन्तः (५.२.१०६), षडिकः षडङ्गुलिमान् (१.४.१८), चर्मतिलः = त्वचि चिह्नवान्, कालकः = श्यामतिलकचिह्नवान् (१.२.३१), चिल्लः, पिल्लः = क्लिन्ने सदा यस्य चक्षुषी (५.२.३३)।

इत्थं गोकर्णखरकर्णगोजङ्घाश्वजङ्घैणीबन्धादयो भाष्ये परिदृश्यमानाः शब्दाः शारीरिकसंरचनायाः सूक्ष्मनिरीक्षणपरिचायकाः।

शारीरचेष्टाकारणेन रूढाश्शब्दा अपि दृष्टिपथमधिरोहन्ति भाष्ये। यथा— तुन्दपरिमृजः = यो हि तुन्दं परिमार्ष्टि तुन्दपरिमृजस्स भवति।

यः अक्षिणी निमील्य भाषते स अक्षिनिकाणः।
यो हस्तौ उत्थाप्य भाषते स उद्बाहुः। (६.२.१७७)
निद्रावेलायां यो गोरिकां कुरुते स नासिकन्धयः।

व्याधयः

"रोग उपतापः स्पर्श इति रोगपर्यायाणि" इति "पदरुजविशस्पृशो घञ्" (३.३.१६)। इत्यस्मिन् सूत्रभाष्ये रोगपर्याया समुल्लिखिता भाष्यकृता भाष्ये तत्र तत्र नैके रोगास्समवर्णिषत। तथा हि—

(१) कण्डूतिः = वेदनामात्रसान्निध्ये रोगो ज्ञेयः। अस्ति मे कण्डूतिरिति वेदनामात्रसान्निध्ये (३.१.२७) इति भाष्यम्।
(२) शारदः शारदिको वा = शरदि जायमानो रोगविशेषः।
(३) अतिसारः = अतिसारो व्याधिः। (३.३.१७)
(४) छर्दिका = वमनव्याधिः। (५.४.४९)
(५) वैपादिकः = पादरोगः। (५.२.१०३)
(६) दद्रुः = चर्मरोगः। (५.२.१००)
(७) विकम्पितः = वातकम्पः। (६.४.२४)

द्रव्यगुणवर्णनम्

भाष्यकारो भाष्ये नैकत्र द्रव्याणि तद्गुणविशेषान् तज्जायमानरोगाँश्च व्याचष्टे।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

(१) दधित्रपुसम् = दधित्रपुसं प्रत्यक्षज्वरः (१.१.५९) दध्येव विशिष्टावस्थायुक्तं सत् त्रपुसमुच्यते। अदो ज्वरनिमित्तमतो न खाद्यम्।

(२) यवागूः = मूत्राय कल्पते यवागूः। (२.३.१३)

(३) मधु = श्लेष्मघ्नं मधु। (६.१.१२)

(४) घृतम् = पित्तघ्नं घृतम्। (६.१.१२) "आयुर्घृतमायुषो निमित्तमिति गम्यते" इत्यन्यत्र।

औषधानि

भाष्ये अनेकौषधिविशेषास्संवर्णिताः। संफला, भस्त्रफला, अजिनफला, पिण्डफला, शणफला, श्वेतफला, त्रिफला, अमूला, ओदनपाकी, शङ्कुकर्णी, शालपर्णी, शङ्खपुष्पी, दासीफली, दर्भमूली, गुग्गुलु, कुस्तुम्बरी, निन्दुकी (४.१.६४)।

मातृदोषविशेषेण शिशोः रोगोत्पत्तिः

अन्तर्वर्तिन्याः स्त्रियः आहारविहारादीनां कुण्ठाक्रोधपरितापादिमानसावस्थानाञ्च प्रभावो जनिष्यमाणशिशुं प्रभावयतीति अर्वाचीनवैद्यविज्ञानसमयः। गर्भावस्थायामन्तवर्तिन्याचरणीयानंशान् व्याकुर्वाणो भाष्यकारः तदाचरणेन सञ्जनिष्यमाणशिशुदोषान् सविशदं व्याचष्टे 'चतुर्थ्यर्थे बहुलं छन्दसी'ति सूत्रे (२.३.६२)। तथा हि—

"या खर्वेण पिबति तस्यै खर्वो जायते" इति। अपक्वशरावेण पेयपानेन वामनो जायत इत्यर्थः। "यां मलवद्वाससं (रजस्वलां) सम्भवन्ति (गर्भाधानार्थमुपगच्छन्ति) ततो जातोऽभिशस्तः" (मिथ्यारोपितपातकः), यामरण्ये तस्यै स्तेनो, यां पराचीं (लज्जादिना परागवलितवदनाम् अन्यचित्तां वा) तस्मै ह्रीतमुखोऽपगल्भः (अप्रगल्भः), या स्नाति तस्या अप्सुमारुको (मरणशीलः) याऽभ्यङ्क्ते (तैलादिना स्नाति) तस्मै दुश्चर्मा (कुष्ठी), या प्रलिखते (चित्रादि लिखति) तस्यै खलतिरपमारी (खलतिः = अनेकशिराः, अपमारी = अपमृत्युयुक्तः), या अङ्क्ते (कज्जलादिना नेत्रे अलङ्करोति) तस्यै काणः, या दतो धावते तस्यै श्यावदन् (मलिनदन्तः), या नखान्निकृन्तते तस्यै कुनखी, या कृणत्ति (औषध्यादीन् छिनत्ति) तस्यै क्लीबः, या रज्जुः सृजति तस्या उद्बन्धुको (गले रज्जुं बध्वा मरणशीलः), या पर्णेन पिबति तस्या उन्मादको जायते।

रजस्वलां नाधिगच्छेदिति भाष्यकारवचनमिदं श्रुतिरपि समर्थयति—"न सहासीत नास्या अन्नमद्याद् ब्रह्महत्यायै ह्येषा वर्णं प्रतिमुच्यास्तथो खल्वाहुरभ्यञ्जनं वाव स्त्रियो अन्नमभ्यञ्जनमेव न प्रतिगृह्यं काममन्यत्।" या खर्वेण पिबति तस्यै

CC-0. Sampurnanand University Collection. Digitized by eGangotri

खर्वः, तिस्रो रात्रीर्व्रतं चरेत्। "अञ्जलिना वा पिबेदखर्वेण वा पात्रेण प्रजायै"। (तैत्तिरीयश्रुतौ रजस्वलाप्रस्तावः)

इत्थमेवायुर्भोगचिकित्सक-चिकित्साविधान-रोगप्रतिबन्धकोपायादीनां प्रासङ्गिकी चर्चा प्रस्तुता परिदृश्यते महाभाष्ये।

कृषिविद्या

महाभाष्ये क्षेत्रपरीक्षण-सिञ्चन-कर्षण-संरक्षण-बीजवपन-धान्यसञ्चयादि-कृषिविषयक-नानाव्यापारसम्बद्धानि परश्शतमुदाहरणानि प्रेक्षं प्रेक्षं पतञ्जलेः कृषिविद्यावैशद्यविषये जायते विस्मयः। विस्मयाविष्कारकाण्युदाहरणानीमानि क्रमशोऽत्र प्रस्तूयन्ते।

कृषेरर्थः

भाष्यकारसमये कृषिर्भारतस्य मुख्यो व्यवसाय आसीत्। तदानीन्तनकाले कृष्-धातुजस्य कृषेर्विलेखनमेव नार्थ आसीत्। अर्वाचीनकृषिकर्मणि समाविष्टा भूमिसज्जीकरण-विलेखन-खनन-बीजवपन-सस्यकर्तनादिक्रियाः तात्कालिककृषेरर्था आसन्।

"हेतुमति च" इति सूत्रस्य भाष्यावसरे कृषेः णिजुत्पत्त्यनुत्पत्तिविचारवेलायां भाष्यकारो व्याचष्टे—"कृष्यादिषु चानुत्पत्तिर्वक्तव्या। एकान्ते तूष्णीमासीन उच्यते पञ्चभिर्हलैः कृषतीति तत्र भवितव्यं- पञ्चभिर्हलैः कर्षयतीति।"

"कृष्यादिषु चानुत्पत्तिः। नानाक्रियाणां कृष्यर्थत्वात्। कृष्यादिषु चानुत्पत्तिस्सिद्धा। कुतः नानाक्रियाणां कृष्यर्थत्वात् नानाक्रियाः कृषेरर्थाः। नावश्यं कृषिर्विलेखन एव वर्तते। किं तर्हि? प्रतिविधानेऽपि वर्तते। यदसौ भक्तबीजबलीवर्दैः प्रतिविधानं करोति स कृष्यर्थः। आतश्च प्रतिविधानेऽपि वर्तते।"

अतः कृषेः न विलेखनमेवार्थः, किन्तु विलेखनप्रेरणं, विलेखनोपकरण-व्यवस्थापनं, विलेखनविषये यावत्प्रतिविधानकरणञ्चार्थः।

क्षेत्रपरीक्षणम्

तदानीन्तनकाले क्षेत्रस्वभावं सुपरीक्ष्य बीजमुप्यते स्म। तथा चोच्यते—"कृभ्वस्तियोगे सम्पद्य कर्तरि च्विः" (५.४.५०) इति सूत्रे सम्पद्यन्तेऽस्मिन् शालय इति। क्षेत्रेऽस्मिन् शालयो भविष्यन्ति, अस्मिँश्च यवा भविष्यन्तीत्यादिकथनं तदैव युज्यते यदा क्षेत्राणां धान्यादीनाञ्च विशेषज्ञानं स्यात्।

ज्ञानमदस्तदानीमासीदित्यनुभावयत्येतद् वाक्यम्।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

क्षेत्रसिञ्चनम्

पुराकाले कुल्यादिभिः क्षेत्रसिञ्चनं सम्पाद्यते स्म। कृषिः केवलं वर्षाधार एव नासीत्। कुल्यादिभिः जलसेचनादिना निरभिवर्षेऽपि शाल्यादीनुत्पादयन्ति स्म। "मीनाति मिनोति दीङां ल्यपि च" (६.१.५०) इति सूत्रं भाष्यकार एवं व्याचष्टे।

"अन्यार्थमपि प्रकृतमन्यार्थं भवति। तद्यथा शाल्यर्थं कुल्याः प्रणीयन्ते। ताभ्यश्च पानीयं पीयत उपस्पृश्यते च शालयश्च भाव्यन्ते। ईदृशव्यवहारदर्शनात् शाल्यर्थं कुल्यानां व्यवस्थापत्तं बहुप्रचारमासीदिति स्फुटं वक्तुं शक्यम्। अत एव 'बहुगुणवतुडति संख्या' (१.१.२४) इति सूत्रे "बहुत्र शाल्यर्थं कुल्याः प्रणीयन्ते" इत्युक्तम्।

भूमेः कर्षणम्

हलविलिखितरेखा सीतेत्यभिधीयते। कर्षणं द्विवारं त्रिवारं नैकवारमपि भवति स्म। बीजवपनेन सह द्वितीयतृतीयवारकर्षणं "द्वितीया करोति" "तृतीया करोति" "बीजा करोति" इति व्यवह्रियते स्म।

क्षेत्रकोणेषु यत्र हलगमनावकाशो न भवति, तत्र केनचित्साधनविशेषेण कृष्यते स्म। तत्साधनञ्च "आखः, आखरः, आखनिकः, आखनिकवकः" इत्येभिर्नामभिः व्यवह्रियते स्म।

"खनो घच्" (३.३.१२५) इति सूत्रभाष्ये भाष्यकार एवं व्यनक्ति—खनेः डडरेकेकवकाः वाच्याः। डो वक्तव्यः आखः, डरो वक्तव्यः आखरः, इको वक्तव्यः आखनिकः, इकवको वक्तव्यः आखनिकवक इति।

बीजवपनम्

भाष्यकृता नैकवारं वपनशब्द उल्लिखितः। "पुंयोगादाख्यायाम्" (४.१.४८) इत्यत्र "माषवापिणी, ब्रीहिवापिणी" इत्युदाहृतम्, "कुमति च" (८.४.१६) इत्यत्र तु उदाहृतैः कुम्भस्य वापः कुम्भवापः, माषाणां कुम्भवापो माषकुम्भवापः इत्युदाहरणैः सीतायां कुम्भेनापि माषादिबीजा उप्यन्ते स्मेति गम्यते। किञ्च कृषकैरसकृत् धान्यद्वयं सकृदेवोप्यते स्म। "सहयुक्तेऽप्रधाने" (२.३.१९) इत्यत्र "तिलैस्सह माषान् वपति। तिलैर्मिश्रीकृत्य माषा उप्यन्ते" इति भाष्यम्। क्षेत्रं तु माषवपनार्थं सज्जीक्रियते स्म। तत्र प्राधान्येन माषा गौणतया तिला अप्युप्यन्ते स्म।

पूर्वसूत्रमेव व्याकुर्वता भाष्यकारेणाभिहितम्—"भवेत्सिद्धं यदा तिलैर्मिश्रीकृत्य माषा उप्येरन्। यदा तु खलु कस्यचिन्माषबीजावाप उपस्थितः तदर्थञ्च क्षेत्रमुपार्जितं तत्रान्यदपि किञ्चिदुप्यते यदि भविष्यति।"

CC-0. Sampurnanand University Collection. Digitized by eGangotri

व्रीहिनामानि

बीजवपनं सस्यकर्तनञ्चाधृत्य व्रीहिनाम निश्चीयते स्म तदानीन्तनसमये। 'कालात्साधु पुष्प्यत् पच्यमानेषु' (४.३.४३) इति सूत्रस्योदाहरणानि अत्र प्रमाणभूतानि। तथा हि, "हेमन्त उप्यन्त इति हेतोः हेमन्तिकाः, शरदि उप्यन्ते स्मेति शालयः शारदाः, ग्रीष्मे पच्यन्त इति गोधूमादयो ग्रैष्माः।"

"आश्वयुज्या वुञ्" (४.३.४५) इत्यत्र च "आश्वयुजमासे उप्यमाना माषा आश्वयुजाः" इत्युदाहृतम्।

क्षेत्रसंरक्षणम्

कुसूलादिना क्षेत्रं संरक्ष्यते स्म। "कर्मवत्कर्मणा तुल्यक्रियः" (३.१.८७) इति सूत्रं व्याकुर्वन् भाष्यकार आह—"कथं ज्ञायते भिद्यते कुसूलेनेति? न चान्यः कर्ता दृश्यते क्रिया चोपपद्यते। किञ्च भोः विग्रहवतैव कर्त्रा क्रियायाः भवितव्यम्, न पुनर्वातातपकाला अपि कर्तरि स्युः। भवेत्सिद्धं—यदि वातातपकालानामन्यतमः कर्ता स्यात्, यस्तु खलु निर्वाते निरभिवर्षे अचिरकालकृतः कुसूलः स्वयमेव भिद्यते तस्य नान्यः कर्ता भवति अन्यदतः कुसूलात्।"

अयमर्थः—क्षेत्रादीनां संरक्षणार्थं मृदा पाषाणैर्वा निर्मितभित्तेर्नाम कुसूल इति। भिद्यते कुसूलः स्वयमेवेत्यत्र कुसूलस्य कथं कर्तृत्वमित्याक्षिप्य न चान्यः कर्ता दृश्यते, क्रिया चोपलभ्यते। अतः कोऽपि कर्ताऽवश्यमाश्रयणीयः। स चान्याभावात् कुसूल एव। विग्रहवतैव कर्त्रा भवितव्यमिति न, किन्तु वातातपादयोऽपि कर्तारः। एवमपि यत्र वातवर्षादिकं नास्ति नूत्नश्च कुसूलः स्वयमेव भिद्यते तत्र कुसूल एव कर्ता।

प्राकृतिकोत्पातसूचनाः

विविधवर्णविभूषिता चपला सौदामिनी प्राकृतिकपरिणामकारिणी भवतीत्यद्यावध्यप्यनाविष्कृतं किमप्यद्वितीयं वैज्ञानिकं सत्यं सहस्रवर्षेभ्यः प्रागेवाविश्चकार भगवान् भाष्यकारः "चतुर्थी सम्प्रदाने" इति सूत्रस्य भाष्ये। तथा हि—"उत्पातेन ज्ञाप्यमाने। उत्पातेन ज्ञाप्यमाने चतुर्थी वक्तव्या।"

वाताय कपिला विद्युत् आतपायातिलोहिनी।
पीता भवति सस्याय दुर्भिक्षाय सिता भवेत्॥

यज्ञविद्या

पतञ्जलेः याज्ञिकत्वात् तत्प्रणीतभाष्ये यज्ञविषयंकोल्लेखो नैसर्गिको नितराम्। भगवान् भाष्यकारः स्वयं राजानं पुष्यमित्रं याजयाञ्चकारेति कथयितुं स्पष्टं प्रमाणं समुपलभ्यते भाष्ये। 'वर्तमाने लट्' (३.२.१२३) इति सूत्रं व्याकुर्वाणो भगवानाह—

CC-0. Sampurnanand University Collection. Digitized by eGangotri

"प्रवृत्तस्याविरामे शिष्या शासितव्या भवन्ति। इहाधीमहे, इह पुष्यमित्रं याजयाम इति। किं पुनः कारणं न सिद्ध्यति। अवर्तमानत्वात्।"

(२) पुष्यमित्रो यजते याजका याजयन्ति। (३.२.१२)

(३) इष्येते च शतृशानचौ। अपि मां याजयन्तं पश्य। अपि मां याजयमानं पश्य (गर्हायां लडपि जात्वोः)।

महाभाष्ये याज्ञिक-याज्ञिकविधान-यज्ञप्रकाराग्निचयनादयो विभिन्ना याज्ञिकांशा नैकत्र संवर्णिता दरीदृश्यन्ते। पतञ्जलिकाले यज्ञविद्या परमोत्कर्षतामाप्नोत्। संहिताब्राह्मणकल्पसम्बद्धग्रन्थाः प्राचुर्यं प्राप्य स्वतन्त्रयज्ञशास्त्रत्वेन विकासमाप्नुवन्निति कथयितुं "याज्ञिकाः शास्त्रेणानुविदधते" इत्यदो भाष्यकारवचनमेव प्रमाणम्।

भाष्ये परिदृश्यमानाः याज्ञिकसम्बद्धाः केचन पारिभाषिकशब्दा अत्रोदाह्रियन्ते।

याज्ञिकाः—"परिगणितो याज्ञिक्ये" इत्यनेन भाष्यवार्तिकेन स्पष्टं यत् यज्ञग्रन्थाध्येतारो याज्ञिकास्तेषामाम्नाया याज्ञिक्यानीति कथ्यन्ते स्मेति।

याज्ञिक्यकः—अवक्षेपणे कन्-याज्ञिक्यकेनायं गर्वितः। (५.३.९५)

याजुष्कः—चतुर्वेदप्रवीणः।

वार्हिष्कः—वर्ह्यास्तरणादिक्रियासु निपुणो उत तत्र नियुक्तो याजकः वार्हिष्कः।

प्रायेण याज्ञिकः—यो नियमितरूपेण याज्ञिक्यं नाधीते स प्रायेण याज्ञिकः। (२.३.१८)।

याज्ञिकविधानानि

पातञ्जलेऽनेकत्र याज्ञिकविधानानां चर्चा विहिताऽऽस्ते। कानिचन विधानान्यत्रोदाह्रियन्ते दिङ्मात्रम्।

(१) वैदिकमन्त्राः प्रसङ्गानुसारं विपरिणमयितव्याः

वैदिकमन्त्राः तत्तद्यज्ञानुसारं लिङ्गविभक्तिवचनपुरस्सरं यथायथं विपरिणमयितव्या इत्येकं विधानम्। भाष्यकार आह—"ऊहः खल्वपि। न सर्वैः लिङ्गैः न च सर्वाभिर्विभक्तिभिः वेदे मन्त्रा निगदिताः। ते चावश्यं यज्ञगतेन यथार्थं विपरिणमयितव्याः।"

(२) प्रयाजाः सविभक्तिकाः कार्याः

प्रयाजमन्त्राः ऊह्यमानाग्निशब्दप्रकृतिकविभक्तियुक्ताः। यथा—"समिधः समिधोऽग्ने अग्न आज्यस्य व्यन्तु अग्निरग्निरिति।" मन्त्रा अमी सविभक्तिकास्सम्पाद्या इति।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

प्रसङ्गेऽस्मिन् शब्दकौस्तुभकारोऽभिधत्ते—"यद्यपि प्रकृतौ प्रयाजमन्त्राः सविभक्तिका एव पठ्यन्ते तथापि यद्याधानादनन्तरं यजमान उदरव्यथावान् स्यात्, यदि वा संवत्सरमध्ये तस्य महती विपत् स्यात्, तदा नैमित्तिकी पुनराधेयेष्टिर्विधीयते। तत्रेदमाम्नातम्- प्रयाजाः सविभक्तिकाः कार्या" इति। (पस्प.)

समाजविज्ञानम् (Sociology)

चातुर्वर्ण्यम्

महाभाष्ये चत्वारो वर्णाः, चत्वार आश्रमाश्च समुल्लिखिताः। "गुणवचनब्राह्मणादिभ्यः कर्मणि च" (५.१.१२४) इत्येतत्सूत्रभाष्ये "ब्राह्मणादिषु चातुर्वर्ण्यादीनामुपसंख्यानं कर्तव्यम्"।

चातुर्वर्ण्यम्। चातुराश्रम्यम्। सर्व एते शब्दाः गुणसमुदायेषु वर्तन्ते ब्राह्मणः, क्षत्रियो, वैश्यः, शूद्र इति। अनेन स्पष्टं यत् भाष्यकारसमये समग्रोऽपि समाजः चातुर्वर्ण्ये विभक्तः, जीवनञ्च चतुर्ष्वाश्रमेषु।

भाष्यकृता यं क्रममाधृत्य चत्वारो वर्णास्समुल्लिखिषत स एव क्रमस्तेषां सम्मानस्तरस्याप्यासीत्।

ब्राह्मणलक्षणम्

त्रीणि यस्यावदातानि विद्या योनिश्च कर्म च।
एतच्छिवं विजानीहि ब्राह्मणाग्र्यस्य लक्षणम्॥
(पुंयोगादाख्यायाम्, ४.१.८)

विद्यया जन्मना कर्मणा च ब्राह्मणः ब्राह्मणः कथ्यते स्म। यः विद्यातपोभ्यां हीनः स कर्मब्राह्मणः सन् समाजे असम्मान्य आसीत्।

वृत्तिः—प्राधान्येनाध्यापनं ब्राह्मणवृत्तिरासीत्। भाष्यकार एवमाह—"ब्राह्मणेनावश्यं शब्दाः ज्ञेयाः। अध्यापनं हि ब्राह्मणस्य वृत्तिः"। (पस्प.)

अपौरुषेयाणां वेदानां रक्षाया उत्तरदायित्वं ब्राह्मणानामासीत्। इत्थं पवित्रवेदरक्षकाणां हननं महापातकत्वेन गण्यते स्म। "यो ह्यजानन् ब्राह्मणं हन्यात् सुरां वा पिबेत् मन्ये सोऽपि पतितः स्यात्"। (पस्प.)

क्षत्रियः

अयं शासकवर्ण आसीत्। राज्याभिषिक्तः क्षत्रियो राजन्यः कथ्यते स्म। एषामाचारशैली प्रायः ब्राह्मणानामिवासीत्। अत इमे ब्राह्मणसदृशा आसन्निति गम्यते। "अब्राह्मणमानयेत्युक्ते ब्राह्मणसदृशं क्षत्रियमानयति" (६.१.१३५) ब्राह्मणाभावे क्षत्रियेण तत्कर्म सम्पाद्यते स्म। अर्थाद् ब्राह्मणेन अथवा ब्राह्मणं प्रति

CC-0. Sampurnanand University Collection. Digitized by eGangotri

क्रियमाणानि कार्याणि क्षत्रियेण क्षत्रियं प्रति क्रियन्ते स्म। "ब्राह्मणवदस्मिन् क्षत्रिये वर्तितमिति सामान्यं यद् ब्राह्मणकार्यं तत्क्षत्रियेऽतिदिश्यते।" (६.३.६८)

क्षात्रवृत्तिः—सामाजिकी रक्षा क्षात्रधर्म आसीत्। रक्षार्थमेते क्षत्रविद्या अभ्यस्य क्षात्रविद्या इत्यभिहिता भवन्ति स्म।

वैश्यः

'विट्' इत्यस्यापरं नाम। इमे पालितान्ताः गुप्तान्ताश्च भवन्ति स्म। (इन्द्रपालितः, इन्द्रगुप्त इत्यादि) अनेन द्योत्यते यदमी समाजेन संरक्ष्या भवन्ति स्मेति। क्षत्रियवैश्ययोः प्रत्यभिवादने टेः प्लुतो विकल्पेन क्रियते।

"भो राजन्यविशां वेति वाच्यम्" इत्यत्र—कृतनमस्कारं राजन्यं (इन्द्रवर्माभिवादये इति) आयुष्मानेधि इन्द्रवर्म३न्, इन्द्रवर्मन्, कृताभिवादं विशं (इन्द्रपालितोऽहं भोः इति) प्रति आयुष्मानेधि इन्द्रपालित३ इन्द्रपालित (८.२.८३) इति प्रत्यभिवादननियमः कृतः।

शूद्राः

शूद्रा जन्मना कर्मणा चेति द्विधा आसन्। जन्मना शूद्रा जन्मशूद्राः, शूद्रकुलोत्पन्ना इति। परित्यक्तशास्त्रविहितकर्माणः शूद्रवज्जीवनयापकाः कर्मशूद्रा इति कथ्यन्ते स्म। इमे समाजे हेयदृष्ट्या दृश्यन्ते स्म। यस्मिन् वंशे कर्मशूद्रो भवति स वंशः नैकाधिकारेभ्यो वञ्चितो भवति स्म। उदा.—ब्राह्मणपरिवारे जातः कश्चन शास्त्रविहितकर्माण्यननुष्ठाय कर्मशूद्रः संवृत्तस्तर्हि तद्वंशस्य सोमपानाधिकारो निषिध्यते स्म। "एवं हि याज्ञिकाः पठन्ति दशपुरुषानकं यस्य गृहे शूद्रा न विद्येरन् स सोमं पिबेदिति।"

शूद्राणां द्वे श्रेणी आस्तां तदानीन्तनकाले। निरवसिता अनिरवसिता इति। तक्षकायस्कररजकतन्तुवाया अनिरवसिताः, चण्डालभृतकादयो निरवसिता इति। निरवसिता ग्रामेभ्यो बहिर्निवसन्ति स्म। अनिरवसितास्तु ग्रामाभ्यन्तरे। नगरमध्ये तु निरवसिता अपि निवसन्ति स्म। "एवमपि य एते महान्तः सत्स्यायास्तेष्वभ्यन्तराश्चण्डालामृतपाश्च वसन्ति" (१.२.४)।

अग्रजासु सोदरीष्वविवाहितासु कनिष्ठाया विवाहः समाजानुमतो नासीत्।

दिधिषूः—सतीष्वप्यग्रजास्वविवाहितासु ऊढा कनिष्ठा दिधिषूः, अस्याः पतिः दिधिषूपतिरिति कथ्यते स्म।

पुत्रप्रियता—साम्प्रतिककाल इव पुत्रिकासन्तानापेक्षया पुत्रसन्तानमाधिक्येनेच्छन्ति स्म तदानीन्तनजनाः।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

यस्मिन् दशसहस्राणि पुत्रे जाते गवां ददौ।
ब्राह्मणेभ्यः प्रियाख्येभ्यः सायमुञ्छेन जीवति ।।

पातञ्जलकालिकसमाजे नैके नैतिकदोषा आसन्निति ज्ञायते। तत्सूचकानि कानिचनोदाहरणानि भगवानुदाजहार।

क्वचित् कन्या विवाहात्पूर्वमेव अन्तवर्तिन्यो भवन्ति स्म। तदपत्यं कानीन-शब्देन व्यवह्रियते स्म। कानीनशब्दोत्पत्तिविचारवेलायां भगवानित्थमाचष्टे।

कन्यायाः कनीन च

इदं विप्रतिषिद्धम्। को विप्रतिषेधः? अपत्यमिति वर्तते। यदि च कन्या, नापत्यम्। अथापत्यं न कन्या। नैतद्विप्रतिषिद्धम्। कथम्—कन्याशब्दोऽयं पुंसाभिसम्बन्धपूर्वके सम्प्रयोगे वर्तते। या चेदानीं प्रागभिसम्बन्धात् पुंसा सह सम्प्रयोगं गच्छति तस्यां कन्याशब्दो वर्तत एव। कन्यायाः कन्योक्ताया कन्याभिमतायाः सुदर्शनायाः यदपत्यं स कानीनः। (४.१.११६) (शास्त्रोक्तो विवाहोऽभिसम्बन्धः, तत्पूर्वके पुरुषसंयोगे कन्याशब्दो निवर्तते। या तु शास्त्रोक्तेन विवाहसंस्कारेण विना पुरुषं युनक्ति सा कन्यात्वं न जहाति।)

स्त्रीणां सामाजिकप्रतिष्ठा

पातञ्जलयुगे स्त्रीप्रतिष्ठा ह्रासं गतेति गम्यते। यद्यपि काश्चन स्त्रियः आपिशल-काशकृत्स्नप्रणीतग्रन्थानधीयते स्म। "अनुपसर्जनात्" (४.१.१४) आपिशालमधीते ब्राह्मणी आपिशला ब्राह्मणी, काशकृत्स्नीमधीते काशकृत्स्ना ब्राह्मणी। तथापि यज्ञसभासु ईदृशविदुषीणां प्रवेशो नासीदेव। 'कथं च स्त्री नाम सभायां साध्वी स्यात्?"—(प्रदीपे) यज्ञसभायां विदुषामेव पुरुषाणां साधुत्वाधिकारादिति भावः।

गणिका

अनेकाः स्त्रियः गणिकाकार्यं नटीकार्यञ्च कुर्वत्यः जीवनं यापयन्ति स्म। तत्काले गणिकासंख्या महत्यासीदिति गणिकासङ्घाः स्थापिताः।' तत्सङ्घनाम गाणिक्यम्। गणिकनां समूहो गाणिक्यम् (४.२.४०)।

नटीनां स्थितिः

नटीनां स्थितिः तदानीं हेयाऽऽसीत्। रङ्गस्थले यः कोऽपि गत्वा नटीं प्रति स्वीयेच्छामभिव्यनक्ति स्म। तासां सर्वभोग्यत्वमनेनोदाहरणेन स्फुटं भवति। "नटानां स्त्रियो रङ्गगता यो यः पृच्छति कस्य यूयं कस्य यूयमिति तं तं तव तवेत्याहुः।" (६.१२)

CC-0. Sampurnanand University Collection. Digitized by eGangotri

सामाजिकसम्बन्धाः

व्यक्तीनां सामाजिकसम्बन्धाः चतुर्विधा इति भाष्यकारोक्तिः। लोके बहवोऽभिसम्बन्धाः आर्थाः, यौनाः, मौखाः, स्रौवाश्च (१.१.४९)। धनसम्बन्ध आर्थः, यौनो नाम पितृपुत्रादिसम्बन्धः, मौखः गुरुशिष्यादिसम्बन्धः, स्रौवो नाम पुरोहितयजमानादिसम्बन्धः।

"आर्थसम्बन्धः चतुर्धा। यदेतत् स्वं नाम क्रयणोदाहरणात्, याञ्चायाः, विनिमयादिति।"

श्रमिकाः—भाष्योल्लेखानुसारं श्रमिकाः शिल्पिनः, श्रमिका इति द्विधा। ये नैकस्मिन्नपि कर्मणि निष्णातास्ते श्रमिकाः, कस्मिँश्चिद् व्यवसायविशेषे कुशलास्तु शिल्पिन इति व्यपदिश्यन्ते स्म।

कौशलाभावात् श्रमिकाः स्वीयशारीरिकश्रमेण जीवन्ति स्म। यः श्रमं क्रीणाति स स्वामी 'अर्य' इत्युच्यते स्म। (अर्यः स्वामिवैश्ययोः-३.१.१०३, अर्यः स्वामीति)। निश्चितधनेन निश्चितावध्यर्थं यः श्रमं क्रीणाति स अवक्रेता इति। ईदृशी क्रिया "परिक्रयण"मिति (contract basis) कथ्यते स्म। इत्थं परिक्रयणेन कार्षापणानां शतेन, सहस्रेण च वर्षमेकं कानिचिद्वर्षाणि वा श्रमिकाः श्रमार्थं नियुज्यन्ते स्म।

परिक्रयणं = नियतकालं वेतनादिना स्वीकरणं नात्यन्तिकः क्रय एव (काशिका १.४.४४)।

श्रमिकनियुक्तिक्रिया 'उपनयनकर्म' इत्युच्यते स्म, यस्यार्थः वेतनदानपुरस्सरं स्वामिसमीपानयनम्।

श्रममूल्यानि (Labour rates)

वेतनेन नियुक्ता वैतनिका इति। वेतनरूपेण पादकार्षापणदानप्रथा तदानीमासीत्। "कर्मकराः कुर्वन्ति पादिकमहर्लप्स्यामहे" इति (काशिका १.३.७२)। भृतका अपि पादकार्षापणं लभन्ते स्म। "याजका अन्तरेणापि यजिं लभन्ते भृतकाश्च पादिकम्" (का. १.३.७२)।

श्रमिकभेदाः—कर्मकरः, भृतकः, परिक्रीतः, भृत्यः,प्रसाधकः, दासः, भक्तिकः।

प्रसाधकः—स्वामिनं स्नपनतैलमर्दनपादसंवाहनादिना प्रसाधयति स्म (सुखं वेदयते प्रसाधको देवदत्तस्य-३.१.१८)।

छत्रधरः—अयं छत्रं गृहीत्वा राजानः धनिनश्च अनुसरति स्म।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

श्रमिकस्वभावः—केचन कर्मकरा भृतिं लभमाना अपि निष्ठया कार्यं नाचरन्ति स्म। केचन भृतिलोभे एकस्मिन् दिने अनुष्ठेयं कार्यं दिनद्वये समापयन्ति स्म। ईदृशाः शीतकसंज्ञया व्यपदिश्यन्ते स्म। ये च अधिकस्फूर्त्या कार्यं कुर्वन्ति स्म ते उष्णका इति।

"शीतोष्णाभ्यां कारिणि" (५.२.७२)। य आशु कर्तव्यानर्थान् चिरेण करोति स उच्यते शीतक इति। यः पुनराशुकर्तव्यानर्थानाश्वेव करोति स उच्यते उष्णक इति।

सामाजिकमूल्यानि

जगद्धारकतत्त्वानां धर्म इति समाख्या व्यधायि व्यासेन। "यतोऽभ्युदयनिःश्रेयससिद्धिः स धर्म" इति वैशेषिकाः। अस्मिन्नर्थे धर्मो नाम मूल्यम्। इत्थं सनातनधर्माः सनातनसामाजिकमूल्यत्वेन व्यपदेष्टुं शक्याः।

धर्मविषयकश्रद्धा भाष्यकारस्य ज्यायस्येव। धर्मनिर्णयसन्दर्भे भाष्यकार आह—"शास्त्रेण धर्मनियमः।" शास्त्रञ्च समाजकल्याणकारकतत्त्वमुपदिशति। तद्विरुद्धाचरणं नैव कार्यम्।

"अशास्त्रोक्ते क्रियमाणे विगुणं कर्म भवति। विगुणे च कर्मणि फलानावाप्तिः।" शास्त्रं यत्र धर्मविषये मौनं वहति तत्र ऋषिसम्प्रदायो धर्मः (पस्प.)।

प्रेक्षापूर्वकारी

विलक्षणं पदमदो भाष्ये परिदृश्यते तत्र तत्र। प्रेक्षापूर्वकारी उचितानुचितज्ञः दूरे तिष्ठत्यधर्मात्। यतस्स जानाति दुःखमधर्मस्य भवति परिणाम इति। तद्भिन्नस्तु धर्मो नाम तत्त्वं नास्ति किमपि। अतस्तदनुष्ठानं नावश्यकमिति मन्यते। "ध्रुवमपायेऽपादानम्" इति सूत्रभाष्यावसरे भगवानित्थं व्याचष्टे। "अधर्माज्जुगुप्सते। अधर्माद् बीभत्सते इति। य एष मनुष्यः प्रेक्षापूर्वकारी भवति स पश्यति दुःखोऽधर्मो नानेन कृत्यमस्तीति। स बुध्या सम्प्राप्य निवर्तते। इह य एष मनुष्यः सम्भिन्नबुद्धिर्भवति स पश्यति नेदं किञ्चिद्धर्मो नाम नैनं करिष्यामीति स बुद्ध्या सम्प्राप्य निवर्तते।"

अधार्मिककृत्यानि

धार्मिकाधार्मिककृत्यानि अनेकत्र समुदाहृतानि भाष्ये। धार्मिककृत्येषु वर्णाश्रमानुकूलमाचरणं भजति स्म प्रामुख्यम्। ब्राह्मणेभ्यो विहितेष्वनुष्ठानेषु अपभाषणत्यागो भजति स्म प्राथम्यम्। तथा हि—"तेऽसुरा हेलयो हेलय इति

CC-0. Sampurnanand University Collection. Digitized by eGangotri

कुर्वन्तः पराबभूवुः। तस्माद् ब्राह्मणेन न म्लेच्छितवै नापभाषितवै, म्लेच्छो ह वा एष यदपशब्दः। म्लेच्छा माभूमेत्यध्येयं व्याकरणम्।'' (पस्प.)

ब्रह्महत्या सुरापानञ्च

तदानीन्तनसमये ब्राह्मणवधः सुरापानञ्च महापातकत्वेन गण्यते स्म। ''सरूपाणामेकशेष एकविभक्तौ'' (१.२.८४) इति सूत्रं व्याकुर्वाणो भाष्यकार इत्थं ब्रवीति—''एवञ्च कृत्वा धर्मशास्त्रं प्रवृत्तम्। ब्राह्मणो न हन्तव्यः, सुरा न पेयेति ब्राह्मणमात्रं च न हन्यते, सुरामात्रञ्च न पीयते योऽजानन् ब्राह्मणं हन्ति सुरां वा पिबति सोऽपि मन्ये पतितः स्यात्।''

'गोपोष्ठक्' (३.२.८) इत्यत्र तु—''या ब्राह्मणी सुरापी भवति नैनां देवाः पतिलोकं नयन्ति'' इत्युक्तम्।

गुरुतल्पगमनम्

गुरुतल्पगमनं महापातकत्वेन गण्यते स्म। ''प्राग्वहतेष्ठक्'' (४.४.१) इति ठक्प्रत्ययः क्व भवतीत्याकाङ्क्षायां ''गच्छतौ परदारादिभ्यः'' इति सङ्ग्रहवार्तिके ''पारदारिकः गौरुतल्पिकः'' इत्युदाहृतं भाष्यकृता। ''ध्वंसते गुरुतल्पगः'' इत्युक्तमन्यत्र (३.२.४८)।

शौचाशौचम्

ब्राह्मणगुणगणवर्णनप्रसङ्गे सर्वत्र शुच्याचार इत्युक्तं भाष्यकृता। शौचमदः आन्तरिकं बाह्यञ्चेति द्विधा। बाह्यशौचे स्नानादिक्रियास्सम्मिलिताः। उपविश्य मूत्रविसर्जनमित्यादिनियमान् यो न पालयति स भवति गुणहीनः। 'नञ्'-सूत्रभाष्यावसरे भाष्यकार इत्थमभिधत्ते—''समुदाये ब्राह्मणशब्दः प्रवृत्तोऽवयवेष्वपि वर्तते। जातिहीने गुणहीने च। गुणहीने तावद् अब्राह्मणोऽयं यस्तिष्ठन् मूत्रयति'', ''अब्राह्मणोऽयं यस्तिष्ठन् भक्षयति''।

वस्तुस्पर्शजातस्याशौचस्य निवृत्त्यर्थं त्रिवारमाचमनमुक्तम्। तद्यथा—''त्रिहृदयङ्गमाभिरद्भिः अशब्दाभिरुपस्पृशेदित्युपस्पर्शनं शौचार्थम्'' (५.१.८४)।

ज्येष्ठाः समादरणीयाः

ज्येष्ठदर्शनसमनन्तरं तत्समानार्थं कनिष्ठा उत्तिष्ठेयुरिति समुपदिशति किमपि सामाजिकं सन्मूल्यं भाष्यकारः ''एकः पूर्वपरयोः'' इत्यस्मिन् भाष्ये। तदित्थम् - ''पूर्ववया ब्राह्मणः प्रत्युत्थेयः। पूर्ववयसोऽप्रत्युत्थाने दोष उक्तः। प्रत्युत्थाने च गुणः।''

ऊर्ध्वं प्राणा ह्युत्क्रामन्ति यूनः स्थविर आयाति।
प्रत्युत्थानाभिवादाभ्यां पुनस्तान् प्रतिपद्यते ॥

CC-0. Sampurnanand University Collection. Digitized by eGangotri

प्रत्युत्थानाकरणे प्राणोत्क्रमणरूपमसन्तमपि दोषमुद्भाव्य तत्प्रशंसा क्रियते तदननुष्ठाने दोषदर्शनेन तदनुष्ठानार्थम्।

उद्योतकारो महावैयाकरणो नागेशोऽपि भाष्यकृतः मतसमर्थनार्थमुदाहरति श्लोकमेकम्—

व्याघ्रादिव्यपदेशेन यथा बालो निवर्त्यते ।
असत्योऽपि तथा कश्चित्प्रत्यवायोऽभिधीयते ।। (अत्रैव उद्योते)

आपस्तम्बसूत्रकारोऽपि "समानग्रामे च वसतामन्येषामपि वृद्धतराणां प्राक्प्रातराशात्" (१.२.५.१३) इत्युक्त्वा ब्राह्मणेतरा वृद्धा अपि प्रत्युत्थानेन सभाजनीया इत्युपदिदेश।

अनृतं न वक्तव्यम्। अनृतं पापाय

अनृतं प्रच्छन्नं व्यक्तश्चेति द्विधा। भाष्यकृता द्वयमप्यनृतं न वदनीयमित्युपदिष्टम् (८.२.४८)।

अनृतवादी मत्तशब्देन व्यवहृतो भाष्ये। एष असत्यकथनहेतोः पापीयान् भवति। "अनृतं हि मत्तो वदति पाप्मा एवं पुनाति" (८.१३५), "मत्तस्य न प्रतिगृह्यम् अनृतं हि मत्तो वदति तस्मान्नापि गृह्यम्" (प्रत्यपिभ्यां ग्रहेः, ३.१.११८)।

सुरापानं वर्ज्यम्

सर्वं मद्यमपेयमिति सर्वसुरापानं निषिद्धमापस्तम्बधर्मसूत्रकारैः। सुराऽपानस्य सर्वाधिकमहत्त्वं कल्पितं भाष्ये। सुरापाने महान् दोष उक्तः। "ब्राह्मणो न हन्तव्यः सुरा च न पेयेति ब्राह्मणमात्रं न हन्यते सुरामात्रञ्च न पीयते" इत्यादीनि भगवतः कथनानि सुरापानस्य तात्कालिकीं सामाजिकीं प्रबलप्रवृत्तिं निरूपयन्ति।

भक्ष्याभक्ष्यनियमः

"आहारशुद्धौ सत्त्वशुद्धि"रिति छान्दोग्योपनिषत् (७.२६.२)।

पलाण्डुभक्षणम्—पलाण्डुभक्षणं निषिद्धं धर्मसूत्रकारैः। भाष्यकृता "पलाण्डुभक्षिती" इति पलाण्डुभक्षणघृणाद्योतकः शब्दः प्रयुक्तः। तदानीं वृषलाः पलाण्डुं भक्षयन्ति स्म सुराञ्च पिबन्ति स्म। परं सुरापानेन सहैव पलाण्डुभक्षणं वृषला अपि न कुर्वन्ति स्म।

"वृषलरूपोऽयम् - अप्ययं पलाण्डुना सुरां पिबेत्" इत्युक्तम् (५.३.६६)।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

मांसभक्षणम्

पञ्च पञ्चनखा एव भक्ष्याः तद्भिन्नास्तु वर्ज्या आसन् तदानीन्तनसमये। प्रसङ्गेऽस्मिन् भाष्यकारो ब्रवीत्येवं—"पञ्च पञ्चनखा भक्ष्याः। अभक्ष्यो ग्राम्यकुक्कुटः, अभक्ष्यो ग्राम्यसूकरः।" (पस्प.)

गुरुशिष्यसम्बन्धः

गुरुशिष्यसम्बन्धः शिक्षाप्रणाल्याः प्राणायते। आदरो गुरौ शिष्यस्य, अनुरागः शिष्ये गुरोः, रागः शिक्षायाञ्च द्वयोरपि खलु नितरामनिवार्यः। आदरानुराग-योरन्यतरस्याभावे कलुषिता ननु भवति शिक्षाप्रणाली। उभयोर्मध्यगतं सम्बन्धं चिकथयिषुर्भाष्यकारो व्याचष्टे—"छत्रादिभ्यो णः" (४.१.६२) इत्यस्मिन् भाष्ये।

किं यस्य छत्रधारणं शीलं स छात्रः? किञ्चातः? राजपुरुषे प्राप्नोति। एवं तर्हि छत्रमिव छत्रम्। गुरुश्छत्रम्। गुरुणा शिष्यच्छत्रवच्छाद्यः। यथा छत्रं रक्षति वर्षातपाभ्यां तथा गुरुणा बाह्यदुष्परिवेषाच्छिष्यः संरक्ष्यः। छिद्रयुक्तं जीर्णं शीर्णञ्च छत्रमसमर्थं भवति छादने। तथैवाल्पज्ञानः अपटुः गुरुरक्षम एव शिष्यरक्षणे। परं छत्रेणात्मा छाद्यस्तर्हि शिष्येण तद् दृढं ग्राह्यम्, परिपाल्यञ्च। शुश्रूषादिभिस्सेवमानो गुरुं शिष्यश्छत्रमिव रक्षेद् यदि तर्ह्येव स गुरुणा सुष्ठु छाद्यो भवति।

इत्थं छत्रोदाहरणप्रसङ्गेन भगवता गुरुशिष्यसम्बन्धः सुष्ठु प्रत्यपादि।

शिष्यानुशासनम्

यद्यप्यनुशासनहीनाश्छात्रा दण्ड्याः, तथापि ते गुरुभिरमृतहस्तैः दण्ड्या न तु विषोक्षितैरिति भगवान् भाष्यकारः गुरूनुपदिशति।

सामृतैः पाणिभिर्घ्नन्ति गुरवो न विषोक्षितैः।
लालनाश्रयिणो दोषास्ताडनाश्रयिणो गुणाः॥

इत्थमत्र समाहृतानां विविधविद्याविषयकोदाहरणानां पर्यालोचनेनेदं स्पष्टं भवति यद्भाष्यमदो न केवलं व्याकरणनिबन्धनमात्रम्, अपि तु सर्वशास्त्राकर इति।

●

CC-0. Sampurnanand University Collection. Digitized by eGangotri

पाणिनीयोत्कर्षविमर्शः

डॉ. हरिवंशकुमारपाण्डेयः
ईक्ष्यशोधकः, शिक्षण-शोध-प्रकाशन-संस्थानस्य
सम्पूर्णानन्द-संस्कृत-विश्वविद्यालये
वाराणस्याम्

❋❋❋

मुनिवरपाणिनिविरचितव्याकरणार्यम्णि निर्भरालोके ऐन्द्रादिव्याकरण-ग्रहास्तिरोभावमुपयान्ति। इह खलु जगति यद्यदवष्टभ्य प्रचलति लोकानां व्यवहारः, तत्र भाषैव प्रधानभावं जुषते। यदि ह्यत्र भाषैव न स्यान्नैव नैजमाशयं प्रकाशयितुं प्रभवेयुर्लोकाः। अप्रकाशयन्तश्चात्मीयमाशयं नैव पारयेयुः किञ्चिदप्यनुष्ठातुम्। एतदभिसन्धाय खलु तत्रभवानाचार्यदण्डी स्पष्टमाचष्ट—

'इदमन्धं तमः कृत्स्नं जायेत भुवनत्रयम्।
यदि शब्दाह्वयं ज्योतिरासंसारं न दीप्यते'।। इति।

तत्र च प्रयुज्यमानैः शब्दैः साधुभिरेव भाव्यं नासाधुभिः। साधुशब्दा हि प्रयुज्यमाना इह सर्वानुमोदनीयतां परत्र च वस्वौकसाराप्राप्तिं नियतमुत्पादयन्ति। असाधुशब्दा न केवलमिह परिहासपात्रताम् अपि तु निरयमपि परत्र निर्विवादमापादयन्ति। असाधुशब्दपरिहारेण साधुशब्दप्रयोगे व्याकरणाध्ययनमेव प्रधानं कारणमिति सर्वसम्प्रतिपन्नम्। प्रदर्शिता च व्याकरणाध्ययनस्यावश्यकता तत्रभवतः पवनतनयस्य नवव्याकरणपारावारपारीणस्य वाक्यं लक्षणलक्षितं श्रवणपथस्यातिथीकुर्वता तस्य च सर्वज्ञतां लक्ष्मणे सप्रकारं निरूपयता भगवता जानकीजानिना। तच्चेदं पद्यरत्नम्—

'नूनं व्याकरणं कृत्स्नमनेन बहुधा श्रुतम्।
बहु व्याहरताऽनेन न किञ्चिदपशब्दितम्'।।

इति हनूमद्व्यवहाराद् व्याकरणश्रवणस्यानुमानाद् व्याकरणसाध्यसाधुशब्दा व्यवहारे प्रयुक्ता इति प्रतीयते। तदेतद्गैर्वाणीभाषणपुराणतानिरूपणपरायणानां

CC-0. Sampurnanand University Collection. Digitized by eGangotri

नः करावलम्बं कलयति। एवं सुन्दरकाण्डेऽपि व्याकरणाध्ययनस्यावश्यकत्वं सूचितम्। तत्र हि, 'पवनात्मजन्मा जानकीमनलङ्कृतामशोकवनिकागतां, व्याकरणज्ञानजन्यसंस्कारासंस्कृततयाऽनभिमतार्थमभिदधानां वाणीमिव कथमपि विदाञ्चकार' इति भगवान् वाल्मीकिराह। स चायं श्लोकः—

'दुःखेन बुबुधे सीतां हनूमाननलङ्कृताम्।
संस्कारेण यथा हीनां वाचमर्थान्तरङ्गताम्।। इति।

एवञ्चासंस्कारनिबन्धनानभिमतार्थप्रतीतिपरिहाराय तथाविधसंस्कारकारणं व्याकरणमध्येतव्यमित्युपदिष्टं भवति। व्याकरणलक्षणाननुरोधे विवक्षितार्था-प्रतीतिरित्याशयानः किल कालिदासः 'विनीतनागः किल सूत्रकारैरैन्द्रं पदं भूमिगतोऽपि भुङ्क्ते', 'नन्दिग्रामगतस्तस्य राज्यं न्यासमिवाभुनक्' इत्यत्र यथायथमात्मनेपदपरस्मैपदे प्रायुङ्क्त। यदि व्यत्यासेन ते प्रयुञ्जीत, तर्हि राज्ञः स्वर्गसुखानुभवो भरतेन राज्यपरिपालनं च न प्रतीयेत। प्रत्युत राज्ञोऽवरणीयत्वं भरतस्य राज्यश्रिया सममुग्रमसिधारं व्रतमिवाभ्यसितवतस्तदनुभोक्तृत्वं च प्रतीयते। 'भुजोनवन' इत्यादिलक्षणानुगुणप्रयोगाद्धि लोके गणनायां कालिदासः कनिष्ठिकामधितिष्ठति। आलङ्कारिकाः पुनः च्युतसंस्कारत्वाख्यं काव्यदोष-माचक्षाणास्तद्दोषपरिहाराय तदध्ययनस्यावश्यकतामसूचयन्। वेङ्कटाध्वर्यपि व्याकरणानभिज्ञदुर्दशाप्रतिपादनपुरस्सरं तदध्ययनस्यावश्यकतामसूसुचत्। इत्थं हि तदीयं पद्यम्—

'अस्वीकृतव्याकरणौषधानामपाटवं वाचि सुगाढमास्ते।
कस्मिंश्चिदुक्ते तु पदे कथञ्चित् स्वैरं वपुः स्विद्यति वेपते च'।। इति।

फणिभाषितभाष्योपनिबद्धं प्रयोजनान्तरं तु तैस्तैश्शतशो निरूपितमिति नेह तन्यते।

व्याकरणानि च नवेति लघुत्रिमुनिकल्पतरुकारप्रदर्शितपद्येन ज्ञायते। तच्चेदम्—

'ऐन्द्रं चान्द्रं काशकृत्स्नं कौमारं शाकटायनम्।
सारस्वतं चापिशलं शाकलं पाणिनीयकम्'।।

तत्र ऐन्द्रं 'वाग्वै पराच्यव्याकृतावददि'ति श्रुत्युपारूढम्। चान्द्रं 'विन्दतिश्चान्द्रदौर्गादिः', 'चान्द्रास्तु आत्मोदरकुक्षिष्विति पेठु'रिति कौमुदीकृता तत्र

CC-0. Sampurnanand University Collection. Digitized by eGangotri

तत्रानूदितम्। काशकृत्स्नं पतञ्जलिना प्रणीतमिति कल्पतरुकारः। कौमारम् आग्नेयपुराणान्त्यभागे सङ्कीर्तितम्। सारस्वतम् ऋक्तन्त्रव्याकरणशब्दशब्दितम्। शाकटायनमपि मुद्रणपथमधिरूढम्। आपिशलशाकले हि 'वा सुप्यापिशलेः', 'लोपः शाकल्यस्ये'त्यादिपाणिनीयसूत्रैरनुमेयतां प्रतिपद्येते। नवमं चास्माकीनं पाणिनीयम्। 'सोऽयं नवव्याकरणार्थवेत्ता' इति हनूमान् रामायणे प्रशस्यते। व्याकरणानि पुनरेनान्यष्टौ स्मर्यन्ते पुराणेषु। यथा भविष्यमहापुराणे ब्राह्मे पर्वणि प्रथमेऽध्याये—

'प्रथमं प्रोच्यते ब्राह्मं द्वितीयमैन्द्रमेव च।
याम्यं प्रोक्तं ततो रौद्रं वायव्यं वारुणं तथा।।
सावित्रं च तथा प्रोक्तमष्टमं वैष्णवं तथा'।। इति।

वोपदेवस्त्वन्यानेवाष्टावादिशाब्दिकान् प्राह, यथा—

'इन्द्रश्चन्द्रः काशकृत्स्नापिशली शाकटायनः।
पाणिन्यमरजैनेन्द्रा जयन्त्यष्टादिशाब्दिकाः'।।

इतीत्यन्तेन व्याकरणानामष्टत्वं न्यरूपयन्। सत्येवं यैः कैश्चिदुच्यते 'व्याकरणमेकम्, तच्च पाणिनीयम्, 'नवव्याकरणार्थवेत्ता' इत्यत्रत्यनवशब्दो न संख्याबोधकः; परन्त्वभिनवरूपार्थबोधकः, तथा च अभिनवभूतपाणिनीय-व्याकरणाभिज्ञत्वमेव हनूमतः प्रतिपाद्यत' इति, तत्रेदं वक्तव्यम्— यद्यभिनवव्याकरणवेत्तेत्यर्थः, तर्हि पाणिनीयमेकमेव व्याकरणमित्यसङ्गतम्। चिरन्तनव्याकरणसत्ताया नवपदमहिम्ना लाभात्। किञ्च 'नवो यः व्याकरणार्थः' इत्यर्थे तदर्थान्वयोपगमेऽपि हनूमतः पाणिनीयमात्राभिज्ञत्वस्योररीकृततया पाणिनीयविरुद्धस्य 'एवं मां परिभाषन्तं कस्माद्वै नाभिभाषथ' इति हनूमत्कृतपरस्मैपदप्रयोगस्योपलम्भात् 'न किञ्चिदपशब्दित'मिति स्तुवतो जानकीजानेर्मृषाभाषिता प्रसज्येत। संख्यावाचित्वमते तु व्याकरणान्तराङ्गीकारेण हनूमतस्तदभिज्ञत्वेन तदनुरोधेन प्रयोगस्य सुलभत्वात् नोक्तापत्तिरवतरति। अपि चोदाहृतवचनानां व्याकोपः, अप्रसिद्धिप्रतिहतिश्चेति द्रष्टव्यम्। अखिलेषु च व्याकरणेषु पाणिनीयमेव प्रधानभावमाटीकते। शाकटायनादिमुनिविरचितानि हि लौकिकशब्दमात्रविषयाणि। इदं तु लोकवेदोभयसाधारणमित्यनितरसाधारणं वेदाङ्गपदमारूढम्। शेखरकृतस्तु चतुर्दशसूत्री श्रुतिरिति तन्मूलकमिदमेव वेदाङ्गम्, नान्यदिति वदन्ति। 'न तत्र सूर्यो भाति न चन्द्रतारकं नेमा विद्युतो भान्ति कुतोऽयमग्नि'रिति कठवल्ल्युक्तरीत्या सर्वतो रमणीये पाणिनीये वर्तमाने

CC-0. Sampurnanand University Collection. Digitized by eGangotri

शाकटायनादीनि कथमात्मलाभमासादयेयुः। अत एवैतान्यप्रचारप्रतिहतानि नाम्नापि कैश्चिन्न स्मर्यन्ते। वेङ्कटाध्वर्यपि व्याकरणान्तरापेक्षया पाणिनीयस्यादरणे बीजं किमिति कृशानुमुखेनाक्षिप्य विश्वावसुमुखेन 'पाणिनीयमेव व्याकरणं प्रायेणानौपाधिकप्रतीतिकारणमिति तत्रैवादरः पण्डितानाम्' इति समाधत्ते। पराशरोपपुराणे च—

'पाणिनीयं महाशास्त्रं पदसाधुत्वलक्षणम्।
सर्वोपकारकं ग्राह्यं कृत्स्नं त्याज्यं न किञ्चन'।।

इत्येतदेवोपश्लोक्यते। यथा सतीष्वपि बहुषु स्मृतिषु पराशरस्मृतेरेव सम्प्रति व्यवस्थापकत्वं 'कलौ पाराशरः स्मृतः' इति वचनादूरीक्रियते। एवं सत्स्वपि व्याकरणेषु लौकिकशब्दविषयेषु पाणिनीयस्यैव सम्प्रति व्यवस्थापकत्वं कैयटप्रामाण्यादभ्युपगम्यते। 'शताच्च ठन्यतावशते' इति पाणिनिसूत्रप्रकारेण सङ्घविशेष्यकत्वे सति 'शतक' इति भवति। आपिशलिकाशकृत्स्नाभ्यां 'शताच्च ठन्यतावग्रन्थे' इति सूत्रकरणात् 'शत्य' इति सिद्ध्यति। अत्र किं पाणिन्यनुगृहीतस्य रूपस्य साधुत्वम्, उतान्यानुगृहीतस्येत्याशङ्क्य 'नियतकालाश्च स्मृतयो व्यवस्थाहेतव इति मुनित्रयमतेनाद्यत्वे साध्वसाधुप्रविभाग' इति कैयटोपाध्यायैस्समाहितम्। 'यथोत्तरं मुनीनां प्रामाण्य'मिति वचनादपि पाणिनीयस्यैव व्यवस्थाहेतुत्वमभ्युपेयं भवति। वचनमिदं 'न बहुव्रीहा'विति सूत्रप्रत्याख्यानपरं 'गोनर्दीयस्त्वाहे'ति भाष्यमुपादाय कैयटोपाध्यायैस्सञ्चारितम्। नागेशभट्टाश्च 'यथोत्तर'मिति प्रतीकमुपादाय उत्तरोत्तरस्य बहुलक्ष्यदर्शित्वादिति प्रामाण्ये हेतुमुपन्यास्थन्। एतद्धेतूपन्यासेन न्यायसिद्धत्वमस्य सूचितं भवति। पाणिनिः किल स्वकाले प्रयुक्तान् शब्दानध्यक्षीकृत्य तदनुगुणं व्याकरणं प्रणिनाय। तदनु, करणाद्यपाटव-सम्भूतविपर्यासान् स्वसमयस्थान् कांश्चित्प्रत्यक्षीकृत्य वार्तिकं कात्यायनो विरचयामास। एवं पतञ्जलिरप्युभयादृष्टान् शब्दान् साक्षात्कृत्य तदनुगुणं सूत्रवार्तिकव्याख्याभूतं च भाष्यमतिगभीरं निर्ममे। तच्श्मश्रुणा 'त्वकत्पितृकः' इत्यादिशब्दान् प्रयुञ्जानाः किल लोका भगवद्भ्यां कात्यायनपतञ्जलिभ्यां दृष्टाः। अतश्चैषां 'छत्वममीति वाच्यम्', 'अकच्स्वरौ तु कर्तव्यौ प्रत्यङ्गं मुक्तसंशयौ' इत्यादिना साधुत्वं बोध्यते। एतेषु चरमश्शब्दसाक्षात्कर्त्ता पतञ्जलिरिति सत्येषां विरोधे तद्वचनमेव प्रामाण्यमवगाहते। पदमञ्जरीकारा अपि वचनस्यास्य न्यायसिद्धतां व्यञ्जयन्ति—

CC-0. Sampurnanand University Collection. Digitized by eGangotri

'अथवा कस्यचित्केचिदपरस्यापरे तथा।
अन्यस्यान्ये तथा शब्दास्सन्ति दर्शनगोचराः'।।

तथा च—

'यद्विस्मृतमदृष्टं वा सूत्रकारेण तत्स्फुटम्।
वाक्यकारोऽब्रवीदेवं तेनादृष्टं च भाष्यकृत्'।। इत्यादिना।

एवञ्चोत्तरोत्तरमनतिक्रम्य मुनीनां प्रामाण्यमेष्टव्यं भवति। अत्रैवं कश्चिदाशङ्केत—पाणिनिकात्यायनौ सतीर्थ्यतया समानकालिकौ, तयोः पौर्वापर्यबोधकं वचनमिदं कथं प्रामाण्यमवगाहतामिति। अत्रैवं समाधेयम्—सतीर्थ्यतायामस्ति बहूनां विप्रतिपत्तिः। उररीकृतायामपि तस्यां न किञ्चिद्विवक्षितं परिहीयते। तत्तत्प्रणीतग्रन्थद्वारा तत्प्रणेतॄणामुत्तरोत्तरत्वस्याभिसंहितत्वात्। यस्य पुनः पौर्वापर्यमभिमतं तस्यापि ग्रन्थद्वारकमेव तेषां प्रामाण्यमभिधानीयम्। तत्तदाशयविशिष्टानां हि प्रामाण्यम्, न तु यथाजातानाम्। अतश्च पाणिनिकात्यायनयोः पौर्वापर्ये सत्यसति वा न काप्यनुपपत्तिरापततीति। एतेषां कालस्तु बहुधा बहुत्र सप्रमाणं प्रतिपादित इति तत एवावगन्तव्यम्। मुनित्वं चैषां वेदशास्त्रार्थतत्त्वावगन्तृत्वेनेति गुरुचरणाः। यत्तु कैश्चित्प्रत्यवस्थीयते मुनित्वमेवैतेषां, नर्षित्वं, तयोर्व्यधिकरणत्वादिति। तदिदं कालिदासग्रन्थानवलोकननिबन्धनविजृम्भणमिति निस्संशयं ब्रूमः। रघुवंशे 'क्षणमात्रमृषिस्तस्थौ सुप्तमीन इव ह्रदः', 'यशोधनो धेनुमृषेर्मुमोच', 'सत्यामपि तपस्सिद्धौ नियमापेक्षया मुनिः', 'रक्षापदेशान्मुनिहोमधेनो'रित्यादिभिः पद्यैर्वसिष्ठमेकमेव मुनि-ऋषिशब्दाभ्यामसकृद्व्यपदिशति। ततश्च तदुक्तो व्यधिकरणत्ववादः कालिदासग्रन्थविरुद्ध इति प्रतिपत्तव्यम्।

यस्तु यथोत्तरमित्यस्यार्थमेवमुपदिशति—'भाष्यकारापेक्षया वार्तिककृतः, तदपेक्षया पाणिनेः प्रामाण्य'मिति। स तु द्वारान्तरेणापि भोजनमुपदिशेदिति किमनेन व्याकरणवैदेशिकेन। पाश्चात्त्या अपि वचनस्यास्य न्यायसिद्धतामेवाशेरते। नव्यवैयाकरणास्तु ज्ञापकसिद्धत्वमस्य समर्थयन्ते। तथा हि—तृतीयाध्यायस्य प्रथमपादे अशीतितमं सूत्रं 'धिन्विकृण्व्योरच'ेति। अनेन धिविधातोः कृविधातोश्च न्-म्-विशिष्टस्यात्वमुप्रत्ययश्च शब्विषये विधीयते। विहाय लोपं वकारस्यात्वविधानं स्वलोपस्थानिवद्भावाभ्यां लघूपधगुणवारणफलकमिति वस्तुस्थितिः।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

अत्र सूत्रे महाभाष्यकारा:—"क्वायमकार: श्रूयते। न क्वचिच्छ्रूयते। लोपोऽस्य भविष्यति, 'अतो लोप आर्धधातुके' इति। यदि न क्वचिच्छ्रूयते। किमर्थमयमुच्यते। न लोप इत्येवोच्येत। नैवं शक्यम्। लोपे सति गुण: प्रसज्येत। अत्वे पुनस्सति अकारलोपस्य स्थानिवद्भावाद् गुणो न भविष्यति। ननु च लोपेऽपि सति 'न धातुलोप आर्धधातुके' इति प्रतिषेधो भविष्यति। आर्धधातुकनिमित्ते लोपे सति प्रतिषेध:। न चैष आर्धधातुकनिमित्तो लोप:। अपि च प्रत्याख्यायते खल्वपि स योग:। तस्मिन् प्रत्याख्याते गुणस्स्यादेव। तस्मादत्वं वक्तव्यम्" इति। हरिदीक्षितास्तु भाष्यस्यास्य तात्पर्यं सङ्ग्रहेणोपवर्ण्य 'अनेन सूत्रमतात्प्रत्याख्यानवादिमतं प्रबलमिति प्रत्याख्यानवादिसम्मतलक्ष्यमेव कथञ्चित्सूत्रमतेऽपि साध्यं न तु विपरीतम्, सम्भवे अन्यथा सूत्रमप्रमाणमेवेति च प्रत्याख्यानं सूत्रसम्मतमिति च ध्वनितम्।

सूत्रकृत्खण्डितप्राचीनऋषिवाक्यानामप्रामाण्यवत् सूत्रकारवच:खण्डन-प्रवृत्तभाष्यवार्तिकवचनैस्तदंशे सूत्रकारवचसोऽप्यप्रामाण्यकल्पनैवोचितेति दिगि'त्यन्तेनास्याकारग्रहणज्ञाप्यतां सुस्पष्टमुपापीपदन्। एतद्ग्रन्थमनुवाचयतां मानसं परां कोटिं विस्मयस्याधिरोहति। स्ववचनप्रत्याख्यातृवार्तिककार-भाष्यकारवचनापेक्षया स्ववचनमप्रमाणं तन्मतमेव स्वमतमिति बोधनाय स्वयमेव किञ्चित्पदं प्रायुङ्क्तेति। सर्वतो विलक्षणत्वादत्र सर्वं सम्भाव्यत इति नापहसितव्यम्।

यत्केचिदाक्षिपन्ति—'पाणिनिस्तावत् कात्यायनाद्युत्कर्षं सहत' इत्येतच्छशशृङ्गप्रायम्। पाणिनिर्हि स्ववचनखण्डनप्रवृत्तं वररुचिं शपँस्तेनापि प्रतिशप्त: लोकान्तरमनयत्, स्वमप्यगमच्चेति किलैतिह्यम्। सत्येवं, कथं हरिदीक्षितोक्तं सङ्घटतामिति, तदेतदैतिह्यत्वादेवाप्रमाणं बहुग्रन्थविरुद्धञ्चेत्या-कलनीयम्। ज्ञापकसिद्धत्वाङ्गीकारे न धातुलोपसूत्रप्रत्याख्यानं भाष्यकृत्कृतमपि सूत्रानुगृहीतं भवति। सर्वत्र विधिनिषेधाभ्यां वार्तिकभाष्यकृत्कृताभ्यां सूत्रोपारूढाभ्यां भाव्यम्। न च स्वातन्त्र्येण किञ्चिदुच्छ्वसितुं शक्यम्। एवं हि पस्पशायां भाष्यं 'यो ह्युत्सूत्रं कथयेन्नादो गृह्येते'ति। वार्तिकोक्तौ विधिनिषेधौ सूत्रसिद्धाविति किल तत्र तत्र वार्तिकानि भाष्यकार: प्रत्याचष्टे। एतदेवावष्टभ्य पठन्ति 'सूत्रेष्वेव हि तत्सर्वं यद्वृत्तौ यच्च वार्तिके' इति। एवञ्च वार्तिकभाष्यकाराभ्यां पाणिनिसूत्रार्थ एव तथा तथाऽऽविष्क्रियते न तु स्वातन्त्र्येण किञ्चिदुच्यत इति पाणिनिसूत्रोत्कर्ष एव पर्यवसितं बोध्यम्।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

ननु निरूपितं पक्षद्वयमपि दुष्टम्, न्यायसिद्धत्वाङ्गीकारे पाणिनेस्सर्वज्ञस्य कतिपयशब्दाभिज्ञतायाः प्रसङ्गात्। ज्ञापकसिद्धत्वोपगमे वार्तिककारभाष्यकाराभ्यामुपवर्णितस्य सर्वस्याप्यर्थस्य सूत्रार्थविशेषकत्वाङ्गीकारेण भिन्नाभिप्रायकत्वाभावेन तेषां प्रामाण्याप्रामाण्यविचारस्यायुक्तत्वापातादिति चेन्मैवम्। सर्वज्ञताप्रहाणभीत्यैव नव्यवैयाकरणैः ज्ञापकसिद्धत्वाश्रयणात्। प्रामाण्याप्रामाण्यविचारश्च अत्र पक्षे युज्यत एव। स्मृतेः श्रुत्यर्थानुसारित्वमुत्सर्गत उररीकुर्वाणस्य जैमिनिमुनेः प्रत्यक्षश्रुतिस्मृतिविरोधे प्रामाण्याप्रामाण्यविचारवद् वार्तिकभाष्ययोः सूत्रार्थानुसारित्वस्याङ्गीकारेऽप्यापाततो विरोधमादाय तद्विचारस्य सुकरत्वात्। प्रत्यक्षश्रुतिस्मृत्योस्तत्त्वतो विरोधः, नैवं मुनित्रयप्रणीतानामिति परं विशेषः। दृष्टान्तश्च न सर्वसाम्यमादायेति निरूपिते यथोत्तरमित्यस्यार्थे नानुपपत्तिरिति बोध्यम्। तथा चास्य ज्ञापकसिद्धत्वमेव प्रामाणिकमिति सुधीभिर्विभावनीयम्। मुनिभिस्त्रिभिः प्रवर्तितत्वात् त्रिमुनिव्याकरणमिति वैयाकरणव्यवहारः।

अत्रैवमाशङ्कन्ते— पाणिनिस्तावच्छाकटायनशाकलाऽऽपिशलादीनां व्याकरणानां स्वप्राग्भावित्वं तैस्तैस्सूत्रैस्सूचयति। ततश्च व्याकरणस्य चिरन्तनैरेवोपक्रान्तत्वावगमात् पाणिनेः प्रथमकर्तृकत्वबोधकं पाणिन्युपज्ञं व्याकरणमित्येतत्कथं सङ्गच्छेत इति। अत्रेदं वक्तव्यम्—शाकटायनादिमुनयो हि लौकिकशब्दमात्रमधिकृत्य व्याकरणं प्राणैषुः। भगवाँस्तु पाणिनिरीशानानुध्यानलब्धमक्षरसमाम्नायमुपजीव्य लोकवेदसाधारणेन पथा सञ्चरमाणो व्याकरणं विलक्षणं प्राणैषीत्। पाणिनेः पूर्वं न कोऽपि चिरन्तनः पन्थानमेवंविधं बुबुध इति भवति लोकवेदसाधारणस्य व्याकरणस्य पाणिन्युपज्ञत्वमिति। ततश्चैतद्वाक्यघटको व्याकरणशब्दो लोकवेदसाधारणशब्दानुशासनपर इति प्रतिपत्तव्यम्। विलक्षणत्वादेवेदं 'काणादं पाणिनीयञ्च सर्वशास्त्रोपकारक'-मित्युपश्लोकयन्ति। वस्तुतो विचार्यमाणे—

'अल्पाक्षरमसन्दिग्धं सारवद्विश्वतोमुखम्।
अस्तोभमनवद्यञ्च सूत्रं सूत्रविदो विदुः'॥

इति सूत्रलक्षणं न पाणिनीयसूत्रेष्विवान्यत्र संलक्ष्यते। तथा हि शब्दसंक्षेपो यथैकत्र प्रयुक्तस्य पदस्यैकस्य बहुषु सूत्रेषु सम्बन्धः, न तु प्रतिसूत्रं तत्पदस्य प्रयोगः। संज्ञाश्च प्रायः 'इत्-कृत्-षट्-लुक्-श्लु-घ-घि-घु-टि' इत्येवमाद्या एकाक्षरा एव दरीदृश्यन्ते। अत एव 'अर्धमात्रालाघवेन पुत्रोत्सवं मन्यन्ते

CC-0. Sampurnanand University Collection. Digitized by eGangotri

वैयाकरणाः' इति परिभाषा पठ्यते। सूत्रैश्च तैस्तैर्बह्व्यः परिभाषा ध्वन्यन्ते। किञ्च यद्यच्छास्त्रमसिद्धत्वेन कार्यान्तरप्रयोजकं कार्यान्तरनिवर्तकं वा, तत्तच्छास्त्रम् असिद्धकाण्डे पठ्यते। यस्य च परत्वेन प्राबल्यमभिमतं तत् पश्चात् पठ्यत इत्यहो दीर्घदर्शिता मुनिप्रवरस्य। एवंविधा बहवो विषया इतरसूत्रासाधारणा नैकेनोपन्यासेन पार्यन्ते निरूपयितुम्।

व्याकरणविषये यन्निगमनं कृतं पदमञ्जरीकारैस्तदेव विलिख्य विरम्यते—

'उपासनीयं यत्नेन शास्त्रं व्याकरणं महत्।
प्रदीपभूतं सर्वासां विद्यानां यदवस्थितम्।।
इदमाद्यं पदस्थानं मुक्तिसोपानपर्वणाम्।
इयं सा मोक्षमाणानामजिह्मा राजपद्धतिः।।
रूपान्तरेण ते देवा विचरन्ति महीतले।
ये व्याकरणसंस्कारपवित्रितमुखा नराः'।। इति।

●

CC-0. Sampurnanand University Collection. Digitized by eGangotri

विभिन्नदार्शनिकाभिमतशाब्दबोधविमर्शः

डॉ. दिव्यचेतन(स्वरूप)ब्रह्मचारी
२५/१२ दत्तात्रेयमठः, नारदघट्टः
वाराणसी

❋ ❋ ❋

शाब्दबोध इति विवेचनात् प्राक् तद्विशेषणीभूतः यः शब्दः, तस्य स्वरूपं किमिति चिन्तनीयम्।

नियमो वर्तते = नाग्रहीतविशेषणा बुद्धिर्विशेष्यमवगाहते।

इह खलु समोऽपि लौकिको वैदिको वा व्यवहारः शब्दानां माध्यमेनैव प्रचलति। सर्वे प्राणिनः स्वाभिप्रायं परस्परं विज्ञापयितुं शब्दमेवाश्रयन्ति। तत्राज्ञानमयत्वात् पशुपक्ष्यादिजीवा विचारयितुमसमर्थाः परञ्च ज्ञानवन्तो मानवाः प्रतिक्षणं व्यवहारमार्गे साधनीभूतं शब्दं कथमुपेक्षिष्यन्त इति। विचारपराणां विदुषां मनसि शब्दज्ञानविषयिणी जिज्ञासा नैसर्गिकी एव। अतः सः शब्दः क इति विचार्यते—

शपन्ति व्यपदिशन्ति आह्वयन्ति वानेन वाग्व्यापारेण स खलु शब्द उच्यते। ध्वनिसमुदायं हि प्रायः शब्दपदेन व्यवहरन्ति लौकिकाः, शब्दशास्त्रिभिरपि ध्वन्यात्मकः शब्दोऽनुमोदितः। प्रवक्तुः प्रतिपत्तुश्च परस्परं व्यवहारसम्पादनार्थं शब्दाः प्रयुज्यन्ते। प्रयोक्ता स्वकीयाम् अन्तःस्थां भावनां प्रकटयितुं शब्दभावनां कुरुते। सा शब्दभावना एव प्रतीतपदार्थकेन ध्वन्यात्मकेन शब्दरूपेण प्रवर्तते लोके। शब्दानां ध्वन्यात्मकं रूपं व्यावहारिकस्वरूपं भवति। पाणिनिना[१] शब्दशास्त्रीयप्रक्रियां सम्पादयितुं ध्वन्यात्मकं व्यावहारिकमेव शब्दस्वरूपं समाश्रितम्। पाणिनिरन्यदपि एकं शब्दस्वरूपं निर्दिदेश, यदस्ति शब्दानां तात्त्विकं स्वरूपम्। तात्त्विकमेतच्छब्दस्वरूपं भाषावैज्ञानिकमपि वक्तुं शक्यते। पतञ्जलिरर्थपदेन तच्छब्दस्वरूपं व्याचष्ट, यच्छब्दभावनारूपेण वक्तरि पूर्वत एव सन्तिष्ठते। अग्रे भाषातात्त्विकमिदं शब्दस्वरूपमेवाऽस्माभिः स्फोटपदेन व्यवहरिष्यते। यः

---

१. स्वं रूपं शब्दस्याशब्दसंज्ञा। (पा.सू. १-१-६८)

CC-0. Sampurnanand University Collection. Digitized by eGangotri

ध्वनिसमुदायः कश्चनाऽर्थप्रत्ययं जनयितुं समर्थः स एव शब्दपदव्यवहार्यो भवति। अर्थप्रत्ययानुत्पादकः केवलं श्रोत्रगृहीतो ध्वनिः शब्दशास्त्रे शब्दपदानर्हो भवति।

अत्र द्विविधं नाम शब्दस्वरूपं[1] निर्दिष्टम्। तच्च—

(१) व्यावहारिकं शब्दस्वरूपम्।

(२) भाषातात्त्विकं भाषावैज्ञनिकं वा शब्दस्वरूपम्।

कस्मैचिदपि शब्दशास्त्रिणे उभयविधमपि शब्दस्वरूपमभिमतं भवति। शब्दपूर्णतायै उभयमपि भवति आवश्यकम्। एतदुभयमपि शब्दस्वरूपं संक्षेपेण प्रस्तूयतेऽत्र।

(१) व्यावहारिकं शब्दस्वरूपम् = समेऽपि लौकिका व्यवहारा व्यावहारिकेणैव शब्दस्वरूपेण सम्पाद्यन्ते।

"शाशपिभ्यां वदनाविति[2]" सूत्रेण उणादिकारो व्यवहारसाधनं हि शब्दं स्वीकुरुते। शब्दपदव्युत्पत्त्या एतदनुमीयते यत् प्रारम्भिकी शब्दप्रवृत्तिः नामकरणात्मिका सम्बभूव। उणादि व्याचक्षाणः दशपाद्युणादिवृत्तिकारः आह्वानकरणं शब्दं व्याचष्ट[3]। स्वामिदयान्दोऽपि स्वकीयोणादिव्याख्यायां तथाभूतमेव शब्दं व्याचकार[4]।

पतञ्जलिनाऽपि चर्चितोऽयं लोकप्रतीतिजनको व्यावहारिकः शब्दो ध्वनिसमुदायरूपः[5]। लोके ध्वनिं कुर्वन् बालक उच्यते। "शब्दकारी खल्वयं माणवक" इति। अतः शब्दपदेन लोके प्रतीतपदार्थको ध्वनिविशेषः शब्दः ख्यातः। तेषां शब्दानामनेन पाणिनीयेन तन्त्रेण अनुशासनं क्रियत इति पतञ्जलेः तत्रत्योऽभिप्रायः। अत्रेदं न विस्मर्तव्यं ध्वनिसमुदाये शब्दत्वव्यपदेशः शब्दभावनात्मके स्फोटरूपेऽन्तःशब्दे, बाह्ये च ध्वन्यात्मके शब्दे अभेदबुद्ध्या एव क्रियते। भाषातात्त्विकदृष्ट्या प्रतीत्यजनकस्य ध्वनिसमुदायस्यापि शब्दत्वेनानभिप्रेतत्वात्। प्रयोगदृष्ट्या हि शब्दानां व्यावहारिकं स्वरूपं समाश्रीयते। शब्दस्य स्वरूपग्राहकः प्रयोग एव भवति। लौकिकप्रयोगं विना शब्दस्य रूपनिर्ग्रहो न भवति कथञ्चिदपि इति पतञ्जलिना व्याख्यातम्।

---

१. अस्त्यन्यत् स्वं शब्दस्येति। किं पुनस्तत्? अर्थः। (महाभा. १-१-६८)

२. उणादि-सू. ४/९४।

३. शपन्ति...संस्कृता वा। कर्णमिति (दशपा. ब्री. ६/४८)

४. शप्यते आहूयतेऽनेन स शब्दो नादः। (उणा. व्या. ४/९७)

५. अथवा प्रतीतपदार्थको.....। (महाभा. पस्पशा.)

CC-0. Sampurnanand University Collection. Digitized by eGangotri

तथा हि रूपनिग्रहश्च शब्दस्य नान्तरेण लौकिकप्रयोगम्[1]। शब्दस्येदं व्यावहारिकं स्वरूपमेवाभिप्रेत्य आचार्य उपवर्षः ध्वनीनां शब्दत्वं स्वीचकार। मीमांसासूत्रं व्याचक्षाणः शबरस्वामी उपवर्षमतमन्ववदत्। तथा हि—अथ[2] गौरित्यत्र कः शब्दः? गकारोकारविसर्जनीया इति। भगवानुपवर्षः एतद्रीत्या गौरित्यत्र गकारौकारविसर्जनीयरूपध्वनिसङ्घात एवास्ति शब्दः। बादरायणसूत्रं भाषमाणः आचार्यः शङ्करोऽपि[3] इदमेव मतमुपवर्षस्य अभिमतमित्यवोचत। भगवत उपवर्षस्य इदं निरुक्तं मतं वस्तुतः शब्दानां प्रायोगिकरूपमात्रं संलक्ष्यैव विद्यते। यदि ततः प्राक् स्फोटात्मकः आन्तरः शब्दो न भवेत् तदा नियतार्थे नियतस्य ध्वन्यात्मकस्य शब्दस्योच्चारणमपि न सम्भवेत्।

शब्दं परिभाषमाणेन भगवता पतञ्जलिनोक्तम्—

श्रोत्रोपलब्धिर्बुद्धिनिर्ग्राह्यः प्रयोगेणाभिज्वलित आकाशदेशः शब्द[4] इति।

लक्षणेनानेन शब्दे तथ्यत्रयं निर्दिश्यते—

१. श्रोत्रोपलब्धिः

२. बुद्धिर्निर्ग्राह्यः

३. प्रयोगेणाभिज्वलितश्चेति

भाषातात्त्विकं शब्दस्वरूपम्

शब्दाभिव्यक्तेः साधनं हि ध्वनिरस्ति। वक्तुः पूर्वनिश्चितं शब्दसंस्कारं प्रकटयति ध्वनिसंघातः। स्फोटध्वन्योरभेदबुद्ध्या ध्वनिसमुदाये शब्दत्वं व्यपदिश्यते प्रतीतपदार्थके ध्वनौ शब्दत्वं स्वीकुर्वाणस्य पतञ्जलेरपि अयमेवाशयः। पतञ्जलेरभिप्रायं स्पष्टयन् नागेशः तत्प्रायोगिकं शब्दस्वरूपं व्याचष्ट। तथा हि—लोके व्यवहर्तृषु पदार्थबोधकत्वेन प्रसिद्धः श्रोत्रेन्द्रियग्राह्यत्वाद् वर्णरूपध्वनिसमूह एव शब्द इत्यर्थः[5]। तात्त्विकं शब्दस्वरूपन्तु ध्वन्यतिरिक्तमेकमन्यत्। पाणिनीयतन्त्रे मौलिकरूपेण एतदुपवर्णितम्। सम्प्रत्ययनिमित्तकः ध्वनिसमुदायो भवति वैज्ञानिकः शब्दः, येनोच्चारितेन शब्देन प्रतिपत्तुः अर्थप्रतिपत्तिर्भवति स एव शब्दः। गौरिति शब्दे गकारौकाराभ्यामन्योऽस्ति कश्चिच्छब्दः तत्प्रयोजकः। अथ गौरित्यत्र शब्दमनुसन्दधानस्य पतञ्जलेरयमेवाभिप्रायः—“येनोच्चारितेन सास्नालाङ्गूलक-

---

१. महाभा. १/१/२२;
२. मी.द. १/१/५ शा.भा.।
३. वे.द. १/३/२८ सा.भा.;
४. अष्टा.प्रत्या.सू. १/महाभा. २/आ.।
५. अष्टा. महाभा. पस्पशा. प्र. उद्योते।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

कुदखुरविषाणिनां सम्प्रत्ययो भवति स शब्दः''[१]। पतञ्जलेः शब्दलक्षणं शब्दस्य स्फोटात्मकमान्तरिकं स्वरूपं संकेतयति। अत्रेदं वक्तुं शक्यते यच्छब्दस्य प्रयोजनद्वयं भवति ज्ञानं प्रयोगश्च। ज्ञानमस्ति स्फोटरूपं प्रयोगश्च ध्वन्यात्मकः। एकः पूर्वपरयोरिति सूत्रं भाषमाणः पतञ्जलिः शब्दज्ञानं शब्दप्रयोगञ्च अभीप्सितफलप्रदं व्याचष्ट।

तथा हि शब्दस्यापि ज्ञाने प्रयोगे च प्रयोजनमुक्तम्। किम्? एकः शब्दः[२] सम्यग् ज्ञातः शास्त्रान्वितः सुप्रयुक्तः स्वर्गे लोके च कामधुग् भवति। शब्दस्वरूपप्रसङ्गादत्र एतदप्यवधेयम्—प्रयोगेणाभिज्वलितः श्रावणः शब्दः अनुशासनदृष्ट्या द्विविधः-व्युत्पन्नः, अव्युत्पन्नश्च। तत्र व्युत्पन्नः शब्दः एकेषामाचार्याणां मते स्वीक्रियते। अव्युत्पन्नश्चापरेषाम्। तथा हि वाचकः उपादानः स्वरूपवान् व्युत्पत्तिपक्षे। अव्युत्पत्तिपक्षे तु अर्थाऽवहितं समाश्रितं निमित्तं शब्दव्युत्पत्तिकर्मणि प्रयोजनकम्। तत्र शब्दानां नियतं व्युत्पत्तिनिमित्तं भवति। तदेव च शब्दानां प्रवृत्तिनिमित्तं बोधयति। व्युत्पत्तिपक्षे गवादिरूपार्थे यद् गमनादिक्रियारूपं निमित्तं स्थितम्, तदेव गवादिशब्दस्य व्युत्पत्तिकर्मणि प्रयोजनकम्। गोशब्दस्य व्युत्पत्तेः मूलकारणं गमनरूपा क्रिया एव। गच्छतीति गौरिति व्युत्पादनात्। शब्दव्युत्पत्तिः प्रयोक्तृसामर्थ्यमाश्रयति। प्रयोक्तृभिः अर्थस्य योऽवस्थाविशेषो दृष्टः स एव तद्वाचकस्य शब्दस्य भवति व्युत्पत्तिनिमित्तम्। तथा चोक्तं हरिणा—

अन्यथा च समाख्यानमवस्थाभेददर्शिभिः ।
क्रियते किंशुकादीनामेकदेशेऽवधारणात् ।।[३]

यथा वृक्षवल्मीकादिभिः पथोऽन्वाख्यानं लोके क्रियते तथा शब्दव्युत्पत्तावपि अर्थसहचारिभिः अनेकैः निमित्तैः शब्दो व्युत्पाद्यते। यद्यपि शब्दस्वरूपं पूर्वं विचारितं तथापि संकेतरूपेण पृथक्-पृथक् दर्शनाभिप्रेत-शब्दस्वरूपं तावद् विचार्यते।

न्यायदर्शने

श्रोत्रग्राह्यो गुणः शब्दः[४] स द्विविधः—ध्वन्यात्मको वर्णात्मकश्च। ध्वन्यात्मकस्तावत् शब्दो भेर्यादौ प्रसिद्धः, वर्णात्मकश्च लोकवाग्व्यवहारविषयः, स शब्दः अनित्यः। उक्तं च महर्षिणा गौतमेन—आदिमत्त्वादैन्द्रियकत्वात्

---

१. महाभा. पस्पशा.; २. उणादिः २/६३।
३. वा.प. २/१७३; ४. तर्कसंग्रहे।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

कृतवदुपचाराच्चेति गौतमसूत्रम्[१]। अत्र भाष्यम्—आदिः योनिः कारणम् आदीयतेऽस्मादिति कारणवदनित्यमदृष्टम्। संयोगविभागजश्च शब्दः कारणवत्वादनित्यः किमुत्पत्तिकारणम्, संयोगविभागौ शब्दस्य आहोस्विदभिव्यक्तिकारणम् इत्यत आह—ऐन्द्रियकत्वादिति। इन्द्रियप्रत्यासत्तिग्राह्य ऐन्द्रियकः शब्दोऽनित्यः ऐन्द्रियकत्वाद् रूपादिवत्।

वैशेषिकदर्शने

वैशेषिकेऽपि शब्दस्यानित्यत्वमाह, तथा हि गुणस्य सतोऽपवर्गः कर्मभिः साधर्म्यम्। तद् व्याख्या चेत्थम्—सतः नित्यस्य शब्दस्य लिङ्गाभावात्। शब्दनित्यत्वसाधकं प्रमाणाभावादनित्यम्।

सांख्यदर्शनाभिमतं शब्दस्वरूपम्

सांख्यदर्शने परिगणितेषु पञ्चविंशतितत्त्वेषु पञ्चतन्मात्रमस्ति विकारोऽयमहङ्कारस्य। तेष्वेवान्यतमं शब्दतन्मात्रम्, अस्मादेव भूताकाशस्य भवत्युत्पत्तिः, तथा हि शब्दतन्मात्रादाकाश[२] उत्पद्यते। इति गौडपादभाष्यम्। अनेन प्रतीयतेऽस्मिन् दर्शने शब्दो द्रव्यम्, न तु गुणः। स च शब्दो नित्यः सत्कार्यत्वात्।

मीमांसकाभिमतं शब्दस्वरूपम्

भगवतोपवर्षेण[३] वर्णा एव तु शब्द उक्तम्। अतो वर्णा एव शब्दस्य स्वरूपाणि नान्यत्, स च वर्णः नित्यः उक्तो जैमिनीयन्यायमालायाम्। तथा च—

अबाधितप्रत्यभिज्ञाबलाद् वर्णस्य नित्यता।
उच्चारणप्रयत्नेन व्यज्यतेऽसौ न जन्यते ।। इति[४]।

काव्यशास्त्रीयशब्दस्वरूपम्

काव्यशास्त्रस्य गवेषणेन ज्ञायते यदालङ्कारिकाः शब्दस्येत्थं स्वरूपं प्रतिपादयन्ति। तथा हि अर्थप्रतीतये गीतः शब्द इत्यभिधीयते[५], विभक्त्युत्पत्तये योग्यः शास्त्रीयशब्दः इष्यते[६]। स च शब्दस्त्रिधा—वाचकः लक्षकः व्यञ्जकश्चेति।

---

१. न्या.द. २/२/१३, प्रा. २/३/८।

२. सां.का. ३/गौड.भा.।

३. ब्रह्मसू.शा.भा. १ पा. ३ देवताधिकरणे उदाहरणे शंकर।

४. जैमिनी.न्या.षष्ठाधि. शब्दनित्यत्वाधिकरणे।

५. काव्यालंकारे, प्रथम १;

६. चन्द्रालोके प्र.म.।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

क्रमेणैतेषां त्रयोऽर्थाः वाच्यलक्ष्यव्यङ्ग्याः, एतेषां प्रतीतिः यथायोग्यमभिधा-लक्षणाव्यञ्जनाभिः। उक्तञ्च—

वाच्योऽर्थोऽभिधया बोध्यो लक्ष्यो लक्षणया मतः।[1]
व्यङ्ग्यो व्यञ्जनया ताः स्युः तिस्रः शब्दस्य शक्तयः॥

योगाभिमतं शब्दस्वरूपम्

भगवता पतञ्जलिना योगशास्त्रं विरचितम्। तत्र समाधिपादान्तर्गतं सूत्रमाह—"तत्र शब्दार्थज्ञानविकल्पैः सङ्कीर्णा सवितर्का समापत्तिः" इति। अत्र व्यासभाष्यम्, तद्यथा—गौरिति शब्दो गौरित्यर्थो गौरिति ज्ञानमित्यादि व्याख्यातम्। गौरिति शब्द इति कथनेन पदात्मकः शब्दः प्रतीयते, स च नित्यः, तदेव शब्दस्वरूपम्।

शाब्दिकाभिमतं शब्दस्वरूपम्

स्फोटवादिनः वैयाकरणाः शब्दस्य नित्यत्वं स्वीकुर्वन्ति। स शब्दः स्फोटरूपः व्यवह्रियते न तु ध्वनिरूपः। ध्वनिस्तु शब्दगुणः। तथा हि भाष्यम्—एवं तर्हि स्फोटः शब्दः, ध्वनिः शब्दगुणः। भाष्यकारेण स्फोटः शब्दः स्वमुखेन प्रतिपादितः। अन्यदपि गौरित्पत्र कः शब्दः? इत्याशङ्क्यान्ते आह—"येनोच्चारितेन सास्नालाङ्गूलककुदखुरविषाणिनां सम्प्रत्ययो भवति सः शब्दः।" अत्र पूर्वापर-भाष्यपर्यालोचनया प्रतीयते शब्दो द्विविधः—१. अभिव्यङ्ग्यः २. अभिव्यञ्जकश्च। आद्यः स्फोटरूपः। द्वितीयो ध्वनिरूपः। उक्तञ्च वाक्यपदीये—

द्वावुपादानशब्देषु शब्दौ शब्दविदो विदुः।
एको निमित्तं शब्दानामपरोऽर्थे प्रयुज्यते॥[2]

वार्तिककारोऽपि 'सिद्धे शब्दार्थसम्बन्धे' इति वार्तिके[3] सिद्धशब्दः नित्यवाचकः प्रदीपेऽत्र व्याख्यातः। भगवता पाणिनिना "अर्थवदधातुरप्रत्ययः प्रातिपदिकमित्यत्र अर्थवदेव शब्दस्वरूपं गृह्यत इति व्याख्यातम्।[4] भर्तृहरिः शब्दस्वरूपमित्थं प्रतिपादयति-अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरमित्यादिकारिकया शब्दस्वरूपं वास्तविकं ब्रह्म वर्तते। अन्यत् सर्वमौपाधिकम्। नागेशः मञ्जूषायां ननु कोऽयं वृत्त्याश्रयः शब्द इत्याशङ्क्य वर्णाः प्रत्येकमिति चेत्, न इति आक्षेपपुरस्सरं

---

१. साहित्यदर्पणे द्वितीय; २. यो.सू.समाधि. ४२/व्यासभाष्ये।
३. अष्टा.प्रत्या.सू. १/महाभा. प्रा.; ४. महाभा. पस्प.।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

निर्णये आह सः स्फोटात्मक इति गृहाण[१]। अतः स्फोटात्मकः शब्दः ब्रह्मरूपो नित्यश्च ध्वनिना अभिव्यक्तो भवति।

किं बहुना विवेचनेन संसारेऽस्मिन् सर्वोऽपि प्रत्ययः व्यवहारश्च शब्देन विना न भवति। अतः हरिणोक्तं वाक्यपदीये—

न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते।
अनुविद्धमिव ज्ञानं सर्वं शब्देन भासते॥

तथा च भाष्ये शब्दपूर्वकश्चार्थसम्प्रत्ययः। शब्दस्वरूपस्यावधारणे जाते शाब्दबोधः विविच्यते।

शाब्दबोधः

शब्दाद् आगतो जातः वा शाब्दः 'तत आगत'[२] इत्यण्। शाब्दश्चासौ बोधः इति शाब्दबोधः। बोधश्च तत्र कश्चिदात्मवृत्तिर्गुणः, तत्पर्याया बुद्धिर्ज्ञानं प्रतिपत्तिरित्याद्याः। तत्रेन्द्रियात्मकप्रत्यक्षप्रमाणजन्यो बोधः प्रत्यक्षम्। यथा अयं घट इति। वह्निव्याप्यधूमवान् पर्वत इत्यादिपरामर्शरूपानुमानप्रमाणजन्यो बोधोऽनुमानम्। यथा पर्वतो वह्निमानिति। गवादिसादृश्यप्रत्यक्षोद्बुद्धसंस्कारजन्यगोसदृशो गवय इत्यादिवाक्यार्थस्मरणरूपोपमानप्रमाणजन्यो गवयपदवाच्योऽयमित्यादिशक्तिग्रह उपमानम्। वेदाः प्रमाणम् इत्यादिशब्दरूपप्रमाणजन्यबोधः शाब्दबोध इत्युच्यते।

तदेवं प्रत्यक्षानुमानोपमानशब्दाश्चत्वारः प्रमाणानि। तज्जन्यास्तु प्रत्यक्षानुमानोपमानशाब्दाश्चत्वारो बोधाः प्रमा इत्युच्यन्ते। प्रमाणशब्दश्च भावकरणोभयव्युत्पत्त्या ज्ञानबोधको ज्ञानकारणीभूतेन्द्रियादिबोधकश्च। एवमनुमानोपमानशब्दावपि ज्ञानतत्करणोभयवर्तिनौ। एवं प्रत्यक्षशब्दोऽपि।

यस्यार्थस्य बोधो भवति सोऽर्थो विषयः, यथा राज्ञः पुरुष इति ज्ञाने शाब्दिकमते राजा, स्वस्वामिभावः पुरुषश्च विषयाः विभक्त्यर्थस्य पदार्थभूतस्यापि संसर्गतया भानाभ्युपगमात्। अत एव संसर्गतावादिपदेन शाब्दिका गृह्यन्ते। न्यायनये तु राज्ञः पुरुष इत्यत्र राजनिरुपितं स्वत्वम् आश्रयत्वं पुरुषश्च विषयः।

तत्र शाब्दिकमते राजपदार्थस्य षष्ठ्यर्थीभूतस्वस्वामिभावसम्बन्धेन पुरुषपदार्थेऽन्वय इति स्वस्वामिभावसम्बधेन राजविशिष्टः पुरुष इति बोधाकारः। न्यायनये तु राजपदार्थस्य निरूपितत्वसम्बन्धेन षष्ठ्यर्थस्वत्वेऽन्वयः, स्वत्वस्य च आश्रयत्वसम्बन्धेन पुरुषेऽन्वय इति राजनिरूपितस्वत्ववान् पुरुष इति बोधः।

१. प.ल. मञ्जू.; २. पा.सू. ४/३/६८।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

अन्वयपदं च भावव्युत्पत्त्या क्रियापरं, करणव्युत्पत्त्या च सम्बन्धपरम्। यथा 'राज्ञः पुरुष' इत्यत्र स्वरवामिसम्बन्धेनान्वय इत्यत्रान्वयपदम्। अत एव अन्वयबोधपदेन शाब्दबोध उच्यते। पदार्थद्वयसम्बन्धविषयकबोधे रूढत्वाच्च नान्यत्रान्वयबोध इति व्यवहारः। तथा च शाब्दबोधे द्विविधो विषयो भासते—

१. पदार्थः, २. पदार्थसम्बन्धश्च। सम्बन्ध एव संसर्ग इत्युच्यते। घटस्य ज्ञानं जातमित्यत्र घटस्य ज्ञाने सम्बन्धः षष्ठ्या प्रतिपाद्यते। एवं घटोऽयमिति ज्ञाने घटो विषय इति व्यवहारात् केनचित् सम्बन्धेन घटस्य ज्ञानवृत्तिता वाच्या। तथा च ज्ञानस्य विषये विषयत्वं संसर्गः, विषयस्य ज्ञाने तु विषयित्वम्, अर्थात् स्वनिष्ठविषयतानिरूपकत्वं संसर्गः। स च सम्बन्धो ज्ञानेन विषयेण वा निरूपणीय इति विषयतानिरूपकं ज्ञानम्, एवं विषयितानिरूपकश्च विषयः। तथा च विषयानुयोगिको ज्ञानप्रतियोगिकः सम्बन्धो विषयता। यस्य सम्बन्धः स प्रतियोगी। यत्र सम्बन्धः सोऽनुयोगीत्युच्यते। ज्ञानानुयोगिको विषयप्रतियोगिकश्च सम्बन्धो विषयिता। तत्र विषयता विषयस्वरूपा, ज्ञानस्वरूपा, अतिरिक्ता वेति मतत्रयम्।

'राज्ञः पुरुषः' इति ज्ञाने राज्ञः पुरुषस्य च विषयत्वेन राजपदार्थनिष्ठ-विषयतानिरूपकं पुरुषपदार्थनिष्ठविषयतानिरूपकं च तथा स्वस्वामिभावरूप-संसर्गनिष्ठसांसर्गिकविषयतानिरूपकं च। एवं संयोगसम्बन्धेन घटवद्भूतलमिति प्रत्यक्षात्मकज्ञानं घटसंयोगभूतलत्रितयनिष्ठविषयतानिरूपकम्। तथा घटः संयोगो भूतलमिति समूहालम्बनप्रत्यक्षमपि तादृशविषयतानिरूपकमेवेति घटवद्भूतलमिति प्रत्यक्षापेक्षया घटसंयोगभूतलानीति प्रत्यक्षस्य वैलक्षण्यानुपपत्तिः, विषयता-वैलक्षण्येनैव ज्ञानवैलक्षण्यस्य वाच्यत्वात्। अतो घटवद्भूतलमिति ज्ञानीय-घटसंयोगभूतलनिष्ठविषयतानां विनिगमनाविरहात् परस्परं निरूप्यनिरूपकभावः स्वीक्रियते।

तथा घटवद्भूतलमिति ज्ञानं घटनिष्ठविषयतानिरूपितसंयोगनिष्ठविषय-तानिरूपितभूतलनिष्ठविषयतानिरूपकं भूतलनिष्ठविषयतानिरूपितसंयोगनिष्ठ-विषयतानिरूपितघटनिष्ठविषयतानिरूपकं, घटनिष्ठविषयतानिरूपकसंयोगनिष्ठ-विषयतानिरूपकभूतलनिष्ठविषयतानिरूपकं भूतलनिष्ठविषयतानिरूपक-संयोगनिष्ठविषयतानिरूपकघटनिष्ठविषयतानिरूपकं वा भवति।

एवं हि घटभूतलसंयोग इति ज्ञानापेक्षया घटवद्भूतलमिति ज्ञानस्य वैलक्षण्यं सिद्धम्। आद्ये घटादिविषयतानां निरूप्यनिरूपकभावानापन्नत्वात् द्वितीये तदापन्नत्वाच्च, परन्त्वेवमपि घटवद्भूतलमिति प्रत्यक्षभूतलवान् घट इति

CC-0. Sampurnanand University Collection. Digitized by eGangotri

प्रत्यक्षयोर्वैलक्षण्यानुपपत्तिः, उभयोः समानविषयतानिरूपकत्वात्। एतदर्थं प्रोक्तज्ञानीयविषयतयोर्वैलक्षण्यमभ्युपगम्यते। तच्च वैलक्षण्यं विशेष्यतात्व-प्रकारत्वरूपमेव। तथा च घटवद्भूतलमित्यत्र घटनिष्ठविषयता प्रकारतारूपा भूतलवान् घट इति ज्ञाने तु घटविषयता विशेष्यतारूपेति तयोर्वैषम्यात् उक्तज्ञानयोर्वैषम्यं सिद्ध्यति।

यद्यपि एकत्रैव विषयताया वैलक्षण्याऽभ्युपगमेन निर्वाहः, तथापि अस्यामेव वैलक्षण्यमस्तु अन्यस्यामेव वेत्यत्र विनिगमनाविरहात् सर्वत्र विषयतासु वैलक्षण्यं स्वीक्रियते। तथा च घटवद्भूतलमिति ज्ञानं घटनिष्ठप्रकारतानिरूपितसंयोगसम्बन्ध-निष्ठसांसर्गिकविषयतानिरूपितभूतलनिष्ठविशेष्यतानिरूपकम्। भूतलनिष्ठविशेष्यता-निरूपितसंयोगनिष्ठसांसर्गिक-विषयता-निरूपित-घटनिष्ठप्रकारतानिरूपकं घटनिष्ठ-प्रकारतानिरूपकसंयोगनिष्ठसांसर्गिकविषयतानिरूपकघटनिष्ठप्रकारतानिरूपकं च भवति, भूतलवान् घट इति ज्ञानन्तु भूतलनिष्ठप्रकारतानिरूपकं घटनिष्ठविशेष्यतानिरूपकं चेति तयोर्भेदः। ज्ञाताज्ञातभेदेन द्विविधोऽर्थः शाब्दबोधे भासते। यद्यपि शब्दप्रयोगोऽज्ञातज्ञापनार्थमेव तथापि ज्ञातमर्थमनवलम्ब्य अज्ञातज्ञापनं न संभवति। अतो ज्ञातस्याप्यर्थस्य शाब्दबोधे विषयत्वमावश्यकम्। तत्र यं ज्ञातमर्थमवलम्ब्य अज्ञातार्थज्ञापनं क्रियते, स एव उद्देश्य इत्युच्यते। तत्रोद्देश्यतार्थविषयतापूर्वं ज्ञातास्तु विधेय एवापूर्व इत्यप्युच्यते।

विभिन्नदार्शनिकाभिमतशाब्दबोधप्रकाराः

नैयायिकाः

प्रथमान्तार्थमुख्यविशेष्यकं[१] शाब्दबोधं नैयायिकाः स्वीकुर्वन्ति। तथा च तिबादिप्रत्ययानां कृतौ[२] शक्तिः, फलव्यापारौ धात्वर्थौ तेन 'देवदत्त ओदनं पचति' इति वाक्यात् ओदनकर्मकविक्लित्त्यनुकूलवर्तमानकालिककृतिमान् देवदत्तः। अत्र ओदनपदोत्तरद्वितीयाया अर्थः कर्मत्वम्, पच्धातोः विक्लित्तिफूत्कारादिरर्थः। अनुकूलत्वं संसर्गमर्यादया[३] भासते, लटो वर्तमानत्वमाख्यातस्य कृतिः। आश्रयत्वञ्च संसर्गमर्यादया भासते तेन पूर्वोक्तः शाब्दबोधः जायते। अत्र विशिष्टशाब्दबोधः इत्थम्- तण्डुलपदार्थस्य स्वनिष्ठप्रकारतानिरूपितविशेष्यतासम्बन्धेन अमर्थाश्रयेऽ-न्वयः, आश्रयस्य च स्वनिष्ठाधारतानिरूपिताधेयतासम्बन्धेन फलेऽन्वयः, फलस्य

---

१. न्याय-सि.मु. शब्दखण्डः, पर. ल. मञ्जूषा।

२. पर. ल. मञ्जूषा, न्याय-सि. मु. शब्दखण्डे।

३. तर्कसंग्रह-पदकृत्ये।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

च स्वनिष्ठजन्यतानिरूपितजनकतासम्बन्धेन कृतावन्वयः, कृतेश्च स्वनिष्ठाधेयतानिरूपिताधारतासम्बन्धेन प्रथमान्तदेवदत्तादिपदोपस्थाप्येऽन्वयः। आख्यातार्थसङ्ख्यायाश्च स्वनिष्ठपरिच्छेदकतानिरूपितपरिच्छेद्यतासम्बन्धेन प्रथमान्तपदोपस्थाप्य एवान्वयः, तथा च तण्डुलनिष्ठकर्मतानिरूपकविक्लित्त्यनुकूलव्यापारजनककृत्याश्रयैकत्वविशिष्टो देवदत्त इति बोधः।

मीमांसकाः

वाक्यार्थनिर्णयपराः मीमांसकाः शाब्दबोधे आख्यातार्थभावनाविशेष्यकत्वं प्रतिपादयन्ति। तत्र च मानम् "प्रकृतिप्रत्ययौ सहार्थं ब्रूतः प्रत्ययार्थस्यैव प्राधान्यम्' इति सूत्रम्।[१] दर्शनेऽस्मिन् आख्यातार्थः-भावना, धातोरर्थः-फलम्, कर्तुराक्षेपः शाब्दबोधे भावना विशेष्या अन्यत् सर्वं कर्त्रादिकं विशेषणम्। तथा हि देवदत्तः काशीं गच्छति इति वाक्यात् देवदत्तकर्तृका वर्तमानकालिकोत्तरदेशसंयोगानुकूला भावना इति शाब्दबोधः। अत्र भावना व्यापारापरपर्याया इत्युच्यते। तथा हि व्यापारस्तु भावनाभिधा साध्यत्वेनाभिधीयमाना क्रिया। न च लः कर्मणि इत्यादिसूत्रविरोधः यतो हि सूत्रेण लकाराः कर्तरि कर्मणि विधीयन्ते न तु भावनायाम्, कथं तर्हि आख्यातार्थो भावना इति वाच्यम्, अस्मिन् दर्शने लः कर्मणि इत्यादिसूत्रस्य[२] इत्थमर्थः क्रियते, लकाराः कर्तृत्वे कर्मत्वे च भवन्ति। तथा च कर्तृत्वं भावना इति न पाणिनीयसूत्रविरोधः।

शाब्दिकाः

शब्दप्रमाणपरायणाः वैयाकरणाः धात्वर्थव्यापारमुख्यविशेष्यकं शाब्दबोधं स्वीकुर्वन्ति। अत्र मानं भवप्रधानमाख्यातं सत्त्वप्रधानानि नामानि इति निरुक्तवचनम्[३]। भाष्यकारेणाप्युक्तम्—आख्यातेन च क्रियाप्रधानत्वं लक्ष्यते। तथा च फलव्यापारौ धात्वर्थौ। अन्यत्रापि—

फलव्यापारयोर्धातुराश्रये तु तिङस्स्मृताः।
फले प्रधानं व्यापारस्तिंङर्थस्तु विशेषणम्।। इति[४]।

आख्यातार्थौ कर्तृकर्मणी लः कर्मणि[५] इत्यादिपाणिनीयसूत्रात्। यथा—'देवदत्तः गृहं गच्छति' इति वाक्यात् देवदत्ताभिन्नैककर्तृकः वर्तमानकालिकः

---

१. पर.ल. मञ्जूषायाम्; २. वै.भू. धात्वर्थनिर्णये।
३. नि.आ. १ खा. १; ४. वै.भू.का.।
५. लः कर्मणि च भावे चाकर्मकेभ्यः (१-२-४५)।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

उत्तरदेशसंयोगानुकूलव्यापारः। विशेषतया शाब्दबोधश्चेत्थम्—अत्र षट् पदानि सन्ति। १. देवदत्त, २. सु., ३. गृह, ४. अम्, ५. गम्, ६. तिप्, पदार्थाश्च देवदत्तत्व, १. देवदत्त, २. समवाय, ३. पुँस्त्वत्त्व ४. पुँस्त्व, ५. समवाय, ६. एकत्वत्व, ७. सकत्व, ८. समवाय, ९. गृहत्व, १०. गृह, ११. समवाय, १२. क्लीबत्त्वत्त्व, १३. क्लीबत्त्व, १४. समवाय, १५. एकत्त्वत्त्व, १६. एकत्व, १७. समवाय, १८. कर्मत्व, १९. कर्म, २०. समवाय, २१. गमनत्व, २२. गमन, २३.समवाय, २४. कर्तृत्व, २५. वर्तमानकाल, २६. कर्तृगतैकत्त्वत्त्व, २७. एकत्व, २८. समवाय, २९. देवदत्तस्य कर्तर्यभेदाः, ३०. अन्यपदार्थस्य गमनक्रियायां कर्मक्रियाभावसम्बन्धस्य। अत्र योजना—

समवायसम्बन्धावच्छिन्नपुँस्त्वत्त्वनिष्ठप्रकारतानिरूपिता अथ च समवाय-सम्बन्धावच्छिन्नैकत्त्वत्त्वावच्छिन्नैकत्त्वनिष्ठप्रकारतानिरूपिता च या समवायसम्बन्धा-वच्छिन्ना देवदत्तत्वनिष्ठप्रकारतानिरूपिता देवदत्तनिष्ठा विशेष्यता तादृशविशेष्यता-समानाधिकरणा या अभेदसम्बन्धावच्छिन्ना देवदत्तत्वावछिन्ना देवदत्तनिष्ठप्रकारता तादृशप्रकारतानिरूपिता या कर्तृत्वावच्छिन्ना कर्तृनिष्ठा विशेष्यता तादृश-विशेष्यतानिरूपिता या परिच्छिन्नत्त्वसम्बन्धावच्छिन्ना वर्तमानकालत्वावच्छिन्ना वर्तमानकालनिष्ठा प्रकारता तादृशप्रकारतानिरूपिता या अभेदसम्बन्धावच्छिन्ना गृहत्वावच्छिन्ना गृहनिष्ठा प्रकारता तादृशप्रकारतानिरूपिता या कर्मत्वावच्छिन्ना कर्मनिष्ठा विशेष्यता तादृशविशेष्यतासमानाधिकरणा या निष्ठत्वसम्बन्धावच्छिन्ना कर्मत्वावच्छिन्ना कर्मनिष्ठा प्रकारता तादृशप्रकारतानिरूपिता या संयोगत्वावच्छिन्ना संयोगनिष्ठा विशेष्यता तादृशविशेष्यतासमानाधिकरणा या अनुकूलत्वसम्बन्धा-वच्छिन्ना संयोगत्वावच्छिन्ना संयोगनिष्ठा प्रकारता उक्तसकलप्रकारतानिरूपिता या क्रियात्वावच्छिन्ना क्रियानिष्ठा विशेष्यता तादृशविशेष्यताशालिशाब्दबोध इति प्राच्याः।

अत्र नागेशः

प्राचीनवैयाकरणानां मतापेक्षया नागेशमते इयांस्तु विशेषः, ते तु कर्मणि कर्तरि उभयत्रापि व्यापारमुख्यविशेष्यकशाब्दबोधः भवति इति प्रतिपादयन्ति। परन्तु नागेशः कर्मणि प्रत्यये फलविशेष्यकः शाब्दबोध इति स्वीकरोति, तथा कर्तरि प्रत्यये प्राचीनवत्। तथा च शब्दरत्नकारोऽपि कर्मणि प्रत्यये फलविशेष्यः कर्तरि प्रत्यये पूर्ववत्। तथा हि हरिः सेव्यते एवमेवेति मनोरमायाः प्रतीकमादाय धात्वर्थ एव विशेष्यतेत्यर्थः।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

इयांस्तु विशेषः—तत्र फलांशो विशेष्यः कर्तरि व्यापारांश इति। दार्शनिकविदुषा नागेशेन उद्योते प्रतिपादितं तथा हि विग्रहे फलस्य विशेषतया इष्यते पुत्रः इत्यत्र भिन्नार्थत्वात् न क्यच् किन्तु पुत्रमिच्छति इत्यर्थ एव। कर्मणि च फलविशेष्यत्वम्। अत्र प्रमाणं "सुप आत्मनः क्यच्" इति सूत्रस्य भाष्यम्[1]- तथा हि अथेह क्यचा भवितव्यम्, इष्टः पुत्रः इष्यते पुत्रः? केचित् तदाहुः न भवितव्यमिति किं कारणम्? स्वशब्देनोक्तत्वात्। एतत् प्रतीकमादाय पूर्वोक्तः उद्योतः व्याख्यातः। मञ्जूषायामपि "क्रियाप्रधानमाख्यातम्" इत्यत्र क्रियापदं करणव्युत्पत्त्या व्यापारपरं कर्मव्युत्पत्त्या फलपरमिति बोध्यम्[2]। तथा च भाव्यतेऽनेनेति भावः व्यापारः। भावयत्येनं भावः फलं सः प्रधानो मुख्यो यस्मिन्निति तद् भावप्रधानम्, भावप्रधानमाख्यातमिदं वचनम् उभयविशेष्यकशाब्दबोधपरम्। तथा चोदाहरणम्—"चैत्रः ग्रामं गच्छति" इत्यत्र चैत्राभिन्नैककर्तृको वर्तमानकालिको ग्रामाभिन्नकर्मनिष्ठः यः संयोगः तदनुकूलो व्यापारः। "चैत्रेण ग्रामो गम्यते" इत्यत्र तु चैत्रकर्तृकवर्तमानकालिकव्यापारजन्यो ग्रामाभिन्न-कर्मनिष्ठसंयोग इति बोधः। प्राचीनमते तु उभयत्र एकमेव चैत्राभिन्नैककर्तृको वर्तमानकालिको ग्रामाभिन्नकर्मनिष्ठः यः संयोगः तदनुकूलो व्यापारः।

प्रायः सर्वैः दार्शनिकैः यच्छाब्दबोधस्वरूपं स्वीकृतम्, तदित्थं वक्तुं शक्यते—तत्त्वरूपेण पदैः वृत्त्या स्मृतानां पदार्थानां संसर्गवाक्यार्थाभिवगाहि जायमानो विशेष्यविशेषणभावापन्ननानापदार्थविषयकः शाब्दबोधः वाक्यार्थबोधः इत्यभिधीयते।

सः शाब्दबोधो द्विविधः—१. खण्डशाब्दबोधः, २. अखण्डशाब्दबोधश्च। आद्यः घटमानय इत्यत्र घटपदस्य घटोऽर्थः, द्वितीयायाः कर्मत्वमर्थः आङ्पूर्वकनय्-धातोरानयनमर्थः, आख्यातस्य कृतिरर्थः अथवा अन्यमतेन भावना, शाब्दिकमतेन कर्ता इत्येकः खण्डशो बोधः। द्वितीयो घटकर्मकानयना-नुकूलकृतिमाँस्त्वमिति बोधः न्यायमते। मीमांसकमते घटकर्मकानयनानुकूला चैत्रसमवेता भावना। शाब्दिकमते चैत्रकर्तृकं घटकर्मकमानयनमिति बोधः।

●

---

१. महाभा.तृ.पा.सू. ३/१/८।

२. पा.लघु.मञ्जूषा.।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

स्फोटपदार्थः

डॉ. सुधाकरमिश्रः
प्रवक्ता
श्रीसीतारामवैदिकादर्शसंस्कृतमहाविद्यालयस्य
७/२ए, पी.डब्ल्यू.डी. रोड, कोलकाता-३५

❋ ❋ ❋

"शब्दब्रह्मेति वैयाकरणाः" वैयाकरणानां मते शब्दैव मुख्यं तत्त्वम्। मन्ये सर्वेषां मते शब्दैव एतादृशं तत्त्वं योऽर्थावबोधकः, प्रवृत्तिप्रवर्तकः, कार्यसाधकः, जगत्सञ्चालकः, तत्त्वानां प्राणस्वरूपश्च प्रतिभाति। तस्मिन् शब्दे एतादृशी शक्तिः तिष्ठति, यया शक्त्या मानवाः अर्थात् अपामरपर्यन्ताः जनाः प्रसन्नाः रुष्टाश्च भवन्ति। सा शब्दनिष्ठा शक्तिः कुत्र तिष्ठति, इति विचारचर्चायां नैयायिकानां वैयाकरणानां च भिन्नं भिन्नं मतं विद्यते। नैयायिकानां मते शक्तिः पदे तिष्ठति, तथा चोक्तम्—शक्तं पदमिति।

अर्थात् शक्तिमत् पदमित्यर्थः। परन्तु वैयाकरणा वदन्ति यत् उच्चरितप्रध्वंसित्वेन वर्णस्य, पदस्य, वाक्यस्य चासम्भवात् शक्तिस्तत्र न तिष्ठति। यतो हि अभिव्यक्तेरुत्पत्तेर्वा क्षणस्थायित्वात्, क्षणात्मककालस्य प्रत्यक्षायोग्यत्वेन तदवच्छिन्नवर्णस्याप्रत्यक्षत्वात्। उच्चरितप्रध्वंसित्वं नाम—उच्चारणाधिकरण-कालोत्तरकालवृत्तिध्वंसोपयोगित्वम्, यथा "इको यणचि" इत्यत्र तस्मिन्निति परिभाषोपस्कृतवाक्यार्थेऽयं पूर्वोऽयं पर इति नष्टस्य प्रत्यक्षविषये शब्देन पौर्वापर्यव्यवहारायोगात्। नैयायिकाः स्वकीयमपरमपि मतं ददति यत् संस्कारवशात्, शब्दजशब्दन्यायात्, अनुभवजन्यसंस्कारसध्रीचीनचरमवर्णानुभवाच्च। अतो वर्णेन पदेन च अर्थावबोधो भवतीति। अयं न उपयुक्तपक्षः, नष्टविद्यमानयोर-व्यवहितोतरत्वसम्बन्धायोगात्। पदस्याविद्यमानत्वेन तत्र शक्त्याश्रयत्वस्य ज्ञानाभावात्। संस्कारस्य विपरीताच्च, रसो सरः, नदी-दीन इति विपरीतसंस्कार-बोधेन प्रत्येकमन्यार्थप्रत्ययापत्तेः। अतो वैयाकरणा भणन्ति यद् वृत्त्याश्रयः शब्दस्फोट इति स्वीकरोतु। तस्य स्फोटस्य किं स्वरूपमिति जिज्ञासाया-

CC-0. Sampurnanand University Collection. Digitized by eGangotri

माहुर्वैयाकरणा यत् परा-पश्यन्ती-मध्यमा-वैखरीति चतुर्विधा हि वागस्ति। परावाणी मूलाधारचक्रे तिष्ठति, पश्यन्ती नाभिप्रदेशे, मध्यमा हृदयक्षेत्रे, वैखरी कण्ठे च। उक्तञ्च—

परावाङ्मूलचक्रस्था पश्यन्ती नाभिसंस्थिता।
हृदिस्था मध्यमा ज्ञेया वैखरी कण्ठदेशगा॥
वैखर्या हि कृतो नादः परश्रवणगोचरः।
मध्यमया कृतो नादः स्फोटव्यञ्जक उच्यते॥[1]

परावाक्—मूलाधारस्था पवनसंस्कारीभूता शब्दब्रह्मरूपा स्पन्दशून्या बिन्दुरूपिणी परावागुच्यते।

पश्यन्तीवाक्—नाभिपर्यन्तमागच्छता तेन वायुनाऽभिव्यक्ता मनोगोचरीभूता पश्यन्तीवागुच्यते।

मध्यमावाक्—हृदयपर्यन्तमागच्छता तेन वायुनाभिव्यक्ता तत्तदर्थवाचक-शब्दस्फोटरूपा श्रोत्रग्रहणायोग्यत्वेन सूक्ष्मजपादौ बुद्धिनिर्ग्राह्या मध्यमावागुच्यते।

वैखरीवाक्—आस्यपर्यन्तमागच्छता तेन वायुनोर्ध्वमाक्रामता च मूर्धानमाहत्य परावृत्य च तत्तत्स्थानेष्वभिव्यक्ता परश्रोत्रेणापि ग्राह्या वैखरीवागुच्यते।

चतुर्धा वाचः स्वरूपं निरूपितम्। तत्र मध्यमानादेन स्फोटस्य अभिव्यक्तिर्भवति, अर्थवाचकः, शब्दव्यञ्जकश्च तथा शब्दब्रह्मरूपस्फोटव्यञ्जकश्च। तादृशमध्यमानादव्यङ्ग्यः शब्दस्फोटात्मको ब्रह्मरूपो नित्यश्च। उक्तञ्च भर्तृहरिणा—

अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम्।
विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः॥[2]

अर्थाद् अनादिनिधनम् अक्षरं यद् ब्रह्म यतः अर्थभावेन जगतः प्रक्रिया विवर्तते तत् शब्दतत्त्वमित्यर्थः।

स च स्फोट एको नित्यः परन्तु तत्र स्फोटे नानारूपं कथं प्रतिभाति। यथा—वर्णस्फोटः, पदस्फोटः, वाक्यस्फोटः वर्णजातिस्फोटः, पदजातिस्फोटः, वाक्यजातिस्फोटः, अखण्डपदस्फोटः, अखण्डवाक्यस्फोटश्चेति।

---

१. परमलघुमञ्जूषा।
२. वाक्यपदीये ब्रह्मकाण्डे।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

यद्यप्ययं स्फोट एकोऽखण्डश्च, तथापि पदे, वाक्ये जपाकुसुमादिलौहित्य-पीतत्वादिव्यञ्जकोपरागवशात् लोहितः पीतः स्फटिक इति भानवद् वर्णादिव्यङ्ग्यो वर्णरूपः पदरूपो वाक्यरूपश्च। यथा—मणिकृपाणदर्पणव्यञ्जकोपाधिवशात् मुखे, अन्यस्मिन् वस्तुनि वा दैर्घ्यवर्तुलत्वादिभानं तद्वत्। अस्मिन् अखण्डस्फोटे भिन्नं स्वरूपं प्रतिभाति। उक्तञ्च—

पदे न वर्णा विद्यन्ते वर्णेष्ववयवा न च।
वाक्यात् पदानामत्यन्तं प्रविवेको न कश्चन॥[१]

अर्थात् पदेषु वर्णा न प्रतीयन्ते, वर्णेषु अवयवा न भवन्ति, वाक्यात् पदानां कश्चन प्रभेदो न इति।

एवं विवरणेन प्रतिभाति यत् स्फोटे ये भेदोपभेदा वा प्रतीयन्ते, सर्वे ते औपाधिकाः। यथा आकाशे घटाकाशः, पटाकाशः, मठाकाशश्च। यथा चैतन्यस्य अल्पज्ञत्वविशिष्टः सर्वज्ञत्वविशिष्टः तथा जीवानाञ्च परस्परौपाधिको भेदश्च। मीमांसकानां मते पदे वाक्ये सखण्डपक्षे अन्तिमवर्णव्यङ्ग्यः स्फोट एक एव। पूर्वपूर्ववर्णस्तु तात्पर्यग्राहक इति। स्फोटस्य प्रकाशको नादः, अर्थाद् ध्वनिः। ध्वनिस्तु द्विविधः—प्राकृतो वैकृतश्च। प्रकृत्या अर्थबोधनेच्छया स्वभावेन वा जातः स्फोटव्यञ्जकश्च प्रथमः, अर्थाद् विवक्षितार्थविबोधविषया आत्माभिव्यक्तीच्छया स्वभावेनोत्पन्नः स्फोटप्रकाशको मध्यमानादविषय इत्यर्थः। प्रकृताज्जातो विकृत-विशिष्टश्चिरस्थायी निवर्तको वैकृतिकः। अर्थात् प्रकृताद् उत्पन्नो विकारैर्युक्तो ध्वनिरिति। स्फोटस्य ज्ञाने प्राकृतध्वनिरेव हेतुः। स्फोटस्याभिव्यक्तेरनन्तरमेव वैकृत-ध्वनिरुत्पद्यते। वृत्तिभेदेऽपि इदमेव कारणम्। उक्तञ्च भर्तृहरिणा—

अभ्यासार्थे द्रुता वृत्तिर्मध्या वै चिन्तने तथा।
शिष्याणामुपदेशार्थं वृत्तिरिष्टा विलम्बिता॥[२]

अभ्यासो नाम प्रकरणप्रतिपाद्यस्य वस्तुनस्तन्मध्ये पौनःपुन्येन प्रतिपादनमभ्यासः। पुनः पुनरावृत्त्या बुद्धिस्थिरीकरणमभ्यासः, शीघ्रपाठ्यव्यापारः। तत्त्वविचारणे तु मध्यावृत्तितात्पर्यं नातिद्रुता नातिविलम्बिता इति। शिष्याणामुपदेश्यानामुपदेशः शिक्षणं मन्दगतिका वृत्तिरिष्टा इति। तिसृषु वृत्तिषु वैकृतध्वनिरेव कारणम्। स्फोटस्तु तैर्न भिद्यते।

---

१. वाक्यपदीये ब्रह्मकाण्डे।

२. परमलघुमञ्जूषा।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

स्फोटोत्पत्तिप्रक्रिया—लोके यथा संगणके कार्यं भवति, तर्हि आदौ टङ्कणं भवति, पुनः 'सी.पी.यू.'-मध्ये कार्यं भवति, पुनः मुद्रितं भवति। तदा प्रतिभाति यन्मध्ये यत् कार्यं जातं सैव स्फोटः। तथैव प्रतिपलोपलब्ध-द्रव्यगृहेऽपि (एटीएम) कार्ड-निवेशानन्तरं या प्रक्रिया भवति साऽपि स्फोटस्यैव स्वरूपा इति। उक्तञ्च नागोजीभट्टेन—केनचिद् "घटमानय" इति वैखरीनादः प्रयुक्तः। स केनचिच्छ्रोत्रेन्द्रियेण गृहीतः। स नादो हृदयद्वारा बुद्धिहृद्गतः सन् अर्थबोधकं शब्दं व्यञ्जयति तस्मादर्थावबोधः। स्फुटत्यर्थोऽस्मादिति व्युत्पत्त्या स्फोटः। मध्यमानादः स्फोटं व्यञ्जयति। वैखरी तस्योत्साहकः। भाष्यमपि प्रमाणम्—श्रोत्रोपलब्धिर्बुद्धिनिर्ग्राह्यः प्रयोगेणाभिज्ज्वलितः आकाशदेशः शब्द इत्याकरग्रन्थः सङ्गच्छते। अत्रैका शङ्का उदेति यद् अष्टौ स्फोटाः, तर्हि तेषु वाचकः कः? तदा उच्यते—यथा अर्थगतजातेः शक्यत्वं तथैव शक्ततानिरूपिकाया वर्णपदवाक्यादि-जातेः—वर्णजातेः, पदजातेः, वाक्यजातेः—अर्थावबोधकत्वम्, उक्तमपि शिष्टैः—

अनेकव्यक्त्यभिव्यङ्ग्या जातिः स्फोट इति स्मृता।।

अनेकाभिर्विविधाभिर्या व्यक्तयो घटपटरूपास्ताभिरभिव्यङ्ग्या अभिव्यक्ता, पदार्थप्राणप्रदधर्मो घटत्वपटत्वरूपः स्फोट इति।

वस्तुतस्तु वाक्यस्फोटो वाक्यजातिस्फोट एव वा वृत्त्याश्रय इति।

●

CC-0. Sampurnanand University Collection. Digitized by eGangotri

वेधपरम्परायां स्वस्त्ययनमन्त्रे च ज्योतिस्तत्त्वान्वेषणम्

विद्यावाचस्पतिः डॉ. रामजीवनमिश्रः
उपाचार्यः, ज्यौतिष-विभागस्य
संस्कृतविद्या-धर्मविज्ञान-सङ्काये
काशी-हिन्दू-विश्वविद्यालये, वाराणस्याम्

***

भारतीयज्यौतिषशास्त्रस्यास्तित्वं वैदिकमन्त्रेषु सर्वतःप्रथमं विकीर्णरूपेण प्राप्यते। वेदेषु सूर्यादिग्रहाणां नक्षत्राणाम्, ध्रुवागस्त्यसप्तर्ष्यादितारकाणाञ्च देवत्वरूपे स्तुतिपरकऋचां गानमस्ति। मन्त्रेषु नक्षत्राणां विषये वैदिकऋषीणां रहस्य-पूर्णोत्सुकताया भावः प्रायः सर्वत्र दृश्यते। ब्राह्मणारण्यकग्रन्थेषु ग्रहनक्षत्राणि प्रति न केवलं देवत्वभावो दृश्यते, अपि तु तस्मिन्काले ग्रहादीनां स्वरूपवर्णयोः गुणप्रभावयोश्चापि विचारः प्रारब्ध आसीत्। वैदिकयज्ञानां सम्पादनार्थं कुण्डमण्डपादिनिर्माणविधौ स्पष्टतया दिक्शोधनप्रसङ्गे सूर्यादिबिम्बानां स्पष्टप्रेक्षणं (वर्षायनर्तुदिनमानलग्नादिशुद्धिविचारार्थं) चानिवार्यत्वेन जनेषु प्रचलति स्म। ज्योतिषज्ञानस्यावश्यकतयैव पश्चाद् वेदाङ्गेषु ज्यौतिषशास्त्रमपि स्वतन्त्रवेदाङ्गत्वेनोद्-घोषितञ्जातम्।

ऋग्वेदीयराशिचक्रगणना ज्योतिर्विद्याया अतिप्राचीनस्थितिं प्रामाणिकरूपेण प्रकाशयति। वैदिकसंहितासु नक्षत्रपुञ्जानां विविधतारामण्डलानां रूपाकृतयश्च वर्णिताः सन्ति। आकाशमण्डले ग्रहाणाङ्गतेरध्ययनं भूमण्डलोपरि तत्प्रभावस्य च वर्णनन्तथा एवंविधानां विषयाणां वैज्ञानिकी व्याख्या वेदमन्त्रेषु उपवर्णिताऽस्ति। अत्रेदमवधेयं यदत्र ज्यौतिषाध्ययने मूलभूतः वेधयन्त्राणां प्रयोगः तस्मिन्समयेऽपि आसीत्, अस्य प्रमाणरूपेण यजुर्वेदे नक्षत्रदर्शनस्य (ज्यौतिषिकस्य) चर्चोपलभ्यते। नक्षत्रस्य प्रेक्षणात् (निरन्तरवेधत्वात्) नक्षत्रदर्शोपाधिः वैदिककाले ज्यौतिषिकानां तत्रापि वेधविद्याविचक्षणानां कृते जातः। छान्दोग्योपनिषदि स्थाने स्थाने नक्षत्रविद्याया उल्लेखः दृश्यते। वस्तुतः ज्यौतिषशास्त्रस्योत्पत्तावेव मूलरूपेण वेधयन्त्राणां प्रयोगो वर्त्तते। यदि वेधयन्त्रप्राप्तपरिणामानां परम्परा प्राचीनकाले नासीत्तर्हि कथं नक्षत्राणां विषये "न क्षरतीति नक्षत्रम्" इति व्युत्पत्तिः

CC-0. Sampurnanand University Collection. Digitized by eGangotri

व्याकरणशास्त्रदृष्ट्या जाता। अत्र निष्कर्षोऽयं विद्यते यद् वैदिककाले वेदाङ्गकाले च नक्षत्रदर्शका निरन्तरं ग्रहनक्षत्राणां वेधयन्त्राणां प्रयोगं कुर्वन्ति स्म। अत एव स्वगत्या गमनशीलत्वाद् गच्छतीति ग्रहः इति नाम, नक्षत्राणाञ्च स्वगतशून्यत्वात् नक्षत्रमिति नामकरणमन्वर्थमेव। वैदिकसंहितासु ग्रहशब्दस्य व्यापकप्रयोगं दृष्ट्वा वेवरमहोदनेयोक्तं यद् भारते एव ग्रहाणामन्वेषणञ्ज्ञातं यतो हि ग्रहाणां नामानि विशेषतया भारतीयानि सन्ति। तैत्तिरीयब्राह्मणे उल्लिखितं यद् यदा बृहस्पतिः सर्वप्रथमं प्रकटितो बभूव तदा सः तिष्य "पुष्य"-नक्षत्रपार्श्वे आसीत्। अनेन प्रतीयते यद् यदा गुरुग्रहस्य प्रथमतोऽन्वेषणमभूत्तदा तस्य स्थितिः अस्माकम्प्राचीनवेधविद्वद्भिः पुष्यनक्षत्रसन्निकटे प्रेक्षिता। शतपथब्राह्मणे शुक्रस्य व्याख्याने लिखितमस्ति यत् सः शुक्र एव यो हि चमत्कृतौ सर्वाधिकः। ब्राह्मणग्रन्थेष्वेभिर्वर्णनप्रसङ्गैः ज्ञायते यत् तस्मिन् काले वेधयन्त्राणां प्रयोगः ज्योतिर्विज्ञानवर्धनक्रमे निश्चितरूपेण प्रचलित आसीत्।

अजीगर्तपुत्रः शुनःशेपः ताराणां प्रेक्षक आसीत्। विष्णुपुराणे शुनःशेपः विश्वामित्रस्य पुत्रः देवरातः वर्त्तते। पुराणेषु च विश्वामित्रस्य नाम सप्तर्क्षाणां सृष्ट्या सह सम्बद्धोऽस्ति। शुनःशेपः एव यो हि देवरातोऽपि ख्यातः विश्वामित्रस्य दत्तकपुत्र आसीत्। अस्य वास्तविकजनकस्य नाम अजीगर्त्त आसीत्। अनेन शुनःशेपेन विश्वामित्रस्य ज्योतिर्विद्यालये अनेकानि प्रेक्षणानि ज्योतिषवेधयन्त्राणां माध्यमेन कृतानि।

वेधशालासु वेधयन्त्राणां प्रयोगकर्तृकज्योतिर्वित्सु मूलरूपे शक्तिपुत्रपाराशरस्य वसिष्ठस्य, गृत्समदस्य तथा रहूगणपुत्रगौतमस्य नामानि उल्लेखनीयानि सन्ति। एभिः यानि प्रेक्षणानि क्रियन्तेस्म तानि "स्तृ"-शब्देन प्रयुज्यन्ते स्म। शब्दोऽयम् आङ्ग्लभाषायां स्टार (star) अथवा (Aster) रूपे वर्त्तते। अस्यामेव शृङ्खलायां खगोलीयज्योतिर्विज्ञानस्य कृते "एस्ट्रोनोमी" इत्याङ्ग्लशब्दस्य प्रयोगोऽभूत्।

ऋग्वेदस्यानेकैः प्रसङ्गैरिदं प्रतीयते यद् बृहस्पतिग्रहो वामदेवेनान्विष्टः। अयङ्गौतमस्य पुत्र आसीत् तथा ऋग्वेदे षष्ट्यधिकपञ्चाशदृचामृषिरस्ति। एवमेव शुक्रस्यान्वेषणं भृगुपुत्रेण वेनभार्गवेण कृतम्। इदमस्ति तथ्यं यद् ग्रहस्य नाम तस्यान्वेष्टुरुपरि भवत्यथवा ग्रहनामानुरूपमेवान्वेष्टुः नाम जायते। ऋग्वेदे विंशतिमन्त्राणां सूक्तद्वयस्य ऋषिः वेनोऽस्ति। अत्र वेनशब्दः शुक्रग्रहार्थं प्रयुक्तः, तस्य प्रथमान्वेषकस्यापि नाम वेन एव, अनेन भृगुपरिवारे जन्म गृहीतम्। अधुनापि ज्यौतिषग्रन्थेषु शुक्रस्य विषये भृगुशब्दः वैदिकमन्त्रेषु च वेनशब्दः प्रयुज्यते।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

वेधयन्त्राणां प्रयोगश्च वैदिककाले निर्बाधरूपेण प्रचलित आसीत्। यतो हि वेदस्य नेत्राङ्गरूपे ज्यौतिषशास्त्रस्य गणना इदं द्योतयति यन्नेत्रकार्यमस्ति दर्शनमवलोकनम्प्रेक्षणम्। नेत्रद्वाराकाशीयग्रहनक्षत्रबिम्बानां निरन्तरं प्रेक्षणत्वात् शास्त्रमिदं वेधपरम्परया एव उत्पन्नम्। अतः ज्यौतिषशास्त्रस्याऽऽत्मा वेधप्रक्रिया एव तथा च वेधयन्त्राणां प्रयोगं विना वेधक्रिया कर्तुं न शक्यते। यद्यपि ज्यौतिषविषयकपूर्वोक्तवर्णनैरिदं विज्ञायते यद् वेदेषु बहुत्र ग्रहनक्षत्रादीनां वर्णनन्तु वर्त्तते, परन्तु ज्यौतिषशास्त्रस्यात्मतत्वं वेधविद्या कुत्रापि न सुस्पष्टं वर्णिता अस्ति। वेधप्रक्रियाज्ञानं विनास्य शास्त्रस्योत्पत्तिर्विकासो वा न केवलं कठिनमुतासम्भवीति कथने नास्ति विप्रतिपत्तिपरन्तु विचारणीयोऽयम्प्रश्नो यत् किं तस्मिन् काले आधुनिकवेधशालावद् विकसिता वेधशाला। वेधयन्त्राणि चासन्। ऋषिभिः ग्रहनक्षत्रेषु आधुनिकान्तरिक्षोपग्रहसदृशमाध्यमैर्गत्वा तेषामध्ययनं कृतमथवा केवलं नग्नदृष्ट्यैव योगबलमाध्यमेन सर्वं ज्ञातमुत "यत्पिण्डे तद्ब्रह्माण्डे" इति तत्त्वं विज्ञानयोगशक्त्या स्वशरीरस्थसौरमण्डल एव ब्रह्माण्डदर्शनं विधाय ग्रहनक्षत्रादिपिण्डानां रहस्यं विज्ञातम्, यतो हि लिखितसाक्ष्यरूपेण तात्कालिकवेधप्रक्रियाया वर्णनं वेदेषु, संहितासु, ब्राह्मणारण्यकोपनिषत्साहित्ये वा स्पष्टरूपेण न प्राप्यते। तथापि वैदिकज्यौतिषवर्णनमधीत्येदन्तु प्रतीयत एव यद् वेधयन्त्रसिद्धप्रयोगविधिं विना खगोलीयसिद्धान्तानां निर्धारणन्त्र केवलं कठिनमुतासम्भवोऽपि, अतो वेधपरम्परास्थितौ नास्ति सन्देहः।

अयनबिन्दोश्चलनं निरन्तरप्रेक्षणेनैव ज्ञातुं शक्यते तथा कालाङ्गानां वर्षायनर्तुमासपक्षतिथीनां निर्धारणे प्रथमतया वेधस्यावश्यकतासीदेव। यद्यप्येषु विषयेषु तात्कालिकस्थूलतयेदं सिद्ध्यति यदाधुनिकयन्त्रकृतवेधवत् तात्कालिक-वेधपरिणामेषु सूक्ष्मता नासीत्।

केचन पाश्चात्यविद्वांसः एवं कथयन्ति यद् भारतीयाः पूर्ववेधज्ञा नासन्; प्रत्युत तेषां वेधपरम्परापि नासीन्न च वेधयन्त्राण्यासन्। परन्तु ऋग्वेदकालेऽस्माकं सप्तविंशतिनक्षत्राणां ज्ञानं महाभारते ग्रहनक्षत्रधूमकेतूनाञ्चोल्लेखः, वाल्मीकिरामायणे ग्रहनक्षत्रादीनां वर्णनातीतं वर्णनम्, याज्ञवल्क्यस्मृतौ नक्षत्रवीथीनामुल्लेखः, पुराणेषु ब्रह्माण्डस्वरूपवर्णनमिदं द्योतयति यदस्माकम्पूर्वजाः प्राचीनकालत एव न केवलमाकाशस्यावलोकने दत्तचित्ता आसन्नपि त्वस्य ब्रह्माण्डस्यैतादृशानि रहस्यानि ते वर्णितवन्तो येषामाधुनिकयन्त्रोपलक्षितब्रह्माण्डरहस्येन नीहारिकादीनां वर्णनेन चात्यधिकसाम्यता स्पष्टतया प्रतीयते। संहिताग्रन्थेषु ग्रहचाराध्यायाः, नक्षत्रेषु ग्रहाणाम्भ्रमणं वराहकृतानेकधूमकेतूनां वर्णनं यद् वर्तते तद्विषये वराहमिहिरेण

CC-0. Sampurnanand University Collection. Digitized by eGangotri

प्रोक्तमस्ति यदहं गर्गपराशरासितदेवलादि-ऋषिकृतवर्णनानुसारं केतुचारं लिखामि। अत्रेदं सुनिश्चितं यदुद्दालकादि-ऋषिभिरन्विष्टत्वात् केतूनामुद्दालकादिसंज्ञाः जाताः, यथाधुना योरोपियनज्यौतिषिकानां नाम्ना एनकी धूमकेतुः इत्यादीनां नामानि सञ्जातानि।

वराहमिहिरेण प्रोक्तमस्ति यद् वेधकार्यं राज्याश्रयं विना न भवितुमर्हति। राजा स्वाश्रये ज्यौतिषिकान् संरक्ष्य, आकाशस्यानेकभागान् प्रेक्षितुन्नियुज्येत। भारतीयज्यौतिषशास्त्रस्य विभिन्नग्रन्थेषु दृग्गणितैक्यतायाः समन्वयः, बीजसंस्कारस्योत्पत्तिर्वेधप्रक्रियां विना न भवितुमर्हति, अतो निर्विवादरूपेण वेधपरम्परा तथा च समृद्धवेधशालासु स्थापितानि वेधयन्त्राणि भारते आसन्निति सुनिश्चितम्।

ग्रहनक्षत्राणां दर्शनपरम्परा वैवाहिकसाक्ष्यरूपेणाप्यस्माकं देशेऽनादिकालात् प्रचलिता वर्त्तते। विवाहसंस्कारवर्णनेष्वस्याः प्रथाया उल्लेखोऽस्ति यद् वरवधूभ्यां स्थैर्यप्रतीकरूपे ध्रुवताराया दर्शनं विधेयम्, ध्रुवशब्दस्यार्थः स्थिरता। वेधेन ध्रुवतारायाः स्थिरत्वनिर्धारणार्थम्प्रयासोऽवश्यमेव गणितीयध्रुवताराया निकटस्थतारार्थे आसीत्, यतो हि २७८० ईस्वीपूर्वं (अनेकसहस्रवर्षपूर्वमपि) कोऽपि तारकः गणितीयध्रुवतारानिकटे नासीत्, यो हि ध्रुवो वक्तुं शक्यते। केवलं तृतीयश्रेण्याः प्रथमकालीन 'एल्फा ड्रेकोनिस' नामकस्ताराविशेषः गणितीयध्रुवेण निकटतमः २७८० ईस्वीपूर्वमासन्नतयासीदतो वैवाहिकध्रुवताराया दर्शनप्रथा २७८० ईस्वीपूर्वत आसीदित्यनुमीयते।

वर्तमानकालेऽस्माकं देशे वेधप्रक्रियायां या उन्नतिर्दृष्टिपथं विस्तारयति सा वस्तुतः समग्रविश्वस्य सम्मिलितप्रयासस्य प्रतिफलं वर्त्तते। राज्ञः जयसिंहस्य ज्यौतिषविषयकवेधकार्येषु दत्तचित्तत्वादस्माकं देशे वेधपरम्परायां प्रेक्षणार्थं वेधयन्त्राणाम् एको नूतनः पन्थाः समुद्घाटितोऽभूत्। विशालवेधयन्त्राणा-न्निर्माणपुरस्सरमस्माकं देशे देहली-जयपुर-वाराणसी-मथुरा-उज्जैनाख्येषु पञ्चनगरेषु वेधशालानां स्थापना सवाईजयसिंहद्वितीयस्यादेशेन जाता। अस्मिन्नेव कालेऽष्टादशशताब्द्याः प्रारम्भिकवर्षेषु यवनदेशेष्वरबमिस्रदेशेषु च जना वेधकार्येषु संलग्ना आसन्। राज्ञः जयसिंहस्य प्रयासात्तद्देशीया वेधविद्वांसोऽत्राहूताः, तथात्रत्या वेधपण्डिता विदेशेषु प्रेषिताः। इत्थं परस्परं ज्ञानस्यादानप्रदानेनास्यां दिश्युन्नतेः द्वारोऽनावृतः। अनन्तरं पाषाणेष्टिकाचूर्णादिभिर्निर्मितानि यन्त्राणि वेधपण्डितैः स्थूलनिर्णयप्रदायकानि एकस्थानादन्यत्र नेतुमयोग्यान्याकय्य लघ्वाकाराणां लौहनिर्मितवेधोपकरणानां निर्माणदिशि प्रयासः समारब्धः। तथा च स्वयं जयसिंहेन

CC-0. Sampurnanand University Collection. Digitized by eGangotri

पाश्चात्यदेशेभ्यः दूरदर्शकयन्त्रं समानीय तस्य महत्त्वं दृष्टम्। एवम् अत्र भारतीय-वेधपरम्परायां दूरदर्शकस्यागमनादेकं परिवर्तनम्बभूव गैलीलियोवैज्ञानिकेन यो हि दूरदर्शकस्य प्रथमाविष्कर्तासीत्, वेधजगति नवीनक्रान्तेः श्रेयः गृहीतम्। एवं भारतीयवेधपरम्परापि जयसिंहस्थापितवेधशालानाम्मार्गम्परित्यज्य दूरदर्शकप्रधान-वेधशालायुगे प्रविष्टवती।

इत्थमाङ्ग्लशासकानाङ्काले व्यापारप्रचारसंवर्धनदृष्ट्या सामुद्रिकमार्ग-निर्धारणप्रसङ्गे नौपरिवहनसौविध्यदृष्ट्या चाकाशनिरीक्षणार्थं तारकानाम्प्रेक्षणार्थं वा १७९२ खिस्ताब्दे मद्रासवेधशालायाः स्थापनाभूत्। शनैः शनैरत्र तारकाणामध्ययने वृद्धिः जाता। आकाशीयग्रहनक्षत्रादीनां वेधार्थमत्र देशे स्थाने स्थाने दूरदर्शकयन्त्राणां स्थापनेन पाश्चात्त्यवेधशालावदाधुनिकवेधोपकरणैस्सुसज्जितानां वेधशालानां स्थापनादिशि प्रयासाः प्रवर्धिताः। तस्मिन्नेव क्रमे कोड़ाई-कनाल-वलूर-उटकमण्ड-उदयपुर-माउण्टआबू-देवप्रयाग-नैनीताल-अहमदाबादादिस्थानेषु वेधशालाः संस्थापिता अभूवन्। तासु वेधशालाषु यद्यपि विशिष्टवेधयन्त्राणि पाश्चात्त्य-देशेभ्यस्समानीतान्यासन्; परन्तु सम्प्रति भारतीयवेधशालासु प्रयोगशाला निर्माणशालाश्चापि वर्तन्ते, यत्र दूरदर्शकाणां विशिष्टयन्त्राणां वेधोपकरणानाञ्च निर्माणदिशि प्रयासाः प्रचलन्ति निर्माणञ्च विधीयते।

अन्तरिक्षानुसन्धानसंगठनस्य (इसरो) स्थापनानन्तरं देशे चत्वारि केन्द्राणि संस्थापितान्यभूवन्। यत्रान्तरिक्षोपग्रहप्रेषणसम्बन्धिकार्यं दिनानुदिनमेधते। अस्यां दिशि आर्यभट्ट-भास्कर-रोहिणी-एप्पल-इन्सैट-शृङ्खलाया उपग्रहान् सुदूरेऽन्तरिक्षे प्रक्षेपयित्वास्माकं देशस्य वेधपरम्पराप्याधुनिकतमवेधप्रणालीयुक्तदेशपङ्क्त्या-मन्तरिक्षीयवेधशालायुगे स्थानमलङ्कृतवती। यथा विश्वस्य समृद्धदेशानां वेधशालाः (आईन्सटाइनवेधशालावत्) अन्तरिक्षगर्भे भूकक्षायां स्थित्वा वेधदृष्टिमन्तरिक्षीय-दूरवीक्षणयन्त्रमाध्यमेन गहनान्तरिक्षे विस्तारयन्ति, तथैव भारतीयोपग्रहा अपि भूमेर्प्राकृतिकस्थलानामनुसन्धानेनास्यां दिशि महत्त्वपूर्णामुन्नतिम्प्राप्तुं प्रयतन्ते।

विश्वस्य पाश्चात्यदेशेषु विषयेऽस्मिन् महत्त्वपूर्णानि परिवर्तनानि सम्प्रति श्रूयन्ते दृश्यन्ते च। भू-उपग्रहाणामस्मिन् युगे मनुष्योऽन्तरिक्षस्थदूरवीक्षणैर्वेधं सम्पादयिष्यति। अमेरिकादेशस्य राष्ट्रियोड्डयनेनान्तरिक्षप्रशासनेन (नासाख्येन) पृथिव्याः परिक्रमणशीलानामनेकवेधशालानामन्तरिक्षे स्थापनार्थं योजना निर्मीयते। अस्य प्रारम्भः "हर्बल"-अन्तरिक्षदूरदर्शकेन जातः यस्योपरि १.४ अर्बुदडालरमितधनव्ययोऽनुनितः। अस्यान्तरिक्षदूरदर्शकस्य दृष्टिमार्गे कीदृशमपि वातावरणं बाधयितुं न शक्यते तथा चेदमस्माकन्निकटवर्तितारकान् पार्श्वस्थिग्रहान्

CC-0. Sampurnanand University Collection. Digitized by eGangotri

नैकट्येन वेधयितुं शक्ष्यतेऽर्थाद् ब्राह्माण्डेऽन्यसौरमण्डलानां स्थितिमपि निर्देष्टुं समर्थो भविष्यति। "हर्बल"-संज्ञकमन्तरिक्षदूरदर्शकमिदं स्वकार्यं सम्यक्तया सम्पादयति। अस्मिन् दूरदर्शके आगता त्रुटिर्वैज्ञानिकैः स्पेसशटलमाध्यमेन तत्र गत्वापास्ता।

स्वस्त्ययनमन्त्रे ज्योतिस्तत्त्वान्वेषणम्

ॐ स्वस्ति नऽइन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः।
स्वस्ति नस्तार्क्ष्यो ऽअरिष्टनेमिः स्वस्तिनो बृहस्पतिर्दधातु।।[१]

(१) स्वस्तिकविमर्शः

(क) सु : सुवाति नक्षत्राद्यवर्णत्वात् "पश्चिम-ख-स्वस्तिकं" सूचयति।

(ख) अ : अश्विन्यादियोगात् 'पूर्व-ख-स्वस्तिकं' प्रकटयति।

(ग) स् : षाढाश्रवणयोराद्यवर्णयुक्त्या 'ऊर्ध्व-ख-स्वस्तिकं' द्योतयति।

(घ) ति : तिष्यप्रथमाक्षरदृष्ट्या 'अधः ख-स्वस्तिकं' व्यञ्जयति।

अस्य साक्षित्वे स्वयं मन्त्र एव प्रमाणम्।

१. इन्द्रो वृद्धश्रवा नः स्वस्ति—इन्द्रस्त्वष्टा चित्राधिष्ठातृत्वादत्र चित्रा भम्, वृद्धश्रवा (मरुज्ज्येष्ठराजा) इन्द्रः स्वातिद्योतकः। इत्थं चित्रा-स्वाति-नक्षत्रयुगलं मेषादिगेऽर्के सूर्योदये "पश्चिम-ख-स्वस्तिकं" सूचयति।

२. पूषा विश्ववेदा नः स्वस्ति—पूषा रेवतीत्यस्याधिष्ठातृदेवः। विश्ववेदाः विष्वायुर्वेदज्ञावश्विनौ तौ, "स्वर्वैद्यावश्विनीसुतौ" विश्ववेदा अश्विनीसूचकः रेवत्यश्विन्योर्मध्यबिन्दुः पूर्वे, अतः खस्वस्तिकं बोधयति।

३. तार्क्ष्योऽअरिष्टनेमिः नः स्वस्ति—तार्क्ष्यो राजहंसो गरुडो वा उत्तराषाढा-सूचकः अरिष्टनेमिर्भगवान् विष्णुः श्रवणसूचकोऽतः नक्षत्रयुगलमेतत् मेषादिगेऽर्के सूर्योदये ऊर्ध्व-ख-स्वस्तिकं सूचयति।

४. बृहस्पतिर्नः स्वस्ति दधातु—बृहस्पतिः पुनर्वसुपुष्यनक्षत्रयुगलाधि-देवत्वात् मेषादिगे रवौ प्रात उक्तनक्षत्रयुगलम् अधः ख-स्वस्तिकं निर्दिशति। उक्तमन्त्रे चतुः ख-स्वस्तिकं संसूच्य वेदविधाता उक्तदेवेभ्यः स्वस्त्यक्षरेभ्यश्च प्रत्यहं स्वस्ति शुभकामनाद्यर्थं मानवान् उपदिशति। अत एषु समुत्पन्नस्त्रीपुंसोर्मेलापकं स्वत

---

१. ऋ.सं. १/६/१६, यजुः २५/१९।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

एव सम्भाव्यते। एतानि नक्षत्राणि सर्वेषु शुभकार्येषु नक्षत्रवेदिकायां श्रेष्ठानि वर्तन्ते। केवलं पुष्यस्य अधः ख-स्वस्तिकन्यासात् सद्योऽधः स्खलनभीत्या विवाहे त्यागो विहितः। पुनर्वसुपुष्ययोर्युगलत्वं वेदेऽदृश्यम्। लोके पुनर्वसुपुष्ययोर्युगलं शस्यते।

(२) स्वस्ति-ज्योतिश्शब्दयोः सामञ्जस्यविमर्शः

ज्योतिश्शब्द एव स्वस्तिस्वरूपं बिभर्ति। ज्योतिश्शब्द एवं द्रष्टव्यः—

(क) जि : अभिपूर्वकात् "जि"धातोः सिद्धमभिजिन्नक्षत्रमूर्ध्वं ख-स्वस्तिकम्।

(ख) ओ : "ओकारः सत्यपीयूषयोः" नासत्यदस्त्रौ इत्यतः अश्विनी-नक्षत्रात् पूर्व-ख-स्वस्तिकम्।

(ग) ति : तिष्यर्क्षत्वाद् अधः ख-स्वस्तिकं व्यञ्जयति।

(घ) स् : स्वातिनक्षत्रत्वात् पश्चिम-ख-स्वस्तिकं बोधयति।

(३) ज्योतिश्शब्दे पञ्चाङ्गविमर्शः

अत्र ज्योतिषशब्दस्य विलोमक्रमेण न्यासं विधाय ज्योतिश्शास्त्रोक्त-वार-तिथि-नक्षत्र-योग-करणमिति कृत्वा पञ्चानामेवाङ्गानां प्रत्यक्षतो ज्ञानं जायते।

ज् + य् + ओ + ति + स् - इति वर्णविग्रहः।

(क) स् : वर्णोऽयं सप्तवाराणां सूर्यादिकानां बोधको वर्तते।

(ख) ति : वर्णोऽयं तिथीनां द्योतक आस्ते।

(ग) ओ : ओकारः तारबीजं स्यात्। तारका नक्षत्राणि २७ तेषां द्योतको भवति।

(घ) य् : इत्यतः किञ्चिन्न्यूनषड्विंशदिनैरेव सप्तविंशति-योगपूरकः।

(ङ) ज् : अष्टाविंशतितिथिषु जकारेणाष्टौ पर्यायाः सप्त बवादिचर-करणानि सम्भवन्ति। एतेन नाक्षत्रमासो भवति शेषद्वितय-संख्यकतिथिस्थाने चत्वारि शकुनि-चतुष्पाद-नाग-किंस्तुघ्न-संज्ञकानि कृष्णचतुर्दश्युत्तरार्धे शकुनि, अमापूर्वार्धे चतुष्पात्, अमाया उत्तरार्धे नागः, शुक्लप्रतिपत्पूर्वार्धे च किंस्तुघ्नः (कौस्तुभो) भवति। इति चत्वारि स्थिरकरणानि। अर्थादष्टाविंशतिनक्षत्राणां तिथि-समायोगे "तिथ्यर्धं करणं प्रोक्तम्" नक्षत्रार्धमवसीयते। चतुर्दश्युत्तरार्ध-

CC-0. Sampurnanand University Collection. Digitized by eGangotri

तोऽमार्धं यावत्सिनीवाली, अमोत्तरार्धमारभ्य शुक्लप्रतिपदर्धं यावत्कुहूराज्याधिकारः। गोरूपाया अमायाः कामधेनुभूतायाश्चत्वारि स्तनरूपाणि शकुनि-चतुष्पद-नाग-किंस्तुघ्नाः (क्षुद्र)जन्तवश्च पिबन्तीति पुराणोक्तिरत्र समनुसन्धेया।

(४) स्वस्तिशब्दे वैचित्त्यविमर्शः

अतः स्वस्ति स् ७ व ४ स् ७ ति ६ = ६७४७

स् ७व ४ = +४७

चन्द्रपाते भगणपूर्तिदिवसा ६७९४ आयान्ति, अतः स्वस्तिशब्दचमत्कारो दृश्यते। स्वस्ति = 'स्वः ति' इति विग्रहे सति स्वःकारो तिकारं केन्द्रीकृत्य समन्तादेव सूर्यमण्डलमिव परिभ्रमन्नास्ते। अतः स्वर्भानुः = राहुः। स्वश्चन्द्रः केतुश्चेत्युभयोः नाक्षत्रभ्रमः ६८९४ संख्याकदिवसेष्वेव सम्पद्यते। इति कृत्वा उभावेव राहुकेतू छायाग्रहौ श्रीगणेशाधिष्ठातृदेवौ स्तः। श्रीगणेशोऽपि दूर्वाकुशाभ्यां प्रीणाति। तत्र राहुग्रहस्य कृतेऽपि दूर्वा केतुग्रहस्य कृते च कुशः समित् प्रशस्यते।

अत्र स्वस्त्ययनमन्त्र एव वारक्रमोऽपि वर्तते।

१. पूषा (रविवारः)—चतुर्दलात्मककमलबन्धेन प्रस्तुते मन्त्रे द्वितीयपादे पूर्व-ख-स्वस्तिकम्। प्रतिपदास्थले सर्वप्रथमः पूषाशब्दः सूर्यवाचकः द्वारशादित्य-नामसु पठितः। द्वादशतृचाकल्पे च वैदिकैः प्रत्यहं संश्रूयते। अत एष रविवार-सूचकः प्रसिद्धः।

२. विश्ववेदाः (सोमवारः)—विश्व = वि ४ श ५ व ३ = ३५४ पूर्णाङ्क-सूचितदिनैः चन्द्रवर्षः पूर्यते "ऐन्दवस्तिथिभिस्तद्वत्" इत्युक्त्या नाक्षत्रचान्द्रमासः २७.३ दिनात्मकः त्रयोदशगुणितोऽपि ३५४.९ दिनात्मक एव भवति। अतः १३ विश्वदेवाधिष्ठातृकस्त्रयोदशमासात्मकस्तत्र विश्वरूपं वेदयतेऽनेनेति विश्ववेदाः सोमः द्वादश चान्द्रतिथ्यात्मकेष्वपि विश्वशब्द एव। अतो निःसंशयमेष विश्ववेदाः शुद्धचन्द्र एवातः सोमवारः सार्थको भवति।

३. तार्क्ष्यः (मङ्गलवारः)—तृक्ष स्तृक्ष इति धातुभ्यां तार्क्ष्यः स्तार्क्ष्यो वा तीव्र-तीक्ष्ण-वक्र-गतिसूचनाद् गरुडारुणादिवाचको भवति। अरुणशब्दोऽपि मङ्गल-वाचक एव "अरुण उत बभ्रुः सुमङ्गल" इति यजुर्वेदोक्त्या सिद्ध्यत्येवातो मङ्गल-वारार्थप्रतिपादको सम्भवत्येवातो भौमग्रहस्य कृते प्रयुज्यते।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

४. अरिष्टनेमिः (बुधवारः)—अरिष्टोऽनार्तः इति शतपथोक्त्या रिष्टकष्टादिरहितस्तेषामनार्तानां सुखीनां नेमिर्धुरी नाभिर्वा। सूर्यस्यात्यन्तसन्निकटवर्ती बुध एव अस्याधिदेवः प्रत्यधिदेवश्च केवलं भगवान् विष्णुरेवातोऽरिष्टानां शुभाशुभसूचकानां ग्रहाणां धुरिरग्रगण्योऽपि बुध एव अरिष्टनेमिर्भगवान् विष्णुरित्यभिधीयते। सूर्यस्य समन्तात् प्रथमकक्षापि बुधस्यैव वर्तते। एष एव बुधस्य कृते प्रयुक्तो ग्रहो बुधवारश्चानिवार्यः।

५. बृहस्पतिः (गुरुवारः)—बृहस्पतिः स्वयं देवराजस्य गुरुः प्रधानमन्त्री वारेषु ग्रहेषु च पूज्यतमो मतः, अतो गुरुवारस्वीकारे नास्ति संशीतिभीतिः।

६. इन्द्रो (शुक्रवारः)—न भेदः शुक्रशक्रयोरित्युक्तिः पुराणोक्त्यानुसन्धेया। इत्थं पुराणेष्वनुश्रूयते यच्छुक्राचार्यस्तपश्चर्य्यायां प्रवृद्धः। इन्द्रस्तस्य तपोभङ्गार्थं स्वकन्यां सञ्जातलावण्यां शुचिनाम्ना समाम्नातां ऊर्जस्वतीति प्रसिद्धां प्रेषयामास। शुक्रः सद्य एव तपश्चर्यां समाप्य दिव्यविवाहविधिना तामुपयेमे। शुचिशुक्रावुभावपि देवराजे शक्रे ब्रह्महत्यया भीते कमलनाले विलुप्ते च स्वयमेव शचीशक्रयो रूपमासाद्य समग्रस्यापि स्वर्गस्य पुरन्दरमन्दिरे सिंहसासनमारुह्य निर्भीक इव ब्रह्महत्यानिवृत्त्यन्तं राज्यं चक्रतुः इति हेतोः इन्द्रशब्दः शुक्रवाचकः। इन्द्रोऽस्य शुक्रस्य अधिष्ठातृदेवोऽपि राज्यं चकार इति हेतोः इन्द्रशब्दः शुक्रग्रहस्य कृते शुक्रवारकृते देवैः प्रयुक्त इति निश्चप्रचीभूतमास्ते।

७ वृद्धश्रवाः (शनिवारः)—बृहत्शब्दो वृद्धवाचको वर्तते। बृहद् अत्यन्ताधिकं श्रयत्वं, दूरत्वं, बृहदक्षत्वं, मन्दकर्णत्वं वा प्रसिद्धं यस्य स वृद्धश्रवा मन्दः, शनैश्चरः, शनिरिति। सूर्यात्सर्वग्रहेषु शनैश्चर एव दूरतम इति डिण्डिमघोषपुरस्सरं शास्त्रेषु प्रसिद्धमेव। इति मन्त्रस्य प्रथमपाद एव दृश्यते। अतः शनिवासरस्य कृते वृद्धश्रवा इति शब्दो वेदेषु सुप्रयुक्तः प्रत्यक्ष एव सिद्ध्यति। अत एव सप्तग्रहाः पूर्वोक्तपद्धत्या स्वातिरूप-राहुकेतुभ्यां समेता नवीभूताः पुरस्ताद् दृश्यन्ते।

ॐ ईदृङ् चान्यदृङ् च सदृङ् च प्रतिसदृङ् च।
मितैश्च सम्मितैश्च सभराः (सप्तजिह्वश्चाग्नेः)।।[१]

अनेन सप्तजिह्वानिर्माणक्रममनुवासरक्रमेण ग्रहन्यासे कृते सति स्वयमेव गत्यनुकूलो ग्रहकक्षाक्रमः पुरस्कृतो भवति। वारक्रम एव सप्तजिह्वायन्त्रारूढः

१. यजुः १०/८१।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

स्वस्ववारक्रमाङ्कानुसारं परिभ्रमन् सन् सप्तवाराङ्कनक्रमेणैव निम्नकक्षक्रमं प्रकटयति। जिह्वान्तर्गतास्तु अङ्का वारद्योतका वर्तन्ते। बहिर्गतास्तु अङ्काः श., गु.,मं.,शु.,बु.,चं. सूर्यसिद्धान्तोक्तं कक्षाक्रमं समभिव्यञ्जनन्ति येन समग्रा अपि वर्षपति-मासपति-वारपति-होरापति-घटीपतिक्रमादयो भेदा ज्योतिश्शास्त्रे सुव्यवस्थिताः सन्ति। तद्यथा—

मन्दामरेज्यभूपुत्रसूर्यशुक्रेन्दुजेन्दवः ।
परिभ्रमन्त्यधोऽधस्थाः सिद्धविद्याधरा धनाः ॥[१]

१. पूषा (श्रीसूर्यनारायणः)—नवपदात्मकमूर्ध्वतिर्यग्गताभिस्त्रिभिस्त्रिभिरेव रेखाभिर्निर्मिते ग्रहमण्डपेऽष्टस्वपि दिक्षु मध्यवेदिकायामरुणवर्णालङ्कृते चतुरस्र-मण्डले स्फुटितकिरणजालमिव माणिक्योपमं भास्करं रम्यसिंहासने प्रतिष्ठापयेत्।

२. विश्ववेदाः (चन्द्रमाः)—ग्रहमण्डपस्याग्नेय्यां श्वेतवेदिकायां शुक्लवर्णावृते चतुरस्रमण्डले प्रतिपत्कलाधर इवोदीयमानः शुक्लमण्डलः सोमः संस्थापनीयः।

३. तार्क्ष्यः (मङ्गलः)—ग्रहमण्डपस्य दक्षिणस्यां रक्तवर्णालङ्कृतायां वेदिकायां सिन्दूररागरञ्जिते त्रिकोणमण्डले प्रवालरत्नमिव देदीप्यमानं मङ्गलप्रदं सुमङ्गलं प्रतिष्ठापयेत्।

४. अरिष्टनेमिः (बुधः)—ग्रहमण्डपस्यैशान्यां हरितवर्णोपेतायां वेदिकायां हरितरागसम्भृते बाणाकारमण्डले पद्मरागरागानुकारिणं हरितवर्णाभं बुधग्रहं समालिखेत्।

५. वृहस्पतिः (देवराजगुरुः)—ग्रहयागमण्डपस्योत्तरस्यां स्वर्णवर्णा-लङ्कृतायां वेदिकायां पीतरागरञ्जिते दीर्घपट्टिशाकारमण्डले पुष्परागमिव जाज्वल्यमानं पद्मासने शोभमानं देवगुरुं बृहस्पतिं संस्थापयेत्।

६. इन्द्रः (शुक्रः)—पूर्वस्यां सुश्वेतरागालङ्कृतायां वेदिकायां शुक्लवर्णावृते पञ्चकोणाकारमण्डले व्रजरत्नमिवाऽऽभासमानं दैत्यकुलपुरोहितं शुक्रं प्रतिष्ठापयेत्।

७. वृद्धश्रवाः (शनैश्चरः)—पश्चिमायां नीलवर्णालङ्कृतायां वेदिकायां घननील-रागरञ्जिते धनुषाकारमण्डले प्रस्फुटितकिरणजालेन्द्रनीलमणिसन्निभं शनैश्चरं संस्थापयेत्।

---

१. सूर्यसिद्धान्ते-१२/३१।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

८. स्वर्भानुः (राहु)—नैर्ऋत्यां कृष्णवर्णालङ्कृतायां वेदिकायां पेचकरागरञ्जिते शूर्पाकारमण्डले महाकालमित्रं विकरालं राहुं महाग्रहं स्वासने सन्निवेशयेत्।

९. स्वश्चन्द्रः (केतुः)—वायव्यां धूमिलरागालङ्कृतायां ग्रहवेदिकायामागारे धूमरागरञ्जिते ध्वजाकारमण्डले वैदूर्यरत्नमिव देदीप्यमानं केतुमहाग्रहं संस्थापयेत्।

ग्रहमण्डपे नवग्रहाणां राशिसहितानां स्थापनक्रमेणैव स्वस्त्ययनोक्ता स्थावरोच्चनीचत्वव्यवस्था बुद्धिगोचरा भवति। मन्त्रे चत्वारोऽपि स्वस्तिशब्दाः चतुर्ष्वपि कोणेषु न्यस्ता भवन्ति। स्वस्तिबिन्दुर्वस्तुतश्चन्द्रपातस्य (राहोः) स्थानं बोध्यम्। स्वस्तिकोणेषु चन्द्र-चन्द्रपात-बुधानां प्रायो विशेषाधिकारो वर्तते। तत्रापि वैशिष्ट्यं चन्द्रपातयोरेव विद्यते। यतो हि प्राकृतरूपेण मेषादिबिन्दौ राहोस्तुलादिबिन्दौ केतोश्च मूलत्रिकोणस्थानं निश्चप्रचीभूतमास्ते। एवं राहोरुच्चत्वं स्थावररूपेण वृषान्तवर्तिषु त्रिषु अंशेषु मिथुनारम्भवर्तिषु त्रिष्वंशेषु च परमोच्चपदं विद्यते। तद्वदेव वृश्चिकान्त्यवर्तिषु त्रिष्वंशेषु धनुषु आदिवर्तिषु त्रिष्वंशेषु च केतोः परमोच्चस्थानं विनिश्चितमास्ते। शेषग्रहाणां परमोच्चस्थानं निम्नलिखितप्रकारेण बोध्यम्।

१. पूषा (सूर्य)—स्वस्तिमन्त्रोक्तपद्धत्या पूर्वस्यां १० अंशोपरि सूर्यस्य परमोच्चस्थानं नित्यं स्वीक्रियते। तच्चाश्विनीनक्षत्रस्य तृतीय-चतुर्थ-चरणयोर्मध्य-बिन्दौ सिद्ध्यति। पुराणेषु संज्ञानाम्नी सूर्यस्य पट्टराज्ञी पत्युस्तेजःपुञ्जप्रतापेन सन्तप्ता सती स्वच्छायां स्वस्थाने सूर्यपत्नीरूपेण संस्थाप्य स्वयमश्विनीरूपेण कुरुजाङ्गलेषु बभ्राम। तस्याश्छायारूपात् सूर्यस्य भद्राशनैश्चरयोर्युगलं (यमलं) प्रादुरबीभवत्। उभावपि तौ भद्राशनैश्चरौ छाययाश्वत्थमूले संस्थापितौ। प्रतिशनिवासरमश्वत्थमूलमेत्य भगवती-लक्ष्मीः स्वयं स्वीयस्तनपानादिना तयोः सुरक्षां विदधे। छायाया यमयमुनयोः संज्ञायमलसुतयोर्विषयेऽसद्व्यवहारं वीक्ष्य सूर्यः समग्रमप्युदन्तजातं ज्ञात्वा कुरुजाङ्गलेषु प्राप्याश्वरूपेण संज्ञयाश्विनीरूपया दृङ्नासयोः संयोगेन दस्रनासत्ययोः स्ववैद्ययोरश्विनीकुमारयोर्जन्मकारणमभवत्। एषा कथा वह्नि-पुराणेऽनुसन्धेया।

२. विश्ववेदाः (चन्द्रमाः)—चतुः स्वस्तिपदमपि चन्द्रस्यैवासनरूपेण बोध्यम्। स च अग्निकोणादुत्थायैशानकोणस्थं स्वस्तिपदमलञ्चकार। तत्र वृषस्यादि-मांशत्रयो३परि कृत्तिकायाश्च ६/३०' अंशोपरि परमोच्चपदं चन्द्रः स्वीकृतवान्। अत एव कृत्तिकाद्यष्टाविंशतिपत्नीनां दक्षप्रजापतेः कन्यानां स्वामी स्वयं चन्द्र एव वर्तते। रेवतीतः षण्णक्षत्राणां मृगशीर्षपर्यन्तानां मध्ये आदियुञ्जायां कृत्तिकासु विद्यमानोऽपि

CC-0. Sampurnanand University Collection. Digitized by eGangotri

रोहिण्यां लक्ष्यते। अतो रोहिणी चन्द्रस्याधिका प्रियाऽऽसीदिति कथा पुराणेष्वनुसन्धेया।

३. तार्क्ष्यः (सुमङ्गलः)—"असौ यस्ताम्रोऽअरुणऽउत बभ्रुः सुमङ्गलः" "ऊर्ध्व-ख-स्वस्तिके" विराजमानो मकरस्य २८ अष्टाविंशत्यंशोपरि धनिष्ठा-नक्षत्रस्य च ४अंश/४०' अंशाद्युपरि भौमः ग्रहमण्डपे स्वस्थानस्थित एवात्र परमोच्चपदमलङ्करोति। धनिष्ठैव श्रविष्ठाख्या पुराणेषु घटवतीनाम्ना प्रसिद्धा भौमपत्नी बभूव। षण्मुखसदृशचतुस्तारकात्मिका योगतारा धनिष्ठा नक्षत्रं नित्यमाकाशे घटवती नाम सार्थकीकुर्वन्नास्ते।

४. अरिष्टनेमिः (बुधः)—कन्याराशौ १५ अंशोपरि हस्तनक्षत्रस्य च पञ्चमांशोपरि बुधस्य स्थावरं परमोच्चपदं फलितशास्त्रे प्रसिद्धम्। बुधश्चन्द्र-पुत्रत्वाच्चतुर्ष्वपि स्वस्तिपदेषु स्वाधिकारं स्वायत्तीकर्तुं स्वयं प्रभुः। वायव्यकोणीय-स्वस्तिपदे कन्याराशिर्ज्योतिर्हस्ता दिव्यकन्या (इला) बुधस्य पत्नीरूपेण वर्तते। एकदा मनुः स्वपुत्रप्राप्त्यर्थं पुत्रेष्टियागं चकार। तत्र पट्टराज्ञ्यादिष्टेन होतृदोषेण कन्या जाता। वशिष्ठस्य तपःप्रभावेण सा इला पुत्रत्वं प्राप्य सुद्युम्ननामको राजकुमारः स्वीयाश्वमारुह्य इलावृतवर्षे शिवगौरीकुण्डं प्राप्त एव गौरीशापात् पुनः कन्याऽभवत्। तत्र चन्द्रपुत्रो बुधस्तपोमग्न आसीत्। इलाबुधयोः समागमात् पुरुषप्रभृतयश्चत्वारः चन्द्रवंशधराः प्रसिद्धराजकुमारा अभवन्। तस्या इलायाः प्रभावेणाद्यापि तस्य इलावृतवर्षत्वात् "इलामा" इति संज्ञाधारिणां जनानामाधिक्यं तत्र वर्तते। एवं बुद्धमतानुयायिनोऽपि वर्तन्ते। तत्रत्या पुरुषा अपि स्त्रीरूपानुकारिणीं वेशभूषां स्वीकृत्य वेणीधरा एव दृश्यन्ते। बुधो रौहिणेय इत्युच्यते। बुद्धस्य जन्म रोहिणी-तटवर्तिनि कपिलवस्तु इत्यमिधायां राजधान्यां समभवत्। बुधशुक्रौ वारद्वयमस्तं स्वीकुरुतः, वक्रास्ते (पश्चिमास्ते) सति पूर्वोदयं च लभेते। एवं मार्ग्यस्ते (पूर्वास्ते) सति पश्चिमोदयं स्वीकुरुतः। अत एव स्वस्तिकेऽपि तयोरुभयोरपि बुधशुक्रयोः स्थानपरिवर्तनं भवत एव। बुधः पश्चिमस्यां पुंरूपं परिहृत्य स्त्रीरूपं स्वीकरोति। शुक्रश्च पश्चिमे सति शुक्रशुचिरूपेण पूर्वस्यां च शक्रशचीरूपेण ज्येष्ठदेवगुरुरूपेण स्वयमेव शक्ररूपेण वा पूज्यो भवति। एतावुभावपि परस्परमुच्चगौ स्यातां तदोभयोरेकः स्वोच्चे द्वितीयो नीचस्थितो भवतीति बोध्यम्। नीचभङ्गराजयोगकारिणौ च भवतः।.

५. बृहस्पतिः (गुरुः)—कर्कस्थः पञ्चमांशोपरि पुष्यर्क्षस्थश्च १°/४०' अंशाद्युपरि विद्यमानः परमोच्चस्थो भवति। अतः पुष्यतारा गुरुपत्नीव जगत्प्रसिद्धा वर्तते।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

६. इन्द्रः (शुक्रः)—मीनराशौ २७ अंशोपरि रेवतीनक्षत्रस्य च १०अं. २० कलोपरिष्ठः परमोच्चपदं लभते। अतो रेवती ऊर्ज्जस्वती-जयन्ती-शुचि-प्रभृतिनामभिः प्रसिद्धाभवत्।

७. वृद्धश्रवाः (शनैश्चरः)—तुलाराशौ २० अंशोपरि स्वाति-विशाखयोर्मध्यवर्तिनि बिन्दौ परमोच्चपदं लभते। अतः शनिदेवस्य स्वाती विशाखा चेति द्वेऽपि पत्न्यौ बभूवतुः। एष शनिः सदा स्वस्त्ययनोक्ते पश्चिमे स्वस्तिकपदे विराजते।

८. स्वर्भानुः (राहुः)—वृषराशौ अन्तिमांशत्रितयोपरि मिथुनराशौ च प्रारम्भिकांशत्रितयोपरि परमोच्चतामनुभवति। मृगशीर्षर्क्षस्य च ३ं/४०' अंशाद्युपरि परमोच्चतामाश्रयतीति वा। अतो मृगशिरा तारा तस्य पत्नीरूपाऽभवत्। मृगशीर्षर्क्षस्य वेदेषु इन्वका, इन्वगा, इल्वला वा नामानि प्रसिद्धानि सन्ति।

९. स्वश्चन्द्रः (केतुः)—वृश्चिकस्यान्तिमत्र्यंशोपरि अष्टाविंशतितमेंऽशे धनुषश्चाऽऽदिमत्र्यंशोपरि ज्येष्ठाया अन्तिम १०ं/३०' अंशाद्युपरि मूलस्यादि-त्र्यंशोपरि केतुः परमोच्चतामधिगच्छति। अतः केतोः ज्येष्ठा (निद्रा, रोहिणी) वा मूला (विचृति, वर्हणी वा) पत्न्यो वर्तन्ते। स्वश्चन्द्र-रोहिणीयोगोऽपि सार्थक एव।

(९) स्वस्ति (स्वर्भानु-स्वश्चन्द्रयोः राहुकेत्वोर्वा) स्वामित्वनिर्धारणम्—राहुः कुण्डलिनीरूपस्य मुखं स्वीक्रियते, केतुश्च पुच्छमुच्यते। राहुर्महाकाल इव विकराल-रूपो महान् सर्पः कालसर्पो वेत्युच्यते।

मीनमेषयोर्मध्यवर्ती बिन्दुरेव राहोर्मूलत्रिकोणस्थानम्, तदेव विषुवबिन्दुः वेदेषु प्रसिद्धः। तथापि मेषराशिरेव राहोर्मूलत्रिकोणम्। एवं कन्यातुलयोर्मध्यवर्ती विषुवबिन्दुः शारदसम्पातबिन्दुर्वा स्वश्चन्द्रः स्वच्छन्दस्वरूपः केतोर्मूलत्रिकोणस्थानं वर्तते, तथापि तुलादिबिन्दुरेव केतुग्रहस्य मूलत्रिकोणाधिष्ठानं स्वीक्रियते। मेषादिविषुवबिन्दुतो मेषस्य सप्तविंशतितमांशं यावद् राहुरूपमहाकालसर्पस्य फणमयं महच्छत्रं विराजते। अतो मेषादितो सप्तविंशत्यंशपर्यन्तं फणच्छत्राच्छन्नं मेषराशिमण्डलं राहोरधिकारे वर्तितेऽतस्तत्र राहुमहाग्रहस्यैव स्वामित्वं बोध्यम्। कुम्भस्यान्तिमसप्तविंशत्यंशसमाप्त्युत्तरं त्रयोंऽशा मीनादिवर्तिनीमंशत्रयीं यावद् राहोः स्वामित्वं बोध्यम्। इत्थं कुम्भमीनयोर्मध्यवर्तिनोऽत्र षडंशा राहोः स्वामिरूपेण स्वाधिकृताः सन्ति। सिंहराशौ अष्टादशांशसमाप्युत्तरमेकोनविंशत्यंशमारभ्य सिंहस्यात्मांशं यावद् द्वादशैवांशास्तेनैव सह कन्यादितो नवमांशान्तं यावद् राहोः सिंहासनवत् स्वामित्वरूपेणाधिकारो वर्तते। अर्थात् सिंहस्यैकोनविंशत्यंशमारभ्य

CC-0. Sampurnanand University Collection. Digitized by eGangotri

कन्याया नवमांशं यावद् एकविंशत्यंशात्मकं राशिमण्डलं राहोः सिंहासनरूपेण वर्तते। इत्थं चतुष्पञ्चाशदंशानामाधिपत्यं राहोः सिद्ध्यति।

तद्वत् केतोश्च वृश्चिकस्याष्टादशांशसमाप्त्युत्तरसमकालमेव एकोनविंशत्यंश-मारभ्य वृश्चिकस्यान्तिमत्रिंशदंशान्तं द्वादशतुल्यसंख्यकांशानामेवं धनुषः प्रारम्भत ९ अंशान्तं केतोः स्वामित्वं बोध्यम्। इत्थं वृश्चिकस्यैकोनविंशत्यंशमारभ्य धनुषो नवमांशं यावदिति कृत्वा एकविंशत्यंशानां स्वामित्वं केतोर्वर्तते।

अस्याभिप्रायोऽयं यत् समस्तेऽपि राशिचक्रे राहुकेत्वोरुभयोरपि चन्द्रपातयोः षड्बिन्दवो महत्त्वपूर्णाः सन्ति—

१. मेषमीनयोर्मध्यवर्ती बिन्दू राहोर्मूलत्रिकोणम्, मेषादितोऽग्रे स्वामित्वद्योतकश्च।

२. कन्यातुलयोर्मध्यवर्ती बिन्दुः केतोर्मूलत्रिकोणम्।

३. वृषमिथुनयोर्मध्यवर्ती बिन्दू राहोरुच्चत्वम्।

४. वृश्चिकधनुषोर्मध्यवर्ती बिन्दुः केतोरुच्चत्वम्, स्वामित्वद्योतकश्च।

५. कुम्भमीनयोर्मध्यवर्ती बिन्दू राहोः स्वामित्वद्योतकः।

६. सिंहकन्ययोर्मध्यवर्ती बिन्दू राहोः स्वामित्वद्योतकः।

इति शम्।

●

CC-0. Sampurnanand University Collection. Digitized by eGangotri

श्रीमदाद्यशङ्कराचार्य्यभगवत्पादानां मठाम्नायव्यवस्थापनस्य दार्शनिकं व्यावहारिकं च रहस्यम्

प्रो. विन्ध्येश्वरीप्रसादमिश्रो 'विनयः'
आचार्योऽध्यक्षश्च, वैदिकदर्शनविभागस्य
काशी-हिन्दू-विश्वविद्यालये
वाराणस्याम्

***

यः सृष्ट्वा जगदञ्जसाऽञ्चितदृशा तत्प्राविशल्लीलया,
नानात्वं बिभराञ्चकार च पुनर्बिम्बात्मना भानुवत्।
यस्मिन्प्रोतमिदं प्रपञ्चपटलं सूत्रे यथा विद्रुमा-
स्तं श्रुत्यन्तसुरद्रुमं द्रुतिमतां चित्तेषु भान्तं नुमः।।
नुमो मतिमतामुद्यद्भास्करोपमसंविदम्।
तत्त्वज्ञानविदां वेद्यं शङ्करं शङ्करं प्रभुम्।।

श्रीमद्धर्मराजस्य पुण्यश्लोकशिखामणेरजातशत्रोर्युधिष्ठिरस्यैकत्रिंशदधिकषट्शतोत्तरद्विसहस्रमिते (२६३१) वत्सरे वैशाखशुक्लपञ्चम्यां रविवासरे मध्यन्दिनेऽधिभारतं केरलप्रान्तस्य 'कालटी'-नामाभिरामे ग्रामे मातुरार्याम्बायाः पितुश्च श्रीशिवगुरोस्तनयत्वमुपेत्य साक्षाल्लोकशङ्कर एव श्रीशङ्कराचार्य-वर्ष्मणाऽवततारेति समस्तशाङ्करपीठानां प्रशस्तशोधबोधानुसन्धान-परम्परया सुतरामवगम्यते।

अष्टवर्षदेशीयोऽयं भगवान् एकोनचत्वारिंशदधिक-षट्शतोत्तरद्विसहस्रमिते यौधिष्ठिरेऽब्दे (२६३९) कार्त्तिक्यां शुक्लैकादश्यां भगवत्या नर्मदायास्तटे तपस्यन्तं श्रीमन्नारायणादवाप्ताविच्छिन्नपरम्पराऽवस्थितवेदान्तराद्धान्तविभूषितस्वान्तं महान्तमाचार्यं श्रीमद्गोविन्दभगवत्पादमुपसृत्य ततो जगद्धिताय दण्डसन्न्यासदीक्षां सञ्जग्राह तदनु परमहंसपरिव्राजकाचार्यत्वेनासेतुहिमगिरिमखिलभारतवर्षं

CC-0. Sampurnanand University Collection. Digitized by eGangotri

स्वचारुचरणसञ्चरणचर्यया चालञ्चक्रे। स्वधन्यतमस्य जीवनस्य द्वात्रिंशद्-वर्षात्मकेऽल्पीयस्येव वयसि तत्र तत्र समुज्जृम्भमाणानां नानामतमतान्तरमा-बिभ्राणानामवैदिककुतर्कपाशानां स्वदुर्धर्षेण पाण्डित्येनामूलचूलं कर्त्तनं विधायोपनिषद्ब्रह्मसूत्रश्रीमद्भगवद्गीतेति प्रस्थानत्रय्या भाष्यवितानेन किं वा स्वापरिमितप्रज्ञानेन सनातनधर्मदर्शनपद्धतिञ्च पुनरुद्घाटयाम्बभूवेति नूनं विदन्ति विद्वांसः।

पश्चाच्च भारतराष्ट्रस्य सर्वविधसांस्कृतिकमैक्यं सौमनस्यञ्च चिराय संसाधयितुकामोऽस्य चतसृषु दिक्षु यज्ञमण्डपस्थविधानमनुसृत्य ब्रह्मणो वदनचतुष्टयाद्वेदाविर्भावक्रमं वा मनसि निधाय चत्वारि पीठान्यपि समुद्भावयामास यथाक्रमम्। तद्यथा—

(१) षट्चत्वारिंशदधिकषड्विंशतिशतात्मके (२६४६) यौधिष्ठिरे वर्षे भारतस्योत्तरदिग्विभागे हिमवतः सुमनोरमेऽञ्चले बदरिकाश्रमे ज्योतिष्पीठम्।

(२) अष्टाचत्वारिंशदधिकषड्विंशतिशतात्मके (२६४८) तद्वत्सरे पश्चिमदिग्विभागे पश्चिमसिन्धुतटे द्वारकायां भगवद्धामोपलक्षितपुर्यां द्वारकापीठम्।

(३) चतुष्पञ्चाशदधिकषड्विंशतिशतात्मके (२६५४) तस्मिन् दक्षिणदिग्विभागे विभाण्डकर्षितनयस्य ऋष्यशृङ्गस्य तपोभूमौ शृङ्गगिरौ शृङ्गेरिपीठम्।

एवञ्च,

(४) पञ्चपञ्चाशदधिकषड्विंशतिशतात्मके (२६५५) युधिष्ठिरवर्षे भारतवर्षस्य पूर्वदिग्विभागे महोदध्युपकूलं पुरुषोत्तमक्षेत्रस्य श्रीमज्जगन्नाथपुर्य्यां गोवर्द्धनपीठमिति।

एतेषु पर्यायेण स्वशिष्योत्तमान्पूज्यपादतोटकाचार्य-सुरेश्वराचार्य-हस्तामल-काचार्य-पद्मपादाचार्यांश्च पीठाचार्यत्वेन समभिषिच्य स्वसमयादेव चतुराम्नाय-शङ्कराचार्यपरम्परां परिपालयाम्बभूव तत्रभवाञ्जगद्गुरुः। ततः प्रभृत्यद्यावधिपर्यन्तं पीठानि चत्वार्यपि स्वाविच्छिन्नामाचार्यमणिमालां स्व-स्ववक्षसि धारयन्तितमां सद्विदितक्रमां विद्वन्मनोरमाम्।

एतेषामेव मठाम्नायसञ्ज्ञकानां पीठानां दार्शनिकं व्यावहारिकं च रहस्यजातं श्रीमद्हरिगुरुकृपाकटाक्षादवाप्तबोधलेशेन किञ्चिदुपदर्शयामः।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

अथ मठाम्नायव्यवस्थाया दार्शनिकं रहस्यम्

'आम्नाय' इति समग्रज्ञानराशेर्भगवतो वेदस्यापरपर्यायः। भगवत्पादेन भारतवर्षस्य शब्दब्रह्मरूपता काचित्पारमार्थिकी सन्न्यरूप्येतेन मठाम्नायचतुष्टयेन ऋग्यजुःसामाथर्वणां चतुर्ण्णामपि वेदानाम् ऊर्ध्वाम्नायाऽऽत्माम्नायजम्बूद्वीपेति सञ्ज्ञयोपास्तिभावनाभेदेन त्रित्वमवाप्तस्य ब्रह्मविद्येत्यपरनामधेयस्य वेदान्तस्य सङ्गत्येति तन्निर्व्यूढलघुग्रन्थेन मठाम्नायोपनिषत्सञ्ज्ञकेन स्फुटं वेत्तुं शक्यते। तद्यथा—

ॐ ऊर्ध्वाम्नायगुरूपदेशभुवनाकारसिंहासनसिद्धाचारवन्दितं समस्त-वेदवेदान्तसारनिर्माणपरात्परं निरञ्जनज्ञानार्थषट्चक्रजाग्रतीमयं परावाचा परात्परं सर्वसाक्षिधृतं चिन्मयं ज्योतिर्लिङ्गं निराकारं गलितं पूर्णप्रभाशोभितं शान्तं चन्द्रोदयनिभं भजमानस्तच्छ्रीगुरुचैतन्यं प्रणमामि।

अखण्डमण्डलाकारं व्याप्तं येन चराचरम्।
तत्पदं दर्शितं येन तस्मै श्रीगुरवे नमः ॥

इत्युपक्रम्य जगद्गुरुतत्त्वञ्च प्रणम्य प्रथमं चतसृष्वपि दिक्षु संस्थापितानां चतुराम्नायमठानां तात्त्विकं स्वरूपमित्थमभ्यधायि भगवत्पादेन क्रमशः—

ॐ प्रथमे पश्चिमाम्नायः शारदामठः कीटवारिसम्प्रदायस्तीर्थाश्रमपदं द्वारकाक्षेत्रं सिद्धेश्वरो देवो भद्रकाली देवी ब्रह्मस्वरूपाचार्यो गङ्गागोमतीतीर्थं स्वरूपब्रह्मचारी सामवेदप्रपठनं 'तत्त्वमसी'त्यादिवाक्यविचारो नित्यानित्य-विवेकेनात्मनोपास्तिमात्मतीर्थमात्मोद्धारार्थे साक्षात्कारार्थे सन्न्यासग्रहणं करिष्ये। ॐ नारायणायेति।

ॐ द्वितीये पूर्वाम्नायो गोवर्द्धनमठो भोगवारिसम्प्रदायो वनारण्ये पुरुषोत्तमं क्षेत्रं जगन्नाथो देवो विमला देवी भद्रपद्मपादाचार्यो महोदधितीर्थं प्रकाशब्रह्मचारी ऋग्वेदप्रपठनं तमेवैक्यं जानथ "प्रज्ञानमानन्दं ब्रह्म" इत्यादिविचारो नित्यानित्य-विवेकेनात्मनोपास्तिमात्मतीर्थे आत्मोद्धारार्थे साक्षात्कारार्थे सन्न्यासग्रहणं करिष्ये। ॐ नमो नारायणायेति।

ॐ तृतीय उत्तराम्नायो ज्योतिर्मठ आनन्दवारिसम्प्रदायो गिरिपर्वत-सागरपदानि बदरिकाश्रमक्षेत्रं नारायणो देवता पूर्णगिरी देवी त्रोटकाचार्योऽलकनन्दातीर्थमानन्दब्रह्मचार्य्यथर्ववेदपठनं तमेवैक्यं जानथ 'अयमात्मा ब्रह्म' इत्यादिवाक्यविचारो नित्यानित्यविवेकेनात्मनोपास्तिमात्मतीर्थम् आत्मोद्धारार्थे साक्षात्कारार्थे सन्न्यासग्रहणं करिष्ये। ॐ नमो नारायणायेति।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

ॐ चतुर्थे दक्षिणाम्नायः शृङ्गेरीमठो भूरिवारिसम्प्रदायः सरस्वती-भारती-पुरी चेति पदानि रामेश्वरक्षेत्रमादिवराहो देवता कामाक्षी देवी शृङ्गी ऋषिः पृथ्वीधराचार्यस्तुङ्गभद्रातीर्थं चैतन्यब्रह्मचारी यजुर्वेदप्रपठनं तमेवैक्यं जानथ 'अहं ब्रह्मास्मि' इत्यादिवाक्यविचारो नित्यानित्यविवेकेनात्मनोपास्तिमात्मतीर्थम् आत्मोद्धारार्थे साक्षात्कारार्थे सन्न्यासग्रहणं करिष्ये। ॐ नमो नारायणायेति।

तदनु, काशीस्थसुमेरुपीठ ऊर्ध्वाम्नायस्य यतेर्व्यष्टिस्वरूपस्य आत्माम्नायस्य जम्मूद्वीपाख्यविस्तीर्णे भारतवर्षे यतेः समष्टिस्वरूपस्य जम्बूद्वीपाख्याम्नायस्येति च त्रयाणामाम्नायानां वेदान्तरूपाणां विवेचनं पुनरपि व्यधायि भगवताऽऽद्यजगद्-गुरुणेति। यथा—

ॐ पञ्चम ऊर्ध्वाम्नायः सुमेरुमठः काशीसम्प्रदायो जनकयाज्ञवल्क्यादि-शुकवामदेवादिजीवन्मुक्ता एतत्सनकसनन्दनकपिलनारदादिब्रह्मनिष्ठा नित्यब्रह्मचारी कैलासक्षेत्रं मानसरोवरं तीर्थं निरञ्जनो देवता माया देवी ईश्वराचार्योऽनन्तब्रह्मचारी शुकदेववामदेवादिजीवन्मुक्तानां सुसंवेदप्रपठनं परोरजसेऽसावदो 'सज्ज्ञानमनन्तं ब्रह्म' इत्यादिवाक्यविचारो नित्यानित्यविवेकेनात्मनोपास्तिमात्मतीर्थम् आत्मोद्धारार्थे साक्षात्कारार्थे सन्न्यासग्रहणं करिष्ये। ॐ नमो नारायणायेति।

ॐ षष्ठ आत्माम्नायः परमात्मा मठः सत्यसुसम्प्रदायो नाभिकुण्डलिक्षेत्रं त्रिकुटीतीर्थं हंसो देवी परमहंसो देवता अजपा सोऽहं महामन्त्रों ब्रह्मविष्णुमहेश्वराद्या जीवब्रह्मचारी हंसविद उपास्तिरुपाधिभेदसन्न्यासार्थं ज्ञानसन्न्यासग्रहणं करिष्ये। ॐ नमो नारायणायेति।

ॐ सप्तमे जम्बूद्वीपः सम्यग्ज्ञानं शिखा न सूत्रं वेद्यवेदकः श्रद्धा नदी विमलातीर्थमात्मलिङ्गशान्त्यर्थे विचारो नित्यानित्यविवेकेनात्मनोपास्तिमात्मतीर्थम् आत्मोद्धारार्थे साक्षात्कारार्थे सन्न्यासग्रणं करिष्ये। ॐ नमो नारायणायेति।[१]

इदमत्र रहस्यम्-योगशास्त्रदृष्ट्या साधकस्य शरीरमिदं चतुःपीठान्वितं चतुर्विधानामाम्नायानां प्रकाशकमत्यन्तं गहनमुपासनोपयिकञ्चास्ते, यथोक्तं योगशिखोपनिषदि—

चतुःपीठसमाकीर्णं चतुराम्नायदीपकम्।
बिन्दुनादमहालिङ्गं विष्णुलक्ष्मीनिकेतनम्॥
देहं विष्ण्वालयं प्रोक्तं सिद्धिदं सर्वदेहिनाम्॥ (५/३,४)

CC-0. Sampurnanand University Collection. Digitized by eGangotri

अथ, गुदमेढ्रान्तरालस्थं त्रिकोणात्मकं मूलाधारं प्रथमं कामरूपाख्यं पीठम्। यत्र कुण्डलिनीनाम पराशक्तिः प्रतिष्ठिता। नाभिदेश-हृद्देशयोर्मध्ये पूर्णगिरिसञ्ज्ञकं पीठं द्वितीयम्। कण्ठदेशे जालन्धरं पीठं तृतीयम्, भ्रुवोर्मध्ये उड्यानाख्यं तुरीयं महापीठमित्याहृत्य पीठचतुष्टयमत्र विराजते।

एषां त्रयाणामपि पीठानामाम्नायचतुष्टयेन साकं सङ्गतिः सुतरां प्रतिपादिताऽस्मद्गुरुवर्यैः पूर्वाम्नायगोवर्द्धनमठपुरीपीठस्य वर्त्तमानाधीश्वरैर्जगद्-गुरुशङ्कराचार्य-श्रीनिश्चलानन्दसरस्वतीभगवत्पादैः। अमीषाम्मतेन, 'पश्चिमाभिमुखं स्थितम्' इति योगचूडामण्युपनिषदुक्त-शरीरस्थदिङ्निर्धारणन्यायेन ऊर्ध्वमुद्दिश्य पूर्वेति पदस्य अधोभागञ्चोद्दिश्य पश्चिमेति पदस्य प्रयोगोऽत्र दृश्यते। तस्माद् भ्रूमध्ये यद् द्विदलात्मकमाज्ञाचक्रं तदेवोड्यानपीठमेतच्च ऋग्वेदस्वरूपः पूर्वाम्नायः। कण्ठकूपस्थितं षोडशदलं विशुद्धचक्रमेव जालन्धरपीठं पश्चिमाम्नायः। हृदये द्वादशदलमनाहतचक्रमेव पूर्णगिरिपीठम्, अयमेवोत्तराम्नायः।

तथैव लिङ्गमूले षड्दलं स्वाधिष्ठानचक्रमेव कामरूपाख्यं पीठमथवा योगचूडामण्युपनिषदनुसारेण गुदमूलस्थचतुर्दलादाधारचक्रादारभ्य षड्दलात्मक-स्वाधिष्ठानचक्रपर्यन्तं कामरूपपीठम्, अयमेव दक्षिणाम्नायः।[२]

योगशास्त्रेषु मूलबन्धोड्डीयानबन्धजालन्धरबन्धश्चेति यौगिकसाधनायां बन्धत्रयस्यानिवार्यत्वमुदीर्यते। गुदमेढ्रयोर्युगपदाकुञ्चनेनाधोगमनशीलस्यापानस्य बलवदूर्ध्वीकरणं मूलबन्धः। अस्य बन्धस्य सुप्तकुलकुण्डलिन्याः समुद्बोधने विनियोगः। कुम्भकाख्यप्राणायामस्यान्ते रेचकाख्यस्य चादौ नाभिलिङ्गयो-र्मध्येऽधिसुषुम्णं प्राणशक्तेर्बलाद्विनिवेश एवोड्डीयानबन्धस्तथैव पूरकस्यान्ते कण्ठकुहरस्य किञ्चिदाकुञ्चनं जालन्धरबन्धः। अनेन ब्रह्मनाड्यां प्राणस्य प्रवेशः सिद्ध्यति।

अथ पुनरपि प्रत्येकमाम्नाये विशेषाः

प्रथमः पश्चिमाम्नायः—

स्थलम् - द्वारकापुरी, सिन्धसौराष्ट्रमहाराष्ट्रादयः प्रदेशाः

पीठम् - शारदापीठम्

सम्प्रदायः - कीटवारिः

देवः - सिद्धेश्वरः

देवी - भद्रकाली

CC-0. Sampurnanand University Collection. Digitized by eGangotri

वेदः - सामवेदः
उपनिषत् - छान्दोग्योपनिषद्
महावाक्यं - 'तत्त्वमसि' (छान्दोग्य. ६/१२/१६)
तीर्थम् - गोमती
गोत्रम् - अविगताख्यम्
ब्रह्मचारी - स्वरूपाख्यः
योगपट्टम् - तीर्थमाश्रमश्च
प्रथमाचार्यः - विश्वरूपः सुरेश्वराचार्यः

द्वितीयः पूर्वाम्नायः

क्षेत्रम् (स्थानम्) - जगन्नाथपुरी, पुरुषोत्तमक्षेत्रम्
पीठम् - गोवर्द्धनपीठम्
सम्प्रदायः - भोगवारिसम्प्रदायः
देवः - जगन्नाथः
देवी - विमला
वेदः - ऋग्वेदः
उपनिषत् - ऐतरेयोपनिषद्
महावाक्यम् - 'प्रज्ञानं ब्रह्म' (ऐत.५/४)
तीर्थम् - महोदधितीर्थम्
गोत्रम् - काश्यपगोत्रम्
ब्रह्मचारी - प्रकाशाख्यः
योगपट्टम् - वनमरण्यश्च
प्रथमाचार्यः - श्रीपद्मपादाचार्यः

तृतीय उत्तराम्नायः

क्षेत्रम् (स्थानम्) - बदरिकाश्रमक्षेत्रम्
पीठम् - ज्योतिर्मठम्
सम्प्रदायः - आनन्दवारिसम्प्रदायः
देवः - भगवान् नारायणः
देवी - पूर्णागिरि

CC-0. Sampurnanand University Collection. Digitized by eGangotri

वेदः - अथर्ववेदः

उपनिषत् - माण्डूक्योपनिषत्

महावाक्यम् - 'अयमात्मा ब्रह्म' (माण्डूक्य. २, बृहदारण्यक. ४/४/५)

तीर्थम् - अलकनन्दा

गोत्रम् - भृगुसञ्ज्ञकः

ब्रह्मचारी - आनन्दाख्यः

योगपट्टम् - गिरिः पर्वतः सागरश्च

प्रथमाचार्यः - श्रीतोटकाचार्यः

चतुर्थ दक्षिणाम्नायः

क्षेत्रम् (स्थानम्) - रामेश्वरक्षेत्रम्

पीठम् - मठाम्नायपीठम्

सम्प्रदायः - भूरिवारिसम्प्रदायः

देवः - आदिवराहः

देवी - कामाक्षी

वेदः - यजुर्वेदः

उपनिषत् - बृहदारण्यकोपनिषद्

महावाक्यम् - 'अहं ब्रह्मास्मि' (बृहदा.१/४/१०)

तीर्थम् - तुङ्गभद्रा

गोत्रम् - भूर्भुव इत्याख्यः

ब्रह्मचारी - चैतन्याख्यः

योगपट्टम् - सरस्वती-भारती-पुरीति

प्रथमाचार्यः - श्रीहस्तामलकाचार्यः

इत्येवंरीत्या मठाम्नायपद्धत्या तत्रभवता भगवत्पादेन सन्न्यासधर्मे समग्रवेदस्य वेदान्तरहस्यानां तन्त्रोपसनानाञ्च सम्यग्व्यवस्थापनं व्यधायीति निश्चप्रचम्।

व्यावहारिकं रहस्यम्

एवमेव व्यवहारदृशा तद्युगे तत्रभवता नाना नाम वैदिकानां मतानां प्राबल्येन सङ्कीर्णतां विप्रकीर्णताञ्चापन्नस्य विश्वकल्याणमूलस्य सनातनधर्मस्य

CC-0. Sampurnanand University Collection. Digitized by eGangotri

राष्ट्रैक्येन साकं सुदृढीकरणं विहितम्। उपनिषद्ब्रह्मसूत्रगीताख्यप्रस्थानत्रय्या भाष्यं विधाय निपुणतरमुपपादितं पूज्यवर्येण श्रुतिस्मृतिपुरस्सरमेतद्द्वयानुगामि तर्कस्यापि प्रामाण्यम्। शिवशक्तिविष्ण्वादिदेवानां नैकविधानि रम्याणि स्तोत्राणि च निर्माय जगद्गुरुणा पञ्चदेवोपासनद्वारेणोपासकानां मध्ये भावसमन्वितिः संसाधिता, तथैव च श्रीविद्योपासनामाविष्कृत्य 'प्रपञ्चसारसञ्ज्ञक-तन्त्रग्रन्थविरचनया च निगमवर्त्मना सहागमस्य तत्त्वमपि सम्यङ्न्यरूपि।

तदानीन्तनेऽनेहसि स्वपूर्ववर्त्तिनां स्वसमकालसम्प्रवर्तितानाञ्च बौद्धविहाराणां समीक्षणं विधायौपनिषदस्य सन्न्यासाश्रमस्य वनारण्यतीर्थाश्रमगिरिपर्वत-सागरसरस्वतीभारतीपुरीति नाम्ना दशरूपत्वं व्यवस्था पयन्नयं भगवान् सन्न्यासिनां साधनधिया शास्त्रानुशीलनधिया च वर्गीकरणमपि प्रवर्त्तयामास। येन तत्र तत्र स्वप्रसृतिं समश्नुवानानां बौद्धादिविधर्मिणां दुर्गोच्छेदनं वैदिकधर्मस्य राष्ट्रैक्यस्य च सम्पादनं तदात्वे समजनीति न नापरोक्षं प्रेक्षावतामिति विरम्यते।

●

CC-0. Sampurnanand University Collection. Digitized by eGangotri

भगवद्गीतोक्तकर्मवादविशेषः कर्मयोगः

डॉ. जया-मिश्रा
प्रवक्ता, संस्कृतविभागस्य
आर्यमहिलास्नातकोत्तरमहाविद्यालये
वाराणस्याम्

❋❋❋

कर्मवादो हि भारतीयसंस्कृतेः परम्परायाश्च विशिष्टः, व्यवहारे जीवनदर्शनत्वेन दृढमूलः, सर्वतोभावेन सम्यक् परिपालितः सिद्धान्तः सुप्रतिष्ठो विद्यते। सर्वो जनः प्रत्येति यद् वर्तमानं जीवनं सुखदुःखात्मकं पूर्वजन्मकृतकर्मानुरूपमेव भवति। पूर्वजन्मार्जितं यत्पुण्यापुण्यं फलं तदेव भाग्यं दिष्टं दैवमित्यादिनामभिर्निगद्यते। अस्मिन् जन्मनि क्रियमाणं कर्मैव पुरुषार्थपदेन प्रसिद्धम्। धर्मार्थकाममोक्षाणां पुरुषार्थानां सिद्धिः कर्माधीनाऽवधार्यते। सर्वत्र हि संस्कृतवाङ्मये सिद्धान्त एषः साक्षात् परम्परया वा प्रतिपादितोऽवलोक्यते। सबहुमानं लोकेऽनुल्लङ्घनीयतयाऽखण्डनीयतया च व्यवहारस्याखिलस्याधारभूतोऽयं कर्मवादो न केनापि सिद्धिकामेन सामाजिकेन कथञ्चिदप्युपेक्ष्यते। 'अवश्यमेव हि भोक्तव्यं कृतं कर्म शुभाशुभम्', 'नाभुक्तं क्षीयते कर्म', 'कर्मणैव हि संसिद्धिमास्थिता जनकादयः' इत्यादिमान्यताप्राप्तसिद्धान्तोऽयं भारतीयजीवने नैतिकाध्यात्मिकव्यावहारिकक्षेत्रेषु सर्वत्र संव्याप्तः पदे पदे सम्प्राप्यते। 'योगः कर्मसु कौशलम्' इत्येवंरूपेणापि कर्मवादः प्रशस्तः श्रीमद्भगवद्गीतायाम्। कर्मणा सह भावनाविशेषस्य महत्त्वं सर्वोत्कृष्टम्। 'यादृशी भावना यस्य सिद्धिर्भवति तादृशी'। यद्यपि मानवः सर्वकर्मसम्पादने न सर्वथा स्वतन्त्रस्तथापि दिष्टानुरूपं पुरुषार्थमाचरन् जीवननिर्वाहं सुखेन कर्तुं शक्नोति। 'नालम्बते दैष्टिकतां न निषीदति पौरुषे। शब्दार्थौ सत्कविरिव द्वयं विद्वानपेक्षते'।। इति हि समन्वितरूपेण सर्वविधिना कर्मणोऽपरिहार्यत्वं जीवने सहायकत्वं पुरुषार्थसाधकत्वञ्च सुनिर्धारितं सर्वत्र संस्कृतवाङ्मये।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

श्रीमद्भगवद्गीतायामेष एव किञ्चिद् विपरिणम्य प्रकारान्तरेण कर्मयोगाभिधः सिद्धान्तविशेषः सूक्ष्मातिसूक्ष्मदार्शनिकदृष्ट्या प्रतिपादितो विद्यते।

भगवद्गीतोक्तोऽत्यन्तं लोकप्रसिद्धः कर्मयोगः कर्मवादवत् सर्वजन-साधारण एव, न तु कोऽप्यसाधारणः सिद्धान्तोऽस्ति। अकृताभ्युपगम-कृतविप्रणाशादिदोषप्रसङ्गे उभयोरपि समान एव 'कच्चिन्नोभयविभ्रष्टश्छिन्नाभ्रमिव नश्यति' (६.३८) इति प्रश्नस्यार्जुनकृतस्योत्तरमाह भगवान् 'स्वल्पमप्यस्य धर्मस्य त्रायते महतो भयात्' इत्यादिवाक्येन। किञ्चाकरणे प्रत्यवाय इति नियमात् कर्मणस्त्यागो न युज्यते। नित्य-नैमित्तिक-निषिद्ध-काम्यकर्मणां यथाविधि वेदेषूक्तविधानानुकूलमनुष्ठानं भगवद्गीतायां यथावदनुमोदितम्, विस्तरेण च किं कर्म किमकर्मेति दार्शनिकदृष्ट्या निरूपितम्, व्यवहारानुगतं च सर्वोपयोगितया सुप्रतिष्ठापितं भगवता श्रीकृष्णेन। तद्यथा—

'सहजं कर्म कौन्तेय सदोषमपि न त्यजेत्'। (१८.४२)

स्वभावजेन कौन्तेय निबद्धः स्वेन कर्मणा।
कर्तुं नेच्छसि यन्मोहात्करिष्यस्यवशोऽपि तत्।। (१८.६०)

यज्ञदानतपः कर्म न त्याज्यं कार्यमेव तत्।
यज्ञो दानं तपश्चैव पावनानि मनीषिणाम्।। (१८.५)

एतान्यपि तु कर्माणि सङ्गं त्यक्त्वा फलानि च।
कर्तव्यानीति मे पार्थ निश्चितं मतमुत्तमम्।। (१८.६)

यः शास्त्रविधिमुत्सृज्य वर्तते कामकारतः।
न स सिद्धिमवाप्नोति न सुखं न परां गतिम्।।
तस्माच्छास्त्रं प्रमाणं ते कार्याकार्यव्यवस्थितौ।
ज्ञात्वा शास्त्रविधानोक्तं कर्म कर्तुमिहार्हसि।।

इत्यादिवचनैर्भगवता वैदिककर्मवादस्यैवानुष्ठानं प्रबोधितं जगद्धिताय। कर्मयोगस्य वैशिष्ट्यं तावदेतदेव यत्—

न कर्मणामनारम्भान्नैष्कर्म्यं पुरुषोऽश्नुते।
न च संन्यसनादेव सिद्धिं समधिगच्छति।।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

कर्मत्यागमात्रादेव नैष्कर्म्यलक्षणा सिद्धिर्नाधिगम्यते। अर्थादशेषतः कर्मत्यागो नोचितः, न च सम्भवति।

न हि कश्चित्क्षणमपि जातु तिष्ठत्यकर्मकृत्।
कार्यते ह्यवशः कर्म सर्वः प्रकृतिजैर्गुणैः॥

इत्येवं स्वभावनिरूढतयाऽशेषतः कर्मत्यागो नोपपद्यते। एवं स्थितेऽपरिहार्ये कर्मणि—

नियतं कुरु कर्म त्वं कर्म ज्यायो ह्यकर्मणः।
शरीरयात्रापि च ते न प्रसिद्ध्येदकर्मणः॥
यज्ञार्थात् कर्मणोऽन्यत्र लोकोऽयं कर्मबन्धनः।
तदर्थं कर्म कौन्तेय मुक्तसङ्गः समाचर॥

इत्येतेन फलाभिसन्धिविवर्जितः कर्म कुर्वाणः स विशिष्यते—

अनाश्रितः कर्मफलं कार्यं कर्म करोति यः।
स संन्यासी च योगी च न निरग्निर्न चाक्रियः॥

इत्येवमीश्वरार्पणबुद्ध्या क्रियमाणं कर्म न फलप्रसवाय कल्पते, अतो न बन्धहेतुः कर्म। कर्मफलमनाश्रित्यासङ्गो भूत्वा अवश्यंकर्तव्यतया क्रियमाणं नियतं कर्म न फलं प्रसूते। अत एव नास्ति कर्मणो बन्धहेतुत्वम्। लोकसङ्ग्रहार्थं क्रियमाणं कर्मापि न बन्धाय भवति। अतः कर्मारम्भादेव नैष्कर्म्यं प्राप्यते—

'कुर्याद् विद्वांस्तथाऽसक्तश्चिकीर्षुर्लोकसंग्रहम्'।

अत एव—

'योगिनः कर्म कुर्वन्ति सङ्गं त्यक्त्वाऽऽत्मशुद्धये।
सर्वारम्भा हि दोषेण धूमेनाग्निरिवावृताः'॥

नैष्कर्म्यलक्षणा सिद्धिः निष्कामकर्मयोगेन भक्तियोगेन ज्ञानयोगेन वा शक्यसम्भवा चेत्, तदा केषाञ्चिद् विरोधाभासः कर्मवादे प्रतीयात्, कर्मानुरूपफलाभावात्। सत्यमेव स्यात्, यदि कर्मपदेन काम्यकर्ममात्रं गृहीतं

CC-0. Sampurnanand University Collection. Digitized by eGangotri

स्यात्। किञ्च भगवद्गीतोक्तकर्मवादविशेषेऽपि विरोधाभास एष आपाततः प्रतीयत एव। तद्यथा—

'सर्वं कर्माखिल पार्थ ज्ञाने परिसमाप्यते।
ज्ञानाग्निः सवकर्माणि भस्मसात् कुरुतेऽर्जुन'।।

किञ्च—

न हि ज्ञानेन सदृशं पवित्रमिह विद्यते।
ज्ञानं लब्ध्वा परां शान्तिमचिरेणाधिगच्छति।।

योगिनस्तु सङ्गं त्यक्त्वाऽऽत्मशुद्धये कर्म कुर्वन्ति। भक्तियोगेनापि कर्मवादः कर्मयोगो वाऽऽत्मशुद्धयेऽनुष्ठीयमानो भक्तियोगस्योपायत्वेन स्वीक्रियते,

सर्वधर्मान् परित्यज्य मामेकं शरणं व्रज।
अहं त्वा सर्वपापेभ्यो मोक्षयिष्यामि मा शुचः।।

इत्यादिभगवद्वाक्येभ्यः। एवं तु अकृताभ्युपगमः कृतविप्रशश्च स्वतः प्रसज्येयाताम्। एतादृशानां दोषाणां निराकरणं भगवता श्रीकृष्णेन स्वयं कृतम्—

प्रयत्नाद्यतमानस्तु योगी संशुद्धकिल्विषः।
अनेकजन्मसंसिद्धस्ततो याति परां गतिम्।।
तपस्विभ्योऽधिको योगी ज्ञानिभ्योऽपि मतोऽधिकः।
कर्मिभ्यश्चाधिको योगी तस्माद्योगी भवार्जुन।।
योगिनामपि सर्वेषां मद्गतेनान्तरात्मना।
श्रद्धावान् भजते यो मां स मे युक्ततमो मतः।।

शङ्कराचार्यभगवत्पादास्तु ज्ञाननिष्ठाया उपायत्वेन कर्मयोगस्य ज्ञानयोगेन समन्वयं कुर्वाणाः सर्वदोषपरिहारं कुर्वन्ति—

अथवा ज्ञानकर्मनिष्ठयोः परस्परविरोधादेकेन पुरुषेण युगपदनुष्ठातुमशक्यत्वे सति इतरेतरानपेक्षयोरेव पुरुषार्थहेतुत्वे प्राप्ते कर्मनिष्ठाया

CC-0. Sampurnanand University Collection. Digitized by eGangotri

ज्ञाननिष्ठाप्राप्तिहेतुत्वेन पुरुषार्थहेतुत्वं न स्वातन्त्र्येण, ज्ञाननिष्ठा तु कर्मनिष्ठोपायलब्धात्मिका सती स्वातन्त्र्येण पुरुषार्थहेतुरन्यानपेक्षा.......न कर्मणामनारम्भादप्रारम्भात् कर्मणां क्रियाणां यज्ञादीनामिह जन्मनि जन्मान्तरे वाऽनुष्ठितानामुपात्तदुरितक्षयहेतुत्वेन सत्त्वशुद्धिकारणानां तत्कारणत्वेन च ज्ञानोत्पत्तिद्वारेण ज्ञाननिष्ठाहेतूनां 'ज्ञानमुत्पद्यते पुंसां क्षयात् पापस्य कर्मणः। यथादर्शतले प्रख्ये पश्यत्यात्मानमात्मनि'।। इत्यादिस्मरणात्।........'कर्मणा-मनारम्भान्नैष्कर्म्यं नाश्नुते' इति वचनात् तद्विपर्ययात्तेषामारम्भान्नैष्कर्म्यमश्नुत इति गम्यते। कस्मात्पुनः कारणात् कर्मणामनारम्भान्नैष्कर्म्यं नाश्नुते। उच्यते, कर्मारम्भस्यैव नैष्कर्म्योपायत्वात्। न ह्युपायमन्तरेणोपेयप्राप्तिरस्ति। कर्मयोगो-पायत्वञ्च नैष्कर्म्यलक्षणस्य ज्ञानयोगस्य श्रुताविह च प्रतिपादनात्। श्रुतौ तावत् प्रकृतस्यात्मलोकस्य वेद्यस्य वेदनोपायत्वेन 'तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन' इत्यादिना कर्मयोगस्य ज्ञानयोगोपायत्वं प्रतिपादितम्। इहापि च 'संन्यासस्तु महाबाहो दुःखमाप्तुमयोगतः', 'योगिनः कर्म कुर्वन्ति सङ्गं त्यक्त्वाऽऽत्मशुद्धये'। 'यज्ञो दानं तपश्चैव पावनानि मनीषिणाम्'। इत्यादि।

उपर्युक्तसमन्वयप्रकारः समीचीन एव प्रकारान्तरमपिसम्भवितुमर्हति। भगवता श्रीकृष्णेन—

लोकेऽस्मिन् द्विविधा निष्ठा पुरा प्रोक्ता मयानघ।
ज्ञानयोगेन सांख्यानां कर्मयोगेन योगिनाम्।। (३.३)

इत्येवंनिष्ठयोरुभयोर्द्वैविध्यकथनेन परस्परंनापेक्षैव लभ्यते, न त्वङ्गाङ्गिभावत्वम्। अग्रेऽपि—

ध्यानेनात्मनि पश्यन्ति केचिदात्मानमात्मना।
अन्ये सांख्येन योगेन कर्मयोगेण चापरे।।

अत्र अन्ये, केचित्, अपरे इत्यादिशब्दा भिन्नपुरुषानुष्ठेयत्वमेव ख्यापयन्ति, न च परस्परोपकारित्वं निराकुर्वन्ति। तथापि वक्तुं शक्यते यद् भगवतोऽपि कथञ्चित् समन्वयोऽभीष्ट एव। भागवतं मतं प्रख्यापयितुं प्रवृत्तं गीताशास्त्रं भक्तियोगप्रधानमेवेति वक्तुं शक्यते निर्विचिकित्सम्।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

पूर्वोक्तसमन्वयविधया दृष्टिभेदेन वा सूक्ष्मेक्षिकया पर्यालोच्यमाने कर्मवादे प्रतिभासितविरोधाभासनिरासः कृतो वेदितव्यः। कर्मवादविशेषश्च गीतोक्तस्तदवस्थ एव तिष्ठति। अत्र हि कर्मयोगे 'गहना कर्मणो गतिः' इति वचनात् कर्मणो बन्धहेतुत्वं सर्वथा विद्यमानं कथं खिलीकर्तुं शक्येत, कथञ्च ज्ञानोपयोगित्वं कर्मणः स्याद् इत्यादिंसूक्ष्मदृष्ट्या कर्मणः सात्त्विक-राजस-तामसभेदबलेनोपकारकत्वं संसाधयितुं 'न हि कश्चित् क्षणमपि जातु तिष्ठत्यकर्मकृत्', 'स्वभावस्तु प्रवर्तते' इत्यादिवचनैः प्रकृष्टरूपे वैदिकः कर्मवाद एव प्रतिपादितो भगवद्गीतायां निष्कामकर्मयोगरूपेणोपबृंहितः परमपुरुषार्थसाधनत्वेन च समुपस्थापितः। कर्मसामान्यात्तु कर्मयोगोऽयं नातिभिद्यते। विशेषस्त्वयं यत् स्थितप्रज्ञ-गुणातीत-प्रभृतिमुख्यप्रतिपाद्यं गीताशास्त्रस्य कर्मयोगमनाश्रित्य न शक्यसम्भवमासीत्। वस्तुतस्तु जीवन्मुक्तिदशायां प्रारब्धकर्मणः क्षयाभावे कर्मवाद एव विराजते। सर्वथाऽपि कर्मणो गतिर्दुरवगाह्य तिष्ठत्येव। योगमहिम्ना कर्मणो न केवलं बन्धहेतुत्वं समाप्यते, अपि तु तस्याप्रतिबन्धकत्वमपि सम्पाद्यते। अत एव कर्मयोगः सर्वोत्कृष्टः कर्मवादविशेषः सुप्रतिष्ठितो विद्यते।

●

CC-0. Sampurnanand University Collection. Digitized by eGangotri

ब्रह्मण आनन्दमयत्वविचारः

डॉ. धनञ्जयकुमारपाण्डेयः
उपाचार्यः, वैदिकदर्शनविभागे
संस्कृतविद्याधर्मविज्ञानसङ्काये
काशीहिन्दूविश्वविद्यालये
वाराणस्याम्

❋❋❋

अथेह यथावेदान्तशास्त्रं स्वप्रकाशस्य ब्रह्मण आनन्दमयत्वं विचार्यते। आनन्दस्वरूपस्य चिदात्मन एव आनन्दमयत्वं श्रुतिसमन्वयादधिगम्यते नान्यस्य तदतिरिक्तस्य जीवस्य देवादीनामधिकृत्य श्रुतिवाक्यानि तत्स्वरूपं बोधयन्ति। अविद्यानिवृत्तौ हि जातायां स्वात्मन्यवस्थानं नाम मोक्षो लभ्यते। 'अभयं प्रतिष्ठां विन्दते'[1] इति श्रुत्या परप्राप्तिर्मोक्षो निर्दिश्यते। ब्रह्मानन्दवल्ल्याम् 'एतमानन्दमयमात्मानमुपसंक्रामति'[2] इत्यनेन वेदान्तवाक्येनानन्दमयशब्देन निर्विशेषस्यैवात्मनो बोधो दृश्यते। तदत्र आनन्दमयत्वं किमिति धिया प्रस्थानमीमांसैषा विद्वन्मनोमोदायावतार्यते।

सूत्रकृता भगवता वादरायणमुनिना अथातो ब्रह्मजिज्ञासेति सूत्रप्रतिपाद्यं ब्रह्म जिज्ञास्यत्वेन निर्दिश्य सूत्रद्वयेन लक्षणप्रमाणे कथिते, ततश्च तत्रैव वेदान्तानां समन्वयोऽपि चतुर्थसूत्रेणोक्तः। प्रधानस्य जगत्कारणत्वं खण्डयताचार्येणानन्तरं तस्यैवानन्दमयत्वं समर्थ्यते। नहि निरूपणीयं वस्तूद्दिश्य प्रसङ्गान्तरं केनचिद् विदुषारभ्यते इति रीत्या आनन्दमयात् कस्यचिदन्यस्याप्रासङ्गिकचर्चाया नास्त्यवसरः। सूत्रसङ्गतिवेलायां यद् ब्रह्म ईक्षितृत्वादिकथनेन परपक्षखण्डनपूर्वकं स्थाप्यते तदेव आनन्दमयोऽभ्यासादिति सूत्रादारभ्य आनन्दमयशब्देन परामृश्यते। ननु मध्ये एतस्यानन्दमयप्रतिपादनस्य कोऽयमवसर इति चेन्न यथावसरं सूत्रैरेतैर्वेदान्तवाक्यान्येव विचार्यन्ते।

---

१. तैत्तिरीयोपनिषत् २.७.१।

२. तत्रैव २.८.५।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

वेदान्तवाक्यानुगतान्येन सूत्राणि दृश्यन्ते। सूत्रकृता तात्पर्यावधारणार्थमेव वेदान्ता व्याख्यायन्ते सूत्रमुखेन। एतदेव भाष्यकृद्वचनेनावगम्यते तद्यथा[१]—

'जन्माद्यस्य यतः इत्यारभ्य श्रुतत्वाच्च इत्येवमन्तैः सूत्रैर्यान्युदाहृतानि वेदान्तवाक्यानि तेषां सर्वज्ञः सर्वशक्तिरीश्वरो जगतो जन्मस्थितिलयकारणमिति' इत्यनेन काचित् सूत्राणां परस्परसङ्गतिरेव प्रदर्श्यते भगवत्पादेन। भाष्यकृताऽपि वेदान्तवाक्यान्येवालोच्य यथासूत्रं तात्पर्यवर्णना क्रियते। अत एवानन्दाधिकरणभाष्यानुक्रमणिकायामुच्यते—'अतः परस्य ग्रन्थस्य किमुत्थानमिति'[२]। अनेनाक्षेपवचनेन पूर्वप्रतिपादितविषयेण सहावश्यं सङ्गतिरस्ति परग्रन्थस्यानन्दमयोऽस्यासीदित्यस्येति बोध्यते। यदि पुनः आनन्दमयो जीवो वा स्यादन्यो वा स्यात्तर्हि भाष्यकृदाक्षेपो न स्याद्युक्त इति प्रतीयते। अत एव सूत्रमेतदपि ब्रह्मपरमेव बोध्यम्। पञ्चदश्यामपि परस्यात्मनो बोध्यते तन्मयत्वं तद्यथा[३]—

कादाचित्कत्वतो नात्मा स्यादानन्दमयोऽप्ययम्।
बिम्बभूतो य आनन्द आत्माऽसौ सर्वदास्थितेः।।

अत्रेदं वक्तव्यम्—सर्वासु श्रुतिषु यद्यपि सर्वधर्मविवर्जितमेव ब्रह्म तत्समन्वयादवधार्यते तथापि क्वचिच्छ्रुतिवाक्येन निर्विशेषं क्वचिच्च सविशेषं श्रूयते। न हि सविशेषप्रतिपादनाया वैयर्थ्यं मन्तव्यं भवति। अत्र भामतीकृतोच्यते[४]—

'यद्यपि तत्त्वतो निरस्तस्योपाधिरूपं ब्रह्म तथापि न तेन रूपेण शक्यमुपदेष्टुमित्युपहितेन रूपेणोपदेष्टव्यमिति'। इदमेव भामतीवचनं सिद्धान्तविन्दावपि अर्थतः समर्थितं वर्तते। उक्तञ्च मधुसूदनस्वामिना[५]—

चिन्मयस्याद्वितीयस्य निष्कलस्याशरीरिणः।
उपासकानां सिद्ध्यर्थं (कार्यार्थं) ब्रह्मणो रूपकल्पना।। इति।

एतेन ग्रन्थेन ब्रह्मणो निर्विशेषमेव पारमार्थिकं स्वरूपं भवितुमर्हति, तथाविधश्रुतितात्पर्यविनिश्चयात्। एवञ्च वेदान्तवाक्येषु विद्याविद्याविषयभेदेन ब्रह्मणो रूपद्वैविध्यं दृश्यते श्रूयते च। समर्थ्यते चैतद्भगवत्पादेन[६]—

---

१. ब्रह्मसूत्रम् १.१.६.१२; २. तत्रैव।
३. पञ्चदशी ३.१०; ४. भामत्याम् १.१.६.१२।
५. दशश्लोक्या अष्टमश्लोकसिद्धान्तबिन्दौ; ६. तत्रैव।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

'एवमेकमपि ब्रह्मापेक्षितोपाधिसम्बन्धं निरस्तोपाधिसम्बन्धं चोपास्यत्वेन ज्ञेयत्वेन च वेदान्तेषूपदिश्यते' इति प्रदर्शयितुं परो ग्रन्थ आरभ्यते'। ननु 'अन्योऽन्यसत्त्वे आत्मा आनन्दमय' इति श्रुतिप्रतिपादितेनानन्दमयकोशपदेन आत्मा गीयते अत एव पञ्चदश्यां श्रूयते[1]—

कारणे सत्त्वमानन्दमयो मोदादिवृत्तिभिः।
तत्तत्कोशैस्तु तादात्म्यादात्मा तत्तन्मयो भवेत्।। इति।

अत्र 'तु'शब्देनात्मनः पञ्चकोशेभ्यो वैलक्षण्यमेव बोध्यते। यथा देहेन्द्रियादीनामन्नादिविकारत्वेनान्नमयप्राणमयादिशब्दाभिधेयत्वमुपपद्यते आत्मनस्तथैव कारणशरीरभूतायामविद्यायां यत्सत्त्वं तदेव मोदादिवृत्तिभिः सुखविशेषैः सहितमानन्दमयो नाम कोशः श्रूयते, आत्मा तत्तत्कोशैः सह तादात्म्याभिमानात् तत्तन्मयो तत्तदभिधेयोऽपि भवति। पञ्चदशीकृन्मते आनन्दविकारोऽपि कथञ्चित् मोदादिवृत्तिकाले विद्यत एव। अतश्च आनन्दमयस्य सविशेषप्रतिपादनात् कथं तेन निर्विशेषश्रुतिरिति शङ्कोदेत्येव। अग्रे स्वयमेवोच्यते[2]—

अन्वयव्यतिरेकाभ्यां पञ्चकोशविवेकतः।
स्वात्मानं तत उद्धृत्य परं ब्रह्म प्रपद्यते।। इति।

एतेन यत्पृथक्करणं श्रूयते तेनानन्दमयावस्थायां निर्विशेषत्वं न शक्यते वक्तुम्। अत एव[3]—

व्यतीतौ भेदसंसर्गौ भावाभावौ क्रमाक्रमौ।
सत्यानृते च विश्वात्मा प्रविवेकात् प्रकाशते।।

इति श्लोकव्याख्यावसरे वाक्यपदीये श्रीगुरुचरणैरुच्यते[4]—'एवं सर्वविकल्पान् व्यतीतोऽपि विश्वात्मा प्रविवेकाद् युक्त्याऽन्नमयादिकोशेभ्यः पञ्चभ्यो विवेचनात् पृथक्करणात्, स्वरूपेण प्रकाशते, नान्यथेत्यर्थः' इति। तस्मात् कथं तावदानन्दमयश्रुत्या परस्यात्मनो ग्रहणमिति उदेति शङ्का।

---

१. पञ्चदशी १.३६; २. तत्रैव १.३७।
३. वाक्यपदीयम्, ब्रह्मकाण्डस्वोपज्ञवृत्तौ प्रथमकारिकायाम्।
४. तत्रैव, अम्बाकर्त्र्याम्।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

अत्रोच्यते—आनन्दमयशब्दस्य त्रयोऽप्यर्था भवन्ति—आनन्द-विकारः, आनन्दप्रचुरः, आनन्दरूपश्चेति। 'न[1] च प्राणमयादिषु विकारार्थत्वा-योगात्स्वार्थिको मयडिति युक्तम्' इति भामतीग्रन्थाक्षेपबलेन स्वार्थिकोऽपि प्रतीयते। वस्तुतस्तु ब्रह्मानन्दवल्ल्यां 'ब्रह्मविदाप्नोति परमिति'[2] श्रूयते, तस्यैतस्य वेदान्तवाक्यस्यैव वृत्तस्थानीयोऽयं परो ग्रन्थो दृश्यते 'स वा एष पुरुषोऽन्नरसमय'[3] इत्यादयः। निगदितमेतद् भगवत्पादेन[4]—

'सर्व एव वल्ल्यर्थो ब्रह्मविदाप्नोति परमिति ब्राह्मणवाक्येन सूत्रितः। स च सूत्रितोऽर्थः संक्षेपतो मन्त्रेण व्याख्यातः। पुनस्तस्यैव विस्तरेणार्थनिर्णयः कर्तव्य इत्युत्तरस्तद्वृत्तिस्थानीयो ग्रन्थ आरभ्यते तस्माद् वा एतस्मादित्यादि'। इति। एतस्मात् सर्वस्यास्य परब्रह्मबोधने महत्तात्पर्यमिति वेदितव्यं भवति। तत्र तत्र तत्तत्कोशद्वारेण तत्तन्मयसविशेषब्रह्मोपासनयाऽन्ते परं ब्रह्मैव निरूप्यते इत्यपि ज्ञातव्यं भवति। एकस्यैवात्मनस्तदुक्तरीत्या पञ्चविधत्वमाकर्ण्यते। 'तस्माद् वा एतस्माद् विज्ञानमयादन्योऽन्तर आत्मानन्दमयः'[5] इति वाक्येन कार्यात्मा प्रतिपादितो भवति। उक्तञ्चैतद् भाष्येऽस्या उपनिषदः—

'अन्नादिमया हि कार्यात्मानो भौतिका इहाधिकृताः। तदधिकारपति-तश्चायमानन्दमयः, मयट् चात्र विकारार्थे दृष्टो यथान्नमय इत्यत्र। तस्मात् कार्यात्मानन्दमयः प्रत्येतव्यः'[6]। इति निरूपणेनानेन आत्मासौ यो हि भाष्यकृतोच्यते स एवाष्टमेऽनुवाके सङ्क्रमणश्रुत्याऽपि बोध्यते। अत्र तु पञ्चविधकोशान्तर्गतानन्दमयो मयटा विकाराभिपन्नस्ततश्चाग्रे नित्यादिलक्षणोऽपि परमात्मानन्दमयशब्देन श्रूयते, तयोः का सङ्गतिरिति दशायां प्रोच्यते—एक एवात्मा सच्चिदानन्दस्वरूपोऽस्ति नान्यः, तत्रैव वेदान्तानां महत्तात्पर्यमिति दिक्। भवतु नाम तत्रात्मश्रुतितत्तन्मयेषु नैतेन भेदावसरः। ब्रह्मानन्दस्य निरतिशयत्वं प्रतिपादयन्त्या श्रुत्याऽपि 'स एको ब्रह्मण आनन्दः। श्रोत्रियस्य चाकामहतस्येति प्रकाश्यते'[7]।

---

१. भामती १.१.६.१२।

२.-३. तैत्तिरीयोपनिषत् २.१.१।

४. तत्रैव शाङ्करभाष्ये।

५-६. तत्रैव २.५.१।

७. तैत्तिरीयोपनिषत् २.८.४।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

अधुना आनन्दमयाधिकरणस्थविचारविषयमधिकृत्य आनन्दमयत्वं निगद्यते। अधिकरणेऽत्र प्रथमसूत्रेण आनन्दमयोऽभ्यासादित्यनेन, अभ्यासात् पदेन ब्रह्मण एव चितो भगवत्पादेनाभ्युपेयते आनन्दमयत्वम्। अत्र पूर्वपक्षस्तावद् विनियुज्यते तद्यथा इहानन्दमयो जीवोऽपि भवितुमर्हति आनन्दविकारविशिष्टतया। अन्नमयाद्यमुख्यप्रवाहपतितत्वादन्नमयादिवतानन्दमयस्यामुख्य एवात्मानन्दमयः। न च सर्वान्तरत्वश्रुत्या आनन्दमयो मुख्य एवात्मेति शङ्कायाम्, प्राचुर्यविकारसाधारणस्यापि मयटो विकारार्थतैव युज्यते सावयवत्वशारीरत्वप्रियादिसंस्पर्शित्वेभ्यो लिङ्गेभ्यः। तस्मादेतज्जीवोपासनविषयपरमेवेति पूर्वः पक्षः। उक्तमप्येतद् भगवता भाष्यकृता[१]—

'मुख्यश्चेदात्माऽऽनन्दमयः स्यान्न प्रियादिसंस्पर्शः स्यात्। इह तु तस्य प्रियमेव शिर इत्यादि श्रूयते' इति ग्रन्थभावार्थोऽपि संसारिणमेवाभिव्यनक्ति। निष्कलस्यात्मन प्रियाद्यवयवयोगः शारीरत्वञ्च केनापि प्रकारेण नोपयुज्यतेऽतः संसारी जीव एवानन्दमयाभिधेयो न ब्रह्मेति। अनेनोपहितमेवाद्रियते। नहि प्राचुर्यार्थस्वीकृतावेतद् ब्रह्मणि समुपपद्येत। भामतीकृतोक्तम्[२]—

'आनन्दप्राचुर्यं हि तद्विपरीतदुःखलवसम्भवे भवति, न तु तदत्यन्तासम्भवे। न च परमात्मनो मनागपि दुःखलवसम्भवः,. आनन्दैकरसत्वादिति' इत्यादिकं सर्वं निरस्यते भगवता भाष्यकृताऽभ्यासादिति सूत्रपदमनुसृत्य। परस्मिन्नात्मनि बहुकृत्वोऽभ्यस्यतेऽयमानन्दशब्द इति भाष्ये निरूपितमस्ति। तत्रेदमाशङ्क्यते यद् एकस्मिन्नेव वाक्ये केवलं दृश्यते 'एतमानन्दमयमात्मानमुपसङ्क्रामति' इति श्रुतौ आनन्दमयशब्दः। अन्यत्र तु 'एष ह्येवानन्दयति', 'आनन्दं ब्रह्मणो विद्वान् न विभेति कुतश्चनेति', 'आनन्दं ब्रह्मेति व्यजानात्', 'विज्ञानमानन्दं ब्रह्म' इत्यादिषु[३] आनन्दशब्दश्च। अथ च यानि हि वेदान्तवाक्यानि प्रदर्शितानि तेषु केवलं एकत्रैव मयडन्तस्य श्रुतिर्नान्यत्र इति कथनाभिप्रायः। अत्र भामतीकृतो वदन्ति[४]—

---

१. तैत्तिरीयोपनिषद्भाष्ये, भामत्याञ्च-ब्रह्मसूत्रस्य।

२. भामत्याम् १.१.६.१२।

३. तैत्तिरीयोपनिषत् २,५१, २.८,९, ३.६ बृ.उ. ३.९.२८।

४. भामत्याम् १.१.६.१२।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

'आनन्दमयावयवस्य तावद्ब्रह्मणः पुच्छस्याङ्गतया न प्राधान्यं, अपि त्वङ्गिन आनन्दमयस्यैव ब्रह्मणः प्राधान्यम्। तथा च तदधिकारे पठितमभ्यस्यमानमानन्दपदं तद्बुद्धिमाधत्त इति तस्यैवानन्दमयस्याभ्यास इति युक्तम्। ज्योतिष्टोमाधिकारे—वसन्ते वसन्ते ज्योतिषा इति ज्योतिष्पदमिव ज्योतिष्टोमाभ्यासः कालविशेषविधिपरः इति'।

अस्यायमभिप्रायः—आनन्दमयो ब्रह्म, अभ्यस्यमानत्वादित्यादि-प्रयोगस्थले सिद्धान्त्यभिमतानुमाने स्वरूपासिद्धिः प्रतीयते, यतो हि 'एष ह्येवानन्दयति' इत्यादिषु आनन्दशब्द एव अभ्यस्यमानो दृश्यते, नानन्दमय इति। तस्य प्रियमेव शिरः, मोदो दक्षिणः पक्षः, प्रमोद उत्तरः पक्षः, आनन्द आत्मा, ब्रह्मपुच्छम्'[१] इत्यादिसन्दर्भे आनन्दमयस्यैवाङ्गित्वं श्रूयतेऽतो भामतीकृद्वचनं समीचीनं प्रतिभाति। अत एव भाष्यकृता[२] 'आनन्दमयं प्रस्तुत्य' इत्यभाणि। भाष्यभावप्रकाशिकायामेतद्विषये ननु आनन्दशब्दस्याभ्यासे कथमानन्दमयस्य ब्रह्मत्वमित्याशङ्क्य ब्रह्मणि प्रयुक्तपूर्वस्यानन्दशब्द-स्यानन्दमये प्रकृते प्रयोगादिति व्याख्यातमस्ति।

आनन्दमयस्य सर्वान्तरत्वाद् अन्नमयाद्यमुख्यप्रवाहपतितत्वेऽपि मुख्यत्वमक्षुण्णमेव। प्रियाद्यवयवयोगाच्च दुःखलवयोगोऽपि परमात्मन औपाधिक एवेति भामतीरीत्योपपादितम्। 'विकारशब्दान्नेति चेत् न प्राचुर्यादिति'[३] सूत्रात् तस्य विकारविषयत्वं निषिध्यते। पुनश्च मयट्प्रत्ययेन प्राचुर्यार्थस्य ग्रहणं युक्तमिति भाष्ये निगदव्याख्यातम्। एवञ्च आनन्दप्रचुरं ब्रह्मानन्दमयः। ब्रह्मानन्दस्य निरतिशयत्वावधारणार्थमेव मनुष्यादीनामानन्दाभि-वर्णना। ब्रह्मण आनन्दहेतुत्वेनापि प्राचुर्यार्थः सिद्ध्यति। एष ह्येवानन्दयति इत्यत्रानन्दं ग्राहयति इत्यर्थो जायते। अत एव भगवता[४]—

यो ह्यन्यानानन्दयति स प्रचुरानन्द इति प्रसिद्धं भवति।

---

१. तैत्तिरीयोपनिषत् २.५।

२. भाष्यभावप्रकाशिका १.१.६.१२, सूत्रभाष्यटीकायाम्।

३. ब्रह्मसूत्रम् १.१.६.१३।

४. शारीरकभाष्यम् १.१.६.१४।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

यथा लोके योऽन्येषां धनिकत्वमापादयति स प्रचुरधन इति गम्यते तद्वद् इति प्रत्यपादि।

ततोऽग्रे मान्त्रवर्णिक मेव च गीयते सूत्रमभिलक्ष्यापि आत्मनो बोध्यते तन्मयत्वमिति भगवत्पादेनात्र मन्त्रब्राह्मणयोरेकार्थत्वं समर्थ्यते। ब्रह्मविदाप्नोति परमिति वाक्यप्रकाशितं परं ब्रह्म निर्विशेषाख्यमुपक्रम्य सत्यादिविशेषणत्रय-निर्धारितमेव प्रकृतत्वेन मन्तव्यं भवति यत आकाशादीनां समुत्पत्तिः श्रूयते। अथ च तदेव प्रवेशनश्रुत्या जीवभावमापन्नमिव दृश्यते तदेव दर्शयन्ति गुहान्तरत्वादिप्रतिपादकश्रुतयोऽपि, तस्यात्मप्रतिपत्त्यर्थमेवान्योऽन्तर आत्मेति वचनमाम्नायते तदेव प्रक्रान्तं वेदितव्यम्। अत एवाचार्या ब्रुवते शारीरके[१]—

तन्मान्त्रवर्णिकमेव ब्रह्म गीयते 'अन्योऽन्तर आत्मानन्दमयः, इति ब्रह्मव्यतिरिक्तस्य जीवस्य नेतरोऽनुपपत्तेति सूत्रान्निषिध्यते आनन्दमयत्वम्। श्रुतौ तमानन्दमयं प्रकृत्य[२] 'सोऽकामयत। बहु स्यां प्रजायेयेति। स तपोऽतप्यत। स तपस्तप्त्वा इदं सर्वमसृजत' इत्यादिवाक्यानि नाम्नातानि जीवविषयेऽपि तु ब्रह्मण्येव समन्वीयन्ते।

एवमेव 'भेदव्यपदेशाच्चेति'[३] सूत्रेण ब्रह्मण्येव रसश्रुतिरुपयुज्यते। रसं लब्ध्वाऽऽनन्दीभवति इति श्रुत्यानन्दमयाद् ब्रह्मणो जीवपार्थक्यमायाति। यतो जीवानन्दमययोर्भेदं व्यनक्ति श्रुतिः। अन्यो जीवो लब्धाऽन्यश्च परमात्मा लब्धव्यो दृश्यते तस्माद् भेदव्यपदेशाच्चापि जीवो नानन्दमय इति सिद्ध्यति। रीत्यानया श्रुतिस्मृतिसिद्ध आत्मलाभोऽपि कथमेवं सिद्धिमियादितिशङ्कायां तावदग्रे वाचस्पतिमिश्रमुनिनोच्यते[४]—

'यदि लब्धा न लब्धव्यः, कथं तर्हि परमात्मनो वस्तुतोऽभिन्ने जीवात्मना परमात्मा लभ्यत इत्यर्थः। सत्यम्, परमार्थतोऽभेदेऽप्यतिरोपितं भेदमुपाश्रित्य लब्धृलब्धव्यभाव उपपद्यते इति'। आनन्दमयाधिकारे कामयितृत्वनिर्देशाच्च

---

१. शारीरकभाष्यम् १.१.६.१५।

२. तैत्तिरीयोपनिषत् २.६।

३. ब्रह्मसूत्रम् १.१.६.१७।

४. भामती १.१.६.१७।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

सांख्यपरिकल्पितस्याचेतनस्यापि प्रधानस्यानन्दमयत्वं निराकृतं वेदितव्यमिति। एतच्च जीवप्रकृतिसाधारणमेव निराकरणमिति विशेषः। यत आनन्दमयत्वं केवलस्य निरुपाधिकस्य ब्रह्मण एवेति व्यवस्थापितं वर्तते वेदान्तसिद्धान्ते। ईशजीवयोरुभयोरपि सेवाधिकत्वेन कल्पित्वात् न कल्पितस्य जीवस्यानन्दमयत्वं वक्तुं शक्यते सिद्धान्तदिशा। ईश्वरोपाधिभूतमायायाः शुद्धसत्त्वप्राधान्येन कथञ्चित्तत्रानन्दमयत्वसम्भावनायामपि जीवे तु नास्ति कथञ्चिदपि आनन्दमयत्वं तदुपाधिभूतमायाया मलिनसत्त्वप्राधान्यसत्त्वात्। किन्तु ईश्वरस्याऽपि सोपाधिकत्वेन तस्य न मुख्यमानन्दमयत्वमित्यवधेयम्।

आनन्दमयाधिकरणस्यान्तिमे सूत्रे 'अस्मिन्नस्य च तद्योगं शास्ति'[१] इत्यत्रापि अस्मिन् आनन्दमये प्रकृते आत्मनि, अस्य प्रतिबुद्धस्य जीवस्य तदात्मना योगो नाम युक्तिरेव श्रुत्याऽऽपाद्यते। अत्र विकारार्थमाश्रित्यापि व्याख्यानमधिकरणस्थसूत्राणां कृतं विद्यते। तन्नेह विस्तरभयात् प्रतन्यत इति।

●

१. ब्रह्मसूत्रम् १.१.६.१८।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

अर्थ एव प्रधान इति कौटिल्यः

डॉ. हेतराम-कछवाहः
उपाचार्यः, प्राचीनराजशास्त्रार्थशास्त्रविभागस्य
सम्पूर्णानन्दसंस्कृतविश्वविद्यालये, वाराणस्याम्

❋❋❋

कोशशब्दः शकारान्तः षकारान्तश्च पुल्लिङ्गे नपुंसकलिङ्गे च प्रयुज्यते। स च 'कोषोऽस्त्री कुड्मले पात्रे पेश्यां शब्दादिसङ्ग्रहे। जातिकोशेऽर्थसंघाते दिव्ये खड्गपिधानके[१] इति मेदिनी-कोशप्रामाण्येन अमरकोशे उदधृतं कोशशब्द-व्युत्पत्तिश्च–'कुष्यति निष्क्रामत्यस्मात्स्वयमेव इति कोशः। 'कुष्'-धातोः अकर्तरि इति विवक्षायाम् 'अकर्तरि च'[२] सूत्रेण कोशशब्दः तालव्यशकारे मूर्धन्यषकारे च द्विधा प्रयुज्यते। एवं पुष्पकलिकासु खड्गस्य 'म्यान' इत्याख्ये पिधाने स्वकोषे राजकोशे वा दिव्यशपथभेदे च सर्वत्र विविधार्थेषु विवृतो दृश्यते।

किञ्च अपरत्र कोशशब्दः हिरण्ये रजते उभयोर्निर्मितायां मुद्रायाञ्च प्रयोगविशेषे दृश्यते। अत्र हिरण्यमयशब्देन अमुद्रात्मके सौवर्णे राजते वा पिण्डेऽपि व्यवहारो दृश्यते। तालव्यस्थकोशशब्दे 'कुश=संश्लेषणे' इति धातोः कुश्यते संश्लेष्यते धनम् (करः) अनेन इति कोश इति व्युत्पत्तिः। एवं कुश-कुषशब्दयोः धातुपाठे पृथक्-पृथग् धातुनिर्देशनेन राजकीयकरसंग्रहणे मन्ये तालव्यशकारान्त-कोश एव शब्दो ग्रहीतुं शक्यते, महर्षिपाणिनिधातुपाठनिर्देशात्।

अपरञ्च मूर्धन्यषकारान्तकोषशब्दस्य कुड्मले खड्गपिधाने अर्थोपसङ्ग्रहेऽपि मेदिनीकोष-अमरकोषादौ च प्रयोगे सत्यपि क्र्यादिधातुपाठे 'कुष निष्कर्षे' इति पाठाद् विश्वकोषप्रमाणेन[३] शपथे 'विश्वक्सेनेऽभ्रे कोषः विषादौ च' इत्यत्र कुष्धातोः षकारस्य शकारस्य वा ऊष्मवर्णत्वेन ऋषेः आर्षदृष्टौ षकारान्तस्य शकारान्तस्य

---

१. मेदिनीकोशः १६६/१०; २. अष्टाध्यायी ३/३/१९।

३. विश्वकोषः १७१/८।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

कोषकोशशब्दयोः अक्षरध्वनिभेदेन कोषेऽर्थे निष्पन्नत्वेऽपि विषादावपि कोषशब्दस्य भावोऽभिगम्यते। अतः केषाञ्चिदाचार्याणां मतेन कोषशब्दस्य विषार्थोऽपि ग्रहीतुं शक्यते। एवं बह्वर्थकः कोशशब्दः तत्र तत्र कोशग्रन्थेषु शास्त्रेषु च प्रयुक्तो दरीदृश्यते।

किञ्च सर्वग्राहके वाचस्पत्यमिति कोषे कोशशब्दः आधारादौ, कृताकृतयोः, हेमरुप्पयोः, कुड्मले, खड्गपिधाने, समूहे दिव्यभेदे; मूर्धन्यकोषशब्दः अभिधानरूपे शब्दपर्यायव्यापकग्रन्थे, धनाद्यागारे, पानपात्रे, चषके, हेमकोषप्रमाणेन शिम्बायां पनसादिमध्यस्थे (कोवा) इत्यर्थे, धरणीकोषप्रमाणेन पदार्थे यथा— 'नेत्रकोषः क्षीरस्वामिवचनेन', धनागारे 'निःशेषविश्राणितकोषजातम्' इति प्रयोगे यदा राजा रघुः विश्वजितयज्ञे स्वधनागारस्य स्वप्रतिज्ञानुसारेण समग्रस्य कोशस्य दाने कृते सति सर्वथा रिक्तहस्तः तिष्ठति, तदैव उपात्तविद्यः गुरुदक्षिणार्थी वरतन्तुशिष्यः कौत्सः राज्ञो रघोः समीपे आगत इति रघुवंशमहाकाव्यस्य पञ्चमसर्गे इत्थं महाकविकालिदासेन वर्णितम्—

तमध्वरे विश्वजितिक्षितीशं निःशेषविश्राणितकोषजातम्।
उपात्तविद्यो गुरुदक्षिणार्थी कौत्सः प्रपेदे वरतन्तुशिष्यः ॥[१]

एवं कुड्मले विकसमानपुष्पकलिकायां प्रयुक्तः कोशशब्दः महाकविकालिदासेनैव 'मामक्षिणोद् यत्र विभिन्नकोशैः', 'भिन्नादिगैरिकतटा इव दन्तकोशाः' इत्युभयत्र तालव्यशकारस्य यः प्रयोगः कृतः स अरुणदन्तपङ्क्तेरर्थे वर्तते। अतः कालिदासप्रयोगप्रामाण्याद् दन्तकोशेऽपि कोशशब्दः प्रयुक्तो दृश्यते। दुर्गासप्तशत्यां स्तवे पञ्चमाध्याये श्लोको—

शरीरकोशाद्यत्तस्याः पार्वत्या निःसृताम्बिका।
कौशिकीति समाख्याता ततो लोकेषु गीयते ॥[२]

अत्र कोशशब्दः शरीरकोशेऽपि प्रयुक्तः। अतः कोशः कोषश्च इत्युभौ शब्दौ तत्तच्छास्त्रेषु विविधार्थेषु प्रयुक्तौ दरीदृश्येते। एवमेव 'पङ्कजकोषः' रघुवंशे एव प्रयुक्तः। सुश्रुतसंहितायाञ्च 'कोशमङ्गुलिपर्वसु विदध्यात्' इति अङ्गुलिपर्वस्वपि

---

१. रघुवंशमहाकाव्यम् ५/२।
२. दुर्गासप्तशती, ५/८७।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

कोशशब्दो व्यवहृतः। श्रीमद्भागवतमहापुराणवचनेन 'यो वाप्ययं द्वीपः कुवलयकमलकोषाभ्यन्तरकोशः'[१] इत्यत्र कुवलयकमलकोषे पुनः कोश इत्युभयशकारषकारप्रयोगो जातः। एवं कोशशब्दो बह्वर्थे प्रयुक्तस्सन् शास्त्रसम्मतो दृश्यते। एष्वर्थेष्वेव राजशास्त्रे राजकोशार्थे कोश-कोष इत्युभौ शब्दौ शास्त्रकारसम्मतौ। विशेषतश्च राजकीयकोशे राजकोशे राष्ट्रियकोशे व तालव्यशकारान्तः प्रयोगः शास्त्रकारैः नेष्टः। अंतो राजकीयकोषे राजकोषे वा सर्वथा मूर्धन्यषकारान्त एव प्रयोक्तव्यः, न तालव्यशकारान्त इति विवेकः।

कोशस्य यन्महत्त्वं प्राचीनकाले आसीत्, तदद्यापि वर्तते। कोशं विना किमपि राज्यं नैव प्रभवति प्रगतिं कर्तुम्। राज्यस्यास्तित्वं विकासश्च कोशे एव निर्भरो भवति। आचार्यकौटिल्यस्य मतमस्ति यद् राज्यस्य सर्वेषां कार्याणामारम्भाः कोशाधारिता भवन्ति। अत एव राज्ञा सर्वप्रथमं कोषव्यवस्था कार्या।[२] धर्मपूर्वकमेव प्रजाभ्यो धनसंग्रहः कर्तव्यः। पर्याप्तरूपेण राष्ट्रियकोशे धनसंग्रहो विधातव्यः, येन विपत्तिकालेष्वपि दीर्घकालं यावद् आर्थिकदृष्ट्या राज्यकार्याणि निर्बाधं चलेयुः। लोके धर्मार्थकामस्वरूपस्य त्रिवर्गस्य मूलं कोश एवास्ति।[३] राज्यव्यवस्था सैनिकव्यवस्थादयश्च सर्वाः कोशाधारिता भवन्ति। कोशाभावे सैनिकाः शत्रोरधीना भवन्त्युत स्वस्वामिनमेव घ्नन्ति।

अर्थशास्त्रे अर्थप्रतिपादनप्रसङ्गे कथितमस्ति यत् "अर्थ एव प्रधान इति कौटिल्यः"।[४] आचार्यकौटिल्यः कथयति यत् सङ्कटकाले शान्तिकाले चोभयोः कालयोः राज्यस्य प्रजानाञ्च लाभार्थं कोशप्रयोगः करणीयः। इदमत्रावधेयं यत् स च कोशो धर्मार्जितः स्यात्, सः पूर्ववर्तिभी राजभिः प्राप्तः स्यादुत राज्ञा स्वयमधिगतः स्यात्। कोशः प्रधानतया सुवर्णरजतादिमुद्राभिर्विविधवर्णयुतैर्गुरुतमैः रत्नैश्च पूर्णो भवेत्। तन्मात्रा चात्यधिकरूपेण भवेत्, येन सुदीर्घकालपर्यन्तं

---

१. श्रीमद्भागवतमहापुराणम्, ५/१६/६।

२. "कोषपूर्वाः सर्वारम्भाः तस्मात् पूर्वं कोषमवेक्षेत। प्रचारसमृद्धिश्चरित्रानुग्रहश्चौरग्रहो युक्तप्रतिषेधः सस्यसम्पत् पण्यबाहुल्यमुपसर्गप्रमोक्षः परिहारक्षयो हिरण्योपायनमिति कोशवृद्धिः"। (कौटिलीयार्थशास्त्रम् २/८)

३. 'अर्थमूलौ हि धर्मकामाविति'। (कौटिलीयार्थशास्त्रम् १/६)

४. कौटिलीयार्थशास्त्रम् १/६।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

बाह्याक्रमणानां दुर्भिक्षादीनामन्यासामापदाञ्च प्रतीकारं कर्तुं शक्येत।[१] आचार्यकामन्दकानुसारं वार्ताविद्याभ्यन्तरे कृषिकार्यं, वाणिज्यं, पशुपालनञ्चायान्ति। एतान्येव कोशवृद्धिसाधनानि सन्ति। राजा न्यायपूर्वकं धर्मपूर्वकञ्च कोशार्जनं कृत्वा तद्रक्षणपुरस्सरं तद्वृद्ध्यर्थं तस्य सदुपयोगार्थञ्च यत्नं कुर्यात्।[२] कोशवैशिष्ट्यं प्रतिपादयताऽऽचार्यकामन्दकेनोक्तमस्ति यद् राज्यस्य स्वातन्त्र्यदायित्वं मूलरूपेण राज्ञो भवति, किन्तु राज्ञो रक्षा कोशद्वारैव भवति, अर्थात् सः कोशवृद्ध्या यावत् सम्पन्नो भविष्यति तावत् स्वराज्यस्य प्रजानाञ्च रक्षणं कर्तुं प्रभवति, यतो हि राज्यस्य सर्वाण्यन्यान्यङ्गानि कोश एवाश्रितानि भवन्ति। यदि राज्ये कोशस्य मूलवार्तायाः कृषिवाणिज्यपशुपालनानां विनाशो भवति चेत् कोशं विना किमपि राज्यं नहि जीवितुं शक्नोति। एवंविधं कोशविहीनं राज्यं श्वसनक्रियां कुर्वदपि मृतवद् भवति, यतो हि कोश एव राज्यस्य सर्वाधारभूतोऽस्ति।[३]

आचार्यभीष्मस्य कथनमस्ति यद् राजानो निरन्तरप्रयत्नपूर्वकं स्वकोशरक्षां कुर्युः। यतो हि कोश एव राज्यस्य राज्ञश्च मूलमस्ति। कोश एव तयोर्विकासं करोति।[४] राज्यस्या कोष्ठागारः सर्वदाधान्यपरिपूर्णः स्थापनीयः।[५] यद्धनं राज्यस्य सुरक्षाव्यवस्थाकार्येभ्योऽवशिष्टं भवेत्तदेव धर्मकर्मसु उपभोगेषु वा नियोक्तव्यम्।[६] धारणाशक्तिः चातुर्यं संयमः बुद्धिः शरीरं धैर्यं शौर्यं तथा च देशकाल-परिस्थित्यनुसारं व्यवहरणम् एतानि अष्टकोशवर्धनसाधनानि सन्ति, अर्थाद् धनरूपाग्निप्रज्ज्वलनायेन्धनस्वरूपाणि सन्ति। एकस्मात् लघुबीजात् सहस्रबीजानि

---

१. "धर्माधिगतः पूर्वैः स्वयं वा हेमरूप्यप्रायश्चित्तस्थूलरत्नहिरण्यो दीर्घामप्यापदमनायतिं सहेतेति कोशसम्पत्"। (कौटिलीयार्थशास्त्रम् १/६)

२. न्यायेनार्जनमर्थस्य. रक्षणं वर्धनं तथा।
सत्पात्रप्रतिपत्तिश्च राजवृत्तं चतुर्विधम्॥ (कामन्दकीयनीतिसारः, १/२०)

३. आयत्तं रक्षणं राज्ञि वार्ता रक्षणमाश्रिता।
वार्ताच्छेदे हि लोकोऽयं श्वसन्नपि न जीवति॥ (कामन्दकीयनीतिसारः, १/१२)

४. कोशश्च सततं रक्ष्यो यत्नमास्थाय राजभिः।
कोशमूला हि राजानः कोशो वृद्धिकरो भवेत्॥ (म.शा.प. ११९/१६)

५. कोष्ठागारं च ते नित्यं स्फीतैर्धान्यैः सुसंवृतम्।
सदास्तु सत्सु संन्यस्तं धनधान्यपरो भव॥ (म.शा.प. ११९/१७)

६. यद्धि गुप्तावशिष्टं स्यात् तद्धितं धर्मकामयोः।
संचयात्र विसर्गी स्याद् राजा शास्त्रविदात्मवान्॥ (म.शा.प. १२०/३५)

CC-0. Sampurnanand University Collection. Digitized by eGangotri

उत्पद्यन्ते। अतोऽल्पस्यापि धनस्य दुरुपयोगोऽनादरश्च न करणीयः।[१] दुष्टजनाद्धनमपहृत्य तस्य सदुपयोगं कुर्यात्।[२]

महाभारतस्य शान्तिपर्वण्युक्तं यदनावृष्टौ जलसङ्कटे च यथा जनो निर्जलस्थानं खनित्वा जलं निस्सारयति, तथा सङ्कटकाले राज्यस्य प्रजायाश्च कल्याणाय निर्धनजनेभ्योऽपि यथासाध्यं धनं गृहीत्वा राजा स्वकोशं संवर्द्धयेत्। सुसमये प्राप्तेन तद्धनेन प्रजा अनुग्रहणीयाः। पूर्वराजैरप्यापत्तिकाले इत्थमाचरणं विधाय संकटाद्राज्यं प्रजाश्च समुद्धारिताः।[३] राज्यरक्षामूलं सेना कोशश्च विद्यते, तत्रापि कोश एव सेनामूलम्।[४] सन्दर्भेऽस्मिन् भारतभावदीपाख्यटीकाकारेणापि महाभारते कथितम्—

"राज्ञो मूलं दीर्घकारणं कोशो बलं च तत्रापि कोशो बलस्य मूलं तद्बलं धर्माणां मूलं धर्मश्च प्रजानां मूलम्। अतः सर्वस्य मूलभूतं कोशं वर्धयेत्।"[५]

अतः आपत्तिकाले प्रजां सम्पीड्यापि राजा दोषभाङ् न भवति।[६] यतो हि सङ्कटकाले आर्थिकदृष्ट्या प्रजापीडनमर्थसंग्रहरूपप्रयोजनसाधकतया अर्थकारकं

---

१. धृतिर्दाक्ष्यं संयमो बुद्धिरात्मा
धैर्यं शौर्यं देशकालाप्रमादः।
अल्पस्य वा बहूनां वा विवृद्धौ
धनस्यैतान्यष्ट समिन्धनानि॥
अग्निः स्तोको वर्धतेऽप्याज्यसिक्तो
बीजं चैकं रोहसहस्रमेति।
आयव्ययौ विपुलौ संनिशाम्य
तस्मादल्पं नावमन्येत वित्तम्॥ (म.शा.प. १२०/३७.३८)

२. असाधुभ्योऽर्थमादाय साधुभ्यो यः प्रयच्छति।
आत्मानं संक्रमं कृत्वा कृत्स्नधर्मवदेव सः। (म.शा.प. १३६/७)

३. कोशं च जनयेद् राजा निर्जलेभ्यो यथा जलम्।
कालं प्राप्यानुगृहणीयादेष धर्मः सनातनः। (म.शा.प. १३०/१३)

४. राज्ञः कोशबलं मूलं कोशमूलं पुनर्बलम्।
तन्मूलं सर्वधर्माणां धर्ममूलाः पुनः प्रजाः॥ (म.शा.प. १३०/३५)

५. म.शा.प. १३०/३५ इत्यत्र भारतभावदीपाख्यटीकायाम्।

६. नान्यानपीडयित्वेह कोशः शक्यः कुतो बलम्।
तदर्थं पीडयित्वा च दोषं प्राप्तुं न सोऽर्हति॥ (म.शा.प. १३०/३६)

CC-0. Sampurnanand University Collection. Digitized by eGangotri

जायते।[१] यथा याज्ञे कर्मण्यकरणीयमपि किञ्चित्कर्मानुष्ठीयते, तत्कर्म सदोषं न मन्यते, तथैवापत्तौ प्रजापीडनेन राजा दोषयुक्तो न भवति।[२] विपत्तिकाले प्रजायाः राज्यस्य च रक्षणाय कोशसंग्रहरूपकार्यं ये बाधन्ते, राजा तेभ्यो मृत्युदण्डमपि दातुं शक्नोति,[३] यतो हि राज्यप्रजासंरक्षणातिरिक्तः कश्चनाऽपरो राजधर्मो न विद्यते।[४]

यस्य राज्ञ पार्श्वे पर्याप्तकोशो भवति, सः सर्वस्मादपि सङ्कटात् पारमधिगच्छति।[५] कोशेनैव राज्यमूलं सुदृढं जायते।[६] निर्बलेन राज्ञा कोशो न प्राप्यते। कोशहीनस्य पार्श्वे सैन्यबलं स्थातुं न शक्नोति। अतः कोश एव राज्यस्य सर्वस्वभूतं तत्त्वम्।[७] कोशे नष्टे सति राजबलं विनश्यति।[८] यस्य राज्ञः पार्श्वे कोशस्य धनस्य वा अभावो भवति, साधारणजनैरपि स उपेक्ष्यते।[९]

कोशस्य महत्त्वं प्रतिपादयता महर्षिणा व्यासेन महाभारते उक्तं यदप्राप्तप्रापणम्, प्राप्तवस्तुसंरक्षणम्, तदसंवर्द्धनम्, कार्यम् संवर्द्धितस्य स्तुनः

---

१. अर्थार्थमन्यद् भवति विपरीतमथापरम्।
अनर्थार्थमथाप्यन्यत् तत् सर्वं ह्यर्थकारणम्॥
एवं बुद्ध्या सम्प्रपश्येन्मेधावी कार्यनिश्चयम्॥ (म.शा.प. १३०/३८)

२. अकार्यमपि यज्ञार्थं क्रियते यज्ञकर्मसु।
एतस्मात् कारणाद् राजा न दोषं प्राप्तुमर्हति॥ (म.शा.प. १३०/३७)

३. एवं कोशस्य महतो ये नराः परिपन्थिनः।
तानहत्वा न पश्यामि सिद्धिमत्र परन्तप॥ (म.शा.प. १३०/४२)

४. न च राज्यसमो धर्मः कश्चिदस्ति परन्तप।
शब्दः संशब्दितो राज्ञामापदर्थमतोऽन्यथा॥ (म.शा.प. १३०/४७)

५. अधनं दुर्बलं प्राहुर्धनेन बलवान् भवेत्।
सर्वं धनवता प्राप्यं सर्वं तरति कोशवान्॥ (म.शा.प. १३०/४९)

६. स्वराष्ट्राद् परपराष्ट्राच्च कोशं संजनयेन्नृपः।
कोशाद्धि धर्मः कौन्तेय राज्यमूलं च वर्धते॥ (म.शा.प. १३३/१)

७. अबलस्य कुतः कोशो ह्यकोशस्य कुतो बलम्।
अबलस्य कुतो राज्यमराज्ञः श्रीर्भवेत् कुतः॥ (म.शा.प. १३३/४)

८. अशङ्कमानो वचनमनसूयुरिदं शृणु।
राज्ञः कोशक्षयादेव जायते बलसंक्षयः॥ (म.शा.प. १३०/१२)

९. हीनकोशं हि राजानमवजानन्ति मानवाः।
न चास्याल्पेन तुष्यन्ति कार्यमप्युत्सहन्ति च॥ (म.शा.प. १३३/६)

CC-0. Sampurnanand University Collection. Digitized by eGangotri

यथायोग्यं सुपात्रेभ्यो यथाविधिदानेन धनस्य सदुपयोगो भवति।[१] धर्माय धनत्यागो हि द्वितीयोपयोगः, कामभोगार्थं तद्व्ययः तृतीयः, सङ्कटं निवारयितुं तद्व्ययः चतुर्थः सदुपयोगः।[२] धनेन मनुष्य इहलोके परलोके च विजयते, सत्यं धर्मञ्च सम्पादयतीति।[३] कोशसञ्चयेनैव लोकपरलोकेषु सिद्धिमधिगच्छति। प्रायः धर्मोपायेनैव राज्ञा धनप्राप्तिकामना करणीया।[४] राजा कोशसंग्रहं कुर्यात्, कोशं सङ्गृह्य सादरं तं रक्षेत्, तद्रक्षाञ्च विधाय संवर्द्धयेत्। राज्ञोऽयमेव सदा कोशसम्बन्धिधर्मः।[५]

एवं हि भारतीयराजशास्त्राचार्यैः कोशं राज्यस्य महत्त्वपूर्णमङ्गं मत्वा अनेकोपायैः कोशसङ्ग्रहसम्बन्धिविचारः प्रतिपादितः। कोशस्य सङ्ग्रहः अर्थे समायाति। आचार्यचाणक्येन स्वकीयस्य ग्रन्थस्य नाम अर्थशास्त्रम् इति विहितम्। तत्र अर्थशब्दो धर्मार्थकामप्रधाने त्रिवर्गे समायाति। अत्र अर्थशब्दार्थः चलाचलसम्पत्तिरिति वर्तते। त्रिवर्गे योऽर्थशब्दस्तत्र अर्थ एव प्रधान इति कौटिल्यमतम्। अत्र धर्मादिषु प्राधान्यनिर्णयं कुर्वता चाणक्येन इत्थमुक्तम्—"धर्मार्थाविरोधेन कामं सेवेत, न निस्सुखः स्यात्। समं वा त्रिवर्गमन्योन्यानुबन्धम्। एको ह्यत्यासेवितो धर्मार्थकामानाम् आत्मानमितरौ च पीडयति।[६] अर्थ एव प्रधान इति कौटिल्यः—अर्थमूलौ हि धर्मकामाविति।'

अस्यार्थः श्रीमूलायां त्रिधा कृतः—कामं धर्मार्थयोः अविरोधेन सेवेत इत्येकः पक्षः। परस्परपूरकतया सेवेत इति द्वितीयः पक्षः। एकः पुरुषार्थः आचरितः आत्मानमितरौ च अर्थ एव प्रधान इति कौटिल्यमतम्, यतः विना अर्थं न

---

१. अलब्धलाभो लब्धस्य तथैव च विवर्धनम्।
प्रदानं च विवृद्धस्य पात्रेभ्यो विधिवत्ततः॥ (म.शा.प. ५९/५७)

२. विसर्गोऽर्थस्य धर्मार्थं कामहैतुकमुच्यते।
चतुर्थं व्यसनाघाते तथैवात्रानुवर्णितम्॥ (म.शा.प. ५९/५८)

३. धनेन जायते लोकावुभौ परमिमं तथा।
सत्यं च धर्मवचनं यथा नास्त्यधनस्तथा॥ (म.शा.प. १३०/४३)

४. कोशेन धर्मः कामश्च परलोकस्तथा ह्ययम्।
तं च धर्मेण लिप्सेत नाधर्मेण कदाचन॥ (म.शा.प. १३०/५०)

५. तस्मात् संजनयेत् कोशं सत्कृत्य परिपालयेत्।
परिपाल्यानुतनुयादेष धर्मः सनातनः॥ (म.शा.प. १३३/२)

६. कौटिलीयार्थशास्त्रम् १/६।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

धर्मानुष्ठानं न वा कामोपभोगः। तदेवाह—'धर्मार्थाविरोधेन धर्मार्थयोरेकबाधेन कामं तृतीयपुरुषार्थम्। वेति पक्षान्तरे। तच्च अन्योन्यानुबन्धं त्रिवर्गं समं सेवेतेति। परस्परसंसृष्टान् धर्मार्थकामास्तुल्यमात्रया सेवेतेत्यर्थः। सममसेवने को दोषस्तत्राह धर्मार्थकामानां मध्ये एकः अन्यतमः अत्यासेवितः अतिमात्रं व्यसनितया सेवितः सन् इतरौ अर्थकामौ धर्मकामौ धर्मार्थौ वा पीडयति हि। धर्मादीनां समप्राधान्यमरोचमानः कौटिल्य आह– अर्थ एव प्रधान इति कौटिल्यः। एवकारेण धर्मकामयोरप्राधान्यमुक्तम्। तत्र हेतुरुच्यते– अर्थमूलौ हि धर्मकामाविति। अर्थमूलौ=अर्थसाध्यौ।

अत्र जयमङ्गला—"स्वदारेष्वपि कामसेवायां विधिमाह—धर्मार्थाविरोधेनेति। ऋतावुपेयात् सर्वतः सर्वत्र वा प्रतिषेधवर्जमिति धर्माविरोधः। कामौपयिकवस्तुमात्रसम्पादनादर्थाविरोधः। यद्येवन्धर्मार्थाविव सेव्यौ प्रधानत्वात्, न काम इत्यत्राह न निस्सुखः स्यादिति। अवश्यमविरोधेन सेव्यम्। तस्य धर्मार्थयोः फलभूतत्वात्। पितृक्रियाङ्गत्वाद्धर्मार्थम्, अन्वयादिना चार्थार्थम्। तस्मादविरोधेन कालं विभज्य मात्रया सेव्यते। तथा चाह गौतमः—

"न पूर्वाह्णमध्यन्दिनापराह्णानफलान् कुर्यात्। यथाशक्तिधर्मार्थकामेभ्यः।'[१] समं वा त्रिवर्गं सेवेत। नैकमतिशयेनेत्यर्थः, न केवलं समम्,. अन्योन्यानुबन्धम्। यस्मिन् सेव्यमानेऽन्योऽप्यनुबध्यते। तत्र धर्मोऽर्थेन कामेनोभयेन वेति अर्थकामानुबन्धः। अर्थो धर्मेण कामेनोभयेन वेति धर्मर्मकामानुबन्धः। कामो धर्मेणार्थेनोभयेन वेति धर्मार्थानुबन्ध इति। एकस्यातिसेवायां दोषमाह—एको हीत्यादि। धर्मादीनां मध्ये एकोऽत्यन्तसेवितः। आत्मानमितरौ च पीडयति। तद्यथा—अतिदानेन धर्मोऽर्थं पीडयित्वा धर्मान्तरं च पीडयति। तपश्चात्यन्तं सेवितं कामं बाधित्वा शरीरक्षयाद् धर्मार्थौ बाधते। अर्थोऽपि तादात्विकोऽस्ति य उपादीयमानो धर्मकामौ बाधित्वार्थमपि बाधते। कामोऽत्यासेव्यमानः शरीरक्षयादात्मानं पीडयति। असमुत्थानादर्थम्। अर्थाभावाद्धर्मम्। तस्मात् समं सेवेत।

तत्रापि शरीरान्तरोपात्तधर्ममूलत्वेऽप्यर्थकामयोः वर्तमानव्यापारापेक्षत्वादुपदेशमाह—अर्थमूलाविति। यस्माद् राज्ञो धर्मकामावर्थमूलौ, अर्थमुपजृम्भयतो द्वावप्यविरोधेन भवतः। तस्मादन्योन्यानुबन्धित्वेन अर्थस्य विशेषः। इत्थं महानयज्ञेन

---

१. धर्मसूत्रम्, ९/४।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

चाणक्येन राजनीतिशास्त्रमिति स्थाने अर्थशास्त्रमिति पदेन व्यवहृतम्। अतो राजनीतेर्भावः अर्थशास्त्रमपि। अत्र राजशास्त्रार्थे अर्थपदं चतुर्विधपुरुषार्थेषु अन्यतमपुरुषार्थपरमस्ति, यथा विद्याप्रकर्षे सूक्तिरियम्—

विद्या ददाति विनयं विनयाद् याति पात्रताम्।
पात्रत्वाद्धनमाप्नोति धनाद्धर्मस्ततस्सुखम्॥ इति।

अत्र विनयादीनां कारणं विद्या इति कथितम्, परं विद्यया पात्रत्वे सति धनस्य (अर्थस्य) प्राप्तिर्भवति।

आचार्यचाणक्यप्रभृतयः सर्वे प्राक्तना राजशास्त्रवेत्तारः कथितवन्तो यद् राज्यसञ्चालनाय राज्ञे अर्थस्य (कोषस्य) भवति किलावश्यकता। अर्थसमृद्धे राष्ट्रे युक्तविनिमयेन राज्यं पूर्णगौरवमाधत्ते। एतेनैव वाल्मीकीयरामायणे महर्षिवाल्मीकिना प्रतिपादितं यद् यदा हि रामो वनवासान्निवृत्तः पुनरयोध्यायामागतस्तदा महात्मा भरतः पित्रा दशरथेन यावद्वैभवैः यावता चभूभागेन सहिता मही ततश्चतुर्गुणां वृद्धिं विधाय रामाय राज्यं ददौ—

यावदावर्तते चक्रं यावती च वसुन्धरा।
तावत् त्वमिह लोकस्य स्वामित्वमनुवर्तय॥[१]

अत्र श्लोके दशरथेन शासितस्य राष्ट्रस्य चतुर्गुणं वृद्धिं विधाय चतुर्गुणितं कोषं वर्धयित्वा भरतेन रामाय राज्यं प्रदत्तम्। अत्र प्रकरणे वाल्मीकीयटीकाकारा भरतेन वर्धितस्य चतुर्गुणकोषस्य बहुमाहात्म्यं वर्णयन्ति। एतेन प्रतीयते यद्राज्ञां कृते कोषस्य महन्महत्त्वं वरीवर्ति। व्यवहारेऽपि अर्थराहित्ये किमपि कार्यं साधयितुं न शक्यते। तदा का कथा राज्यसञ्चालनस्य। एतत् सर्वं विमृश्य महानीतिकारेण चाणक्येन राजशास्त्रस्याभिधानम् अर्थशास्त्रमिति विहितम्। तथा हि 'अर्थ एव प्रधानः' इति। एतदर्थं पूर्वं विद्याप्राशस्त्ये 'विद्या ददाति विनयम्' इत्यादि-वचनमुद्धृतम्। आचार्यचाणक्यः स्वग्रन्थे धर्मादिषु प्राधान्यनिर्णय इति प्रकरणे वचनमेतत् प्रतिपादितवान् यद् 'अर्थ एव प्रधानः' इति। एतेन सुतरां सिद्ध्यति यद्राज्ञा प्रजाभिश्च सममेव धर्मार्थकामाः सेवनीयाः।

सर्वत्र भारते चतुर्वर्ग-चतुराश्रम-चतुःपुरुषार्थानां समानमेव सेवनं प्राक्तनकालादेव प्रतिष्ठितं विद्यते। एवं सति समानरूपेण चतुःपुरुषार्थानामुपदेशः सर्वत्र विद्यते, तथाऽपि आचार्यविष्णुगुप्तेन केन कारणेन सर्वानतिरिच्य अर्थ एवं

---

१. वाल्मीकीयरामायणम्, १२८/११।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

प्रधानः कथितः इति विचारणीयोऽयं विषयो राजशास्त्रे उपात्तो भवति। धर्म एव प्रधान इति वचनेन धर्माविरोधी अर्थः, अर्थाविरोधी कामश्च सेवनीयः। त्रिष्वप्यसामञ्जस्ये जाते समग्रा सामाजिकी व्यवस्था व्यवच्छिन्ना भवति। अतो धर्माविरोधी अर्थः, अर्थाविरोधी काम इति त्रयः सेवनीयाः। परन्तु आचार्येण अर्थमूलौ हि धर्मार्थकामौ इति कथनेन राजशास्त्रे अर्थस्य (कोषस्य) विशेषमहत्त्वं प्रतीयते। अर्थमूल इति कथने आचार्यस्य को भाव इत्यधिकृत्य विचारे कृते सतीदमेव प्रतीयते यद् अर्थमूलावेव धर्मकामौ इत्यर्थसाध्यावेव। यतो हि अर्थं विना न कामसिद्धिः, न च धर्मसिद्धिः। धर्मार्जने दान-तीर्थाटन-वापी-कुल्या-गोशाला-धर्मशालादिकार्याणि समायान्ति। एतानि सर्वाण्येव अर्थमूलानि। एवं यदि अर्थो न स्यात्तर्हि अभीष्टकामोऽपि न सिद्ध्येत। मन्ये, अनेनैव कारणेन त्रिकालदर्शी आचार्यश्चाणक्यः स्वशास्त्रे 'अर्थ एव प्रधानः' इति कथितवान्। अत्र 'एव' इति पदेन धर्मकामयोरप्राधान्यं प्रतिपादितम्। किञ्च राजसञ्चालने सर्वत्र सुखसमृद्धि-प्रस्थापने अर्थ (कोष) एवादौ आवश्यकः। अन्यदपि नीतावुक्तम्—

किं वाससेत्थं न विचारणीयं वासः प्रधानं खलु योग्यतायाः।
पीताम्बरं वीक्ष्य ददौ स्वकन्यां दिगम्बरं वीक्ष्य विषं समुद्रः ॥

अत्र सर्वसमर्थेऽपि शिवे उदासीनत्वेन निरपेक्षत्वेन च समुद्रो देवाश्च तं गरलं ददुः। परं सापेक्षः विष्णुः परमशोभाढ्यैः अलङ्करणैः सुसज्जितः सन् लक्ष्मीभाग् अभूत्। अतो लोकेऽपि भौतिकवैभवस्य माहात्म्यं महत्त्वञ्च सर्वातिशायि वर्तते। मन्ये आचार्यचाणक्य एतेन सिद्धान्तेनाभिभूतस्सन् 'अर्थ एव प्रधानः' इत्युक्तवान्।

कामस्योपभोगः सुन्दरीभिः रमणीभिर्भवति, परमत्र विधिरस्ति यत् स्वच्छन्देन कस्यापि रमणीभिः कामोपभोगो न युक्तः, विधिना परिणीताभिः आनखशिखमलङ्कारादिभिरलङ्कृताभिरेव युक्त इति। एवमेव गोमूत्रं पवित्रं मूत्रत्वात् स्वमूत्रवदिति व्याप्त्या न स्वमूत्रमन्यमूत्रं वा ग्राह्यं गोमूत्र एव विधिसत्त्वात्। एवमेव जीवनेऽर्थस्य प्रधानत्वेन धर्मकामयोः सिद्धिर्भवति, तदर्थं धर्मपूर्वकार्थव्यय एव युक्तः। एवं राजसञ्चालने प्रभूतार्थस्यावश्यकता सम्पद्यते, परं तस्य नियोगेः धर्मेण धर्मे कामे च राज्ञा कर्तव्य इति आचार्यकौटिल्यस्य हार्दिको भावः। एतेनैव त्रिवर्गः परस्परमन्योन्यानुबन्धपूर्वक एव सेवितव्य इति सर्वो भावो जयमङ्गलाटीकादिषु

CC-0. Sampurnanand University Collection. Digitized by eGangotri

विवृतः। उपाध्यायनिरपेक्षायामपि सर्वथा विषयसेवानिषेधे प्राप्ते चैवं नियमः 'अर्थ एव प्रधानः' इत्युक्तम्। एवमेव महर्षिणा वात्स्यायेन कामसूत्रेऽपि उक्तम्— 'श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणानामात्मसंयुक्तेन मनसाधिष्ठितानां स्वेषु स्वेषु विषयेष्वानुकूल्यतः प्रवृत्तिः कामः'।[1]

किञ्च उपाध्यायनिरपेक्षाटीकाकारोऽग्रे विचारेऽपि सङ्केतयति यज्जीवनाय समुचित आहार आवश्यकः, परमाधिक्ये सन् रोगाय कल्प्यते। अत एवाहार आवश्यकः सन्नपि नाधिकः, न च न्यूनस्तथैव सर्वे विषया यथायोग्यं सेवनीयाः। एवमुपचितेऽप्यर्थे नाधिको न च न्यून इति तथैव नियमः।

राज्ञां मुख्यं कार्यं प्रजानां पालन-पोषण-रञ्जन-रक्षणादिकं प्राधान्येन। यतो हि राज्ञि धनधान्यसमृद्धे राष्ट्रे प्रजानां समुचितं रक्षणं संवर्धनञ्च सम्भवति। धनधान्यशक्तिसम्पन्ने राष्ट्रे आक्रान्ता शत्रुः राष्ट्रापकाराय नोत्सहते। एतेन राष्ट्रस्य समृद्धयेऽभ्युदये च तन्मूले कोषस्य महती आवश्यकता भवति। यस्य कस्यापि राष्ट्रस्य यावती सुदृढा सुव्यवस्थिता चार्थव्यवस्या सेत्स्यति तावती एव तस्य शक्तिसम्पन्नताऽपि भविष्यति। यथा रघुवंशे उक्तम्—

प्रजानां विनयाधानाद्रक्षणाद्भरणादपि ।
स्वपिता पितरस्तासां केवलं जन्महेतवः ।।इति।

राष्ट्रस्य प्रजानाञ्च संरक्षणाद् वस्तुतो दिलीप एव प्रजानां पिता इव बभूव। प्रजानां पितरस्तु केवलं जन्मकारणमेवासन्। इत्थं समुचितं राष्ट्रस्य प्रजायाः पालनेन च राजानं प्रजापतिरिव सम्मानयति प्रजाः। तथा चैतादृशस्य राज्ञो राज्यस्य वा सुखदुःखेषु प्राणपणेन साहाय्यं विदधाति।[2]

एवञ्च सर्वथा आर्थिकदृष्ट्या समृद्धस्य राष्ट्रस्य सेनापि शक्तिसम्पन्ना भवति, राष्ट्रञ्चान्तर्बहिर्दृष्ट्या सुदृढं सुरक्षितञ्च जायते। एवं सुदृढे राष्ट्रे शास्त्राण्यपि सुदृढानि वर्धितानि च भवन्ति। उक्तञ्च—

शस्त्रेण रक्षिते राष्ट्रे शास्त्रचिन्ता प्रवर्तते।

---

१. कामसूत्रम्, ११/१२।
२. धर्मिकं पालनपरं सम्यक् परपुरञ्जयम्।
राजानमभिमन्यन्ते प्रजापतिमिव प्रजाः ।। (कामन्दकीयनीतिसारः, १/११)

CC-0. Sampurnanand University Collection. Digitized by eGangotri

प्राचीनराजशास्त्रार्थशास्त्रदृष्ट्या विद्या चतुर्धा निगदिता-आन्वीक्षिकी, त्रयी, वार्ता, दण्डनीतिश्च। तत्र त्रिवर्गप्राप्तिमूले वार्ता-विद्या अर्थात् 'कोष' एव समायाति। तथा चात्र वार्ताविद्यायां कृषिः पशुपालनं व्यापारश्चान्तर्गता भवन्ति। इयमेव विद्या धान्य-पशु-हिरण्य-वज्र-मणि-माणिक्य-गोमेद-मौक्तिक-नीलम-प्रवाल-वैदूर्य-पुष्पराग-रजत-ताम्रादिखनिजपदार्थानां व्याख्याविधायिका परमोपकारिणी चास्ति। एतत्कारणेन कोषेन सेनाबलेन च स्वपक्षं परपक्षञ्च स्ववशे आनयति राजा।[१]

पुरा हि वैदिककाले भारतवर्षे आयस्य मुख्यं साधनं कृषिः पशुपालनञ्चासीत्।[२] मन्त्रेषु यासां पञ्चभूनाम् (पञ्चक्षितीनाम्) उल्लेखो जातः, ताश्च भूमयः पञ्चनदीनाम्— गङ्गा-यमुना-सरस्वती-शतद्र्वादीनाम्—समीपस्था ये देशा भूमय वा आसन् ता एव कृषेराधिक्येन पञ्चनददेशः, आहोस्वित् पञ्चाम्बुप्रदेश रूपेण सन्ति इत्यैतिह्यं दृश्यते। अद्यापि पञ्चाम्बु-(पंजाब) सहितास्तत्तत् प्रदेशा विस्तृतभूभागाश्च वर्णिताः, यासु नदीषु तटवर्तिनो देशास्त एव वस्तुतः कृषिप्रधानाः समग्रभारतवर्षस्यान्नदाने समर्थाश्च दरीदृश्यन्ते। किञ्च तद्देशीया एकश्रेणिका एव जातयः क्रमशः पञ्चनदीतटवर्तिपञ्चजातीषु विभक्ता अभूवन्, त एव पञ्चजनपदेन ऋग्वेदे उल्लिखिताः, यासां मुख्याजीविका कृषिरेवासीत्।[३] एतत् सन्दर्भ एव तन्नदीतटस्थभूमिः (पञ्चपृथिवीवी) इति पदेन ऋग्वेदे बहुतम् प्रतिपादिशः।[४]

राज्यसञ्चालनव्यवस्था सर्वथा कोषेऽर्थे वा निर्भरा जायते। अत एव राजशास्त्रदृष्ट्या राज्ञा प्रथमं कोषसङ्ग्रह एव कर्तव्यः। अश्वाध्यक्ष–गजाध्यक्ष-सीताध्यक्ष-आकराध्यक्ष-कोष्ठागाराध्यक्ष-पण्याध्यक्ष-कुप्याध्यक्ष-आयुधागाराध्यक्ष-शुल्काध्यक्ष-सूत्राध्यक्ष-सूनाध्यक्ष-नावध्यक्ष-रक्षाध्यक्ष-मुद्राध्यक्ष-विवीताध्यक्षादिसर्वे अध्यक्षाः स्वस्वविभागमाध्यमेन उचितदृष्ट्या राजकोषसमृद्ध्यर्थं रक्षार्थञ्च कर्म कुर्युः।[५] आचार्येण कामन्दकेनाभिमतमिदम्—

---

१. कौटिलीयार्थशास्त्रम् १/३।

२. ऋग्वेदः ५/७९/१२९/२, ६/४६/७।

३. ऋग्वेदः ६/११/४, ६/५१/११, ७/३२/३२, ९/६५/३२।

४. ऋग्वेदः २/२/१०, ४/३८/१०/२।

५. बह्वादानोऽल्पनिःस्रावः ख्यातः पूजितदैवतः। ईप्सितद्रव्यसम्पूर्णो हृद्यः स्वाप्तैरधिष्ठितः॥
मुक्ताकनकरत्नाढ्यः पितृपैतामहोचितः। धर्मार्जितो व्ययसहः कोशः कोशज्ञसम्मतः॥
धर्महेतोस्तथार्थाय भृत्यानां भरणाय च। आपदर्थं च संरक्ष्यः कोशः कोशवता सदा॥
(कामन्दकीयनीतिसारः ४/६०-६२)

CC-0. Sampurnanand University Collection. Digitized by eGangotri

पाशुपाल्यं कृषिः पण्यं वार्ता वार्ता तु जीवनम्।
सम्पन्नो वार्तया साधु नावृत्तेर्भयमृच्छति ॥[१]

प्रसङ्गेऽस्मिन् उपाध्यायनिरपेक्षाटीकाकारेणोक्तम्—"पाशुपाल्यमिति, पशवो हस्त्यश्वगोमहिष्यादयः। तान् पालयन्तीति पशुपालाः, हस्तिशिक्षाशालिहोत्रादिविदः। तेषां शास्त्रमनुष्ठानं च पाशुपाल्यं कृषिरिति, कर्षणं तत्प्रतिपादकं पराशरादिप्रोक्तं शास्त्रमनुष्ठानं च। पण्यमिति, पणं व्यवहारं क्रयविक्रयलक्षणमर्हतीति पण्यम्, पण्यशब्देन वाणिज्यमुच्यते। एतत् त्रयमेव जगद्वृत्तिहेतुत्वादिह जगति वर्तनात् 'वार्ता' इत्यभिधीयते। तया सम्पन्नो वार्तया विजिगीषुः साधुयथा भवति तथा, अवृत्तेरवर्तनाद् भयं न ऋच्छति न प्राप्नोति।[२]

सैन्यशक्तिसंवर्धनार्थं प्रजापालनार्थं रक्षणार्थं यज्ञादिधर्मानुष्ठानर्थञ्च राजकोषः सङ्ग्रहणीयः, यतो हि राजकोषो राज्ञः कृते परत्रेह च सुखदो भवति। विजिगीषूः राजा अधर्मशीलराज्ञः शत्रुराज्ञश्च भेदनीत्या दण्डनीत्या वा सर्वधनमपहृत्य स्वकीयं राजकोषं संवर्द्धयेत्। राजकोषः पूर्णतः समृद्धः सम्पन्नश्च भवेत् येन विंशतिवर्षपर्यन्तं प्रजापालनं, राष्ट्रसंरक्षणं, सैन्यशक्तिसंवर्द्धनञ्च भवेत्। वस्तुतो राष्ट्रशक्तिसमृद्धेः सैन्यबलसमृद्धेश्च मूलाधारः कोष एव भवति। कोषेनैव सैन्यशक्तौ समृद्धिर्भवति, सैन्यशक्त्या कोषसञ्चयः, कोषसञ्चयेन राष्ट्रसमृद्धिः, राष्ट्रसमृद्ध्या चारिक्षयो भवति।[३]

---

१. कामन्दकीयनीतिसारः २/१४।

२. कामन्दकीयनीतिसारः, उपाध्यायनिरपेक्षाटीका २/१४।

३. बलप्रजारक्षणार्थं, यज्ञार्थं कोशसङ्ग्रहः।
परत्रेह च सुखदो नृपस्यान्यश्च दुःखदः ॥
अधर्मशीलात् नृपतिः सर्वशः संहरेद्धनम्।
छलाद् बलाद् वस्तुवृत्त्या परराष्ट्रानुद्धरेत्तथा ॥
दण्डभूभागशुल्कैस्तु विना कोशाद् बलस्य च ॥
संरक्षणं भवेत् सम्यग् यावद्विंशतिवत्सरम्।
तथा कोशस्तु सन्धार्य्यः स्वप्रजारक्षणक्षमः ॥
बलमूलो भवेत् कोशः कोशमूलं बलं स्मृतम्।
बलसंरक्षणात् कोशराष्ट्रवृद्धिररिक्षयः ॥
जायते तत् त्रयं स्वर्गः प्रजासंरक्षणेन वै ॥ (शुक्रनीतिः ४/२/३,७,१३-१५)

CC-0. Sampurnanand University Collection. Digitized by eGangotri

उपर्युक्तविवेचनेनेदं स्पष्टं भवति यद्राज्यसञ्चालनं कोषेनैव भवति। चाणक्यसूत्रेष्वपि कोषस्य महन्महत्त्वं दरीदृश्यते—'सुखस्य मूलं धर्मः', 'धर्मस्य मूलमर्थः', 'अर्थस्य मूलं राज्यम्', 'जितात्मा सर्वार्थैः संयुज्यते', 'अर्थसम्पत्प्रकृतिसम्पदं करोति', 'वृत्तिमूलमर्थलाभः', 'अर्थमूलं कार्यम्', 'अर्थवान् सर्वलोकस्य बहुमतः', 'महेन्द्रमप्यर्थहीनं न बहु मन्यते लोकः', 'अर्थमूलौ धर्मकामौ'। अतः कोषवैशिष्ट्यस्य तथा चार्थवैशिष्ट्यस्योपयोगित्वस्य चाधारेणैवार्थशास्त्रे समीचीनमुक्तम्—'अर्थ एवं प्रधान इति कौटिल्यः'।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

राजविद्यायां कूटनीतिः

डॉ. दिनेशकुमारगर्गः

प्राध्यापकः, प्राचीनराजशास्त्रर्थशास्त्रविभागस्य
सम्पूर्णानन्दसंस्कृतविश्वविद्यालये
वाराणस्याम्

***

अत्रादौ 'राजविद्यायां कूटनीतिः' इति विषयवस्तुकथनावसरे 'वाक्यार्थज्ञाने पदज्ञानं पदार्थज्ञानञ्च कारणं भवति' इति नियममधिकृत्य राजविद्यादिशब्दा विचार्यन्ते—'राज्ञां विद्या राजविद्या', अत्र विद्यापदेन 'आन्वीक्षिकीत्रयीवार्तादण्डनीतीनां चतसृणां ग्रहणं भवति'। तत्र [१]सुखदुःखयोरीक्षणात् आन्वीक्षिकी आत्मविद्या भवति। उक्तञ्चाऽत्र [२]आचार्य-कौटिल्येन—

प्रदीपः सर्वविद्यानामुपायः सर्वकर्मणाम्।
आश्रयः सर्वधर्माणां शश्वदान्वीक्षिकी मता।।

अपि च तत्रैव—'सांख्यं योगो लोकायतञ्चेत्यान्वीक्षिकी'। अत्र लोकायतपदेन नास्तिकदर्शनानां ग्रहणम्। अथ [३]द्वितीया त्रयी विद्या, अनया चतुर्दशानां विद्यानां ग्रहणं भवति। अनयोभयोः लोकयोः तत्सम्बन्धिसुखयोः प्राप्तिर्भवति। तृतीया वार्ता विद्या। [४]अनया विद्यया सम्पन्नो राजा वृत्तेः भयं न प्राप्नोति। अत्र वार्ताशब्दो वर्त्तते जीवति लोकोऽनयेति व्युत्पत्त्या लोकजीवनभूता वार्ता विद्या। 'कृषिपशुपाल्ये वाणिज्यं चेति वार्ता'[५]। एवं

---

१. आन्वीक्षिक्यात्मविद्या स्यादीक्षणात् सुखदुःखयोः। (का.नी.द्वि.स. ११)

२. कौ. अर्थ. प्रथमप्रकरणे प्रथमेऽध्याये।

३. अङ्गानि वेदाश्चत्वारो मीमांसान्यायविस्तरः। धर्मशास्त्रं पुराणञ्च त्रयीदं सर्वमुच्यते।।
(का.नी.द्वि.स. १३)

४. सम्पन्नो वार्तया साधु नावृत्तेर्भयमृच्छति। (का.नी.द्वि.स.)

५. कौ. अर्थ. प्रथमेऽध्याये प्रथमप्रकरणे।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

दण्डनीतिः चतुर्थी विद्या, अनया विद्यया राजा स्वस्य प्रजायाश्च रक्षां समीचीनतया कर्तुं समर्थो भवति। अत्र दण्डपदेन राज्ञ एव ग्रहणं, तस्य नीतिः दण्डनीतिः[१]। चतसृणां विद्यानां मध्ये दण्डनीतिरेव सर्वप्राधान्या तस्यामेव सर्वासां विद्यानां समारम्भः[२]। दण्डनीतेरभावात् मात्स्यन्यायेन सर्वासां विद्यानां समारम्भ एव न सम्भवति।

विद्या—विद्याशब्दः चतुर्भ्यो धातुभ्यो निष्पन्नः सन् चतसृणां विद्यानां बोधको भवति। तद्यथा—सर्वविद्यानां प्रदीपभूता आन्वीक्षिकी विद्या, यया धर्मार्थकाममोक्षान् विद्यात् = विचारयेत्, अत्र विद्याशब्दः 'विद-विचारणे' धातोः निष्पद्यते। एवं चतुर्वर्गं यज्जानीयात् तत् त्रय्या विद्यात्वं 'विद-ज्ञाने' धातोरिदं रूपं, तथा चतुर्वर्गं यल्लभते, तद्वार्ताया विद्यात्वं, 'विद्लृ-लाभे' इति धातोरिदं रूपम्, तथा चतुर्वर्गसत्तापादनाद्दण्डनीतेर्विद्यात्वं, 'विद सत्तायाम्' इति धातोरिदं रूपम्, इत्यभिधानान्यपि यासां पृथग्धातुभ्यो व्युत्पादितानि, ताः कथमन्तर्भावं नीयन्त इत्यभिप्रायः।

नीतिः कूटनीतिश्च—सामान्यरूपेण नीतिशब्दः प्रापणार्थकात् 'णीञ्धातोः' 'स्त्रियां क्तिन्' इति सूत्रेण कर्मणि क्तिन्-प्रत्ययेऽनुबन्धलोपे प्रातिपदिकत्वे विभक्त्यादिकार्ये सति निष्पद्यते। स च शब्दो धर्माय सदाचाराय वा प्रयुज्यते। वैदिक्यां संस्कृतौ सदाचारः सर्वोत्कृष्टतमं स्थानं भजते। दुराचारिण उद्धारः सदाचारेणैव सम्भाव्यते। अन्यथा ऋचाऽपि तस्य किमपि शं कर्तुं न प्रभवति। श्रुतिर्वदति 'ऋतस्य पन्थां न तरन्ति दुष्कृतः'। अपि च 'आचारहीनं न पुनन्ति वेदाः' इत्यादि। तथा सन्मार्गं प्रापयितुं प्रार्थ्यते, यतः—'परिमाग्ने दुश्चरिताद् बाधस्व मा सुचरिते भज[३]', अर्थात् 'हे अग्निदेव! सन्मार्गेणाऽस्मान् नय'।

किञ्च सर्वे मनुष्याः समाना न भवन्ति अतः 'परित्राणाय साधूनां विनाशाय च दुष्कृताम्[४]' इति भगवद्वाक्येन सज्जनानां रक्षा दुर्जनानां विनाशः, दमनद्वारैव सम्भवति। आचार्यशुक्रेणाऽप्युक्तम्—'सर्वोपजीवकं लोकस्थितिकृन्नीतिशास्त्रकम्[५]'। अर्थात् सर्वेषां जनानामाश्रयभूतं नीतिशास्त्र-

---

१. दमो दण्ड इति प्रोक्तः तात्स्थ्यात् दण्डो महीपतिः।
तस्य नीतिर्दण्डनीतिर्नयनान्नीतिरुच्यते।। (का.नी.द्वि.स.)

२. एकैव दण्डनीतिस्तु विद्येत्यौशनसाः स्थिताः। (का.नी.द्वि.स.)

३. यजु. ४.२८;

४. श्रीमद्भगवद्गीता ४.८।

५. शुक्रनीतिसारः १.१५।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

मेवाऽस्ति। लोकस्य व्यवहारो नीतिशास्त्रं विना न प्रचलति, यथा भोजनं विना प्राणिनां देहस्थितिर्न स्यात्।

आदिकाले नीतिशब्दः सदाचारस्य दण्डनीतेश्च बोधक आसीत्। किन्तु कालाऽन्तरेऽयं शब्दः राजनीतेः कूटनीतेर्दण्डनीतेश्च परिपोषकः सञ्जातः। अत्र दण्डनीतिविषये कामन्दकेन शुक्राचार्येणाप्युक्तम्—'वस्तुतो राजा दण्डरूप एव, दमनकर्तृत्वात्'[१]।

प्राचीनयुगे नीतिः कूटनीतेः राजनीतेर्वा पृथग्भूता नाऽऽसीत्।राज्ञः प्रधानं कर्म प्रजायाः पालनमासीत्। तदर्थं स्वकर्मरतस्य रक्षा विरतस्य निग्रहः कर्त्तव्यः। एतदादर्शरूपे राज्ञोऽश्वपतेः कथनं सार्थकं परिलक्ष्यते—

न मे स्तेनो जनपदे न कदर्यो न मद्यपः।
नानाहिताग्निर्नाविद्वान् स्वैरी स्वैरिणी कुतः।।

अत एव कथ्यते—नीतिशास्त्रज्ञानां विदुषां सम्मानं विदध्यात्, तथा धर्मे संलग्नः सन् प्रजां पालयेत्।कोऽस्ति धर्म इति जिज्ञासायां तच्छब्दस्य व्युत्पत्तिरुच्यते—

धारणाद् धर्म इत्याहुर्धर्मो धारयते प्रजाः।
यः स्याद् धारणसंयुक्तः स धर्म इति निश्चयः[२]।।

यतो हि धर्मोऽयमभ्युदयस्य निःश्रेयसश्च प्रदायकः[३]। अथ च प्रजायाः पालने स्वराज्यस्य रक्षणार्थं कूटनीतेः प्रयोग आवश्यकः।

अत्र कूटशब्दः कैतवार्थस्य बोधकः[४]। यः स्ववशेन्द्रियस्तेन राज्ञा कूटनीतिः प्रयोक्तव्या। उक्तश्चात्र 'ब्रह्मचर्येण तपसा राजा राष्ट्रं विरक्षति'[५]। अपि च नयविक्रमसम्पन्नो राजा राजलक्ष्मीं वर्धयेत्, तदर्थं विनयसम्पन्नताऽऽवश्यकी। विनयो हीन्द्रियजयः[६]। अन्यथाऽन्यत्र कूटप्रयोगे सर्वत्र छलकपटव्यवहारेण राजा

---

१. का.नी. २.१५, शु.नी. १.५७; २. महाभारते शान्तिपर्वणि १०९.११।

३. 'यतोऽभ्युदयनिःश्रेयससिद्धिः स धर्मः। (वैशेषिकदर्शने १.१.२)

४. अमरकोषः ३.३.३६; ५. अथर्ववेदः ११.५.१७।

६. नयविक्रमसम्पन्नः सूत्थानश्चिन्तयेच्छ्रियम्। नयस्य विनयो मूलं विनयः शास्त्रनिश्चयः।।
विनयो हीन्द्रियजयः तद्युक्तः शास्त्रमृच्छति। तन्निष्ठस्य हि शास्त्रार्थाः प्रसीदन्ति ततः श्रियः।।
(का.नी.प.श्लोके २१-२२)

CC-0. Sampurnanand University Collection. Digitized by eGangotri

तु विनश्यत्येव तेन सह प्रजा अपि विनष्टतां गच्छन्ति। कूटनीतेः प्रयोगः, अतिसावधानतया विवेकसम्पन्नतया, यत्राऽधिक आवश्यकः, तत्रैव कर्त्तव्यः। कूटनीतिप्रयोगो भगवता श्रीकृष्णचन्द्रेण यथा विहितः, तथा केनाऽपि न कृतः। येन स्वकीयाऽग्रजस्य विरोधादपि स्वीयां भगिनीमर्जुनाय ददौ[1]। नीतिविषये आचार्यशुक्रस्योक्तिरस्ति—'नीतिमतान्तु सा युक्तिर्या हि स्वश्रेयसेऽखिला'[2]।

अर्थात् यो नीतिमान् तेन स्वस्य कल्याणाय य उपायोऽपेक्षितः सः करणीयः। अन्यथा सः पशुतुल्यः। यतो हि स्त्रियोऽपि स्वीयजारपतीन् गोपयितुं छलमाश्रयन्ति[3]। यो यथा भवति तेन सह तस्या एव युक्तेराश्रयणं कर्त्तव्यम्[4]।

कूटनीतौ सामाद्युपायानां योगदानम्

विजयाऽऽकांक्षिभिः राजभिः सामाद्युपायाः कूटनीतिविषये सम्यक् प्रयोक्तव्याः। तद्रहिता हि कूटनीतिः सिद्धिदात्री न भवति। अथ च मित्रं शत्रुं वा स्ववशं कुर्यात् तत्तदुपायैः, यथा हस्तिः, सर्पः, सिंहो वोपायैः स्ववशीक्रियते। उक्तञ्चाचार्यशुक्रेण—

मित्रं शत्रुं यथायोग्यैः कुर्यात् स्ववशवर्तिनम्।
उपायेन यथा व्यालो गजः सिंहोऽपि साध्यते[5]॥

यो राजोपायान् आश्रित्य राज्यं करोति, सः स्वर्णभाक् भवति, यथा शुक्रनीतौ—

'भूमिष्ठाः स्वर्गमायान्ति वज्रं भिन्दन्त्युपायतः'[6]।

अर्थात् मनुष्यो भूमिं निवस्याऽपि स्वर्गं गच्छति, तथा वज्रोऽपि विदीर्यते।

अथ समेषां सामाद्युपायानां स्वजनान् प्रति तत्तद् युक्त्यैव प्रयोगः कार्यः। तद्यथा—

---

१. न कूटनीतिरभवच्छ्रीकृष्णसदृशो नृपः।
अर्जुनाद् ग्राहिता स्वस्य सुभद्राभागिनीछत्वात्॥ (शु.नी. ५.५९)

२. शु.नी. ५.६०।

३. नात्मोपसङ्गमने युक्तिं चिन्तयेत् स पशुर्जडः।
जारसङ्गोपने छद्म संश्रयन्ति स्त्रियोऽपि च॥ (शु.नी. ५.६४)

४. युक्तिश्छलात्मिका प्रायस्तथाऽन्या योजनात्मिका।
यच्छद्मचारी भवति तेन छद्म समाचरेत्॥ (शु.नी. ५.६५)

५. शु.नी. ४.२४; ६. शु.नी. ४.२५।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

सुहृत्सम्बन्धि स्त्रीपुत्रप्रजाशत्रुषु ते पृथक्।
सामदानभेददण्डाश्चिन्तनीयाः स्वयुक्तिभिः[1]॥

यन्मित्रं स्यात् तेन सह सर्वदा सामदानयोः प्रयोगः कार्यः। यथा तत्रोक्तम्—'त्वत्समस्तु सखा नास्ति, मित्रे साम इदं स्मृतम्, मम सर्वं तवैवाऽस्ति, दानं मित्रे स जीवितम्'[2]। किन्तु मित्रं प्रति कदापि भेददण्डौ न प्रयोक्तव्यौ।

मित्रं प्रति भेददण्डयोर्लक्षणं कथयन्नाह आचार्यशुक्रः—

मित्रेऽन्यमित्रगुणान् कीर्तयेद्भेदनं हि तत्।
मित्रे दण्डो न करिष्ये मैत्रीमेवंविधो हि सः[3]॥

शत्रूणां कृते सामादीनां प्रयोगः कथं कार्यः, तेषां स्वरूपं श्रीशुक्राचार्यो ब्रूते—

सामस्वरूपम्—

परस्परमनिष्टं न चिन्तनीयं त्वया मया।
सुसहाय्यं हि कर्त्तव्यं शत्रौ साम प्रकीर्तितम्[4]॥

दानस्वरूपम्—

करैर्वा प्रमितैर्ग्रामैर्वत्सरे प्रबलं रिपुम्।
तोषयेत्तद्धि दानं स्याद्यथायोग्येषु शत्रुषु[5]॥

भेदस्वरूपम्—

शत्रुसाधकहीनत्वकारणात् प्रबलाश्रयात्।
तद्धीनतोज्जीवनाच्च शत्रुभेदनमुच्यते[6]॥

दण्डस्वरूपम्—

दस्युभिः पीडनं शत्रोः कर्षणं धनधान्यतः।
तच्छिद्रदर्शनादुग्रबलैर्नीत्या प्रभीषणम्[7]॥

---

१. शु.नी. ४.२६; २. शु.नी. ४.२८।
३. शु.नी. ४.२९; ४. शु.नी. ४.३१।
५. शु.नी. ४.३२; ६. शु.नी. ४.३३।
७. शु.नी. ४.३४।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

उपर्युक्तसामाद्युपायानां प्रयोग एवं प्रकारेण करणीयः, यथा मित्रोदासीनशत्रवो राजानः स्वाभ्यधिका बलिनो न सन्तु, तत्रोक्तम्—

सर्वोपायैः तथा कुर्यान्नीतिज्ञः पृथिवीपतिः।
यथा स्वाभ्यधिका न स्युर्मित्रोदासीनशत्रवः[१]॥

अत्राशङ्क्यते यच्चतुर्णामुपायानां प्रयोगः सम्भूय कर्त्तव्यः, अथवा तेषूपायेषु क उपायः श्रेयान्, तत्रोच्यते—

सामैव प्रथमं श्रेष्ठं दानं तु तदनन्तरम्।
सर्वदा भेदनं शत्रोर्दण्डनं प्राणसंशये[२]॥

सामनीतेः प्रयोगः प्रथमतः कार्यः, अनन्तरं दानस्य, तेन चेत् कार्यसिद्धिर्न भवेत्, तर्हि भेदस्य, यदा प्राणसंशयमापद्येत, तदा दण्डनीतिः प्रयोक्तव्या। एवं प्रबलशत्रौ सामदानयोः प्रयोगः कार्यः, स्वापेक्षयाऽधिकस्य बलवतो राज्ञः सामभेदयोः प्रयोगः कार्यः,स्वसमानाय राज्ञे भेददण्डयोः प्रयोगः। अथ च हीनशत्रौ दण्डः प्रयोक्तव्यः। यदि शत्रुणा राज्ञा प्रजा पीडिता स्यात्, तां सामदानाभ्यां स्ववशीकृत्य शत्रुं पीडयेत्, तस्यां (प्रजानां) पीडनं स्वकीयविजयकारणं भवति। अथ च स्वदेशस्थानां गुणवतामपि दुष्टानां देशाद् बहिः प्रेषणं हितकारि भवति। स्वकीयप्रजायाः कृते भेददण्डयोः प्रयोगः कदापि न कर्त्तव्यः, अपि तु प्रजायाः पालनं सामदानाभ्यामेव करणीयम्। चेत् स्वप्रजायै दण्डभेदौ प्रयुज्येते, तर्हि राज्यमाशु विनश्येत्। किन्तु दण्डद्वारा चेत् प्रजाऽसदाचरणान् निवर्तते, तदा राज्ञाऽवश्यमेव दण्डः प्रयोक्तव्यः। यतो हि दण्डो राजाधीनः, अतो यथायोग्यः, नाऽधिकः न मृदु, अपि तु यथार्हो दण्डो दातव्यः। उक्तश्चात्र कौटिल्येन—'सुविज्ञाय प्रणीतो हि दण्डः प्रजा धर्मार्थकामैर्योजयति, दुष्प्रणीतस्तु कामक्रोधाभ्यामज्ञानाद्वानप्रस्थान् परिव्राजकानपि कोपयति किं पुनर्गृहस्थान्'[३]। दण्डो नाम 'वधबन्धार्थहरणलक्षणः, मध्यमोत्तममृदुरूपः। अत्राऽऽचार्यशुक्रेणाप्युक्तम्—

निर्भर्त्सनं चापमानोऽनशनं बन्धनं तथा।
ताडनं द्रव्यहरणं पुरान्निर्वासनाङ्कने[४]॥

---

१. शु.नी. ४.३६; २. शु.नी. ४.३७।
३. कौ.अ. १.४.१; ४. शु.नी. ४.४४।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

व्यस्तक्षौरमसद्यानमङ्गच्छेद्यो वधस्तथा।
युद्धमेते ह्युपायाश्च दण्डस्यैव प्रभेदकाः[१]।।
जायते धर्मनिरता प्रजा दण्डभयेन च[२]।।

राजा चेत् दण्डधरः स्यात् तर्हि प्रजा स्वे-स्वे धर्मे रता भवति। एवं प्रकारेण कुशलेन राज्ञा सामादयः प्रयोक्तव्याः।

कूटनीतिप्रयोगप्रक्रिया—राज्ञा कूटनीतेः प्रयोगः कथं करणीयः। अत्र विषये आचार्यविष्णुगुप्तेन समीचीना व्याख्या कृता। राज्ञां सन्धिविग्रह-यानासनाश्रयद्वैधीभावात्मकं षाड्गुण्यं कूटनीतेरेव स्वरूपम्, यथाऽऽचार्य-शुक्रेणोक्तम्—नीतिमतां सैव युक्तिः प्रशंसनीया या स्वात्मकल्याणाय प्रजाकल्याणाय राज्यवर्धनाय च भवति। अर्थात् राजा यदा पश्यति यदनेन राज्ञा सह सन्धिरेव शङ्करः, तदा सन्धिरेव कार्यः, निर्बलं शत्रुं पश्य तेन सह विग्रहः कार्यः, अथवा यदि पश्येत् 'न यः शक्तः परः कर्माण्युपहन्तुं नाहं तस्य कर्मोपघाती वा व्यसनमस्य श्ववराहयोरिव कलहे वा स्वकर्मानुष्ठानपरो वा वर्धिष्ये' इत्यासनेन वृद्धिमातिष्ठेत्[३]। चतुर्थो गुणः शत्रूपर्याक्रमणरूपः। उक्तश्चात्र 'यदि वा मन्येत यानसाध्यः कर्मोपघातः शत्रोः प्रतिविहितस्वकर्मारक्षश्चाऽस्मि' इति यानेन वृद्धिमातिष्ठेत्[४]। पञ्चम आश्रयरूपः, यथा यदा राजा मन्येत 'नाऽस्मि शक्तः परकर्माण्युपहन्तुं स्वकर्मोपघातं वा त्रातुम्' इति बलवन्तमाश्रितः स्वकर्मानुष्ठानेन क्षयात् स्थानं स्थानात् वृद्धिं चाकाङ्क्षेत[५]। षष्ठो द्वैधीभावरूपः, यदा पश्यति, यच्छत्रुद्वयं वर्तते, अनेन शत्रुणा सह सन्धिना स्वकार्यं सेत्स्यामि, तदा तेन सह सन्धिः कार्यः। उक्तश्चात्र कौटिल्येन 'सन्धिनैकतः स्वकर्माणि प्रवर्तयिष्यामि, विग्रहेणैकतः परकर्माण्युपहनिष्यामि' इति द्वैधीभावेन वृद्धिमातिष्ठेत्[६]। एवमेव योगवामन-प्रकरणद्वारा कूटयुद्धप्रकरणद्वारा च कूटनीतेः प्रयोगविषये, आचार्यकौटिल्येन विस्तृता विहिता। सन्धिरूपः कूटनीतेः प्रयोगः श्रीमद्भागवतस्याष्टमस्कन्धस्य समुद्रमथनप्रसङ्गे कृतोऽस्ति। तत्र यदा देवाः निर्बलिनः सञ्जाताः, असुराश्च प्रभावशालिनोऽभूवन्, तदानीं ते सर्वे मिलित्वा भगवन्तं शरणं ययुः।

---

१. शु.नी. ४.४५; २. शु.नी. ४.४६।
३. कौ.अर्थ.षा.प्र.अ.; ४. कौ.अर्थ.षा.प्र.अ.।
५. कौ.अर्थ.षा.प्र.अ.; ६. कौ.अर्थ.षा.प्र.अ.।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

शरणागतान् देवान् पश्य भगवता ते सम्बोधिताः। यद् यूयं निर्बलिनः स्थ। अतः सामर्थ्यमानेतुं समुद्रमन्थनं विधातव्यम्, तच्च कार्यमेकाक्यसम्भवम्। अर्थात् भवन्तोऽल्पसंख्याकाः असुरा भूयांसो वर्तन्ते। अतोऽहिमूषकवत् सन्धिर्विधेयः[१]। यदा च पीताऽमृता भवेयुः तदा तान् पराजयितुं समर्था भविष्यन्ति। अतः परं भगवत आज्ञया देवाः सन्धिं कृतवन्तः। शत्रुणा सह सन्धिसमये स्वकीयं तात्कालिकं स्वार्थं लोभं च परित्यज्य स्थायिलाभश्चिन्तनीयः। इमान् समान् गुणान् आश्रित्य देवाः स्वकीयं लक्ष्यं प्राप्तवन्तः।

कणिकस्य कूटनीतिः

महाभारतयुद्धस्य प्राक् यदा धृतराष्ट्रेण युधिष्ठिरो युवराजपदेऽभिषिक्तः, ततः प्रभृति अहोरात्रं स्वकार्यकुशलप्रणाल्या सर्वासु प्रजासु प्रियतमः सन् स्वीयां विमलां कीर्तिं ववृधे। तस्यैवं वर्धमानां कीर्तिमभिलक्ष्य, धृतराष्ट्रस्य मनसि दुर्भाव उत्पन्नः। तदा तेन राजनीतिपण्डितः स्वकीयः श्रेष्ठो मन्त्री कणिकाभिध आहूतः। तदागते सति धृतराष्ट्रः तमुक्तवान्। भोः कणिक! पाण्डवानां यशसः पराक्रमस्य च वृद्धिरहरहो भवति। एतदवलोक्य मम चित्ते महान् सन्तापो जायते। अस्मिन् विषये त्वं कथय, मया सन्धिर्विग्रहो वा विधातव्यः। कणिक उवाच—भो राजन्! मम वचः शृणु, अत्र रोषो न कर्त्तव्यः, राजा नित्यमुद्यतदण्डः सन् दैवं निहत्य पुरुषार्थं कुर्यात्। उक्तञ्चात्र—'नित्यमुद्यतदण्डः स्यान्नित्यं विवृतपौरुषः'[२]।

राजा कदापि स्वस्मिन् शैथिल्यं नानयेत्। स्वस्मिंश्चेत् क्वापि शिथिलताऽस्ति, तां न प्रकाशयेत्। अन्यस्य दुर्गुणं ज्ञायेत। चेत् शत्रोरनिष्टं कर्त्तुं प्रारम्भयेत्, तर्हि मध्ये न विरमेत्। शङ्कुलस्याऽग्रभागश्चेदाभ्यन्तरं शिष्यते, तर्हि बहुदिनानन्तरं विकारं प्राप्य वेदनां जनयति। निर्बलं शत्रुं मत्वा चक्षूंसि न निमीलयेत्। चेत् समयोऽननुकूलस्तर्हि पश्यन्नपि न पश्येत्, शृण्वन्नपि न शृणुयात्। शत्रूणां त्रीन् (मन्त्रबलमुत्साहञ्च) पञ्च (सहायं सहायकं साधनमुपायं देशकालविभागञ्च) सप्त (साम, दामं, दण्डं, भेदं मायामैन्द्रजालिकप्रयोगं

---

१. यातदानवदैतेयैस्तावत्सन्धिर्विधेयताम्। कालेनाऽनुग्रहीतैस्तैर्यावद्वो भव आत्मनः॥
अरयोऽपि हि संधेयाः सति कार्यार्थगौरवे। अहिमूषकवद्देवा ह्यर्थस्य पदवीं गतैः॥
(श्रीमद्भागवते अ.स्क.ष.अ. १९-२०)

२. महाभारतस्याऽऽदिपर्वणि, १३९.६।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

शत्रुगुप्तकार्यञ्च) राज्याङ्गानि[१] च नाशयेत्। यावत् समयोऽनुकूलो न स्यात्, तावत् शत्रुं स्कन्धे कृत्वाऽपि वाहयेत्। किन्तु समयाऽनुकूले सति शत्रुं घटवत् ध्वंसयेत् सामाद्युपायेषु केनाप्युपायेन शत्रुं नाशयेत्। इदमेव राजनीतेर्मूलमन्त्रम्। एवमुक्तवति कणिके, धृतराष्ट्र उवाच—भोः कणिक! सामाद्युपायैः शत्रून् कथं नाशयेत्। एतत्सर्वं सम्यक् मह्यं ब्रूहि। तदा तेनोक्तम्—महाराज। अस्मिन् विषये भवत एकां कथां श्रावयामि। कस्मिंश्चिद्वने बुद्धिमान् स्वार्थकोविद एको वृको वसति स्म। तेन सह तस्य चत्वारि मित्राणि निवसन्ति स्म। तेषां नामानि व्याघ्रो मूषकः शृगालो नकुलश्च। एकस्मिन् दिने हृष्टः पुष्ट एको मृगस्वामी तैरवलोकितः। प्रथमस्तावत् सर्वे तं वशीकर्तुं चेष्टां कुर्वन्तो विफलाः सञ्जाताः तदा ते सर्वे मिथो विचारयामासुः। तत्र वृक उवाच—मृगोऽयं तीव्रधावको युवा चतुरश्च, भो व्याघ्र! विनाशार्थं कृतो भवतः प्रयत्नो निरर्थकतां गतः। अतोऽयमुपायः कर्त्तव्यः,यदा सः शयानो भवेत्, तदा मूषकः तत्र गत्वा तस्य पादान् विदीर्येत्। विक्षतं तं दृष्ट्वा भवान् वशीकुरु। अथ वयं सर्वे मिलित्वा खादयेम्। सर्वे मिलित्वा यथा विचारितं तथा कृतम्। यदा ममार सः। तदा चतुरो वृकः तान् प्रत्यवोचत्—भवन्तः सर्वे स्नातुं गच्छन्तु, अहमस्य रक्षां विधास्ये। स्नानार्थं समेषु गतेषु सत्सु चतुरो वृकश्चिन्तितवान्। तावत्काले महाबली व्याघ्रो नद्याः स्नात्वाऽऽगतः। चिन्तामग्नं वृकं दृष्ट्वा व्याघ्रोऽपृच्छत्, भो मित्र! किं चिन्तयसि आगच्छ, इमं मृगं भुक्त्वा गतक्षुधा प्रसन्ना भवेम। तदा तेनोक्तम्—बलशालि व्याघ्र भ्रातः! मूषको मामुक्तवान् यद् व्याघ्रस्य बलं धिक् धिक्, मृगं त्वहं हतवान्, अथ स बलशाली व्याघ्रो मम पुरुषार्थजन्यं हतमृगं किं भोक्ष्यसि, तस्यैवमहंकारयुक्तं वचो निशम्य तद्भक्षणे मम रुचिर्नष्टा। त्वं चेद् भोक्तुमिच्छसि, तर्हि भक्षय। तदा व्याघ्र आह—एवमस्ति चेत्, तर्हि तेनाऽहं जागरितः। एवमुक्त्वा व्याघ्रो गतः। तत्काले मूषकोऽपि स्नात्वाऽऽगतः। तेन मूषक उक्तः। भ्राता मूषक! नकुलो मामुक्तवान् व्याघ्रस्य कर्त्तनेन मृगे गरः संसक्तः। अत एव नाहं भक्ष्ये, अपि तु मूषकं भक्ष्यामि, तच्छ्रुत्वा भीत्वा मूषकस्ततः पलायितः (अत्र भेदनीतिरस्ति) अनन्तरं शृगालः तत्राऽऽगतः। वृकस्तमुक्तवान्—भोः शृगाल! व्याघ्रस्त्वय्यतीवरुष्टः। अहं तव हितमेव चिन्तयामि। अधुनैव व्याघ्र्या सहागतवानासीत्, त्वं यथेच्छसि तथा कुरु, एवं श्रुत्वा भीत्वा सोऽपि ततः पलायितः। अथ नकुलोऽपि तत्राऽऽगतः। तमायान्तं

१. सप्ताङ्गं राज्यम्—

स्वाम्यमात्यश्च राष्ट्रञ्च दुर्गं कोशो बलं सुहृत्। एतावदुच्यते राज्यं सत्वबुद्धिव्यपाश्रयम्॥

(का.नी.प्र.अ. १८)

CC-0. Sampurnanand University Collection. Digitized by eGangotri

दृष्ट्वा सोऽवोचत्। रे नकुल! मया सह युद्ध्वा पराजिताः व्याघ्रमूषकशृगालाः पलायिताः। चेत्तव गर्वोऽस्ति, तर्हि मया सह युध्यस्व। ततो मृगमांसं भक्षय। तदा स नकुल आह—तादृशा बलवन्तस्त्वया चेत् पराजिताः, तर्हि कथमहं त्वया सह योद्धुं समर्थोऽस्मि। एवमुक्त्वा सोऽपि ततो गतः। अतोऽत्र चतुर्धासु नीतिषु सामनीत्या व्याघ्रः, दानभेदनीतिभ्यां शृगालमूषकौ, दण्डनीत्या नकुलश्च, एते समे पलायिताः।

अतोऽत्र बुद्धिमतो राज्ञो महत्कर्त्तव्यमस्ति यत्—भीरौ भयमुत्पादयेत्। शूरवीरं वन्देत। लोभिने किमपि दद्यात्। समानं निर्बलं वा पराक्रमेण वशमानयेत्। अतोऽत्रोक्तम्—

एवं समाचरन्नित्यं सुखमेधेत भूपतिः।
भयेन भेदयेद् भीरुं, शूरमञ्जलिकर्मणा।।
लुब्धमर्थप्रदानेन समं न्यूनं तथौजसा[1]।।

शत्रुः कोऽपि भवेत्, तमवश्यमेव पातयेत्[2]। शपथं कृत्वा धनं लोभयित्वा, गरं दत्वा, छलेन वा शत्रुं जयेत्। घातेच्छुः घातयन् वा मधुरं वदेत्। हत्वा कृपां विदध्यात्। शोचेत्, रुद्यात् च। शत्रून् सन्तोषयेत्। किन्तु तस्य त्रुटिमवलोक्य तिरस्कुर्यात्। यदुपरि शङ्का न भवति तदुपरि शङ्कामवश्यमेव कुर्यात्। तादृशा जना अतिघातका भवन्ति, यो विश्वासपात्रो नास्ति तं न विश्वसेत्, यो विश्वस्तः तत्राप्यतिविश्वासो न कार्यः, यतोऽतिविश्वासात् समूलनाशो भवति। उक्तञ्च—

न विश्वसेदविश्वस्ते विश्वस्ते नातिविश्वसेत्।
विश्वासाद् भयमुत्पन्नं मूलान्यपि कृन्तति[3]।।

सर्वत्र पाखण्डितपस्वीत्यादिवेषेण भयोपधाद्युपायैः[4] गुप्तचराणां शोधनं विदध्यात्।

उपधाशोधनं कथं कुर्यात्तत्रोच्यते चतस्र उपधा भवन्ति—१. धर्मोपधा, २. अर्थोपधा, ३. कामोपधा, ४. भयोपधा चेति। तत्र धर्मोपधाशुद्धौ—

---

१. म.भा.आ.प. १३९.५०-५१।
२. सप्ताङ्गस्य राज्यस्य विपरीतं य आचरेत्। गुरुर्वा यदि वा मित्रं प्रतिहन्तव्य एव सः।। (म.शा. ५७.५)
३. महा.आ.प. १३९.६२।
४. उपेत्य धीयते यस्मादुपधेति ततः स्मृता। उपाय उपधा ज्ञेया तयाऽमात्यान् परीक्षयेत्।। (का.नी.च.स. २६)

CC-0. Sampurnanand University Collection. Digitized by eGangotri

'अधार्मिकोऽयं राजा साध्वेनं हत्वाऽन्यमुपपादयाम' इति। प्रत्याख्याने शुचिः। अर्थोपधा—लुब्धोऽयं न ददाति, अतो वञ्चनीय इति प्रत्याख्याने शुचिरिति। कामोपधा—राजमहिषी त्वां कामयते कृतसमागमोपायेति प्रत्याख्याने शुचिरिति। भयोपधा—एकोऽमात्यः सर्वान् आह्वयेत्, तेनोद्वेगेन किल राजा तानवरुन्ध्यात्, कापटिकश्छात्रः पूर्वावरुद्धस्तेषामेकैकममात्यं भयदर्शनेन राजवधार्थमुपनयेत्, तत्प्रत्याख्याने शुचिरिति। किन्तु राजोपधाशुद्धिविषये स्वीयं स्वकीयराज्ञीं वा न कुर्यात्। अत्राऽऽचार्यकौटिल्येनोक्तम्—

न त्वेव कुर्यादात्मानं देवीं वा लक्ष्यमीश्वरः।
शोधहेतोरमात्यानामेतत् कौटिल्यदर्शनम्[१]॥

[२]तत्र धर्मोपधाशुद्धान् गुप्तचरान् धर्मस्थीयकण्टकशोधनेषु स्थापयेत्, अर्थोपधाशुद्धान् समाहर्तृसन्निधातृनिचयकर्मसु, कामोपधाशुद्धान् बाह्याभ्यन्तर-विहाररक्षासु (कञ्चुक्यादिपदेषु) तथा भयोपधाशुद्धान् आसन्नकार्येषु राज्ञः। सर्वोपधाशुद्धान् मन्त्रिपदे नियोजयेत्। सर्वत्राऽशुचीन् खनिद्रव्यवनकर्मान्तेषू-पयोजयेत्।

तथा गुप्तचराणां बहुदिनपर्यन्तमेकस्मिन् स्थाने नियुक्तिर्न कार्या, मिथः स्थानं परिवर्तयेत्।

नीतिनिपुणराज्ञ इदं लिङ्गम्, वाण्या विनम्रता, हृदयस्य कठोरता, भयोत्पादकं कर्म कुर्वन्नपि सस्मितं वच उच्चारणम्।

प्राञ्जलिकर्मकरणं, शपथकरणम्, आश्वासदानं, चरणस्पर्शः, आशा-प्रदानम्, इत्येते सम ऐश्वर्यप्राप्तेरुपायाः सन्ति। यः शत्रुणा सन्धिं विधाय चिन्तारहितो भवति। तस्य विनाशे सति जागरूको भवति। स्वकीयं रहस्यमयं वचः, शत्रोरेव नहि अपि तु मित्रादपि गोपयेत्। कस्मैचिदप्याशादानमपि बहुकाले दानार्थम्। मध्ये विघ्नं कुर्यात्।

अतः भो राजन्! पाण्डुपुत्रेभ्य आत्मानं रक्षेत्। ते दुर्योधनादिभ्यो बलवत्तराः। भवता तादृश उपायोऽन्वेष्टव्यः, यतः तेभ्यो भयं न भवेत्। अथ च पश्चात्तापोऽपि न भवेत्। 'अतः किमधिकं ब्रवीमि' एवमुक्त्वा मन्त्री कणिको गृहं गतवान्। अथ च धृतराष्ट्रश्चिन्तामग्नः सन् विचारयामास।

महाभारते कणिकद्वयस्य कूटनीतिवार्ता प्रस्तुता वर्तते। प्रथमस्तावत् धृतराष्ट्रस्य मन्त्री कणिकः, यः कूटनीतावर्थशास्त्रे च महान् पण्डित आसीत्।

---

१. कौ.अर्थ.प्र.अ.प. अध्याये श्लो.सं. २; २. कौ.अर्थ.प्र.प.अ.।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

तस्य वर्णनमुपरि सञ्जातम्, अनन्तरं द्वितीयः कणिकः, यो भारद्वाजकुलोत्पन्नः, एको ब्राह्मण आसीत्। अनेन सौवीरदेशस्य राजा शत्रुञ्जयः, यदा शत्रुभिः परिवृत आसीत्, तदा कूटनीतेरुपदेशं प्राप्तवान्।

भारद्वाजकणिकस्य कूटनीतिः

'आपत्काले मया किं कर्त्तव्यम्' इति राज्ञा शत्रुञ्जयेन पृष्टो भारद्वाजः कणिक उक्तवान्—भो राजन्! नित्यमुद्यतदण्डो राजा भवेत्। पौरुषं प्रकटीकुर्यात्। स्वीयां छिद्रतां दुर्बलताञ्च दूरीकुर्यात्। शत्रोः छिद्रतां दुर्बलताञ्च पश्येत्। चेद् दुर्बलताया अवसरं पश्येत्तर्हि झटित्येवाऽऽक्रमेत। यो राजा सदोद्यतदण्डो भवति, तस्मात् प्रजाऽपि बिभेति। अतः सर्वान् जनान् दण्डेन वशीकुर्यात्।.

एवं संकटकालाऽऽगते सति सुमन्त्रणया पराक्रमेणोत्साहेन वा युध्येत् लब्धावकाशे सति पलायेत्। उक्तश्चात्र—

सुमन्त्रितं सुविज्ञातं सुबुद्धं सुपलायितम्।
आपदास्पदकाले तु कुर्वीत न विचारयेत्।।

राजा वचस्येव विनयी भवेत्। हृदयं क्षुरधारामयं कुर्यात्। सस्मितं वचो ब्रूयात्, कामक्रोधौ त्यजेच्च। शत्रुणा सह सन्धिं कृत्वाऽपि, तत्र न विश्वसेत् स्वकार्यं साधयित्वा विद्वान् पुरुषः, तत्स्थानं परित्यजेत्। संकटकालोपस्थिते शोकाभिभूते च भूतकालिकीं रामनलादीनां कथां श्रावयित्वा सान्त्वनां दद्यात्। यस्य बुद्धिर्निर्मलाऽस्ति, तस्मै भविष्यत्कालिकीं लाभाऽऽशां दद्यात्। विदुषे पुरुषाय तत्काल एव धनं दत्वा, तं शाम्येत्।

यो राजैश्वर्याकांक्षी, सः किं कुर्यादत्रोच्यते—

अञ्जलिं शपथं सान्त्वं प्रणम्य शिरसा वदेत्।
अश्रुप्रमार्जनञ्चैव कर्त्तव्यं भूतिमिच्छता[१]।।

यावत् समयोऽनुकूलो न भवेत्, तावत् शत्रुं स्कन्धेनापि वहेत्, प्राप्ताऽवसरे तु तं घटवद् भिन्द्यात्। उक्तञ्च—

वहेदमित्रं स्कन्धेन यावत् कालस्य पर्ययः।
प्राप्तकालन्तु विज्ञाय भिन्द्याद्घटमिवाऽश्मनि[२]।।

१. महा. शान्ति.; २. महा. शान्ति.।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

शत्रोः समक्षं तिन्दुकसमिदिव मुहूर्तमपि भयङ्करीं ज्वालां कुर्यात्, अर्थात् प्रचण्डं पराक्रमं प्रदर्शयेत्, न तु तुषाऽग्नेरिव मन्दगत्या ज्वलेत्।

कोकिलस्य, वराहस्य, मेरोः, शून्यगृहस्य नटस्याऽनुकूलसुहृदश्च ये गुणाः, तान् सर्वाननुकुर्याद् राजा। कस्य को गुणोऽस्ति विचार्यतेऽत्र। कोकिलस्य श्रेयान् गुणोऽस्ति, कण्ठमाधुर्यम्, वराहस्य गुणो भीषणाऽक्रमणं यस्य निरोधोऽसम्भवः, मेरोर्गुणः उच्चैः स्थितिः, शून्यगृहस्य वैशिष्ट्यमस्त्यनेकेषां कृत आश्रयदानम्, नटस्य गुणोऽस्ति क्रियानिपुणेन सन्तुष्टीकरणमनुरक्तसुहृदो गुणो हितचिन्तनम्, इत्येतान् गुणान् राजा समाश्रयेत्। उक्तश्चात्र—

कोकिलस्य वराहस्य मेरोः शून्यस्य वेश्मनः।
नरस्य भक्तमित्रस्य यच्छ्रेयस्तत् समाचरेत्[१]॥

बुद्धिमता राज्ञा कर्त्तव्यमस्ति यत् प्रतिदिनं शत्रुगृहं गच्छेत्। अमङ्गलयुक्तस्यापि तस्य कुशलक्षेमादिकं पृच्छेत्। उक्तश्च—

उत्थायोत्थाय गच्छेत् नित्यमुक्तो रिपोर्गृहान्।
कुशलं चास्य पृच्छेत यद्यप्यकुशलं भवेत्[२]॥

ये सालसाः क्लीबा अभिमानिनः लोकवार्तातो भीताः प्रतीक्षारताः, ते स्वाभीष्टं न प्राप्नुवन्ति। यथोक्तम्—

नालसाः प्राप्नुवन्त्यर्थान् न क्लीबा नाभिमानिनः।
न च लोकापवादभीता न वै शश्वत् प्रतीक्षिणः[३]॥

राजैवं सावधानो भवेत्। तस्य छिद्राणि शत्रुर्न पश्येत्। स्वयं तु शत्रोः छिद्राण्यवलोकयेत्। स्वच्छिद्राणि कूर्माङ्गानीव गोपयेत्। उक्तश्च—

नात्मच्छिद्रं रिपुर्विद्याद् विद्याच्छिद्रं परस्य तु।
गूहेत् कूर्म इवाङ्गानि रक्षेद् विवरमात्मनः॥

एकाग्रचित्तः सन् राजा स्वकर्त्तव्यं चिन्तयेत्, सिंहवत् पराक्रमं प्रकटीकुर्यात्। यथोक्तम्—

बकवच्चिन्तयेदर्थान् सिंहवच्च पराक्रमेत्॥

---

१. महा. शान्ति.; २. महा. शान्ति.।
३. महा. शान्ति.।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

अपि च राजा कथं कुर्यात्—

कुर्यात् तृणमयं चापं शयीत मृगशायिकाम्।
अन्धः स्यादन्धवेलायां बाधिर्यमपि संश्रयेत्।।

बुद्धिमान् पुरुषो देशकालयोरनुकूले सति पराक्रमेत्। तयोरननुकूले तत्कृतं कर्म विफलायते। उक्तञ्च—

देशकालौ समासाद्य विक्रमेत विचक्षणः।
देशकालव्यतीतो हि विक्रमो निष्फलो भवेत्।।

स्वस्मै समयोऽनुकूलोऽननुकूलो वा स्वकीयः पक्षः प्रबलो निर्बलो वैतत्सर्वं सम्यक् ििचार्य, तथा शत्रोः बलं ज्ञात्वा सन्धिविग्रहादिकं कुर्वीत। उक्तञ्च—

कालाऽकालौ सम्प्रधार्य बलाबलमथात्मनः।
परस्य च बलं ज्ञात्वा तत्रात्मानं नियोजयेत्।।

राजा शत्रोराशां विघ्नयुक्तां कुर्वीत। तस्या असिद्धौ युक्तिसङ्गतं कारणं ब्रूयात्—

आशां कलावतीं कुर्यात् तां विघ्नेन योजयेत्।
विघ्नं निमित्ततो ब्रूयात् निमित्तं चापि हेतुतः।।

यावद् भयं समक्षं नोपस्थितं तावद्भेतव्यम् अर्थात् भीतवद् युद्धादिकं परित्यजेत्, किन्तु भयोपस्थिते सति, अभीतवत् शत्रूपरि प्रहरेत्। उक्तञ्च—

भीतवत् संविधातव्यं यावद् भयमनागतम्।
आगतं तु भयं दृष्ट्वा प्रहर्त्तव्यमभीतवत्।।

प्राणानां संशयापन्नं विना नरो भद्राणि न पश्यन्ति, उक्तञ्च—

न संशयमनारुह्य नरो भद्राणि पश्यति।
संशयं पुनरारुह्य यदि जीवति पश्यति।।

अनागतं भयं प्रागेव जानीयात्, पुनः भयमापन्ने, तदुद्धरेत्, न तु तिरस्कुर्यात्, यतः—

आनागतं विजानीयाद् यच्छेद् भयमुपस्थितम्।
पुन वृद्धिभयात् किञ्चिदनिवृत्तं निशामयेत्।।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

सुलब्धं सुखं परित्यज्य, अनागतं सुखं यः कामयते, नीतिरियं बुद्धिमतां नहि, यतो हि—

प्रत्युपस्थितकालस्य सुखस्य परिवर्जनम्।
अनागतसुखाशा च नैव बुद्धिमतां नमः॥

यः शत्रुणा सन्धिं विधाय, निश्चिन्तः स्वपिति, स वृक्षशाखोपरि स्वपन् जन इव (शत्रुद्वाराऽधः पातयित्वा) अधः पतित्वा, सावधानो भवति। यतः—

योऽरिणा सः सन्धाय सुखं स्वपिति विश्वसन्।
वृक्षाग्रे प्रसुप्तो वा पतितः प्रतिबुद्ध्यते॥

मनुष्यो मृदुना कठोरेण वा येन केनोपायेनाऽऽत्मानमुद्धरेत्, ततो धर्ममाचरेत्। उक्तञ्च—

कर्मणा येन तेनैव मृदुना दारुणेन च।
उद्धरेद् दीनमात्मानं समर्थो धर्ममाचरेत्॥

ये शत्रोः शत्रवः सन्ति, तान् सेवेत पण्डितः। आत्मोपरि ये परेण नियुक्ता गुप्तचराः तेषां प्रत्यभिज्ञानार्थं प्रयतेत, एवं स्वकीयराज्ये शत्रो राज्ये वैतादृशान् गुप्तचरान् नियोजयेत्, ये स्वराज्ये परराज्ये वाऽपरिचिता अभूवन्। शत्रूणां राज्येषु पाखण्डितपस्विवेषधारिण एव गुप्तचररूपिणः प्रेषयेयुः।

यो विश्वासपात्रो नास्ति, तं कदापि न विश्वसेत्, अथ यो विश्वस्तः, तत्राऽतिविश्वस्तो न भवेत्। यतो हि—

न विश्वसेदविश्वस्ते विश्वस्ते नातिविश्वसेत्।
विश्वासाद् भयमभ्येति नापरीक्ष्य च विश्वसेत्॥

शङ्कास्पदे शङ्केत, यस्माद् भयं सम्भावितं तेन सदा सावधानो भवेत्, अन्यथाऽशङ्कितजनाद् भयोत्पन्नं समूलं विनश्यति, यतः—

अशङ्क्यमपि शङ्केत नित्यं शङ्केत शङ्कितात्।
भयं ह्यशङ्किताज्जातं समूलमपि कृन्तति॥

जन्मतः शत्रुर्मित्रं वा न भवति, सामर्थ्ययोगात् शत्रवो मित्राणि च जायन्ते। यतः—

नास्ति जात्या रिपुर्नाम मित्रं वापि न विद्यते।
सामर्थ्ययोगाज्जायन्ते मित्राणि रिपवस्तथा॥

CC-0. Sampurnanand University Collection. Digitized by eGangotri

दोषदृष्टिं परित्यज्यैश्वर्येच्छू राजा सदा जनान् स्वपक्षे कुर्यात्, अन्येषां जनानामनुग्रहकर्त्ता भवेत्, यत्नतः शत्रोर्दमनं विदध्यात्। यतः—

संग्रहाऽनुग्रहे यत्नः सदा कार्योऽनसूयता।
निग्रहश्चापि यत्नेन कर्त्तव्यो भूतिमिच्छता।।

भूतीच्छू राजाऽन्येषां सम्मानं कृत्वा सहिष्णुर्भूत्वा जनान् स्वसमीपमागन्तुं निमन्त्रयेत्। इदमेव लोकाराधनं जनतासम्मानो वाऽस्ति। उक्तञ्च—

निमन्त्रयति सान्त्वेन सम्मानेन तितिक्षया।
लोकाराधनमित्येतत् कर्त्तव्यं भूतिमिच्छता।।

प्रयोजनं विना वैरं न कुर्वीत, अथ च बाहुभ्यां नदीं न तरेत्। यतो हीन उभेऽपि कर्मणी, आयुनाशके स्तः। उक्तञ्च—

न शुष्कवैरं कुर्वीत बाहुभ्यां न नदीं तरेत्।
अनर्थकमनायुष्यं गोविषाणस्य भक्षणम्।।
दन्ताश्च परिमृज्यन्ते रसश्चापि न लभ्यते।।

ऋणाग्निशत्रुषु मध्ये किमपि नाऽवशिष्येत। एतेष्ववशिष्टेषु सत्सु पुनः पुनर्वर्धन्ते, अत उक्तम्—

ऋणशेषमग्निशेषं शत्रुशेषं तथैव च।
पुनः पुनः प्रवर्धन्ते तस्माच्छेषं न धारयेत्।।

अपि च—वृद्धिगतमृणं तिष्ठेत्। तिरस्कृताः शत्रवः शेषप्राणाश्चेत्, उपेक्षितो रोगः शिष्येत चेत्तर्हि तीव्रभयङ्करा भवन्ति। उक्तञ्च—

वर्धमानमृणं तिष्ठेत् परिभूताश्च शत्रवः।
जनयन्ति भयं तीव्रं व्याधयश्चाप्युपेक्षिताः।।

किमपि कार्यं सम्पन्नं विना न परित्यजेत्। सदा सावधानो भवेत्। यतः शरीरेऽवशिष्टः कण्टकोऽपि चिरकालानन्तरं विकारं प्राप्नोति। अत उक्तम्—

न सम्यक् कृतकारी स्यादप्रमत्तः सदा भवेत्।
कण्टकोऽपि हि दुश्छिन्नो विकारं कुरुते चिरम्।।

राजा गृद्धवत् दूरदृष्टिर्भवेत्। बकवल्लक्ष्यदृष्टिः स्यात्, काकवच्छङ्की सन् अन्येषां चेष्टाः पश्येत्। श्ववत् सदा सावधानो भवेत्। सिंहवत् पराक्रमी स्यात्।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

सदाऽनुद्विग्नो भुजङ्गो यथा परेषां विवरं (छिद्रं) दृष्ट्वा आक्रमते (प्रविशति) तथैव शत्रूणां छिद्राण्यवलोक्याऽऽक्रमेत। उक्तञ्च महाभारते—

गृद्धदृष्टिर्बकालीनः श्वचेष्टः सिंहविक्रमः।
अनुद्विग्नः काकशङ्की भुजङ्गचरितं चरेत्।।

यः शूरः तमञ्जलिकर्मणा वशं नयेत, यो भीरुरस्ति तं भयं प्रदर्श्य, लोभिनं धनं दत्वा वशीकुर्यात्, तुल्येन सह युध्येत। अत आह—

शूरमञ्जलिपातेन भीरुं भेदेन भेदयेत्।
लुब्धमर्थप्रदानेन समं तुल्येन विग्रहः।।

तीक्ष्णदण्ड उद्वेजयति। मृदुदण्डः परिभूयते। यथार्हदण्डाः प्रजा धर्मार्थकामैर्योजयेत्। अत्र कणिकेनोक्तम्—

मृदुरित्यवजानन्ति तीक्ष्ण इत्युद्विजन्ति च।
तीक्ष्णकाले भवेत् तीक्ष्णो मृदुकाले मृदुर्भवेत्।।

मतिमान् राजा मृदुस्वभावेन मृदुशत्रुं हन्ति, मृदुनैव दारुणशत्रोर्नाशः,मृदुनोपायेन किमपि दुष्प्राप्यं नास्ति। अतो मृदुरेवातितीक्ष्णः। उक्तञ्च—

मृदुनैव मृदुं हन्ति मृदुना हन्ति दारुणम्।
नासाध्यं मृदुना किञ्चित् तस्मात् तीक्ष्णतरो मृदुः।।

यः प्राप्तकालो मृदुः, काले दारुणश्च स बुद्धिमान् स्वकार्यं साधयति, शत्रूपरि ह्यधिकरोति। उक्तञ्च—

काले मृदुर्यो भवति, काले भवति दारुणः।
प्रसादयति कृत्यानि शत्रुं चाप्यधितिष्ठति।।

विद्वत्पुरुषेण सह विरुध्य, अहं दूरस्थोऽस्मीति न विश्वसेत्, यतो हि तस्य बाहू विशालतमौ भवतः, अर्थात् तद्द्वारा कृतः प्रतिकृत्युपायः दूरे प्रभवति। अतोऽपकृतो विद्वान् पुरुषः, स्वकीयविस्तृतबाहुरूपी प्रभावद्वारा शत्रून् नाशयति, अत आह—

पण्डितेन विरुद्धः सन् दूरस्थोऽस्मीति नाश्वसेत्।
दीर्घौ बुद्धिमतो बाहू याभ्यां हिंसति हिंसितः।।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

इत्थं हितार्थिना भारद्वाजेन ब्राह्मणेन कणिकेन कथितं यथार्थवचनं निशम्य सौवीरदेशाधिपतिः यथोक्तं तदनुरूपमनुष्ठितवान्। यतः सबान्धवः दीप्तां श्रियं बुभुजे।

इयं कूटनीतिः कदा प्रयोक्तव्या, भारद्वाजः कणिकः कूटनीतिमुद्दिश्य, तस्याः प्रयोगसमयमुक्तवान्—भो राजन्! यथा मया शत्रुणा सह कूटनीति-प्रयोगः कथितः प्रयोगोऽयं सम्पत्तिकाले न कार्यः। यदा शत्रुः कूटनीतेरुपायेन स्वोपरि संकटानुपस्थापयेत्, तदा तत्प्रतिकृतिवाञ्छयोपयुक्ता उपायाः प्रयोज्याः। अत एवाऽन्ते महाभारते कथितम्—

इतीदं वृजिनाभिसंहितं, न चैतदेवं पुरुषः समाचरेत्।
परप्रयुक्तेन कथं विभावयेदतो मयोक्तं भवतो हितार्थिना[1]॥

जाबालिकृतः कूटनीतिप्रयोगः

वाल्मीकिरामायणे रामो यदा पितुर्वचनेन वनं जगाम, तदा महर्षिभिरयोध्यावासिभिः सह भरतो राममयोध्यायामानयितुं प्रयतमान आसीत्। तस्मिन्नेव काले भरतस्य पक्षमाश्रित्य ऋषिर्जाबालिः कूटनीतिद्वारा रामं तत्राऽऽनयितुं प्रयत्नं कृतवान्, तस्य संक्षिप्ता वार्ता वर्ण्यते।

भरतमाश्वासयन्तं ब्राह्मणोत्तमो जाबालिः धर्मापेतं (अर्थात् लोकायितं मतम्) वचः धर्मज्ञं राममुक्तवान्—भो राम! तवेदृशी निरर्थिका मतिर्माभूत्। त्वं प्राकृतस्य नरस्येव, अर्थात् यथा कोऽपि पामरो नरः सांसारिकबन्धनासक्तो भवति, तथा त्वया नाचरितव्यम्, यतो हि, अस्मिन् जगति, कोऽपि कस्याऽपि सम्बन्धी नास्ति। यथा कोऽपि नरो ग्रामान्तरं गच्छन् ग्रामाद् बहिर्निवासं करोति, ततः प्रातःकाले तं परित्यज्य प्रतिष्ठेत्। एवमेव मनुष्याणां माता, पिता, गृहं, वसु, एतत्सर्वमावासमात्रं, अत्र सज्जनाः न सज्जन्ते, अपि तु कोऽपि उन्मत्त एव तिष्ठति। अतस्त्वम्—

पित्र्यं राज्यं समुत्सृज्य सनार्हसि नरोत्तम।
आस्थातुं कापथं दुःखं विषमं बहुकण्टकम्[2]॥

अर्थात् पित्र्यं राज्यं परित्यज्य कुत्सितपथ आस्थातुं योग्यो नासि, यतो हि, तत्पथं कण्टकाकीर्णं दुःखयुक्तञ्चाऽस्ति। अतो धनधान्यादि-सम्पन्नायामयोध्यायां यथा स्वर्गे शक्रो राजते, तथैव त्वमपि राज्यं कुरु। यतो

१. महाभारते शान्तिपर्वणि, १४०.७०; २. वा.रा., १०८.७।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

हि साऽयोध्या त्वां विरहिणीव प्रतीक्षते। त्वया च सह कस्याऽपि कोऽपि सम्बन्धो न भवति। पिता दशरथस्तु वस्तुतो न कोऽपि सम्बन्धी, किन्तु निमित्तकारणमेव। यथा तव पिता लयं गतस्तथा त्वमपि मरणधर्मोऽसि। अतो राजरूपं पुरुषार्थं परित्यज्य, ये धर्मपरा भवन्ति, त इह दुःखमनुभूय, अन्तकाले विनाशं लेभिरे। तथाऽष्टकादिश्राद्धं यः करोति पित्रादेर्मरणे सति किं तदन्नादिकं गृह्णाति। तथैव या परम्पराऽस्ति, यथा—यजस्व देवपूजां कुरु, दद्यादन्नादिकम्, दीक्षस्व यागार्थम्, तपश्चान्द्रायणादि प्रव्रजेत्येवं परम्परा वेदादयो ग्रन्था वशीकरणोपायभूता मेधादिभिः वार्तादिना जीवने क्लेशं प्रपश्यद्भिः पामरप्रतारणायानायासेन धनग्रहणाय कृताः। अतो न ते प्रमाणमिति। तथा यत् प्रत्यक्षभूतं राज्यादिकं तदनुसर। अतस्तेनोक्तम्—

सतां बुद्धिं पुरस्कृत्य सर्वकार्यनिदर्शिनीम्।
राज्यं सत्वं निगृह्णीष्व भरतेन प्रसादितः[1]॥

एवं जाबालेर्वचनं श्रुत्वा परमधर्मज्ञो राम उक्तवान्—यत् त्वया पथ्यसन्निभं यदपथ्यं प्रदर्शितम्, तन्मह्यं न रोचते, तथैवं कुपितं रामं दृष्ट्वा मध्ये आक्षिपन् भगवान् वशिष्ठोऽब्रवीत्, यदयं जाबालिर्लोकस्य गतागतिं जानीते, किन्तु त्वां निवर्तयितुकाम एतदब्रवीत्।

एवमेव कूटनीतिवर्णनक्रमे [2]ऋग्वेदस्य दशममण्डलस्य सरमापणि-संवादनामकेऽष्टोत्तरशततमे सूक्ते कूटनीतिद्वारा पणिनामका असुरा इन्द्रेण प्रेषितां गवामन्वेषणार्थं समागतां सरमाऽभिधां देवशुनीं वशीकर्त्तुमिच्छन्ति, यथा—

सरमाऽऽख्या देवशुनी देवराजस्य दूतीभूत्वा यदा पणिनामकाऽसुराणां समीपे आगतवती, तदा तस्या आगमनप्रयोजनं ज्ञातुं नैके प्रश्ना कृताः साऽपि स्वस्वामिनो महिमानं वर्धयन्ती, तान् तिरस्कुर्वन्ती प्रोवाच, हे पणयः! स इन्द्रो हन्तव्य इति न जानामि, यतो हि स इन्द्रो दभत् अर्थात् सर्वान् जनान् (शत्रून्) दभति = हिनस्त्येव, यस्याऽहम् इति, इदमस्मदीयं स्थानं, पराकात् अर्थात्, अतिदूराद्देशात् असरं = प्राप्ताभवम्। इन्द्रः कदापि हिंसितव्यो न भवति। अत्र युक्तिमाह—स्रवणशीला गभीरनद्यः तमिन्द्रं न संवृण्वन्ति। अतो हे पणयः! यूयमिन्द्रेण तादृशपराक्रमेण हताः सन्तः शयनं प्राप्स्यथ[3]। अथ

---

१. वा.रा. १०८.१८; २. ऋ.वे. १०.१०८।
३. ऋ.सं. १०.१०८।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

कूटनीतिज्ञाः पणयः, एवं वदन्तीं तां ज्ञात्वाऽपि, कूटनीतिद्वारा अर्थात् सामादिचतुर्धासु नीतिषु मध्ये दाननीतिद्वारा तां धर्मभगिनीं रचयितुकामः, तस्यै धनं दातुमिच्छन्ति। तथाऽग्रे तैः दण्डनीतेः प्रयोगः क्रियते। यथा—[१]'हे सरमे! अपहृता या इमा गावः, दिवः पर्यन्तान्, परितो गच्छन्तीः, एना गा, ऐच्छः = कामयसे, हे सुभगे। युस्माकं मध्ये क एतादृशः कोऽस्मात् पर्वताद् युद्धं विना मोक्तुमिच्छति। अथ चाऽस्माकं तीक्ष्णान्यायुधानि सन्ति, तस्मादस्माभिः युद्धमकृत्वा को वा गा आहरति। तथा सरमाख्यां देवशुनीं साम्नीत्या वशीकर्त्तुमिच्छन्ति पणयः। तैरुक्तम्—[२]'हे सरमे! चेत् त्वं देवशक्तिभिः पीडिताऽत्राऽऽगताऽसि, तर्हि त्वां भगिनीं करवै (अत्र समूहापेक्षयैकवचनम्) त्वं तु पुनः मा गाः। त्वदीयानां गवां समूहं पर्वतादपगमय्य भजाम। अर्थात् त्वं च वयञ्च विभागं करवामेति। एतत्सर्वं श्रुत्वा सा देवशुनी तान् तिरस्कृत्याऽऽह—भ्रातृत्वं स्वसृत्वञ्च नाहं वेद, भवन्तः कुत्राऽपि गच्छन्तु। किन्तु बृहस्पतिना विज्ञाता गावः, सर्वे सोमो विप्रा ऋषयोऽन्वेषणं करिष्यन्ति। अनेनैतद् ज्ञायते, यत् देवशुनी स्वकीय-दूतीत्वधर्ममपरित्यजन्ती, तान् तिरस्कृतवती।

एवं कथनेन प्रतीयते यत् कोऽपि दूतश्चेत् शत्रोर्देशं गतः, तथा शत्रुः सामाद्युपायैः तं वशीकर्त्तुमिच्छति। तदा धर्माद्युपधाभिः शोधितो दूतः, तस्य न वशीभवति। अतो राज्ञः परं कर्त्तव्यं यत् शोधितो विश्वस्तो दूत एव शत्रूणां देशे प्रेषितव्यः। अन्यथा स्वकीयराज्यस्य भेददानेन राजा विनष्टतां गच्छति।

अतोऽन्ते कथितुं शक्यते यत् कूटनीतिज्ञो राजा सदा स्वराष्ट्रमुन्नयितुं समर्थो भवति। अन्यथा समग्रे विश्वेऽस्य तादृशी प्रतिष्ठा न भवति, यथा कूटनीतिपरस्य राष्ट्रस्य। अतः कूटनीतिज्ञोऽवश्यमेव राजा भवेदिति।

●

---

१. ऋ.सं. १०.१०८, म.सं. ५।

२. ऋ.सं. १०.१०८, म.सं. ९।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

अध्वा समस्त एवायं श्रीशिवाभेदवृत्तिमान्

डॉ. कमलेश-झाः
अध्यक्षः, धर्मागमविभागे
संस्कृतविद्याधर्मविज्ञान-सङ्काये
काशीहिन्दूविश्वविद्यालये, वाराणस्याम्

❋❋❋

सर्वज्ञस्त्वमविज्ञातः सर्वयोनिस्त्वमात्मभूः।
सर्वप्रभुरनीशस्त्वमेकस्त्वं सर्वरूपभाक्॥

यत्र यत्र बुधा यत्र शास्त्रचर्चा मनोहरा।
तत्र तत्र सरस्वत्याः सुषमा कापि राजते॥

भारतीया संस्कृतिः तिसृभिर्धाराभिः पोषिता चकास्ति—१. वैदिकी धारा, २. आगमिकी धारा, ३. अश्रौती धारा चेति। तिस्र इमा धारा आधृत्य नानाविधप्रस्थानवन्ति दर्शनशास्त्राणि[१] सम्प्रवृत्तानि श्रीभारतभुवं सुमहता समुत्कर्षेण योजयन्ति। धाराणामासां समाश्रयणेन नानाशास्त्रवादाः प्रचलिताः प्रसृताश्च परन्तेषु अद्वैतस्यैव प्राधान्येनाधिगन्तव्यता शास्त्रतात्पर्यविद्भिरास्थीयते, द्वैतवादादयस्तु तदङ्गभूता एव लसन्ति। सारासारजुषां विदुषां नैवाविदिततममेतद् यद् वैदिकप्रस्थानानां यथा ब्रह्माद्वैते, आगमिकप्रस्थानानां वा यथा ईश्वराद्वैते परमं तात्पर्यमवसीयते तद्वद् अवैदिकप्रस्थानानां विज्ञप्त्यद्वैतशून्याद्वैत-योरन्यतरस्मिन्नद्वैते तदिति।

अथ विभिन्नस्रोतस्कानामन्योन्यचित्राणां नानाप्रस्थानात्मकुसुमानामुद्-ग्रथनेन विनिर्मितायां मालायां किल ईश्वराद्वैतसिद्धान्तं स्पृहणीयतमं ख्यापयन्तो नानाप्रस्थानवादाः सुधीवृन्दारकवृन्दस्पृहणीया एवाभान्ति। अस्मिन् सिद्धान्ते अनुत्तरसंज्ञकं यदनुत्तममद्वयतत्त्वं चकास्ति तद् मातृकायां प्राथम्यं भजमानेन

---

१. शासनादनिशं देवि वर्णाश्रमनिवासिनाम्।
त्राणनात् सर्वपापेभ्यः शास्त्रमित्यभिधीयते॥ (कुलार्णवतन्त्रम्)

CC-0. Sampurnanand University Collection. Digitized by eGangotri

अकारेणाभिव्यज्यते। एष एव अकारः सर्वेषां वर्णानां वर्गाणाञ्चावभासने बीजभूमिरास्ते। जगतो या सृष्टिरवभासनात्मा तत्राकारस्यैव हेतुतेति परात्रीशिकाकृतः। श्रुतिस्मृतिपुराणादिभिः स्तुतः सर्ववर्णमूलं सृष्टिसमवायिकारणम् अकारः परमः शिव इत्याख्यायते। सोऽयमकुलः शिवः शक्त्या कौलिकीत्याख्यया अविनाभूतः सदा स्फुरणात्मा स्वमहिम्न्यवतिष्ठते। यथोक्तम्—अकारो वै सर्वावाक् इति[१], अक्षराणामकारोऽस्मि इति[२], अमूला तत्क्रमाज्ज्ञेया क्षान्ता सृष्टिरुदाहृता इति[३], अकुलस्यास्य देवस्य कुलप्रथनशालिनी। कौलिकी सा परा शक्तिरवियुक्तो यया प्रभुः।। इति च[४]।

परात् परतरमेतदनुत्तरतत्त्वं षट्त्रिंशत्तत्त्वमयस्य विश्वस्य सृष्टिसंहारयोर्हेतुभूतं नीलसुखाद्यात्मनि वेद्यवर्गेऽपि भासमानम् अनावृतं चित्-तत्त्वमेतत् परिच्छेदसमुत्तीर्णं राजते। यथोक्तम्—यत्र इदं प्रसृतं यत्र च विश्रान्तं तदेव.....स्वयं प्रथमानमनपह्नवनीयमनुत्तरमिति[५]।

यतोऽयं कौलिको विधिः प्रभवति, यत्र च प्रतिष्ठापदवीं भजते, यन्मयं चेदं कौलिकं, तदेवानुत्तरमित्युक्तम् इति च[६]।

सोऽयमनुत्तरमहेश्वरो भगवानमितप्रमाता अखिलं विश्वमभेदेनैवानुभवति स्वात्मनि। स्वस्वभावभूता चास्य विलसति स्वातन्त्र्यशक्तिः। सैषा पञ्चधाऽऽत्मानं विभाजयति शुद्धाध्ववर्गमवभासयितुम्। पञ्चशक्तिप्रभेदानां शास्त्रकृद्भिः प्रकल्पिता नामभेदाः प्रोक्ताः—चिद्, आनन्दः, एषणा, ज्ञानं, क्रिया चेति। तत्र चिच्छक्तिप्राधान्ये महेश्वरः शिवतत्त्वरूपेण आत्मानं प्रथयति। आनन्द-शक्तिप्राधान्ये स एव प्रभुरात्मानं शक्तितत्त्वरूपेणावभासयति। एषणा-शक्तिप्राधान्ये त्वसौ सदाशिवो भाति। ज्ञानशक्तिप्राधान्ये प्रभोरीश्वररूपता भवति। क्रियाशक्तिप्राधान्ये तु देवोऽसौ विद्यातत्त्वस्वरूपेण प्रकाशमानो विलसति। त एते पञ्च शुद्धाध्वानो भान्ति। विश्वसृष्ट्यर्थमुन्मुखे चैतस्मिन् पञ्चतत्त्वात्मनि महेश्वरे मायायाः बन्धनस्य भयस्य भेदप्रतिभासात्मनो द्वैतस्य वाऽनुप्रवेशो नेष्यते। जयति सैषा भगवत्याः स्वातन्त्र्यशक्त्याः सलीलं महेश्वरक्रीडायां सम्भारमुपनयन्त्याः शुद्धाध्वमयी आभाससारा तत्त्वपञ्चकात्मा सृष्टिः।

---

१. तुल.-वागेव ब्रह्मणश्चतुर्थः पादः, छा. ३.१८.३।
२. श्रीमद्भगवद्गीता, १०.३३; ३. परात्रीशिका, ८।
४. श्रीतन्त्रालोकः, ३.६७; ५. परात्रीशिकावि., पृ. ८७।
६. परात्रीशिकावि., पृ. ९५।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

परं यदेषा अभेद्ये खण्डवर्जिते चिन्मये स्वात्ममहेश्वरे भेदलीलां नाटयितुम् अहन्ताभूमौ भेदमयमिदमः समुल्लासनं कुरुते तदसौ माया-संज्ञामात्मनः प्रथयति।

एषा माया यां कलां जनयति तामाश्रित्य तत्त्वचतुष्टयं जायते—अशुद्ध-विद्या रागः कालः नियतिश्चेति। कलादिकेन नियत्यन्तेन तत्त्वपञ्चकेन सर्वकर्तृत्वम्, सर्वज्ञत्वम्, नित्यतृप्तत्वम्, नित्यत्वं व्यापकत्वं चेति प्रभुशक्तिपञ्चकं सङ्कोचितम् भवति। अत एव प्रभौ यत्सर्वकर्तृत्वादिकमायाति तदेव मायया स्वोद्भासिततत्त्वपञ्चकेन सङ्कोचितम् अल्पकर्तृत्वादिरूपेण भोक्तरि अणौ पुरुषशते विजृम्भते। इदमेवोच्यते किञ्चित्कर्तृत्वादिपुरस्कारेण सर्वकर्तृत्वादिसमाच्छादनमिति। यद्वत् कलायाः किञ्चिदंशतः भोग्यांशपूर्त्यै प्रकृतितत्त्वमुज्जृम्भते, तद्वत् कर्तृत्वांशतः भोक्त्रंशपूर्त्यै पुरुषतत्त्वं विजृम्भते।

मायाधिकारक्षेत्रे विचरणशीलोऽयं पुरुषः प्राणसञ्चारादिकमनुभवन् शून्यं प्राणं बुद्धिमहङ्कृतिं मनो बाह्येन्द्रियं देहं वा परिमितमिदमात्मैव अहमात्मना समाविशन् मायाकल्पितमातृतां सप्तविधामङ्गीकुर्वन् विश्वव्यवहारं जनयति। तदेवं मितमातरो मायाप्रभृतिधरापर्यन्ते तत्त्वव्राते यद् विचरन्ति तदेतदेकत्रिंशत् तत्त्वम् अशुद्धाध्वसंज्ञितं भवति। मितमातरो हि मूर्तिवैचित्र्यस्य क्रियावैचित्र्यस्य वा क्रमरूपतामवकल्पमाना देहादिकमात्मतया प्रतिपद्यमानास्तत्संसर्गिणं भावजातं देशेन कालेन वा परिच्छिन्दन्ति। अतो देशः कालो वा न परमार्थभूतः कश्चन पदार्थः प्रत्युत मायाप्रमातृविकल्पित एव तदाभाससारश्चकास्ति। यथोक्तम्—न देशः परमार्थेन न च कालोऽस्ति कश्चन। इति[1]।

तदित्थं मायाप्रमातृविकल्पितो मूर्तिवैचित्र्यकृतो यः क्रमोऽवभासते स देशक्रम इत्यभिधीयते। यस्तु क्रियावैचित्र्यकृतः क्रमोऽवभासते स कालक्रम इत्याख्यायते। यदुक्तम्—

मूर्तिवैचित्र्यतो देशक्रममाभासयत्यसौ।
क्रियावैचित्र्यनिर्भासात् कालक्रममपीश्वरः।। इति[2]।

एतदुक्तम् भवति—गृहम्, अजिरम्, बहिर्द्वारम्, सरणिः, सुरनदी, तीर्थम्, मन्दिरम्, उद्यानं सस्यक्षेत्रादिकं वा स्वात्ममहेश्वरे यदुल्लसन्ति तद् आसां मूर्तीनां मायीयप्रमातरि आकारभेदोऽवभासते तदाभासवैचित्र्यमेव वस्तुतो देशक्रमकल्पने हेतुभावं भजते।

---

१. मालिनीविजयवा., १.११००; २. ईश्वरप्रत्यभिज्ञाविम., २.१.५।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

तद्वत् 'पचति' इत्यत्र यदधिश्रयणं, यद् वा तण्डुलसूपादिकस्य आधानं तत्तद् अवश्रयणपर्यन्तम् अवान्तरक्रियारूपं तदीयं क्रमवैचित्र्यं मायाप्रमातरि यदवभासते सोऽयं क्रियावैचित्र्यकृतः क्षणमुहूर्तयामाहोरात्रमासर्तुसंवत्सरादिरूपः कालक्रमकल्पने हेतुभावं व्रजति। एष कालो देशो वा स्वकारणभूतायां प्रकाशविमर्शात्मनि संविदि परिच्छेदकथाप्रवर्तने तु नैव क्षमते। यथोक्तम्—

देशकालौ न चैवास्य भेदकौ भवितुं क्षमौ।
स्वप्रथां प्राप्नुतो यस्मादस्मादेवापि तावुभौ।। इति।[1]

यतश्च कालाध्वा वर्णमन्त्रपदात्मा ततोऽयं वाचकः प्रमात्रात्मा निगद्यते। देशाध्वा तु कलातत्त्वभुवनात्मा। वाच्यः प्रमेयात्मेति निगद्यते। सिद्धान्ते यद्वद् ऋते प्रमातुः प्रमेयन्न सम्भवति तद्वत् प्रमेयं विना प्रमातापि न स्वीक्रियते। कालाध्वनि प्रमातृप्राधान्यं चेद् देशाध्वनि प्रमेयप्राधान्यं भवति। उभाभ्यामाभ्याम् अध्वभ्यां नामरूपात्मकं विश्वं प्रथते। परमुभयोरप्येनयोरध्वनोः सारभूतं तत्त्वं संविदात्मा प्रकाशमहेश्वर एवास्ते।

यद्वन्मितात्मन्येव लब्धजनिः कालक्रमस्तदपेक्षभावेषु पदं निधत्ते तद्वद् देशक्रमोऽपि, न त्वमितप्रमातरि। यदुक्तम्—

एवं देशक्रमोऽपि मितात्मनः परिच्छिन्नस्वरूपस्य शून्यादेर्देहान्तस्य स्वात्मनि भाति इह तिष्ठामीति। स्वापेक्षया च भावेष्वपि यन्मम संयोगपारिमित्येन वर्तते तदन्तिकम्, इतरद्-दूरमिति, अमितस्य स्वरूपेयत्ता-शून्यस्य तु संवित्तत्त्वस्य भावाः स्वात्मना अहम्भावेन यतो भान्ति, ततः पूर्णा अपरिच्छिन्नस्वरूपेयत्ताकाः, यतः स्वात्मा तस्य तथाभूत एवेति।[2]

संविद्रूपः स्वात्ममहेश्वरो वस्तुतः अक्रम एवास्ते। अत एवोच्यते—सर्वथा निरपेक्षा देवी संविद् अमूर्ता अक्रमा च विलसति—इति। अथापि देशक्रमाभासेन कालक्रमाभासेन च मूर्तिवैचित्र्यं क्रियावैचित्र्यं वा यद् भाति तदेवाध्वा प्रोच्यतेऽध्यात्मम्। यदुक्तम्—

सर्वथैवाक्रमेऽप्यस्मिन् क्रमो नास्त्येव नो यतः।
ऋते क्रमावभासन्तु सिध्येदक्रमतापि नो।। इति।[3]
अमूर्तायाः सर्वगत्वाद् निष्क्रियायाश्च संविदः।
मूर्तिक्रियाभासनं यत्स एवाध्वा महेशितुः।। इति च।[4]

---

१. ई.प्र. कारिका, १.२९;
२. ई.प्र.वि., खं. २, पृ. २०।
३. पूर्णताप्रत्य. विषयसूची;
४. श्रीत.आ., ६.२९।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

बाह्यं प्रमेयमवलम्ब्य भावनाभ्यासमये योगे मार्गभूतस्यास्य अन्वर्थं नामधेयं भवति—अध्वेति।

यतश्चानेन बाह्ययोगमार्गेण प्रबुद्धः साधकस्तत्तद्भुवनेशत्वादिभोगं भुङ्क्ते, सिद्धिमीप्सुर्वा क्रमेण शिवतां = निजपूर्णतां प्राप्नोति=अधिगच्छतीति नैरुक्तिकी काचन व्युत्पत्तिरास्थीयते अध्वशब्दस्य। यथोक्तम्—

द्वैतिनां भोग्यभावात्तु प्रबुद्धानां यतोऽद्यते।
अध्वा क्रमेण यातव्ये पदे सम्प्राप्तिकारणम्।। इति।[1]

प्रबुद्धैरद्यते यस्माद् गम्यते सिद्धिमीप्सुभिः।
गमनेनादनेनापि प्रोच्यतेऽध्वात्र शासने।। इति च।[2]

अमुमध्वानमाश्रित्यैव प्रभोः प्रसरो यतः सम्पद्यते ततः परमेश्वरस्य बहिःप्रसरमार्गोऽध्वा प्रोच्यते। न केवलम् अद्यते=भुज्यते इत्यध्वा; अपि तु गम्यते=प्राप्यते स्वात्मसात् क्रियते ततोऽप्यध्वा इत्यभिधीयते। यथोक्तम्—

संवित्तत्त्वात्मकं सर्वमध्वानं संविदात्मकः।
इच्छयैव क्षणेनैव स्वात्मसात् कुरुते बुधः।। इति।[3]

भेददशायां हि तत्तत्तत्त्वोल्लङ्घनक्रमेण षट्त्रिंशं शिवतत्त्वं प्राप्यत्वेनोक्तम्। भोग्यभावादित्यदनीयत्वात्, अधिगतसंवित्तत्त्वा हि सर्वं स्वात्मसात्कुर्वन्तीति भावः। तेनाध्वैवाध्वा, अद्यते इत्यध्वा चेति[4]।

शिवादारभ्य शुद्धविद्यापर्यन्तं यच्चिद्रूपोन्मज्जनं भवति तदेतेषां शुद्धाध्वा भवति। मायाप्रभृति-धरापर्यन्तं यच्चिद्रूपस्य निमज्जनं भवति तदेतेषाम् अशुद्धाध्वरूपता प्रोच्यते।

द्विविधो यः समावेशस्तत्रानुपाये नाभ्यासस्योपयोगिता काचित्। सोपाये तु शैवशाक्ताणवाख्ये समावेशे क्रियमाणोऽभ्यासः आभ्यन्तरबाह्यभेदेन भिद्यते। आद्ययोराभ्यन्तरयोगाभ्यासः, अन्त्ये तु बाह्ययोगाभ्यास इष्यते। बाह्ययोगेषु स्थानकल्पनात्मनि मूर्तिवैचित्र्यसापेक्षयोगोऽभ्यस्यते। तस्मिन्नेतस्मिन् देशाध्वनि निवृत्त्याद्याः पञ्चकलाः पञ्चत्रिंशत् तत्त्वानि, अष्टादशोत्तरं शतं भुवनानि चान्तर्भूतानि भवन्ति। कलातत्त्वभुवनानां भावनाभ्यासः पिण्डात्मनि स्वशरीरे

---

१. श्रीत.आ., ६.३०; २. पूर्णताप्रत्यभिज्ञा-का., २.१५।
३. पूर्णताप्रत्यभिज्ञा-का., २.१७; ४. श्रीत.आ.वि.खं. ४.१, पृ. ३१।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

दृढतामुपगतः कलाध्वात्मकस्य विश्वप्रपञ्चस्य स्वात्मशिवरूपतया साक्षात्कारे हेतुभावं भजते। यच्चैकैकं कलातत्त्वभुवनात्मतत्त्वं प्रमेयं तत् प्रत्येकं यतः शिवात्मकमतोऽन्योन्यमपि पूर्णशिवरूपमेव विद्यते, तदभिन्नाभिन्नस्य तदभिन्नत्व-नियमात्। तदेवं सर्वसर्वात्मिकया दृष्ट्यापि देशाध्वानमासाद्य भावनाभ्या-सदार्ढ्याच्छिवभावावाप्तिः सुलभा भवति। सात्त्विकभोगावाप्तिरपि तत्तद्भुवनादि-कमधितिष्ठतो देशाध्वसाधनापरायणस्य सुलभा भवतीति विदन्त्येव तद्विदः।

तदेवं मूर्तिभेदमयं विश्वं, मूलमध्याग्ररूपेण प्रस्फुरतो बोधस्य समुदये हेतुभावं भजते, तदनुसन्धानपरायणो योगी सुखं परभैरवीभावमवाप्य चिराय मोदते। यथाहुः—

तत्राध्वैवं निरूप्यायं यतस्तत्प्रक्रियाक्रमम्।
अनुसन्दधदेव द्राग् योगी भैरवतां व्रजेत्।।
त्रिशिरःशासने बोधो मूलमध्याग्रकल्पितः।
संविदेकात्मतानीतभूतभावपुरादिकः।
अव्यवच्छिन्नसंवित्तिर्भैरवः परमेश्वरः।। इति।[1]

श्रीतन्त्रालोके तन्त्रसारे चाणवेन योगेन परभैरवभावावाप्तिः विशकलय्य वर्णितेति तत एव प्रपञ्चनमुन्नेयम्।

तत् समस्तं स्वसंवित्तौ सा संविद् भरितात्मिका।
उपास्यमाना संसारसागरप्रलयानलः।। इति।[2]
अभिन्नं वेत्ति यो विद्वान् स्वात्मानं च गुरुं शिवम्।
तन्नौमि मुक्तमात्मानं विद्याविद्योभयात्मकम्।। इति।[3]

●

---

१. श्रीत.आ., ८.५,१२,१५; २. श्रीत.आ., ८.७।
३. श्रीपूर्णताप्रत्यभिज्ञा, सम्पाद.।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

तन्त्रदृष्ट्याऽज्ञानस्वरूपम्

श्रीशशिशेखरनाथपाण्डेयः
अनुसन्धाता, वेदान्तविभागस्य
सम्पूर्णानन्द-संस्कृत-विश्वविद्यालये
वाराणस्याम्

***

श्रीतन्त्रालोके अज्ञानस्य बन्धकारणत्वं सर्वशास्त्रकारदृष्ट्या समर्थ्यते। तत्र हि प्रतिज्ञारूपेणोक्तमस्ति—

> इह तावत्समस्तेषु शास्त्रेषु परिगीयते।
> अज्ञानं संसृतेर्हेतुर्ज्ञानं मोक्षैककारणम् ।। इति। (१.२२)

सर्वेषु शास्त्रेषु अज्ञानस्य बन्धकारणत्वमुच्यमानम् एवं विवृतं वर्तते भाष्ये—अज्ञानं तिमिरं पारमेश्वरस्वातन्त्र्यसमुल्लासितस्वरूपगोपनासत्त्वमात्मानात्मनोरन्यथाभिमानस्वभावम् अपूर्णं ज्ञानं, तदेव चाणवं मलम्, न तु नवमाह्निकादौ निषेत्स्यमानं द्रव्यरूपम्। उक्तम्—

> स्वातन्त्र्यहानिर्बोधस्य स्वातन्त्र्यस्याऽप्यबोधता।
> द्विधाणवं मलमिदं स्वरूपपापहानितः।। इति।

इदं भाष्यविवरणं सूक्ष्मेक्षिकया विचार्यते चेत्—अज्ञानस्य 'तिमिर'-शब्देन कृता व्याख्या एवं सूचयति, यत् अज्ञानं तिमिर इव स्वरूपतिरोधायकं वर्तते। आत्मानात्मनोरन्यथाऽभिमानस्वभावमपि तदुच्यते। अत्र च आत्मानात्मनोरन्यथा अभिमान एव स्वभावो यस्य इति बहुव्रीहिसमासेनेदं सूच्यते अज्ञानरूपतिमिरसत्त्वे आत्मानात्मनोरन्यथाऽभिमननं भवति। अत एव वक्तुं शक्यते यदात्मानात्मनोरन्यथाऽभिमननम् अज्ञानविजृम्भितं सदन्यथात्वस्य मिथ्यात्वं सूचयति। किन्त्वस्यामवस्थायाम् इदं विचारणीयं भवति यदात्मनश्चेतनस्य अनात्मनो जडस्य च अन्यथात्वं मिथ्या कथमुच्यते?

CC-0. Sampurnanand University Collection. Digitized by eGangotri

अर्थादुभयोर्भिन्नस्वभावत्वमनुभूयमानं कथमपलप्यते? किं स्वरूपज्ञाने सति चिज्जडयोरैक्यं वक्तुं शक्यते? एतस्य प्रश्नस्योत्तरं चैतन्यस्योद्भूतत्वानुद्भूतत्वाभ्यां दातुं शक्यते। यद्यपि लोके घटादिषु चैतन्यमुद्भूतम् मानवशरीरादौ चोद्भूतं दृश्यते, तथापि घटशरीरयोरचेतनत्वविषये न वर्तते कश्चन मतभेदः, तथापि जलहिमोपलानामपृथक्त्वमिव जड़चेतनयोरप्यपृथक्त्वं विचारेण वक्तुं शक्यम्। यथा जलस्य हिमोपलयोश्च स्वरूपं कार्यञ्च पार्थक्येनानुभूयते। तथापि सूक्ष्मेक्षिकया विचारे तेषामैक्यमतिरोहितं भवति।तथैव स्वरूपज्ञाने सति आत्मानात्मनोरैक्यमनुभवितुं शक्यते तदानीमनात्मन आभासताप्रतीतेरसत्त्वात्। अतः स्वरूपस्यैवान्यथाप्रथनमिदं घटादिकम् अज्ञानकालिकं वर्तत इति वक्तुं शक्यते। स्वरूपस्यान्यथाप्रथनं विरुद्धतया वर्तनम् अद्वैतवेदान्तदिशा विवर्तो वक्तुं शक्यते। अत्रापि तत्स्वीकारे बाधकं नास्ति यतो ज्ञानेन द्वैतप्रथनाभावः स्वीक्रियते। अत एव इह तावत् तन्त्रा. १।२२ इत्यस्य व्याख्यायां भाष्ये अज्ञानम् अपूर्णं ज्ञानमिति व्याख्यानं दृश्यते। अस्यां व्याख्यायां मूलं नञोऽल्पार्थकत्वं वक्तुं शक्यते। नञर्था हि षट् प्रसिद्धाः—

तत्सादृश्यमभावश्च तदन्यत्वं तदल्पता।
अप्राशस्त्यं विरोधश्च नञर्थाः षट् प्रकीर्तिताः।।

इति कारिकानुसारम्। एतेन अज्ञानं ज्ञानाभावरूपमिति मतं निरस्तं भवति। अज्ञानस्य भावरूपता च तस्य आवरकत्वख्यापनेन श्रीमद्भगवद्गीतायामुच्यते—

'अज्ञानेनावृतं ज्ञानं तेन मुह्यन्ति जन्तवः'। इति।

अज्ञानम् अभावरूपं भवेच्चेत् तेनावरणं कर्तुं न शक्यते, अभावस्य आवरकत्वाभावात्। अतोऽभावस्यावरकत्वख्यापकवचःप्रामाण्याद् अज्ञानं नाभावरूपम् इति निश्चितं भवति। अत एवात्र भाष्यकारैराचार्यजयरथैरज्ञानस्यापूर्णज्ञानरूपतोच्यते। सा च भावरूपत्वादेव भवितुमर्हति।

इदमिदानीं विचारयितुं युक्तम् अपूर्णज्ञानम् इति कथनस्य कोऽभिप्रायः। ज्ञानं हि प्रकाशकम् उच्यते, ज्ञायते अनेनेति ज्ञानमिति व्युत्पत्तेः। प्रकाशकं ज्ञानं प्रकृष्टतया दीपकं भवति दीपवत्। अत्र च काशधातोर्दीप्त्यर्थकत्वमनुकूलं वर्तते। अर्था घटादयः प्रसिद्धास्तेषां स्वरूपप्रकाशकं ज्ञानं द्विविधं दृश्यते।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

स्वरूपसाक्षात्कारोत्तरकालिकं ज्ञानं यत् जीवन्मुक्तिकालिकं वक्तुं शक्यते, तत्रापि व्युत्थानदशायां व्यवहारस्य सत्त्वात् जीवन्मुक्तिप्राक्कालिकज्ञानं बन्धकालिकं वक्तुं शक्यते। अनयोर्ज्ञानयोः वर्तते प्रकाशकतायां भेदः। जीवन्मुक्तिकालिकं ज्ञानं घटादीनां स्वरूपमवभासयत्तेषाम् आभासतामपि स्फुटयति। यतो जीवन्मुक्तस्य सर्वोऽपि प्रपञ्च आभासरूपेणैव भासते। अस्यां स्थितावेवं वक्तुं शक्यते यत् जीवन्मुक्तिकालिकं ज्ञानं पूर्णज्ञानं वर्तते। पूर्णता च तस्य पूर्ण-ब्रह्मस्वरूपत्वात् स्वीकार्या। तथा च पूर्णं च तज्ज्ञानं पूर्णज्ञानमिति पूर्णज्ञानशब्दे समासः स्वीकार्यः। शिवस्य ज्ञानरूपता पूर्णता च श्रुतिप्रसिद्ध्या युज्यते। यद्यपि एवं करणे बन्धकालिकं ज्ञानम् अपूर्णज्ञानं वक्तव्यम्, तच्च पूर्णज्ञानभिन्नत्वात् तथा वक्तुं शक्यम्। एवं करणे च अपूर्णज्ञानशब्देन बन्धकालिकानाम् अनन्तज्ञानानाम् अपूर्णज्ञानशब्दवाच्यता आपतति न तु तेषां कारणभूतस्य कस्यचिदज्ञानस्य। अज्ञानं सर्वेषां घटपटादिविषयज्ञानानां कारणं वर्तते। एवं वर्तते सिद्धान्तः—चेतनस्य ज्ञानरूपस्य ब्रह्मणोऽज्ञानं हि अविद्याज्ञानं नटादि-पदवाच्यम्। स्वस्थितिकालं यावत् जगदवभासयति। अतस्तत् कारणमुच्यते सर्वेषां घटपटादिज्ञानानां घटपटादिपदार्थानाञ्च आभासभूतानाम्। अत एवोच्यते तत्त्वालोके—

उच्यते वस्तुतोऽस्माकं शिव एव यथाविधः।
स्वरूपगोपनं कृत्वा स्वप्रकाशः पुनस्तथा।। (१.१२३)

भाष्ये च—वस्तुतो हि शिव एव अस्माकम् अद्वैतवादिनां मते गृहीत-पशुभाव इत्युक्तः। इति न शङ्कनीयमेतर्थमेव।

शिव एव यदि गृहीतपशुभावः (जीवभावः) तर्हि तस्य स्वातन्त्र्यशक्तेः का गतिर्भविष्यति अर्थात् परमेश्वर एव यदि पशुरूपेण वर्तते तर्हि तस्य स्वातन्त्र्यं बाधितं भवति। कारिकायां 'स्वरूपगोपनं कृत्वा' इत्युच्यते। अनेन च परमेश्वर एव स्वस्वरूपगोपनं कृत्वा जीवो भवति। अत एव पूर्वाज्ञानलक्षणे प्रथमपृष्ठे 'पारमेश्वरस्वातन्त्र्यमात्रसमुल्लासितस्वरूपगोपनासतत्त्वम्' इत्युच्यते। एतेन सिद्ध्यति यद् अपूर्णपदवाच्यमज्ञानमेव स्वरूपगोपनायां तत्त्वमूलं कारणं भवति, अर्थात् अज्ञानमेव स्वरूपगोपनां करोति। एतस्यायमभिप्रायो भवति स्वरूपस्याज्ञानमेव अर्थज्ञानरूपताम् अर्थरूपतां च प्राप्योभयरूपेण व्यवह्रियते।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

यतो घटं न जानामि पटं न जानामीत्यादिव्यवहारा यथा सन्ति तथैव 'ब्रह्म न जानामि, 'नाऽहं ब्रह्मरूप' इत्यादिव्यवहारोऽपि भवति। इमे अयं घटोऽयं पट इत्यादिव्यवहारा स्वस्वरूपभूतब्रह्मणो ज्ञानमूलका द्वैतप्रथायाम् अज्ञानस्य कारणतां सूचयन्ति। स्वरूपस्य गोपनमज्ञानेन भवति, अतोऽज्ञानं स्वरूपगोपनासतत्त्वमित्युच्यते। एवं स्थिते तत्त्वेन कारणत्वेन सहितं तत्त्वसहितम्, स्वरूपगोपनायां तत्त्वसहितं स्वरूपगोपनासतत्त्वमिति समासोऽत्र वक्तुं शक्यः।

स्वरूपगोपनासतत्त्वमिति कथनेनेदं सूचितं भवति यत् स्वरूपगोपनैव प्रधानं कृत्यमज्ञानस्य। स्वरूपगोपनमेव तत्त्वं वर्तते, स्वरूपगोपनेन प्रतीयमानं जगच्च अतत्त्वं वर्तते। स्वरूपगोपनायाः तत्त्वताकथनं तस्याः सम्पूर्णजगद्विभ्रमकारणतां बोधयति, वाचारम्भणश्रुतौ कारणस्य तत्त्वताश्रवणात् कारणे तत्त्वताव्यवहारः। इदं स्वरूपगोपनम् अपूर्णं ज्ञानमुच्यते, अपूर्णस्य पूर्णभिन्नस्य भिन्नत्वेन प्रतीयमानस्य जगत उद्भवपूर्वकं प्रकाशकत्वात्। 'ज्ञा अवबोधने' इति धातोर्ज्ञानशब्दो निष्पद्यते तथा च धात्वर्थविचारे क्रियमाणे अवमतस्य बोधनं तिरस्कृतस्य बोधनम् प्रकाशनं हि ज्ञानं भवति। को बोधेन तिरस्कृतो भवतीति जिज्ञासायामेवं वक्तुं शक्यते यत् स्वरूपभूतशिवस्य ब्रह्मणोऽज्ञानेन लब्धसत्ताकः प्रपञ्चो स्वरूपसाक्षात्कारेण तिरस्कृतो भवति तदानीं तेषामाभासतायाः सत्त्वात्।

इदं च ज्ञानम् अपूर्णज्ञानं भवति। यत इदं ज्ञानम् अपूर्णकालस्थितस्य ज्ञानं वर्तते। पूर्वकालस्थितिकं त्रिकालाबाध्यं ब्रह्मैव। तस्य च ज्ञानं पूर्णज्ञानं भवति। वस्तुतः प्रपञ्चस्य प्रतीतिमात्रं भवति तस्य सत्ता न वर्तते। अतो जगतोऽपूर्णकालस्थितिकत्वव्यवहारोऽपि स्वरूपाज्ञानदृष्ट्या भवति। ब्रह्मणः साक्षात्कारः स्वरूपप्रकाशनं वर्तते। स्वरूपगोपना अज्ञानस्य कार्यं वर्तते। अत एव स्वरूपसाक्षात्कारेण स्वरूपाज्ञाने निवृत्ते स्वरूपाज्ञानप्रयुक्तः प्रपञ्चोऽपि निवृत्तो भवति। अत एव स्वरूपसाक्षात्कारवतः प्रपञ्च आभासरूपेण प्रतीयते। इदन्त्ववधेयम् अज्ञानकल्पितं हि ज्ञानेन रज्जौ प्रतीयमानसर्प इव निवर्तते न वास्तवम्। इयमेव स्थितिः प्रपञ्चस्याऽपि वर्तते।

इदमज्ञानम् ईश्वरस्वातन्त्र्यमात्रसमुल्लासितं वर्तते इत्यपि तत्रोच्यते। एतेनेदं सूचितं भवति यदज्ञानं कारणान्तरनिरपेक्षेष्वस्वातन्त्र्यमात्रेण समुल्लासितं भवति। तथा च समुल्लासितं सद् आत्मानात्मनोरन्यथाऽभिमानरूपं कार्यं

CC-0. Sampurnanand University Collection. Digitized by eGangotri

करोति। एतेनात्मानात्मनोरन्यथाऽभिधानेनाहंत्वममत्वप्रयुक्तः सर्वो व्यवहारः प्रचलति।

यद्यप्यत्र एवं वक्तुं शक्यते यद् ईश्वरस्वातन्त्र्येण समुल्लासितमज्ञानम् आत्मानात्मनोरन्यथात्वाऽभिव्यञ्जकं भवति एकत्वाभिव्यञ्जकं न भवति किं तत्र कारणमिति? एषा जिज्ञासा मृद्घटयोरेकत्वपृथक्त्वाभ्यां समाधातुं शक्यते। 'यथा अदृष्टवशात् मृद्घटयोरेकत्वं पृथक्त्वञ्चोभयं प्रतीयते यथा वा स्वर्णकुण्डलयोरभेदेऽपि कदाचित् कुण्डलत्वेन कदाचित् स्वर्णत्वेनैव व्यवहारः प्रयोजनमनुसरति तथैव ईश्वरस्वातन्त्र्यमपि सृष्टिरूपप्रयोजनवशात् आत्मानात्मनोरन्यथास्वभावं भानं समुल्लासयति। स्वरूपाज्ञानस्येदं कार्यमात्रमित्युक्तं भवति।

इदमपूर्णं ज्ञानमस्ति यतो हि घटशब्दवाच्यत्वेन किञ्चित्त्वेन वा घटं जानन्नेव घटं न जानामीति वदति। तथैव शिवशब्दवाच्यतां शिवे जानन्नपि शिवस्वरूपाज्ञानविषयको व्यवहारोऽपूर्णं ज्ञानमाश्रित्यैव भवति। अज्ञानम् अपूर्णं ज्ञानं कथमुच्यत इति ज्ञातुं ज्ञानं किमिति ज्ञातव्यम्। येन ज्ञानलक्षणस्यात्रासंघटनादस्याज्ञानता स्फुरेत्, ज्ञानासदृशत्वादपूर्णज्ञानता च वक्तुं शक्येत। ज्ञानलक्षणं च आचार्यजयरथभाष्ये तन्त्रालोककारिकोल्लेखपुरस्सरमेवमुच्यते प्रथमाह्निकचतुर्थकारिकाव्याख्यानावसरे—

एवमेतदिदं वस्तु नाऽन्यथेति सुनिश्चितम्।
ज्ञापयन्ती जगत्यत्र ज्ञानशक्तिर्निगद्यते।। इति।

अयं भावः—इदं घटरूपं वस्तु सन्निकृष्टत्वाद् घटरूपमेव वर्तते, अन्यथा पटादिरूपेण न वर्तत इति सुनिश्चितं ज्ञापयन्ती ज्ञानशक्तिर्निगद्यते। एतेनेदं स्पष्टं भवति यदयं घट एव नाऽन्य इत्यादिरूपेण ज्ञापनं येन भवति तज्ज्ञानमुच्यते पूर्णस्य शिवस्य ज्ञानं पूर्णज्ञानमुच्यते, अज्ञानम् अपूर्णज्ञानमुच्यते, तस्य किञ्चित्त्वेन वस्तुप्रकाशकत्वात्। अत एवाद्वैतवेदान्तिनो वदन्ति ज्ञाततया अज्ञाततया वा सर्वं साक्षिभाष्यम् इति। ज्ञातो घट इति व्यवहारः। ज्ञातत्वेन घटस्य साक्षिभाष्यता सूच्यते, अज्ञातत्वेन किञ्चित्त्वेन वा प्रकाशनम्, अपूर्णतया अनिश्चिततया वा प्रकाशनं भवति। एवमज्ञातमपि वस्तु अज्ञातत्वेन भासते, अज्ञातो घट इति व्यवहारे, अतः अज्ञातत्वेन घटस्य प्रकाशनात् अज्ञानमपि

CC-0. Sampurnanand University Collection. Digitized by eGangotri

ज्ञानपदेन व्यवह्रियते। किन्तु अज्ञानं ज्ञानविरोधीति शङ्कां निराकर्तुमाचार्यो नभोऽल्पार्थकतां स्फुटयितुम् अज्ञानस्य कृते अपूर्णं ज्ञानमिति विशेषणं प्रयुङ्क्ते।

इदमपूर्णं ज्ञानम् अज्ञानपदेनोच्यमानम् आणवं मलमुच्यते आचार्यैः। अत एवोच्यते (तन्त्रालोके १।१५,१६ कारिकयोः)—

अज्ञानमिति न ज्ञानाभावश्चातिप्रसङ्गतः।
स हि लोष्टादिकेऽप्यस्ति न च तस्यास्ति संसृतिः।।
अतो ज्ञेयस्य तत्त्वस्य सामस्त्येनाप्रथात्मकम्।
ज्ञानमेव तदज्ञानं शिवसूत्रेषु भाषितम्।। इति।

अनयोः कारिकयोरर्थविचारेणाज्ञानस्य स्वरूपं स्पष्टीकर्तुं शक्यम्। अत एव वदत्याचार्यः—अज्ञानमिति न ज्ञानाभाववाचकः, तथा स्वीकारेऽतिप्रसक्तेः। लोष्टादिषु ज्ञानाभावस्य सत्त्वात् तत्र संसरणेन भाव्यम्, न च तत्र संसृतिरस्ति, अतो नास्ति तत्राज्ञानमिति मन्तव्यम्। संसरणं हि देवतिर्यङ्मनुष्यादियोनिषु जन्म। तच्च कर्मनिमित्तकम्, कर्माणि च नामनुष्यादिशरीरस्य सन्तीति लोष्टादिषु न संसरणप्राप्तिः। अतोऽज्ञानस्वरूपम् अग्रिमकारिकायामुच्यते—ज्ञेयस्य तत्त्वस्य सामस्त्येनाप्रथात्मकं ज्ञानमेव अज्ञानम् इति। अत्र प्रथनं विस्तारः सामस्त्येनाप्रथनं सम्पूर्णतया ज्ञानाभावः। अत इदमपूर्णं ज्ञानमिति वक्तुं युक्तम्। सामस्त्येनाप्रथात्मकम् इति कथनेनेदमायाति यद् असामस्त्येन प्रथनं तत्र भवति, अत एवेदम् अपूर्णं ज्ञानमुच्यते।

ज्ञेयस्य तत्त्वं च शिव एव, अत एवोच्यते आचार्यजयरथेन—अतो यथोक्ताद्धेतोः ज्ञेयस्य नीलसुखादेः—'ज्ञेयस्य च परं तत्त्वं यः प्रकाशात्मकः शिवः'। इत्यादिवक्ष्यमाणस्वरूपस्य तत्त्वस्य 'सामस्त्येन' तस्य सर्वत्राविशेषात् तदेकघनाकारत्वेन अप्रथात्मकं यद् 'इदं नीलम्', 'इदं सुखम्' इति द्वैतप्रथात्मकत्वादपूर्णं ज्ञानं तदेवाज्ञानं न पुनर्ज्ञानाभावमात्रमित्येतच्छिवसूत्रेषु भाषितम् उक्तमित्यर्थः। द्वैतप्रथात्मकत्वात् ज्ञानस्यापूर्णतोच्यते, अतोऽद्वैतस्य प्रथने ज्ञानं पूर्णं स्यादित्यर्थाद् वक्तुं शक्यते।

अज्ञानस्य स्वरूपं विवृण्वता तन्त्रालोककृतोच्यतेऽन्यत्र—

द्वैतप्रथा तदज्ञानं तुच्छत्वाद् बन्ध उच्यते।
तत एव संमुच्छेद्यमित्यावृत्त्या निरूपितम्।। (१.३०)

CC-0. Sampurnanand University Collection. Digitized by eGangotri

'तत्' इति हेतौ वर्तते। तदेव विवृणोति भाष्यकारः—संविदद्वैतात्मनः पूर्णस्य रूपस्य अख्यानात्। अप्रकाशनात् द्वैतप्रथा एव अज्ञानम् अपूर्णं ज्ञानम्, अपूर्णत्वाच्च तदेव अपूर्णमन्यथाशुभाशुभवासनाशरीरभुवनाकारस्वभावविविध-संकुचितज्ञानरूपतया मलत्रयात्मा बन्ध इत्युच्यते। बन्धरूपत्वादेव तदज्ञानं समुच्छेद्यम् उच्यते। अत एवोच्यतेऽन्यत्र—

मलं कर्म च मायीयमाणवमखिलं च यत्।
सर्वं हेयमिति प्रोक्तम् ....॥

एवम् अपूर्वस्य ज्ञानस्य अज्ञानपदवाच्यस्य बन्धत्वमुच्यते। तच्च मलत्रयात्मा। मलानि च कार्ममलम्, मायीयमलम्, आणवमलश्चेति भेदेन त्रिविधम्। एतत् त्रिविधमलं यावत्तिष्ठति तावन्मोक्षो न भवति। एवं यतो मलसत्त्वे बन्धरूपमोक्षाभावो वर्तते, अतस्तदभावे मोक्षो भवतीत्यर्थत आयाति। बन्धस्य मिथ्यात्वं चायाति, अन्यथा तस्य निवृत्त्यभावप्रसङ्गः। अत एव मोक्षः पुरुषार्थभूत एव परिभाष्यते तन्त्रालोके—

स्वतन्त्रात्माऽतिरिक्तस्तु तुच्छोऽतुच्छोऽपि कश्चन।
न मोक्षो नाम तन्नास्य पृथङ् नामाऽपि गृह्यते॥ (१.३१)

स्वतन्त्रात्माऽतिरिक्तः तुच्छोऽतुच्छो वा कश्चनान्यः पदार्थो नास्ति मोक्षरूपः, तथा स्वीकारे तस्य तुच्छत्वे बन्धत्वापत्तिः, अतुच्छत्वे तस्य पारमार्थिकत्वात् स्वतन्त्रात्मरूपता स्यात्। अत एवोच्यते (१।१५६) कारिकायाम्—

मोक्षो हि नाम नैवान्यः स्वरूपप्रथनं हि सः।
स्वरूपमात्मनः संविन्नान्यत्तत्र तु याः पुनः॥ (१.३१)

कारिकाव्याख्याने आचार्यजयरथेनोच्यते—'इह तावदात्मज्ञानं मोक्ष' इत्यविवादम्। अतो यदेवात्मनो लक्षणं तदेव मोक्षस्येति तत्रान्तरीयकत्वादेव अस्य लक्षणसिद्धेः पृथक्लक्षणं न कृतम्। अत एव नामापि इति अपिपदेन लक्षणादेः पुनः का वार्ता इत्यावेदितम्।

इदमत्रावधेयम्—स्वरूपप्रथनं मोक्ष इति कथनस्यायमाशयो भवति यद् यावद् द्वैतस्य प्रथनं प्रपञ्चभानरूपेण भवति तावत् स्वरूपस्य प्रथनं स्वरूपस्य

CC-0. Sampurnanand University Collection. Digitized by eGangotri

विस्तारो न भवति अर्थात् संकुचित एव आत्मा तदानीं भाति। स्वरूपसाक्षात्कारे जाते जगद्विभ्रातस्य बाधाद् बन्धकालापेक्षया असंकुचितरूपेण स्वरूपप्रथनं भवति। अर्थात् स्वरूपसाक्षात्काराभावकाले द्वैतस्य भानाद् आत्मनः पूर्णस्य भानं (प्रथनं) न भवति, स्वरूपसाक्षात्कारेण च द्वैतस्याप्रथनात् तस्य मिथ्यात्वं सूच्यते। अत एव वक्तुं शक्यते यद् यथा रज्ज्वज्ञानं रज्जुस्वरूपं तिरोदधत् सर्पस्योद्भावकं भवति, तथैव आत्मस्वरूपस्य अज्ञानम् जगद्विभ्रममुत्पादयति, स्वरूपसाक्षात्कारे जाते च अज्ञानविजृम्भितं जगत्तिरोधीयते—'आत्मानं न जानामि घटं जानामि' इत्यादिबुद्धिषु आत्मघटादेः आत्मघटादिशब्द-प्रतिपाद्यत्वेन भानात्। आत्मानं न जानामीत्यादिवाक्यजन्यबुद्धेः सत्त्वे ज्ञानसामान्याभावस्य वक्तुमशक्यत्वाद् अज्ञानम् अपूर्णज्ञानमित्युच्यते आचार्यैरिति शम्।

●

CC-0. Sampurnanand University Collection. Digitized by eGangotri

श्राद्धस्वरूपविमर्शः

डॉ. हिमांशुशेखरत्रिपाठी

द्वारा– प्रो. वाचस्पतिशर्मा-त्रिपाठी

आचार्योऽध्यक्षचरश्च

दरभङ्गास्थ-कामेश्वरसिंहदरभङ्गासंस्कृतविश्वविद्यालयस्य

बिहारप्रदेशे

❋ ❋ ❋

हिन्दूनामाचारेषु पितृयज्ञाख्यमिदं वैदिकं कर्म अतीव महत्त्वपूर्णं स्थानमलङ्करोति। श्राद्धमिदं 'श्रद्धा' इत्यस्मात् शब्दान्निष्पन्नं भवति। श्राद्धशब्दस्य व्युत्पत्तिः श्रद्धया पित्रुद्देश्येन द्रव्यत्यागः श्राद्धमिति भवति। यद्यपि श्राद्धलक्षणविषये ग्रन्थकारेषु मतानैक्यं परिलक्ष्यते तथापि तेषां परिहारपूर्वकं ऋषिमहर्षिकृतानां बहूनां लक्षणानां विषये मयाऽधुना विचार्यते।

देशकालपात्राणां विवेचनापूर्वकं पितॄनुद्दिश्य विप्रेभ्यो यद्दीयते तत् श्राद्धमिति ब्रह्मपुराणोद्धृतं[1] वचनमनुमोदयन्ति श्राद्धप्रकाशकार-श्राद्धकल्पलताकार-श्राद्धमञ्जरीकार-माधवाचार्यादयः। तथा च तत्र वीरमित्रोदयस्य श्राद्धप्रकाशे[2]—

श्रद्धया दीयते यस्मात्तेन श्राद्धं निगद्यते।

श्राद्धकल्पलतायां[3]—"पित्रुद्देश्येन श्रद्धया त्यक्तस्य द्रव्यस्य ब्राह्मणैर्यत् स्वीकरणं तत् श्राद्धमिति"। पुनश्च श्राद्धकल्पतरौ[4] तु ब्राह्मणस्वीकारपर्यन्तं पित्रुद्देश्येन द्रव्यत्यागो विधीयते। यथा—"एतेन पितॄनुद्दिश्य द्रव्यत्यागो ब्राह्मणस्वीकारपर्यन्तं श्राद्धस्वरूपं प्रधान"मिति। "श्राद्धं नामादनीयस्य तत्स्थानीयस्य वा द्रव्यस्य प्रेतोद्देश्येन श्रद्धया त्यागः" इति [5]मिताक्षराकारेण विज्ञानेश्वरेण प्रतिपादितम्। एतस्मात्प्रमाणात् प्रतिसांवत्सरिकश्राद्धे श्राद्धलक्षणमिदं संगतिपरकं न वेति सुधीभिर्भाव्यम्। यतो हि षोडशश्राद्धं प्रेतोद्देश्येन क्रियते पित्रुद्देश्येन वा?

---

१. देशे काले च पात्रे च श्रद्धया विहिता च यत्।
पितॄनुद्दिश्य विप्रेभ्यो दत्ते श्राद्धमुदाहृतम्।। इति।
श्रा.प्र., पृ. ३; ६ श्रा.क.ल., पृ. ३; श्रा.म., पृ. २; प.म., पृ. २९९।

२. वी.मि. (श्राद्ध.), पृ. ७;

३. श्रा.क.ल., पृ. ३।

४. श्रा.क.त., पृ. ४;

५. याज्ञ. स्मृ., मिता, पृ. ७४।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

पूर्वोक्तकल्पतरुमतं श्राद्धक्रियाकौमुदीकारः न गणयति। यतो हि कल्पतरुलक्षण-मप्यनुपादेयं, संन्यासांगश्राद्धे देवश्राद्धे सनकादिश्राद्धे चाव्याप्तत्वादिति। रुद्रधरटिप्पणीयुतश्राद्धविवेके एवमन्यान्येष्वपि श्राद्धं नाम वेदबोधितपात्रालम्भनपूर्वकं प्रमितपित्रादिदेवतोद्देश्यको द्रव्यत्यागविशेषः'' इति लक्षणाच्छ्राद्धं वैदिकमिति प्रतिपादनानन्तरं यागलक्षणं परिलक्षितं न तु तत्र दानलक्षणं स्पष्टम्।

"मृतोद्देश्यको विप्रस्वीकारांगको द्रव्यत्यागः श्राद्धम्'' इति श्राद्धमयूखकाराः[2] प्रतिपादयन्ति। अत्र श्राद्धस्य यागरूपत्वं मृतोद्देश्यकवाक्यात् सिद्धम्। दानरूपत्वमपि विप्रस्वीकारशब्दादेव स्पष्टभावेनायाति। 'पितॄनुद्दिश्य द्रव्यत्यागः श्राद्धमिति विज्ञानेश्वरस्याभिमतम्[3]''। [4]श्राद्धप्रकाशकारः एवं गणयति यत्—"अत्रापस्तम्बादि-सकलवचनपर्यालोचनया प्रमितमात्रोद्देश्यकान्तत्यागविशेषस्य ब्राह्मणायाधिकरण-प्रतिपत्त्यकरणस्य श्राद्धपदार्थत्वं प्रतीयते''। शूलपाणिना[5] तु कल्पतरुप्रभृतीनां मतानि निराकृत्य "संबोधनपदोपनीतात् पित्रादीन् चतुर्थ्यन्तपदेनोद्दिश्य हविस्त्यागः श्राद्धमिति'' लिखितम्। सर्वेषां श्राद्धानां मुख्यत्वमभ्युपेत्य तेषां यत् सामान्यलक्षणं तदपि सम्बोधनपदोपनीतेन चतुर्थ्यन्तपदेनेत्यनयोर्लक्षणघटकत्वेन वैयर्थ्यात् समीचीनं नेति प्रतिभाति। कृष्णतर्कालङ्कारपादैरचेतननिष्ठफलभागित्वावच्छिन्नाभिसन्धान-पूर्वकत्वे सति प्रधानफलजनकत्वे च सति अग्निप्रतिपाद्यत्वेन उपविष्टद्रव्यत्यागः श्राद्धलक्षणनिष्कर्ष इत्यभिहितम्। शूलपाणिना अपि श्राद्धस्य यागरूपत्वं, होमरूपत्वं, दानरूपत्वं वेति बहुधाऽऽशंक्य विचारचातुर्य्या वितर्क्य च एवं विद्वान् पितॄन् यजेत्, पितृभ्यो दद्यादित्यादिप्रयोगात् यागदानोभयपरकत्वमिति विवेचितम्। यतो देवतोद्देश्येन द्रव्यत्यागो याग इति यागलक्षणात् पित्रादावपि तदसम्भवात् "पितरो देवता' इत्यत्र चतुर्थ्यन्तपदं संयोज्य स्वस्वत्वध्वंसोत्पत्तिरूप-परस्वत्वोत्पत्तिरिति दानलक्षणाद् दानमपि सिद्धम्, ब्राह्मणेषु तत् सङ्गतत्वाद् पित्रादीनां सुखार्थं यद् दीयते तदपि दानलक्षणत्वात् श्राद्धस्य दानरूपत्वमिति सिद्धम्।

कर्मलाकरेणापि[6] श्राद्धविषये उक्तं यत्—'ब्राह्मणस्वीकारान्तश्चतुर्थ्यन्त-पदोपनीतपित्राद्युद्देश्यकस्त्यागः श्राद्धमित्यर्थः''। तथा च तत्रैव—

होमश्च पिण्डदानञ्च तथा ब्राह्मणभोजनम्।
श्राद्धशब्दाभिधेयं स्यादेकस्मिन्नौपचारिकम्॥

---

१. श्रा.वि., पृ. १; ध.सा.ई., पृ. ११९६; श्रा.प्र., पृ. ४।
२. श्रा.म., पृ. २;
३. श्रा.दी., पृ. २।
४. श्रा.प्र., पृ. ४;
५. श्रा.वि., टीका, पृ. २६।
६. नि.सि., पृ. २६५।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

श्राद्धक्रियाकौमुद्यां[1] तु ग्रन्थकारमतानुसारम्—

"वेदबोधितसम्बन्धपदोपनीतोद्देश्यकतर्पणेतरः प्रधानो हविस्त्यागः श्राद्धमिति लक्षणम्"।

उत्कलीयसुप्रसिद्धप्राचीननिबन्धकारस्य गदाधरस्य[2] मतं यत्—"विप्रस्वीकार-पर्यन्तस्त्यागो द्रव्यस्य यः पितॄनुद्दिश्य मुख्यं श्राद्धं तत् तदंगमितरस्त्वन्यदिति" कालसार[3]वचनात् श्राद्धस्य यागरूपत्वं दानरूपत्वं च सिद्धम्। श्रद्धया परितुष्टभावेन नामगोत्रोच्चारणपुरस्सरं तुभ्यं संप्रदद इति कौमुदीकार[4]वचनात् तत्र केवलं दानसिद्धम्। "श्रद्धान्वितः श्राद्धं कुर्यादिति" गोभिलमतं निराकृतवान् रघुनन्दनः[5], नेदं केवलं सर्वमपि तु—

संस्कृतव्यञ्जनाद्यं च पयोदधिधृतान्वितम्।
श्रद्धया दीयते यस्मात् श्राद्धं तेन निगद्यते।। इति।

वीरमित्रोदयस्य[6] श्राद्धप्रकाशे यथा—
श्राद्धं तु स्वरूपतो दानं दानस्वरूपमेवेति।

तद्यथा बृहस्पतिः—
संस्कृतं व्यञ्जनाद्यं च पयोदधिघृतान्वितम्।
श्रद्धया दीयते यस्माच्छ्राद्धं तेन निगद्यते।।

ब्राह्मे—
देशे काले च पात्रे च श्रद्धया विधिना च यत्।
पितॄनुद्दिश्य विप्रेभ्यो दत्तं श्राद्धमुदाहृतम्।।

मरीचिः—
प्रेतान् पितॄनप्युद्दिश्य भोज्यं यत्प्रियमात्मनः।
श्रद्धया दीयते यत्तु तच्छ्राद्धं परिकीर्त्तितम्।।

नृसिंहपुराणे—
दिव्यपितृभ्यो देवेभ्यः स्वपितृभ्यस्तथैव च।
दत्त्वा श्राद्धमृषिभ्यश्च मनुष्येभ्यस्तथात्मनः।।

---

१. श्रा.क्रि.कौ., पृ. ४; २. का.सा., पृ. २९५।
३. श्रा.प., भूमिका, पृ. २।
४. नाम गोत्रं च उच्चार्य प्रदद्यात् श्रद्धयान्वितः। परितुष्टेन भावेन तुभ्यं संप्रददेति च।।
५. श्रा.त., पृ. ३; ६. वी.मि., श्राद्ध, पृ. ३।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

पुलस्त्यवचनं निराकृत्य श्राद्धपदस्य यौगिकनामधेयत्वे उपर्युक्तगोभिलसूत्रं पुलस्त्यवचनं च प्रमाणयति श्रद्धान्वित इत्यादिना। न च श्रद्धया श्राद्धभिन्ने अन्नादेर्दाने अव्याप्तिरिति वाच्यं, श्राद्धपदस्य रुढ्यर्थत्वावच्छेदकस्य विजातीयदानत्वस्य तत्र सत्त्वाभावात्। श्रद्धान्वितः श्राद्धं कुर्वीत इत्यत्र श्रद्धान्वित इति श्रवणात् श्राद्धपदस्य यौगिकत्वं, श्राद्धमिति श्रवणात् रूढत्वं च प्रतीतम्। अतः श्राद्धपदं योगरूढमित्युच्यते। श्राद्धतत्त्वस्य [२]भूमिकायां "अचेतननिष्ठत्यागजन्यफलभागित्वावच्छिन्नविषयतया बल्यभिसन्धानपूर्वकहविस्त्यागः श्राद्धम्" इत्येवं दृश्यते।

श्रद्धापूर्वकं भोज्यं प्रेतादीनुद्दिश्य यद् दीयते तत् श्राद्धमिति मरीचिना प्रतिपादितम्। यथा—

> [३]प्रेतं पितरमुद्दिश्य भोज्यं यत् प्रयतात्मनः।
> श्रद्धया दीयते यत् तत् श्राद्धं परिकीर्त्तितम्॥

स्मृतिर[४]त्नावल्युक्तश्राद्धलक्षणे न केवलं पिण्डदानस्य प्राधान्यं परिलक्ष्यतेऽपि तु तत्र तदंग-होमविधानमपि सिद्धान्तितम्। यथा—

> होमश्च पिण्डदानञ्च तथा ब्राह्मणतर्पणम्।
> श्राद्धशब्दाभिधेयं स्यादन्यदप्युपचारतः॥

[५]स्मृतिसंग्रहोक्तवचने यजुर्वेदिनां कृते च एतद् द्वयं व्यवस्थापितम्। यथा—

> यजुषां पिण्डदानन्तु बह्वृचां द्विजतर्पणम्।
> श्राद्धशब्दाभिधेयं स्यादुभयं सामवेदिनाम्॥

मेधातिथिस्तु अमावास्यायां पित्रर्थं यत्कृतं तच्छ्राद्धमिति उक्तवान्। अमावास्यायां यत् क्रियते तत् पार्वणश्राद्धपरकत्वात् प्रेतादिकृतेऽसंगतिभावात् तत् श्राद्धं न वेति तत्तु सुधीभिर्भाव्यम्। [६]धर्मसिन्धुकार-काशीनाथोपाध्यायमतेन पित्रादीनुद्दिश्य विहिते काले देशे पक्वान्नामान्नहिरण्यान्यतमद्रव्यस्य विधिना दानं श्राद्धमिति। ते तु त्याग एव श्राद्धमिति प्रतिपादयन्ति। तन्न साधु, प्रकृतं तु— "पितॄनुद्दिश्य विप्रेभ्यो दत्तं श्राद्धमुदाहृतम्" इत्यवगम्यते। यथा तु श्राद्धचन्द्रिकायाम्—

> प्रमीतस्य पितुः पुत्रैः श्राद्धं देयं प्रयत्नतः[७]।

इति स्मृत्य[८]न्तरवचनप्राबल्याद् दानकर्मणो द्रव्यस्यैव श्राद्धत्वावगमात् त्यज्यमानद्रव्यमेव श्राद्धमिति कथनमपि नासङ्गतमित्यलं बहुना।

●

---

१. श्रा. त., पृ. ३;
२. श्रा.त., भूमिका, पृ. १।
३. श्रा.त., भूमिका, पृ. १;
४. वि.पा., ५, पृ. ३५०।
५. नि.सि., पृ. २६५;
६. ध.सि., पृ. ७३६।
७. श्रा.च., पृ. ५;
८. श्रा.प., पृ. २०।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

साहित्यशास्त्रे चिदानन्दसमीक्षणम्

प्रो. छोटेलालत्रिपाठी
अध्यक्षः, साहित्यविभागस्य
सम्पूर्णानन्दसंस्कृतविश्वविद्यालये
वाराणस्याम्

❋ ❋ ❋

धर्मार्थकाममोक्षप्रभृतिप्रसाधिन्यां भारतीयायां सांस्कृतिकपरम्परायामनादि-निधनस्य ब्रह्मणो निर्वचनमनिर्वचनीयतयोपबृंहितमार्षैः सारतया सरसत्वे-नैवोपोद्बलितम्। इदमस्य ब्रह्मणः पार्यन्तिकतयानन्दापरपर्यायभूतं सरसत्वं समेषां लोकानामभिलाषाविषयतां प्राप्नोतीत्याकलय्य सर्वेऽपि प्राक्कालसम्भवा वेदानुशीलनकृतधियस्तानाश्रित्याविच्छिन्नतया स्व-स्व-विवक्षयोपनिषदारण्यक-ब्राह्मण-संहिता-स्मृति-पुराण-दर्शन-संज्ञया विषयान् संकलय्य निबन्धनतारतम्येन स्वतः परतश्च विविच्य ब्रह्मणोऽपरपर्यायरूपेण प्रतिष्ठापयन्ति। 'एकोऽहं बहु स्याम्' इति श्रुतिस्वारस्येनैतेषु निबन्धनेषु तद् ब्रह्म मूर्तामूर्तरूपेण निरुपपादितः। मूर्तोपासनायां भौतिकसाधनानां प्रयोजकतावशात् तेषां तदाधारभूतसामग्रीणामपि च परमाणुतः प्रारभ्य परममहत्पर्यन्तं विवेचनं प्रस्तूयते। काल्पनिकमिदं विवेचनमिति नास्ति सम्भावना, यतो हि चिरन्तनैर्यया च पद्धत्या तदनुभूतं ता अपि निरूपिताः, अनुभवैकगम्यत्वात्। अमूर्तोपासना तु ज्ञानात्मिकाऽबहिर्भूता परब्रह्मात्मब्रह्मणो भेदाकरम्बितेति। अस्यामुपासनायां भौतिकसाधनानां नापेक्षेति ऋषयो ज्ञानिनस्तत्र प्रवृत्ता भवन्ति। यथाऽमूर्तसाधनयाऽनुभवैकगम्यता तथैव मूर्तसाधनाया अपि तत्रैव पर्यवसानमिति। अमूर्तत्वमेव यदानुभवविषयतां प्राप्नोति तदा तस्य चिदानन्दात्मकत्वं ब्रह्मानन्दात्मकत्वं वेत्युपाधिरिति पूर्वपुरुषाः प्रमाणयन्ति स्म। चिदानन्द एव रसापरपर्यायः "रसो वै सः", "रसं लब्ध्वा ह्येवायमानन्दीभवति' इति श्रुतिस्वारस्येनावगच्छामः। अयमेव चिदानन्द आलङ्कारिकाभिमतो रसपर्यायभूतो लक्ष्यलक्षणग्रन्थेषु वाल्मीकादारभ्याविच्छिन्नतया भग्नावरणाचित्स्वरूपः काव्यात्मेति व्यवस्थितो वर्तते। तत्र व्यापकत्वेन व्यावहारिके जगति प्रयुज्यमानमिदं चैतन्यं व्युत्पत्तिकृद्भिर्व्याकृतं व्यवस्थापितञ्च प्रतिपादकत्वेन विभिन्नेष्वर्थेषु। तथा हि—चैतन्यं

CC-0. Sampurnanand University Collection. Digitized by eGangotri

नाम, चिद्-धातोः ल्युट्प्रत्ययान्तं चेतनपदं विशेषणतया सिद्ध्यति। अयमेव यदा पुंसि प्रयुज्यते तदा जीवात्मत्वेन परमात्मत्वेन मनोबोधकत्वेन वाऽवलोक्यते। एवमेव बुद्धि-विवेक-प्राण-बोध-संज्ञा-धारणा-जीवनादिसन्दर्भेषु भूयो भूयः सम्प्रयुक्तः चेतनाशब्दोऽपि टाबन्तः चिद्-धातोः 'युचि'-प्रत्यये कृते सिद्ध्यति। एवमपि हृदयान्तःकरणमनःपर्यायावबोधकः चेतश्शब्दः चिद्धातोरसुनि-प्रत्यये कृते सति फलीभूतो भवति। अस्मादेव चेतनशब्दात् ष्यञ्-प्रत्यये कृते निष्पद्यमानं चैतन्यं दार्शनिकैः परमात्मत्वेनाभिमतः।

द्वादशशाखासु प्रसृतं भारतीयदर्शनं दार्शनिकैर्यथाभिमतं विभाजितं सत् पूर्वमीमांसोत्तरमीमांसासांख्ययोगन्यायवैशेषिकेति संज्ञितयास्तिकतया विभ्राजते। वेदप्रामाण्याधीनानीमानि दर्शनानि तममूर्तमात्मतत्त्वं परमात्मतत्त्वञ्चाभिन्नत्वेन साधयन्ति। वेदप्रामाण्याद्बहिर्भूतानि लौकायतिकार्हतसौगतपदवाच्यानि त्रीणि नास्तिकदर्शनानि ख्यातानि वर्तन्ते। तत्र सौगतदर्शनं तावन्माध्यमिकविज्ञानवादि-वैभाषिकसौत्रान्तिकाख्यचतुश्शाखं प्रसिद्धं चार्वाकजैनदर्शनाभ्यां सह षट्शाखतां करोतीति पूर्वगणनासमन्वयः। इमानि सर्वाण्यपि द्वादशदर्शनानि तं चैतन्यं पदे पदे विधिनिषेधविधिना स्मरन्ति स्मारयन्तीति। येनेदं तथ्यं निर्गलति यदजस्ररूपेण प्रवहमानाया भारतीयदार्शनिकचिन्तनधाराया अजस्रं स्रोत इव चैतन्यमिदं प्रतिष्ठते।

दार्शनिकपरम्पराया मेरुदण्डोऽयं चैतन्यशब्दः काव्यशास्त्रीयचिन्तन-धारायामन्तःप्रविष्टो विवृत्तिसापेक्षश्चेति प्रथमं भर्तृहरिणा शब्दब्रह्मावधारणां पुरस्कृत्य—

अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम्।
विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः ॥[1]

इत्यनया कारिकया व्यवस्थापितं यद् भारतीयदर्शने परब्रह्मणो यत् स्वरूपं निरुपपाद्यते तत्स्वरूपमेव व्याकरणदर्शने (शास्त्रे) शब्दब्रह्माभिन्नत्वेन प्रतिष्ठाप्यते। इदमपि शब्दतत्त्वमक्षराख्यं ब्रह्माप्यनादिनिधनमेव। यथा वेदान्तिनां नये ब्रह्म चतुर्विधसृष्टिभावेन सगुणीभूय विवर्तते, तथैवेदं शब्दब्रह्म वाङ्मयेऽर्थभावेन विवर्तते। तस्मात् शब्दब्रह्मण एव जगतः प्रक्रिया प्रारभते, तथा चानेनैव वाङ्मयीसृष्टिर्विस्तारं प्राप्नोति। परब्रह्मशब्दब्रह्मणोर्विवर्तरूपायाः सृष्टेः समीक्षणावसरे वयमनुभवामो यत् परब्रह्मणः सृष्टौ येयं पिण्डजाण्डजस्वेदजोद्भिज्जमयी जनिरव-

---

१. वाक्य. ब्र. का.-१।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

लोक्यते सा क्षणभङ्गुरैव। नियतवर्षायुर्जीविनः सर्वेऽपि प्राणिनः। अन्ये तु कतिपयमासदिवसपर्यन्तमेव जीविनः। किं बहुना जलसिक्तान्यपि प्राणिनां प्राणरक्षकाणि यवगोधूमादीनि कतिपयमासानन्तरमेव परिशेषमाप्नुवन्ति। वृक्षादिका अपि नापरिमितवर्षजीविनः संदृश्यन्ते। एवं हि नात्र जगति किमपि वस्तु चिरकालपर्यन्तं जीवनं धारयति। निखिलोऽपि पाञ्चभौतिकः लोकोऽयं युगान्तकाले लयं प्राप्नोति। एवं भूताया अपि तस्याः सृष्टेर्वाङ्मयमक्षतमेव तिष्ठति। वस्तुतः लोकेऽस्मिन् यथामृतत्वस्यानादिकालादेव प्रतिष्ठाऽस्ति, न तथा केनचिद् दृष्टं निपीतं वा, तदापि तस्यास्तित्वं सर्वैरङ्गीक्रियते। तस्य मूर्तरूपमपि लोके नोपलभ्यते। शब्दस्यैवैतन्माहात्म्यं यदमृतं लोके प्रतिष्ठितमस्ति। अमूर्तपदार्थानामपि निरवच्छिन्नरूपेण प्रवर्तितोऽयं प्रतीतिप्रवाहो वाङ्मयरूपिण्याऽमृतधारया सत्तामाप्नोति। इयं वाङ्मयधाराऽक्षता वर्तते। अमृतरसास्वादानुभवोऽनास्वादितत्वादप्रतीतमेव किन्तु वाङ्मयेन स्यन्दितममृतं लोके समुपलब्धान् पेयान् शितासम्मिश्रितान् गोदुग्धादीनतिशय्य सुखमधितिष्ठति। तदुक्तपन्थानमादृत्यान्यत्र समाधिजन्यानन्दरूपेण, अन्यत्र काव्यानन्दरूपेणाथ च रतिसौख्यरूपेण निपीतैस्तेनामूर्तेनामृतेन तस्यास्वादस्य तुलना विधीयते। अनया तुलनयानास्वादितमप्यमृतमास्वादितमिवाभाति। शब्दब्रह्मणः प्रवर्तितानां सर्वासामपि विद्यानां सारभूतमिदं काव्यशास्त्रीयं चिन्तनं साक्षात् शब्दब्रह्मणः प्रवर्तितमिति कल्प्यते[1]।

शब्दब्रह्म एवाक्षरब्रह्म। तस्मादेव काव्यशास्त्रीयं चिन्तनं प्रारभते। शब्दब्रह्मनिरूपकं शब्दशास्त्रं व्याकरणशास्त्रं सर्वविद्यानां मूलं वेदानाञ्च मुखम्। शब्दव्याकृतिसम्बद्धशास्त्रमिदं 'अपशब्दं मा प्रयुक्ष्महीत्यध्येयं व्याकरणम्', 'एकः शब्दः सम्यग्ज्ञातः सुप्रयुक्तः स्वर्गे लोके च कामधुक् भवति' इति प्रयोजनं पुरस्कृत्य प्रयोगयोग्यान् रमणीयान् शब्दान् सृजति। उक्तं हि ध्वनिकारेण 'प्रथमे हि विद्वांसो वैयाकरणाः, व्याकरणमूलत्वात् सर्वविद्यानाम्'[2]। किन्तु ललितोचितसन्निवेशमधुरकाव्यं न शब्दार्थशासनज्ञानमात्रेण परिस्फुरति। तत्तु तत्त्वज्ञानामेव हृदि परिस्फुरति। तथा हि—

शब्दार्थशासनज्ञानमात्रेणैव न वेद्यते।
वेद्यते स तु काव्यार्थतत्त्वज्ञैरेव केवलम्[2]॥

---

१. स्तोतुं प्रवृत्ता श्रुतिरीश्वरं हि न शाब्दिकं प्राह न तार्किकं वा।
ब्रूते तु तावत् कविरित्यभीक्ष्णं काष्ठां ततः सा कविता परा नः॥

२. ध्वन्या. उ. १-७।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

अपि च तत्र महाकवेः—

सोऽर्थस्तद्व्यक्तिसामर्थ्ययोगी शब्दश्च कश्चन।
यत्नतः प्रत्यभिज्ञेयौ तौ शब्दार्थौ महाकवेः[1]॥

वाच्यार्थस्तु रसमधुरकाव्ये केवलमुपायभूतः। यतो हि—'लोकोत्तरवर्णनानिपुणकविकर्म काव्यम्', लोकोत्तरत्वसाधनाय काव्ये गुणालङ्काररीतिवृत्तिप्रभृतीनां प्राचुर्यमथवा भाषायाः सौन्दर्यं पदानां मैत्री नवीनकल्पनाचातुर्यं वर्णनावैचित्र्यं शब्दप्रयोगेऽद्भुतमसादृश्यमिति भवन्त्युपायनानि। एवं वैयाकरणानामभिधादिशक्तयः स्फोटसिद्धान्तश्चोपायतयाऽभिमतः। एतत्सर्वमभिसन्धायैव काव्यमीमांसाकारेण राजशेखरेण सकलविद्यास्थानैकायतनं पञ्चदशं काव्यं विद्यास्थानमिति व्यवस्थापितम्। एतेन व्याकरणशास्त्रमिव काव्यशास्त्रस्यापि समानोपयोगित्वं सिद्ध्यति। यतो हि निगूढतत्त्वावेदकेषु दर्शनग्रन्थेषु शास्त्रपरिशीलनपरिपक्वमतिवैभवानां प्रौढानां प्रवृत्तिः कामं स्यान्नाम, किन्तु तदितरेषां प्रवृत्त्यर्थं तु शास्त्राणां श्रव्यत्वं हृदयावर्जकत्वमपेक्षत एव। तदर्थं तु काव्यशास्त्रमेवेत्युक्तं प्राक्तनैः—

वाग्धेनुर्दुग्धमेतं हि रसं यद्बालतृष्णया।
तेन नास्य समः य स्याद्योगिभिर्गृह्यते न यः॥ भट्टनायकः।

चतुर्वर्गफलप्राप्तिः सुखादल्पधियामपि।
काव्यादेव यतस्तेन तत्स्वरूपं निरूप्यते॥[2]

धर्मार्थकाममोक्षेषु वैचक्षण्यं कलासु च।
करोति कीर्तिं प्रीतिञ्च साधुकाव्यनिषेवणम्॥[3]

इति। एवं यत्खलु चैतन्याधिष्ठानं व्याकरणशास्त्रे शब्दब्रह्मरूपेण प्रतिष्ठितं तदेव साहित्यशास्त्रे रसब्रह्मतयाऽनुभूयते।

इदमाद्यं पदस्थानं सिद्धिसोपानपर्वणाम्।
इयं सा मोक्षमाणानामजिह्मा राजपद्धतिः॥[4]

तस्माद्यः शब्दसंस्कारः सा सिद्धिः परमात्मनः।
तस्य प्रवृत्तितत्त्वज्ञस्तद् ब्रह्मामृतमश्नुते॥[5]

---

१. ध्वन्या. उ. १-८;
२. साहित्यदर्पणे, परि. १,२।
३. साहित्यदर्पणे, परि. १,२;
४. वाक्यपदीये-श्लोक-सं. १६।
५. वाक्य. ब्र. १३२।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

इदं ब्रह्मामृतमास्वाद्यत्वात् काव्यशास्त्रे रसपर्यायभूतममृतायैव कल्प्यते परमानन्दविश्रामधामत्वात्। 'ऋषीणां पुनराद्यानां वाचमर्थोऽनुधावति' इत्युपनिषद्वाक्येन प्रतीयते यदर्थः शब्दानुगामी भवति। शब्दप्रयोगचातुर्येण प्रौढार्थप्रतीतौ व्यंग्यप्रतीतिः सुलभा भवति। इयं प्रतीतिः गुणालङ्कारादिमच्छब्दादपि भवति, अर्थादपि भवति, अतो द्वयोरपि शब्दार्थयोः काव्यात्मनः शरीरसंरचनायामुपादानत्वमादृत्य काव्यपदार्थाभिधानमुद्घोषितं भवति। उभयोः शब्दार्थयोः काव्यत्वे 'सहृदयहृदयाह्लादिशब्दार्थमयत्वमेव काव्यत्वमिति' ध्वनिकारेण ध्वन्यालोके व्यवस्थापितम्। शब्दार्थयोस्तु नित्यसम्बन्धः। शब्दो नार्थं विना तिष्ठति, अर्थोऽपि शब्दं विना न रमते। उभयोर्मध्ये नान्यतरः स्वातन्त्र्येण प्रभवति। उभयोरविनाभावतया शाश्वतिकं साहचर्यमविकलं सममुपकारकत्वं मनसि निधायैवालङ्कारिकैः 'शब्दार्थौ काव्यमिति' परिभाषितम्।

यद्यप्युभयोरपि शब्दानुशासनकाव्यानुशासनयोः समानरूपेण शब्दार्थौ विवेच्यविषयभूतौ, तथापि तत्रायं विवेको यद् व्याकरणशास्त्रे प्राधान्येन शब्दस्यैव स्वरूपगतविवेचनाऽङ्गीक्रियते। व्याक्रियन्ते-व्युत्पाद्यन्ते शब्दा अनेनेति व्याकरणमिति व्युत्पत्त्या शब्दशुद्धिरेव व्याकरणशास्त्रस्य प्राधान्येन विषयभूता। काव्यानुशासनेऽर्थस्यैव प्राधान्येनापेक्षा भवति। शब्दप्रधानानि वेदशास्त्रादीनि, अर्थप्रधानानीतिहासपुराणादीनि, उभयोर्गुणभावेन व्यंग्यप्रधानानि काव्यनाटकादीनीति सुविचार्यैव राजशेखरेण काव्यानुशासनं व्यरचि। यतो हि—काव्यप्रयुक्तानां शब्दानां साधारणानामपि वाच्यार्थे यावल्लक्ष्यार्थो व्यंग्यार्थो वा न प्रतीयते तावन्न कापि प्रयोजकता श्रुतिगोचरीभूतानां शब्दानाम्। अत एव व्यंग्याभिप्रायकमेव मुख्यतया काव्यम्। तथापि शब्दाहरणं व्याकरणादेवेति तत्र सातिशयं श्रद्दधानोऽपि पण्डितराजः रमणीयार्थप्रतिपादकं शब्दं काव्यत्वेन स्वीकरोति।

प्रमेयसिद्धौ प्रमाणापेक्षा भवति। पदवाक्यप्रमाणादिसिद्धस्यैव पदार्थस्यास्तित्वं लोके प्रमाणितं भवति। तत्र पदपदार्थविवृतिनिरूपणपरं व्याकरणशास्त्रं प्रातिपदिकमर्थादनिष्पन्नावस्थायां वर्तमानः शब्दः पदार्थश्चेति द्वयमपि विषयतयाऽऽश्रित्य प्रवृत्तं वर्तते। वाक्यं वाक्यार्थश्चेति द्वयमपि 'आकांक्षायोग्यतासन्निधिवशात् प्रतिष्ठिताविति वाक्यार्थस्य तात्पर्यविषयीभूतत्वात्तात्पर्यविदनापरं मीमांसाशास्त्रं विवृणोति तद् वाक्यार्थतत्त्वमिति। द्वाभ्यामपि नये शब्दः साक्षात्सम्बन्धेनार्थमभिधास्यति सामीप्यादिसम्बन्धेन लक्षयति चेति शब्दस्य तेनैव क्रमेणाभिधालक्षणाशक्तिरप्यङ्गीक्रियते। अतः शब्दोऽप्यौपाधिकभेदेन वाचकलक्षकतयाऽभिमतः। काव्यशास्त्रीय-चिन्तनधारायां शक्यार्थलक्ष्यार्थाभ्यां

CC-0. Sampurnanand University Collection. Digitized by eGangotri

भिन्नस्य व्यंग्यार्थरूपस्यार्थस्य प्रकाशकत्वेनाभ्युपगतत्वात्त्रिविधार्थस्य प्रतिपादकत्वात् शब्दोऽपि त्रिविध एवाङ्गीक्रियते। तृतीयश्चार्थः काव्यार्थः व्यंग्यार्थो वा, तस्योपकारकत्वेनोपस्थितौ वाच्यलक्ष्यात्मकावुभावप्यर्थौ विवेचनीयौ भवतः। न केवलमिमावर्थाविव ध्वनिपदव्युत्पत्त्या ताभ्यां सहैव शब्दस्य, व्यंग्यस्याथ च काव्यसमवायस्यापि विवेचनाऽपेक्षते। एतत्सर्वमभिसन्धाय ध्वनिकारेण—

प्रतीयमानः पुनरन्यदेव वस्त्वस्ति वाणीषु महाकवीनाम्।
यत्तत्प्रसिद्धावयवातिरिक्तं विभाति लावण्यमिवाङ्गनासु ॥[1]

इत्यादिना प्रतीयमानार्थस्य काव्यात्मत्वं जीवातुभूतत्वं वेति संस्मारितम्। प्रतीयमानोऽर्थः तदुत्तरवर्तिभिराचार्यैः मम्मटादिभिः व्यंग्याभिधः ध्वन्यपरपर्यायः रसविश्रान्तिमुपगतः, रमणीयार्थस्वरूपः, रसमात्रतया वा प्रख्यापितः।

व्युत्पत्त्यभ्यासाभ्यां प्रखरीभूता प्रतिभा काव्यसंसारं सृजति। रमणीयशब्दप्रतिपादकत्वादेव साधुशब्दाः गृह्यन्ते। किन्तु न सर्वे, तेषु सर्वेष्वपि साधुशब्देषु केचनोत्कटकाव्यकोटिका आद्रियन्ते। शब्दप्रयोगेऽद्भुतमसादृश्यं कवेः प्रतिभावैलक्षण्यं प्रकटयति। यथा च कविः कर्पूरमिव विमलान् कोमलान् कर्कशान् कठोरान् कमनीयान् शीतलान् शब्दान् विचिन्वन् नवीनकल्पनाचातुर्येण काव्यरचनायां प्रवृत्तो भवति। कविप्रवृत्तेश्च फलं केवलं सहृदयहृदयाह्लाद्यर्थस्य प्रत्यायनमेव। तत्र शब्दार्थौ मुख्यशरीरघटकौ गुणालङ्कारादयोऽवयवभूताः, शक्तयश्च स्नुहीभूताः अर्थशरीरं प्रकाशयन्ति। प्राणास्तु प्रतीयमानोऽर्थः। यथेश्वरस्य विवर्तभूतमिदमखिलं जगत् लब्धसत्ताकं प्रकाशते; तथैव समग्रमिदं विश्वं शब्दस्य विवर्तमात्रमेव। अथवा वाङ्मयमिदं शब्दस्य विवर्तमात्रम्। वाङ्मयाधीनमिदञ्च विश्वम्। विश्वेऽस्मिन् यावन्तोऽपि जडचेतनपदार्थाः तेषां परिचयः शब्दद्वारैव भवति। शब्दैरेव विविधात्मनां पदार्थानां प्रतीतिर्भवतीति। शब्दोच्चरिते सति परिस्फुरितं ज्ञानं पदार्थेन सह तादात्म्यं स्थापयति। तादात्म्येनैव पदार्थप्रतीतिः। अन्यथा शब्दादसम्बद्धानामपि प्रश्रयः भवितुं शक्यते। अनुभवप्रामाण्यादिदं तथ्यं निर्गलितं भवति यत् पदार्थः तज्ज्ञानञ्चेत्युभयमपि शब्दस्यैव परिणामः मिथः तादात्म्यादिति। एवं यथा घटादिज्ञानं शब्दस्य परिणामः तथैव समग्रेयं सृष्टिरपि शब्दमात्रपरिणामभूतेति। यथोक्तं भर्तृहरिणा–

न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते।
अनुविद्धमिव ज्ञानं सर्वं शब्देन भासते ॥[2]

---

१. ध्वन्या. उ. १/४; २. वाक्यपदीये, १२३।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

शब्दस्य परिणामोऽयमित्याम्नायविदो विदुः ।
छन्दोभ्य एव प्रथममिदं विश्वं व्यवर्तत ॥[१]

अवैदिकानां सौगतानां विज्ञानवादिनामपि नये जगतः स्थूलस्वरूपस्य सत्ता नास्ति, विज्ञानमात्रमेव भासते। पाश्चात्यदार्शनिकाः वर्कलेमहोदयाः प्रत्यय-मात्रमेव सत्यं स्वीकुर्वन्ति। अनेन बीजभूतः शब्द एव तिष्ठति। शब्दात्प्रादुर्भूतमिदं जगत् तस्मिन्नेव प्रविलीयते। तथा हि—

ब्रह्मेदं शब्दनिर्माणं शब्दशक्तिनिबन्धनम् ।
विवृतं सर्वमात्राभ्यस्तास्वेव प्रविलीयते ॥

अनया कारिकया शब्दब्रह्मविवर्तभूतस्य काव्यशास्त्रस्य प्रतिष्ठा प्रतिज्ञाप्यते। तत्तु द्विधा विभक्तमङ्गाङ्गितया दृष्टिपथमवतरति। अङ्गान्तर्गतं गुणालङ्काररीति-वृत्तिप्रभृतयो विशेषाः प्रख्याप्यन्ते, अदोषत्वं तु काव्यस्य सर्वत्राव्याहतम्। दोषत्यागाय दोषप्रतीतिरावश्यकीति तस्याप्यभावतयाङ्गत्वमनुमतम्। ततः परं सर्वान् सौन्दर्याधायकानतिशयनिरतिशयात्मकस्य निखिलाङ्गानुप्राणकतयाङ्गितया सुस्थितस्य रसस्य काव्यात्मतयाऽवस्थितिरिति।

रसः काव्यस्यात्मेति भरतादारभ्य पण्डितराजपर्यन्तं सर्वैरप्यङ्गाङ्गिरूपकाव्य-पदार्थचिन्तनचणैरभिनन्द्यते। तस्येदं वैशिष्ट्यमात्मस्थानीयत्वं वा न काल्पनिकम्, अपितु कविभिरनुभवप्रमाणकमेव व्यवस्थापितम्। भरतनन्दिकेश्वरकोहलप्रभृतयस्तु तं ब्रह्मानन्दसहोदरकल्पं चैतन्याधिष्ठानभूतं काव्यामृतमामनन्ति। काव्यात्मत्वाङ्गीकारे सम्प्रदायान्तरवादिनोऽपि काव्ये रसस्यापरिहार्यत्वं स्वीकुर्वन्त्येव। तथा हि—

रसाद्यधिष्ठितं काव्यं जीवद्रूपतया यतः ।
कथ्यते तद्रसादीनां काव्यात्मत्वं व्यवस्थितम् ॥[२]

रसवद्दर्शितस्पष्टशृङ्गारादिरसं यथा ।
इह त्वष्टरसायत्ता रसवत्ता स्मृता गिराम् ॥[३]
मधुरं रसवद्वाचि वस्तुन्यपि रसस्थितिः ॥

'काव्यस्यात्मनि संज्ञिनि रसादिरूपे न कस्यचिद्विमतिः'। (महिमभट्टः)। महिमभट्टस्तु सर्वमपि व्यञ्जनाप्रपञ्चं व्याप्तिमत्वादनुमानेऽन्तर्भावयति। तत्र

---

१. वाक्यपदीये, १२०; २. प्रतिहारेन्दुः।
३. काव्यालङ्कारः।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

पर्वतस्याधःस्थितानां जनानामधिगतधूमावलोकनहेतुना वह्निज्ञानवतां वस्तुप्रत्यक्ष-सम्बन्धाभावात् न पाकः समुपलभ्यते। वस्तुना साक्षात्सम्बन्धं विना वस्तुनः स्वकीयत्वं विना नात्मसम्बन्धः, न च प्रीतिरेव परिस्फुरति। तत्कथं प्रत्यक्षतयाऽऽस्वाद्यमानस्यानुभवप्रमाणसिद्धस्य वस्तुनः परोक्षतयानुभवन्ति। आनन्दोऽपि तेष्वेव न घटते। प्रत्यक्षमेव वस्त्वाह्लादजनकं भवतीति रसः अनुमेय इति पक्षो न रुचिमुद्भावयति। तथापि नैयायिकाः रससत्तां सिद्धान्ततया स्तुवन्ति।

आनन्दावाप्तिः काव्यस्य चरमं फलम्, आनन्दसमुद्भवस्तु रसास्वादनेनैव समुज्जृम्भते। रसास्वादनसमुद्भूतं विगलितवेद्यान्तरानन्दमिति मम्मटभट्टाः निर्दिशन्ति। रसप्रतीतिरपि विभावादिपरम्परयाऽङ्गोपाङ्गं स्पृशन्ती काव्य एव विश्रमते। एवं समेषां काव्याङ्गानां रसपुरस्सरमानन्द एवान्तःपातिता सिद्ध्यति। वैचित्र्यमात्र-बोधकानामलङ्काराणां व्यञ्जकत्वेऽपि व्यंग्यार्थदशायां रस एवान्तःपातिता पर्यवसानं वेति ध्वनिकारा व्यवस्थापयन्ति।

रसानुकूलकाव्यशरीरोपकर्त्री रीतिरपि नात्मपदं स्पृशति। कुन्तकाभिमता वैदग्ध्यभङ्गीभणितिस्वरूपा प्रसिद्धाभिधानव्यतिरेकिणी वक्रोक्तिरपि रसचर्वणाजनि-कैवेति। तथा हि—

शब्दार्थौ सहितौ वक्रकविव्यापारशालिनि।
बन्धे व्यवस्थिते काव्यं तद्विदाह्लादकारिणि ।।इति।।

आह्लादस्तु परमानन्दापरपर्यायः, तदर्थमेव महिमभट्टः कुन्तकश्चेत्युभावपि कृतप्रयत्नौ वर्तेते। यः कश्चित् प्रयासः प्रयत्नः काव्ये आनन्दावाप्तये साध्यते चेत् स सर्वोऽपि काव्याङ्गत्वेनैव तिष्ठति। एवं वक्रोक्तिरपि काव्योत्कर्षायैव प्रवर्तते।

लोकोत्तरचमत्कारिवैचित्र्यसिद्धये।
काव्यस्यायमलङ्कारः कोऽप्यपूर्वो विधीयते।[1] (कुन्तकः)

प्रसिद्धं मार्गमुत्सृज्य यत्र वैचित्र्यसिद्धये।
अन्यथैवोच्यते सोऽर्थः सा वक्रोक्तिरुदाहृता ।।[2] (महिमभट्टः)

यदुक्तमन्यथावाक्यमन्यथाऽन्येन योज्यते।
श्लेषेण काक्वा वा ज्ञेया सा वक्रोक्तिस्तथा द्विधा ।।[3]

---

१. वक्रोक्तिजीवितम्; २. वक्रोक्तिजीवितम्।
३. का.प्र. ९.१।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

इति साम्प्रतिका वक्रोक्तिविवेचका विद्वांसो तत्त्वतो न रससत्तां सहृदयहृदयादपाकर्तुमुत्सहन्ते। अतो वक्रोक्तेः वैचित्र्यमात्रनिष्पादकत्वाद्रसाङ्गतयैव प्रतिष्ठाऽऽकलयितव्येति। एवमेव क्षेमेन्द्राभिमतमौचित्यमपि प्रस्थानतया परिशीलितमपि न रसस्थानीयत्वं भजते। अनौचित्यं रसभङ्गस्य कारणम्, अनौचित्यं नाम काव्यस्योपनिबन्धने कविसमयपरिपालनव्युत्क्रम एव। व्युत्क्रमश्चायं मुख्यार्थस्य रसस्यापकर्षरूपत्वाद् दोषाय कल्प्यते। यथोक्तमानन्दवर्धनेन–

अनौचित्यादृते नान्यद्रसभङ्गस्य कारणम्।
औचित्येनोपनिबन्धस्तु रसस्योपनिषत्परा ॥[१]

एवमौचित्यं नाम मर्यादापालनम्। तां विना के कवयः नोपहास्यतां प्राप्नुवन्ति? एवं रसाद्यभिव्यक्तये प्राक्कविसमयेन सह लोकौचित्यपरिपालनं नितरामावश्यकं भवति। यतो हि ततः अनुप्राणिताः गुणालङ्कारादयो रसोत्कर्षे सत्क्रिया भवन्ति। कविसमयपरिपालनेन लोकौचित्यानुसरणेनैव 'पदैकदेशरचना-वर्णेभ्यश्च रसादयोऽभिव्यक्ता भवन्ति। अपि च गुणालङ्कारादयः तं विना न शोभां विस्तारयन्ति, इति कार्यकारणभावपरिकल्पने धर्मधर्मिभावपरिकल्पनेन काव्यात्मतत्त्वोत्कर्षकानां नियामकधर्मतया सर्वत्र व्यापकमौचित्यं सङ्गच्छते।

एवं सर्वाण्यपि प्रस्थानानि रसपर्यवसितानीति सहृदयहृदयप्रमाणकम्। प्रस्थानप्रवर्तका अपि रससत्तामनतिक्रम्यैव स्व-स्वाभिमतानुपोद्बलयन्ति। उपोद्बलनमिदं रसपर्यायपरिकल्पनं तन्तुना पटज्ञानमिवोपलक्षणं वेति। उपलक्ष्यमाणस्तु रस एव। रसस्त्वपरपर्यायरहित एव रसत्वेन सर्वशास्त्रानुमोदितः क्रियाकल्पामृतकल्पः सर्वालङ्कारिकाभिमतः काव्यात्मभूतः कश्चिद् अपूर्वपदार्थः सिद्ध्यति। वस्तुतः काव्ये कामं सन्तु गुणालङ्काररीतिवृत्त्यौचित्यादयः तदात्मस्थानीयाः किन्तु चैतन्याधिष्ठानस्पर्शशून्यास्ते नालङ्कार्यपदवीमधितिष्ठन्तीति। 'भग्नावरणा चिदेव रसः' तत्कथं काव्याश्रिताः काव्यधर्माः चित्स्वरूपं सङ्क्रमितुं सक्षमाः भवन्ति गुणौचित्यादयः। यथा मनोरथपदेन मनोरथत्वाकारेण सर्वे मनोरथाः साक्षात्सम्बन्धेन प्रतीता भवन्ति, तथैव औचित्यपदेनौचित्याकारेण सर्वमप्यौचित्यं काव्यगतं शब्दद्वारैव प्रतीतं भवतीति न तस्यात्माधिष्ठानत्वम्। अप्पय-दीक्षितपण्डितराजाभ्यामपि नेदं मनागपि भावनाविषयीकृतम्। यथा ब्रह्मणः निर्वचनं तं निर्वचनपूर्वकालिकं प्रकाशयति, तथैव रसस्याऽपि व्याख्यानात्प्रागेव प्रतिष्ठासीदिति रामायणादिषु प्रत्यक्षमनुभवामः। यो हि रसः, स एव काव्यस्यात्मा।

---

१. ध्वन्या. उ. ३, पृ. ३६२।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

यो हि काव्यस्यात्मा स अनादिः परिमितेतरः काव्यजन्यः कविसहृदयनिष्ठः। औचित्यन्तु रचनागतधर्मविशेषः व्युत्पत्त्यभ्यासाभ्यामेव सिद्ध्यति संस्कार-निरपेक्षत्वादिति। एवं रसपदवाच्यवस्तुनः रसपदार्थस्य वा परिचयार्थमुत्सुकानां 'कोऽयं रसः?' 'किं स्वरूपम्', 'कथं काव्यात्मत्वम्?' 'कथं वा ब्रह्मानन्द-सहोदरत्वम्?' 'चैतन्येन रसस्य सम्बन्धः कीदृशः'? इति प्रश्नानां समाधाने सत्वरं साहित्यशास्त्रं प्रवृत्तमस्ति।

रसशब्दस्तु ऋग्वेदे द्रवपदार्थकः सोमाद्यरण्योपलब्धानां वनस्पतीनाम-लौकिकसामर्थ्यसम्पन्नानां समुद्गारितासनार्थं प्रयुक्तः, जलार्थमपि वेदेषु रसशब्दः व्यवहृतः। वेदानामिवानादिरूपः, तस्मादेव प्रवृत्तः रसशब्दः व्याख्याभागेषूपनिषत्सु 'रसो वै सः', 'रसं ह्येवायं लब्ध्वाऽऽनन्दीभवति' इति श्रुतौ ब्रह्मापरपर्यायेणैव तिष्ठति। एवं हि परमानन्दात्मकः परब्रह्मस्वरूप इति विचारकाणां बुद्धि-विषयतामुपेत्य रमणीयत्वेन विगलितवेद्यान्तरेष्वन्येष्वानन्देषु काव्यादिजन्येषु ब्रह्मानन्दसहोदरेषु सुखेष्वपि तस्य प्रवृत्तिरवलोक्यते। रसास्वादनप्रकारस्तु विषयसंगत्या ब्रह्मवादिभिरालङ्कारिकादिभिश्च अनेकधा व्याकृतः। साधकः निर्विकल्पकसविकल्पकसमाधौ वा विगलितवेद्यान्तरमानन्दस्वरूपं परब्रह्मानुपश्यति। समाध्यवस्थैव रसास्वादनावस्था, आनन्दस्य रसास्वादनसमुद्भूतत्वात्। रसास्वादन-समुद्भूतायाः विगलितवेद्यान्तरतायाः फलं यत् साधकः परमानन्दमनुभवति। रसास्वादनपरमानन्दयोर्भेदशून्यत्वादभिन्नत्वेन प्रतीतिरिति। वेदान्ते वा साहित्यशास्त्रे वा 'रस्यते आस्वाद्यत इति रसः', तत्रास्ति विलक्षणा काचिद्रसनपरम्परा (प्रक्रिया) या च चर्वणापरपर्याया तया तदाकाराकारितचित्तवृत्तिरुपजायते। अस्यामवस्थायां ज्ञातृज्ञेयज्ञानानां भेदशून्यत्वान्न पार्थक्यप्रत्ययः। विलक्षणेयमनुभूतिरन्यानुभूति-विलक्षणा विकल्पशून्या केवलमात्मपर्यवसितेति। अत्र विषयविषयिणोः अभेद एव वैलक्षण्यम्। अथवा निर्विषयात्मिकायाः प्रतीतेरत्र प्राधान्यम्। पार्थक्य-विनाशोत्तरकालिकीयं प्रतीतिरेव विविधाभिः संज्ञाभिः संज्ञिता वेदान्तिनां नये पक्वापक्वयोगिनां निर्विकल्पकसविकल्पकसमाधिरूपा, शैवदर्शने शिवात्मिका, मीमांसानये क्रियासाध्याऽपूर्वफलात्मिका, बुद्धत्वं बौद्धदर्शने, अनुमेयात्मिकेति नैयायिकाः, अर्हत्वं साधयन्तो जैना अप्यनुभवन्त्येव कमप्यपूर्वमिति। इयमवस्था पारलौकिकी, तद्भिन्ना लौकिकी, उभाभ्यां भिन्ना काचिदन्या रमणीया रमणीयफलोद्भाविका काव्यसामग्रीजन्या लोकोत्तराऽपि समाध्यवस्था सप्रमाणं साध्यतेऽनुभाव्यते सहृदयैः काव्यशास्त्रनदीष्णैः। अस्यामवस्थायां ब्रह्मानन्द-सहोदरत्वानुभूतिर्भवतीति सा रमणीया, लोकोत्तराह्लादकल्पा, लौकिका-

CC-0. Sampurnanand University Collection. Digitized by eGangotri

लौकिकसुखभिन्नस्वरूपा संज्ञिता वर्तते। पार्थक्यप्रतीतिशून्यत्वे अपार्थक्यमलौकिकत्वं, पार्थक्यप्रतीतिपुरस्सरं पदार्थप्रतीतिः लौकिकत्वम्। अलौकिकप्रतीतिः निर्विषया, लौकिकप्रतीतिः सविषया, एकस्याः प्रतीतिकालेऽपरस्या अभावः। परन्तु काव्यशास्त्रीयचिन्तनधारायां न तथा। निष्कर्षतया वक्तुमिदं समुचितमेव यत् लौकिकमिन्द्रियजन्यं सर्वमपि ज्ञानं पार्थक्ययुक्तमेव भवति। 'अहं घटं वेद्मि' इत्यत्राहं ज्ञाता, घटो ज्ञेयः, घटं वेद्मि ज्ञानम्। अत्र त्रयोऽपि पृथक्तया प्रतिभासन्ते। ब्रह्मानुभवे तदेव तिष्ठति, अन्यत् सर्वं तिरोधत्ते। तिरोधानमेवात्मातिरिक्तानां विषयाणां कैवल्योपलब्धिः, अनन्तरं कैवल्याभिन्नस्यानुभवः। ब्रह्मरूपतामुपगतं भेदात्मकं ज्ञानं सत्त्वोद्रेकप्राबल्यात् निर्विशेषेण भासते। समुज्जृम्भमाणोऽयमखण्डावबोधः पानकरसकल्पः विविधस्वादसहकृतः, अन्यावबोधविलक्षणः कश्चिद्रसाख्यः पदार्थः (मानसावबोधः) चर्वणाख्यः साहित्यशास्त्रेऽपि प्रतिष्ठते। इयं चर्वणा विविधवस्तुस्वादसहकृतपानकरसवदलौकिकानन्दनिष्यन्दिनी लौकिकालौकिकानन्दमध्यवर्तिनी स्वप्रकारात्मिकेति विद्वांसो ब्रूयुः। यथा पानकरसे घटकद्रव्याणां समवायो कामपि स्व-स्वास्वादभिन्नां विलक्षणां चर्वणां जनयति तथैवात्रापि काव्यरसचर्वणायां विभावादिकानां सङ्घटनाजनितत्वं स्वीक्रियते। इयञ्च चर्वणा रसास्वादापरपर्याया। भरतादिभिश्च तथैव व्याकृता चेति। तथा 'हि—

'नहि रसादृते कश्चिदर्थः प्रवर्तते'। विभावानुभावसञ्चारिसंयोगाच्च रसनिष्पत्तिः।

भरतोक्तरससूत्रं चर्वणाव्याख्यानबीजम्। सर्वेऽपि काव्यशास्त्रीयवादाः रससूत्रमवलम्ब्यैव विजृम्भिताः। तत्र भरतमुनेः व्याख्यानं पुरस्कृत्य विविच्यमाने सति प्रतीयते यत् रामायणनाट्यशास्त्रयोः लक्ष्यलक्षणग्रन्थयोः विविच्यमानानुभूयमानविषययोरभिन्नत्वमिति भरतसूत्रमेव परमाह्लादस्य द्वारोद्घाटकमथ च चरमविश्रान्त्युपपादकमिंति सर्वेऽपि स्वीकुर्वन्ति। विभावादयः काव्यनिरूपिता भवन्ति, रसभोक्ता तु द्रष्टा श्रोता वा भवति। तत्रात्मपरमात्मनोः सम्बन्धालोके यथा यमनियमादयः चित्तवृत्तिं शोधयन्ति लक्ष्यं च प्रापयन्ति, तथैव विभावादयः चित्तवृत्तीनुद्भाव्य तदाकाराकारितायां निमज्जयन्ति निबोधयन्ति ब्रह्मानन्दसहोदरं परमाह्लादमिति। अन्तःकरणवृत्तयो वासनारूपत्वादाशुविनाशिन्योऽपि वृत्तयः संस्काररूपेण तिष्ठन्ति। इमा एव सञ्चारिभिन्ना वृत्तयः सूक्ष्मतयाऽविच्छिन्नरूपेण वर्तमानत्वात् स्थायिभावतयाऽऽख्याताः, इमाश्चैव स्थायितयाख्याता वृत्तयो विभावादिभिरुद्दीप्ता रसरूपेण परिणताः सहृदयहृदयमभिव्याप्यास्वादविषयतां प्राप्नुवन्ति। यथोक्तमनन्तदासेन—

CC-0. Sampurnanand University Collection. Digitized by eGangotri

वासनाऽनादिकालीना याऽसौ हृदि सचेतसाम्।
स्वसामग्रीं समासाद्य व्यक्ता सेति रसात्मताम्॥

मम्मटादयोऽप्यालङ्कारिका इमान् स्थायिभावानविच्छिन्नप्रवाहपदवाच्यान् मन्वते। एतेषां स्थायिभावानाम् एव सामग्रीं विना न रसरूपेण परिणतिः, न च चर्वणा, अतो मुनिना भरतेन स्वरससूत्रमाध्यमेनैव सामग्र्या अपि नाम्ना निर्देशः कृतः। निर्दिष्टेयं सामग्री विविधात्मिका सम्भूयैव रसं निष्पादयतीति काव्यतत्त्वविदो वदन्ति। स्थायिभावा एव स्वसामग्रीमवाप्य रसरूपेण परिणता भवन्तीति। स्थायिभावास्तु 'रतिर्हासश्च शोकश्च क्रोधोत्साहौ भयं तथा। जुगुप्सा विस्मयश्चेति, तथा च नवमो निर्वेदाख्यः' इति। एतेषाञ्च सामग्रीरूपेण विभावानुभाव-व्यभिचारिभावाश्चेति ख्याता रसरूपां परिणतिं प्राप्तुं सक्षमा इमे भावाः सततमविच्छिन्नतया वर्तमाना न कदापि विरुद्धभावैरभिभूता भवन्ति, अपि तु विकासावस्थायां तान् विरुद्धानपि स्वस्मिन्नेवात्मसात्कुर्वन्ति। तथा हि—

विरुद्धैरविरुद्धैर्वा भावैर्विच्छिद्यते न यः।
आत्मभावं नयत्यन्यान् स स्थायी लवणाकरः॥ दश. ४-३४॥

अर्थात् यथा विभिन्नाभिः सरिद्भिः सम्प्राप्तमपि मधुरं तोयं लवणाकरमुपेत्य तद्वत्तां सम्प्राप्नोति, तथैव विरुद्धा अविरुद्धा वा भावाः प्रधानीभूतं रसं संस्पृश्य तत्रैव विलीना भवन्ति। एवं स्रक्सूत्रवृत्त्या सर्वेऽपीमे भावा गौणप्राधान्यभावेन परस्परमनुगामुका भवन्ति। यथाभिवदति भोजदेवः—

स्रक्सूत्रवृत्त्या भावानामन्येषामनुगामुकः।
न तिरोधीयते स्थायी तैरसौ पुष्यते परम्॥[१]
चिरं चित्तेऽवतिष्ठन्ते सम्बध्यन्तेऽनुबन्धिभिः।
रसत्वं ये प्रपद्यन्ते प्रसिद्धाः स्थायिनो हि ते॥

एवं शरावनिर्वृतं दीपकं यथा स्वसमीपसन्निहितान् पदार्थान् प्रकाशयन्नेव स्वयं प्रकाशते, तथैव तैः विभावादिभिः प्रादुर्भूतया चर्वणया भग्नावरणः चिदंशः स्वयं प्रकाशते स्वसमीपस्थान् रत्यादिस्थायिभावानपि प्रकाशयति। तयोरभिन्नत्वेन प्रतीयमानत्वात् केवलमानन्द एवावशिष्यते। अथवा स्थायीभावः तैरुद्दीपितः दध्यादिन्यायेन रसीभूय चैतन्यांशेन सह प्रकाशते। यथोक्तम्—

१. सरस्वतीक.।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

ज्ञायमानतया तत्र विभावो भावपोषकृत्।
आलम्बनोद्दीपनत्वप्रभेदेन स च द्विधा॥
अनुभावो विकारस्तु भावसंसूचनात्मकः।
विशेषादाभिमुख्येन चरन्तो व्यभिचारिणः॥
स्थायिन्युन्मग्ननिर्मग्नाः कल्लोला इव वारिधौ॥

विभावादिव्यतिरिक्ताः सात्विकभावा अपि काव्यसामग्रीरूपेणाभिमताः। अवहितं मनः सत्वमित्युच्यते। तत्प्रयोजनं हेतुरस्येति सात्विकभावः। रामादीनामनुकार्याणां सुखदुःखाभ्यां सहृदयानां हृदयानि भावयन्त्येते सात्विकभावाः। निसर्गत एव दुर्वारा इमे भावा अभावत्वेऽपि हृदि तिष्ठन्त्येव। यदुक्तमाचार्यैः—

पृथग्भावा भवन्त्यन्येऽभावत्वेऽपि सात्विकाः।
सत्वादेव समुत्पत्तेस्तच्च तद्भावभावनम्॥[१]

इमे सर्वेऽपि रसपरिकराः ख्याताः। एभिरुद्दीप्तः स्थायीभावः रसरूपेण परिणतः सहृदयानामास्वादविषयतां प्राप्नोति। भावादिकानां लक्षणानि लक्षण-ग्रन्थकारैः पृथक्तयान्यत्र निरूपितानि। रसनिष्पत्तिप्रकारस्तु काव्यप्रकाशकारेण–

कारणान्यथ कार्याणि सहकारीणि यानि च।
रत्यादेः स्थायिनो लोके तानि चेन्नाट्यकाव्ययोः॥[२]
विभावाऽनुभावास्तत् कथ्यन्ते व्यभिचारिणः।
व्यक्तः स तैर्विभावाद्यैः स्थायीभावो रसः स्मृतः॥

लोके व्यक्तिमात्रसम्बन्धिनः कारणकार्यसहकारिणः काव्याश्रयेण सर्वजनसम्बन्धित्वात् सर्वजनग्राह्यत्वात् विभावादिपदवाच्या भवन्ति। लौकिककारणैः लौकिककार्याणि सम्भवन्ति, किन्तु तत्र समुत्पन्ने कार्ये सम्बन्धविशेषस्वीकारपरिहार-नियमनिर्णयात् स्वेतरे न प्रीतिरिति। आत्मसम्बधेनैव तस्या आविर्भावात्। एतदपेक्षया विभावादिभिः समेषामात्मसम्बन्धात् सर्वेऽपि प्रीतिमन्तो भवन्ति। तान्येव लौकिककारणानि कविः कौशलेन कवयति। कवित्वशक्तिसम्पन्नः कविः कवित्वधर्मावच्छिन्नं काव्यं निर्माय तथा प्रस्तौति यथाऽलौकिकत्वं विजृम्भते। रसस्तु स्वयमास्वादस्वरूपः 'रस्यते—आस्वाद्यते' इति व्युत्पत्त्या। तत्कथं तस्य चैतन्याधिष्ठानभूतस्य रसस्य प्रतीतिर्भवतीति पूर्वकथनमुपचारमात्रमेव। यतो हि सः

---

१. काव्यप्रकाशः;　　२. काव्यप्रकाशः, ४-२७,२८।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

स्वयमेव विभावादिभिः व्यक्तो भवति, न पुनस्तस्य साध्यावस्थेति। तथापि ओदनं पचतीतिवत् रसः प्रतीयत इति व्यवहारोऽवगन्तव्यः। रसस्य किं स्वरूपमित्याकांक्षायाम्—

सत्वोद्रेकादखण्डस्वप्रकाशानन्दचिन्मयः ।
वेद्यान्तरस्पर्शशून्यो ब्रह्मास्वादसहोदरः ।।
लोकोत्तरचमत्कारप्राणः कैश्चित्प्रमातृभिः ।
स्वाकारवदभिन्नत्वेनायमास्वाद्यते रसः ।।[१]

अत्र रसविषयकं व्याख्यानं भरतादारभ्य पण्डितराजपर्यन्तं तैस्तैर्वादिभिः यद्यपि मतभेदेन क्वचिदङ्गतया क्वचिच्चाङ्गितया प्रदर्शितः, तथापि न रसास्वादे मतभेदः; किन्तु रसनिष्पत्तावेव प्रकारभेदमादृत्य मतभेदः परिलक्षितः। प्रकारभेदस्तु रुच्यधीनः। यथैकस्यैवाम्रफलस्यास्वादे रुचिभेदात् केचन रसं निस्सार्य अपरे त्वक्च निस्सार्य, अन्ये चूषणक्रियया, अथवा खण्डशः कृत्वा तदाम्रफलमास्वादयन्ति, तथैव विदुषामपि प्रवृत्तिरवधारणीयाऽस्ति। अभिन्नत्वेनायं रसोऽयमास्वाद्यते। आत्मभिन्नत्वेन चैतन्यभिन्नत्वेन चैतन्याकारत्वेन स्वाद्यमानो रसः सरावनिर्वृतं दीपमिव प्रकाशते। अभिनवगुप्तपादाचार्याणां नये लौकिकप्रत्याक्षादि-प्रमाणप्रतीतिशून्योऽप्यवबोधशालिमितयोगिज्ञानवेद्यान्तरसंस्पर्शरहित-'स्वात्ममात्र-पर्यवसितपरिमितेतरयोगिसंवेदनाविलक्षणलोकोत्तरस्वसंवेदनगोचर' इति व्यवहारदशायां प्रत्येयताभिधानं लभते। यथा भौतिकजीवने साधकानामात्मपदलाभः साधना(जीवनचर्या) विशेषद्वारक एव, तथैव काव्यसाधनया साधनानामुपस्थिति-पर्यन्तमात्मानन्दसमुल्लासः। आलङ्कारिकैः साहित्यदर्पणकारप्रभृतिभिः स्वरूपकथन-पुरस्सरं रसनिष्पत्तिप्रकारो निगदितः। तत्र विभावादयः काव्ये तिष्ठन्ति, रसाभिव्यक्तिः प्रतीतिश्च श्रोतॄणां सहृदयानां भवतीति केनोपायेन केन च विधिना? तत्र जगदिदं त्रिगुणात्मकमित्यन्यत्र शास्त्रेषु ख्यातम्। सत्वरजःतमांसि च गुणतया कीर्तितानि। रजस्तमसी चेत्युभावपि चैतन्यांशनैर्मल्ये प्रतिबन्धकौ। तयोश्चाभिभवः विभावादिसाधारणीकरणात्मना सम्भवति। तयोरभावे सत्वोद्रेकः सत्वगुणोपेतं मनोऽन्तःकरणं वा विषयव्यावृत्तत्वात् नैर्मल्यं प्राप्नोति। इदमेव हि नैर्मल्यं रसाभिव्यक्तौ प्रथमं सोपानम्। 'प्रवर्तते हि विशदा हृदि स्वच्छे सरस्वती' इत्यस्ति सूक्तेः क्रान्तदर्शिनां कवीनां मध्ये प्रसिद्धिः, स्वच्छजलवत्स्वच्छे हृदि सरस्वती प्रवर्तते। एवं स्वच्छमन्तःकरणं प्रथमं पृथक्-पृथग्भूतान् विभावादिकान् गृह्णाति,

१. साहित्यदर्पण, ३-२,३।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

अनन्तरं च तेषां पुनः पुनरनुसन्धानेन समुन्मीलितया तद्विषयिण्या भावनयाऽथवैकीकृतविषयसंवलितया तदाकाराकारितया चित्तवृत्त्या पानकरसवदखण्डतयाऽऽस्वाद्यते। सत्वोद्रेकानन्तरं प्रथमं गृह्यमाणाः अनन्तरञ्च सहृदयतावशात् समभिन्नतया स्वात्मत्वेनानुभूयमाना विभावादयो रसाभिन्नत्वेनाखण्डत्वेनैव सन्निहिता भवन्ति। रसानुभूतौ नाङ्गभूतानां विभावादीनां पृथक् प्रतिष्ठा भवति। अथवा विभावादिसंवलितस्य रसस्य विलक्षणत्वात् कश्चिदखण्डानुभव एव भवति। स्वसंवेदनगोचरत्वादानन्दांशः न पृथक्तया भासते, किन्तु चिन्मयत्वेन (स्वस्वरूपत्वेन) भासते। उक्तं हि पण्डितराजमहोदयेन-'भग्नावरणचिदेव रसः' इति। अनेन भग्नावरणायाः चितः प्रकृत्यैव सत्वगुणात्मकं स्वरूपं सिद्ध्यति। सत्त्वात्मके चित्ते सत्त्वात्मिकायां चित्यात्मा प्रकाशते। तस्मिन् प्रकाशिते तदन्तिकस्थाः संस्कारा अपि प्रकाशिता भवन्ति। रसस्तु 'चिन्मयः' अर्थाच्चैतन्यसंवलितः। आनन्दविशिष्टो रसः, स एव च तस्मिन् रसे स्वरूपतया भासते। लोकोत्तरचमत्कारकारित्वं पुरस्कृत्यैव रसस्य प्रतिष्ठा, चमत्कारस्तु विस्मयापरपर्यायः चित्तवृत्तिविस्ताररूपः। रसस्य प्राणभूतः चमत्कारः चित्तविस्तृतौ सक्षम इति रसस्याऽपि चित्तविस्तृतिक्षमत्वं सिध्यति। अस्मिन् सन्दर्भे सगौरवेण साहित्यदर्पणकारेण स्ववृद्धपितामहानां श्रीमन्नारायणमहोदयानां मतमुन्नमितम्। तथा हि—

रसे सारश्चमत्कारः सर्वत्राप्यनुभूयते।
तच्चमत्कारसारत्वे सर्वत्राप्यद्भुतो रसः ॥[1]

अनेकस्यैकस्मिन्नेकरूपेण समन्वयः—साहित्यमिति विभावादिकानां साहचर्यात् रसक्रिया सम्पद्यते। फलं तु आस्वादाख्य आनन्दानुभवः। आस्वादो नाम रजोतमोभ्यां सर्वथा विनिर्मुक्तस्य सत्वप्रवणस्य चित्तस्य विकासः। रजस्तमोरहितस्य चित्तस्य विस्तृतावानन्दसमुद्भवः। यदि च सत्वं रजस्तमोभ्यामभिभूतं भवति, तर्हि वेद्यान्तरसम्पर्कशून्यत्वं नोपपद्यते।

वेद्यान्तरसम्पर्कशून्यत्वस्य रसास्वादनसमुद्भवात् तं विना न चित्तविस्तारः न चानन्दानुभवः। न च स्वप्रकाशत्वं चिन्मयत्वं वोपलभ्येते। सहृदयानां हृदयविस्तारः सत्वोद्रेकादेव। हृदयविस्तार एष साधारणीकरणात्मना विषयान् गृह्णाति। लोके कारणीभूताः सुखदुःखादिविषयाः काव्येन समर्पितास्सन्तः चित्तविस्तारेण स्वात्मत्वेन गृहीता भवन्ति। रजः तमस्यभिभूय सत्वात्मकेऽन्तःकरणे चित्प्रदीपे वा प्रकाशितो भवति। साहित्यशास्त्रानुशीलनपराः चितः प्रकाशनदक्षा एव सहृदया इति। उक्तं हि

१. साहित्यदर्पणे, वृत्तिग्रन्थः, का. ३।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

ध्वन्यालोककारेण—'येषां काव्यानुशीलनाभ्यासवशाद् विशदीभूते मनोमुकुरे वर्णनीयतन्मयीभवनयोग्यता ते हृदयसंवादभाजस्सहृदयाः' इति। सहृदया एव तन्मयीभवनयोग्यतां भावनावशात् प्राप्नुवन्ति। तन्मयीभूयत्वं रसमयत्वमिति लक्षणग्रन्थकाराः। भावनया रसनिष्पत्तिः, रसास्वादनसमुद्भूतो विगलित-वेद्यान्तरानन्दः। रसास्वादनकाले विभावादिविषयिण्या भावनयाऽभिन्नत्वेनास्वादस्य निष्पत्त्या भेदप्रतीतिः स्थगितैव जायते। एतत्सर्वमभिसन्धायैव पण्डितराजमहाभागैः मतान्येकादशाख्यानि प्रस्तुतानि।

"आत्मानन्दसमुद्भव एव रसास्वाद" इत्याचार्याणामभिमतम्। आस्वाद एव रसो नान्यत्किञ्चिदिति रसस्य प्रतीतिर्भवति, रसस्यास्वादोऽवाप्यते, रसश्चर्व्यते, 'रसोऽनुभूयत' इत्यादिप्रतीतयस्तु काल्पनिक्य एव। यद्यपि 'रसास्वादनसमुद्भूतं विगलितवेद्यानन्तरमानन्द'मिति मम्मटोक्त्या रसानन्दयोर्मध्ये भेदप्रतीतिरथवा जन्यजनकभावेऽनुभवो जायते, तथापि तत्रौपचारिकत्वमेवेति साहित्यदर्पणकाराः। एवमात्मानन्दसमुद्भवरूपास्वाद एव रसः। अत एव रसस्यास्वादानतिरिक्तत्वं स्वीकृत्यैव विश्वनाथपण्डितेन 'रस्यमानतामात्रसारत्वात्प्रकाशशरीरादनन्य एव हि रसः'' इत्युक्तम्। नैयायिकानां नये त्वङ्मनःसंयोग एव ज्ञानस्य कारणम्। मनस्तावत्त्रिगुणात्मकम्। यदा रजस्तमसोरभिभूतं मनः लौकिकान् विषयान् गृह्णाति तदा विषयानुरूपाणां लौकिकसुखदुःखादीनामेवानुभवो जायते। यदा तस्मिन् मनसि रजस्तमस्यभिभूय सत्वगुणोद्रेकः तदा सुखात्मिका प्रवृत्तिः प्रभवति। इयमेव सुखात्मिका प्रवृत्तिरन्यत्रानन्दाभिधाना वर्तते। एवं सत्त्वस्य दुर्बलत्वाद्वैषयिक-सुखोपलब्धिः, प्राबल्ये तु तस्मिन् सत्वगुणे विगलितवेद्यान्तरमानन्दं परिस्फुरति। अयमानन्दः स्वप्रकाशानन्दमयत्वात् स्वाकारवदभिन्नत्वेनानुभूयते। मम्मटादयोऽपि दृश्यश्रव्यकाव्यपठनश्रवणसमकालमेव रसास्वादनसमुद्भूतं विगलितवेद्यान्तर-मित्यादिना रसास्वादनानन्दयोर्मध्ये विगलितवेद्यान्तरस्पर्शशून्यत्वमपेक्षन्ते। अयमानन्दः ब्रह्मानन्दसहोदरः, न तु ब्रह्मानन्दाभिधः। लौकिका विषया लौकिक-सामग्रीसापेक्षाः, अलौकिकाश्च विषया अलौकिकसामग्रीसाध्याः। तृतीयोऽयं कविताकामिनीसमुपासकानां राजमार्गः। अत्रालौकिकसाधनैः विभावादिभिः लोकोत्तरानन्दावाप्तिः। परञ्चेयमानन्दावाप्तिः सावधिकैव। निरवधिकः स ब्रह्मानन्दः। निर्विकल्पकश्चापि। रसानुभूतिस्तु सविषयिका सावधिका चेति। किन्तु रसस्यास्य प्रकाशानन्दमयत्वादेवानन्दात्मिकां संविदमुन्मीलयति, यया वेद्यान्तरस्पर्शशून्यता जायते। ब्रह्मानन्दसहोदरत्वमस्य विभावादिजीवितावधित्वात् सविषयत्वाच्च सिध्यति।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

वस्तुतः प्राक्तनजन्मानुगतवासनानां स्वकीयत्वेनाभिमतैः विभावादिभिः परिपाकावस्थैव रसावस्थेति न परमार्थतः। यथोक्तं साहित्यदर्पणकारेण—

विभावेनानुभावेन व्यक्तः सञ्चारिणा तथा।
रसतामेति रत्यादिः स्थायिभावः सचेतसाम्।।[१] इति।

तास्तु वासनारूपाः सर्वथाऽक्षताः तिष्ठन्ति। वासनानां न सर्वथा क्षयो भवति। यथा क्षयावस्थायां सूक्ष्मतां स्थायिभावरूपतां प्राप्नुवन्ति, तथैव स्वानुकूलां सामग्रीमवाप्य द्रुतिविस्तारविकासपर्यन्तं विस्तारमपि प्राप्नुवन्ति। ब्रह्मीभावावस्थायामिमा वासनाः सर्वथा लयमुपयान्ति। रसास्वादापेक्षया चास्मिन्निर्विषयकत्वमिति तदपेक्षया रसास्वादस्य विकल्पतायामिदमेव ताटस्थ्यम्। यथाऽऽत्माभिन्नोऽयं परमात्मा तथैव स्वाकारवदभिन्नोऽयं रसः।

तथा हि—

सत्वोद्रेकादखण्डस्वप्रकाशानन्दचिन्मयः ।
वेद्यान्तरस्पर्शशून्यः ब्रह्मानन्दसहोदरः ।।
लोकोत्तरचमत्कारप्राणः कैश्चित्प्रमातृभिः ।
स्वाकारवदभिन्नत्वेनायमास्वाद्यते रसः ।।[२] इति।

अत्र यथा बौद्धानां सम्प्रदाये विज्ञानवादिनः सौगतदार्शनिका ज्ञानस्वरूपं तदभिन्नं बाह्यजगच्च यद्यप्येकमेव मन्यन्ते तथापि बाह्यजगत् ज्ञेयसंज्ञयाऽवबोध्यते, तथैव रसास्वादयोरभिन्नत्वेऽपि रस आस्वाद्यत इत्यौपचारिकत्वमाश्रीयते व्यवहारसाधनायेति। वस्तुतः "रस्यते आस्वाद्यते इति रसः"[३] इति व्युत्पत्त्या नास्वादेतरः कश्चिदपरो रसपदार्थः, अन्यच्च स्वाकारवदभिन्नोऽयं रसः शिरोमात्रस्वरूपस्य राहोः कृते **'राहोः शिरः'** इत्यौपचारिकः प्रयोगो विधीयते, तथैवास्वादमात्रस्वरूपस्य रसस्याऽपि कृते **'रसास्वादः'** 'रसस्य प्रतीतिः', 'रसः चर्व्यते' इत्यादिका व्यवहारसाधका भूरिशः प्रयोगा भवन्ति।

योऽयं काव्यस्यात्मा रसः स एव सर्वेषां वेदानामर्थात् ज्ञानानां साररूपः। तद् विज्ञानादेव सर्वविज्ञानप्रतिज्ञानात् एकेन विज्ञातेन सर्वं विज्ञातं भवतीति श्रुतेः तस्याह्लादाभिन्नस्य रसस्यैवात्मपदार्थतया सर्वप्राणिपरप्रेमास्पदत्वेन सर्व-

---

१. साहित्यदर्पणे, ३,१; २. साहित्यदर्पणे, ३/२,३।
३. रघुवंश महाकाव्य, १-१।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

प्राणिस्पृहणीयत्वमेव। तमेवात्मानं लब्ध्वा जीवजातमानन्दीभवति। तदेव च 'सत्यं ज्ञानमनन्तं ब्रह्मे'ति श्रुतिस्वारस्यरहस्यभूतमशेषविशेषातीतं तत्त्वमनेकधोपवर्णितम्। तस्यैव निरतिशयबृहत्वोक्त्याऽऽनन्दसुधासिन्धुरूपत्वेन सौन्दर्याभिव्यंजक-शब्दरूपत्वमपि सुव्यक्तम्। तस्यैवानन्दसुधासमुद्रस्य प्रेमतरङ्गस्थानीयोऽर्थः। सौन्दर्यप्रेम्णोरेव पार्वतीपरमेश्वररूपत्वादेव कविकुलगुरुः पार्वतीपरमेश्वरप्रणाममिषेण सत्काव्यस्य परमरहस्यं कटाक्षयति—

वागर्थाविव सम्पृक्तौ वागर्थप्रतिपत्तये ।
जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ ।। इति।

एवं कृत्स्नमपि शब्दार्थरूपं काव्यं सत्यज्ञानानन्दरूपत्वाद्रसात्मकमिति 'रसो वै सः' इति सङ्क्षेपणम्।

●

CC-0. Sampurnanand University Collection. Digitized by eGangotri

महाकविबाणभट्टस्य सौन्दर्यदृष्टेः परिशीलनम्

डॉ. बालकृष्णशर्मा
साहित्यविभागाध्यक्षः
ग्वालियरस्थ-शासकीयसंस्कृतमहाविद्यालयस्य
मध्यप्रदेशे

***

संस्कृतकाव्यसाहित्यं विविधभावाभिव्यक्तिनिर्भराणां कल्पनावैचित्र्यप्रचुराणां रसपरिपाकप्रवणानां पदलालित्योपेतानां भङ्गीभणितिपरिपूर्णानाम् अलङ्कारयोजानाभूषितानां व्यङ्ग्यसौन्दर्यपूरितानां विभावानुभावयोजनाभरितानां चरितचित्रणलसितानां रीतिविन्यासविशिष्टानाम् औचित्याञ्चितानाञ्च काव्यानामवलिं क्रोडीकरोति। अत्रोदात्तचरितचित्रणोपेतानां महाकाव्यानां जीवनैकदेशविन्यासमण्डितानां खण्डकाव्यानां मार्मिकभावनाभिव्यक्तियुक्तमुक्तककाव्यानां कविनिकषकथितानां कथाख्यायिकारूपगद्यकाव्यानां गद्यपद्योभयचारुतामिश्रितानां चम्पूकाव्यानां सहृदयहृदयावर्जकानां रूपकोपरूपकाणाञ्च विद्यते प्रभूतसाहित्यम्। अस्मिन् विशालसाहित्ये कविताकामिनीविलासः कालिदासः, नाट्यसाहित्यविभूतिः भवभूतिः, गद्यरचनासौन्दर्यप्रमाणः बाणः, अन्ये च महाकवयः भासभारविमाघश्रीहर्षादयः विशेषेणोल्लेखनीयाः सन्ति। एतेषु विशेषेणोल्लेखनीयेषु कविष्वपि कादम्बरीकथाकारः बाणभट्टः स्वकल्पनावैचित्र्येण रचनाचातुर्येण पदविन्यासपाटवेन कथाप्रबन्धवैशिष्ट्येन च सर्वथा अप्रतिमो वर्तते। अत एव कथितमस्ति—

> कादम्बरीरसभरेण समस्त एव
> मत्तो न किञ्चिदपि चेतयते जनोऽयम्[1]॥

---

१. कादम्बरीकाव्ये उत्तरार्द्धे पुलिनभट्टः।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

स्वयं बाणभट्टः कादम्बरीकथामधिकृत्य वक्ति—

द्विजेन तेनाक्षतकण्ठकौण्ठया महामनोमोहमलीमसान्धया।
अलब्धवैदग्ध्यविलासमुग्धया धिया निबद्धेयमतिद्वयी कथा[१]।।

वस्तुतः कादम्बरीकथाकाव्यं संस्कृतसाहित्यस्याद्भुतप्रणयनमस्ति। अस्य काव्यस्य पदे पदे काव्यसौन्दर्यं सहृदयहृदयमावर्जयति। को वा रसः अलङ्कारः कादम्बरीकथायां न विराजतेतराम्? यदि कश्चित् सहृदयः काव्यसौन्दर्यस्य ललितविलासं रसभावयोः कमनीयविन्यासं रीत्यलङ्कारयोः मधुरोल्लासं कथाप्रतानस्याद्भुतप्रयासं वर्णनाचातुर्यचमत्कारं कल्पनावैचित्र्यविविधप्रकारं नवनवोन्मेषशालिनीप्रतिभापरिपाकं शैलीरमणीयतां भाषाकमनीयतां सहृदयहृदयाह्लादकतां काव्यकलाचारुताञ्चैकत्र विभावयितुमिच्छति तर्हि सः कादम्बरीकाव्यसेवनं करोतु। अत्र क्वचित् पदलालित्यं विराजते, क्वचिद् भाषागाम्भीर्यम्भ्राजते। एकत्रात्र वर्णनानैपुण्यं विभावनीयमन्यत्र च कल्पनाचातुर्यमास्वादनीयम्। अस्मिन् काव्ये बाणभट्टो वर्ण्यस्य यस्य वर्णने संसक्तो भवति तस्य रुचिरस्वरूपं जीवन्तरूपं भव्यविधानं दिव्यप्रतानं चरमोत्कर्षं चारुनिष्कर्षञ्च प्रस्तौति येन काव्यवर्ण्यवस्तु सहृदयानां सम्मुखे नृत्यतीव। इदमेव कारणमस्ति यत् काव्यस्योत्कर्षः अनतिक्रमणीयो जातोऽस्ति। बहूनि काव्यानि प्रणीतानि संस्कृतसाहित्ये प्राचीनकालतो वर्तमानकालं यावत्, परन्तु कादम्बरीकाव्यस्य माहात्म्यमक्षुण्णमस्ति। बाणभट्टस्य कविताचातुरीं कादम्बरी-काव्यस्य च रसमाधुरीमास्वाद्य को न भवति सहृदयो वशीभूतः? अत एव सहृदया भावुकाः समालोचकाः काव्यशास्त्रिणश्च कादम्बरीकाव्यस्य प्रशंसया स्वसौभाग्यं गौरवं वाऽनुभवन्ति। तद्यथा—

रुचिरस्वरवर्णपदा रसभाववती जगन्मनो हरति।
सा किं तरुणी? नहि नहि वाणी बाणस्य मधुरशीलस्य[२]।।

कादम्बरीकाव्यप्रणयनेन बाणभट्टः वाण्याः अवतारोऽभिहितः। तद्यथा—

जाता शिखण्डिनी प्राग् यथा शिखण्डी तथावगच्छामि।
प्रागल्भ्यमधिकमाप्तुं वाणी बाणो बभूव ह।। इति[३]।

---

१. कादम्बरीकाव्ये पूर्वभागे, श्लोकः २०।

२. प्राचीनालोचकस्य धर्मदासस्य विदग्धमुखमण्डने।

३. आर्यासप्तशत्याम्, गोवर्धनाचार्यः, आर्या ३७।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

वस्तुतो बाणभट्टस्य कादम्बरीकाव्ये समस्तकाव्यवैशिष्ट्यानि विराजन्ते येन सः कविपञ्चाननः कथ्यते। तद्यथा—

श्लेषे केचन शब्दगुम्फविषये केचिद्रसे चापरेऽ-
लङ्कारे कतिचित्सदर्थविषये चान्ये कथावर्णने।
आ सर्वत्र गभीरधीरकविताविन्ध्याटवीचातुरी-
सञ्चारी कविकुम्भिकुम्भभिदुरो बाणस्तु पञ्चाननः[१]॥

कादम्बरीकाव्यरचनाप्रतिद्वन्द्विताय़ां न कोऽप्यन्यः कविः स्थातुं शक्नोति। अत एवोक्तं सोमेश्वरेण—

युक्तं कादम्बरीं श्रुत्वा कवयो मौनमागताः।
बाणध्वनावनध्यायो भवतीति श्रुतिर्यतः[२]॥

अत्र कारणानि सन्ति कादम्बरीकाव्यस्य नायकविन्यासनायिका-विन्यासरीतिविन्यासरसविन्यासगुणविन्यासप्रभृतीनि। तद्यथा कथितमस्ति—

चन्द्रापीडोऽनुकूलः सकलगुणधरो नायकोऽस्मिन्नुदात्तो
नेत्री कन्याऽन्यदीया मृदुललिततनुर्मुग्धकादम्बरी च।
पाञ्चाली नाम रीतिर्विलसति बहुला विप्रलम्भो रसोऽङ्गी
माधुर्याख्यो गुणो वा कविमुकुटमणेः काव्ययोरन्त्यमेतत्[३]॥

एवम्प्रकारेण तथ्यमिदं स्पष्टम्भवति यत् कादम्बरीकाव्यस्य सौन्दर्यं सर्वातिशायि वर्तते। तत्र कवेः प्रतिभैव कारणम्। इदं कादम्बरीकाव्यं बाणभट्टस्य यैः वैशिष्ट्यैः विशिष्टं जातमस्ति तेषु कवेः सौन्दर्यदृष्टिः विशेषेणोल्लेखनीया वर्तते। वस्तुतः कादम्बरीकाव्ये आद्योपान्तं महाकवि-बाणभट्टस्य सौन्दर्यदृष्टेः साम्राज्यं विराजते। कविः स्वसूक्ष्मेक्षिकया सौन्दर्यदृष्ट्या च वर्ण्यवस्तुप्रस्तुत्यां परमरमणीयतामानयति। यद्यपि कादम्बरीकाव्यस्य पदे पदे बाणभट्टस्य सौन्दर्यदृष्टिः प्रसृता प्रतिभाति, तथापि निबन्धेऽस्मिन् तस्याः केचनातिमहत्त्वपूर्णपक्षा एव विमृश्यन्ते। एते पक्षाः सन्ति—

---

१. श्रीचन्द्रदेवस्य; २. कीर्तिकौमुद्याम्।

३. कादम्बर्याः हरिदाससिद्धान्तवागीशटीकाभूमिकायाम्।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

१. कादम्बरीकथाविताने बाणभट्टस्य सौन्दर्यदृष्टिः।

२. कादम्बरीकाव्यपात्राणां विन्यासे बाणभट्टस्य सौन्दर्यदृष्टिः।

३. कादम्बरीकाव्ये रसभावगुणालङ्कारादिविन्यासे बाणभट्टस्य सौन्दर्यदृष्टिः।

४. कादम्बरीकाव्ये वर्ण्यवस्तुजीवन्तवर्णने बाणभट्टस्य सौन्दर्यदृष्टिः।

५. कादम्बरीकाव्ये प्रकृतिचित्रणे बाणभट्टस्य सौन्दर्यदृष्टिः।

६. कादम्बरीकाव्ये वर्ण्यवस्तुसूक्ष्मनिरीक्षणे बाणभट्टस्य सौन्दर्यदृष्टिः।

अत्र कादम्बरीकाव्ये बाणभट्टस्य सौन्दर्यदृष्टेः एतेषां पक्षाणां समासेन विवेचनं प्रस्तूयते।

१. **कादम्बरीकथाविताने बाणभट्टस्य सौन्दर्यदृष्टिः**—महाकविः बाणभट्टः कादम्बरीकाव्यस्य कथायाः कृते 'अतिद्वयी'-विशेषणस्य प्रयोगं करोति येनास्याः कथायाः विताने बाणभट्टस्य सौन्दर्यदृष्टेः ज्ञानं भवति। कादम्बरीकाव्यं कथाविताने सर्वथानुपमं विद्यते। अत एव कविः वदति—

स्फुरत्कलालापविलासकोमला करोति रागं हृदि कौतुकाधिकम्।
रसेन शय्यां स्वयमभ्युपागता कथा जनस्याभिनवा वधूरिव[१]॥

कादम्बरीकथा पुण्डरीकचन्द्रापीडयोः जन्मत्रयकथां क्रोडीकरोति। तद्यथा—

चन्द्रमाः.....कुमारचन्द्रापीडः.....राजा शूद्रकः

ऋषिकुमारपुण्डरीकः.... मन्त्रिपुत्रवैशम्पायनः.....वैशम्पायनशुकः

एवम्प्रकारेण तथ्यमिदमुद्भासितम्भवति यत् कथाविन्यासे कविः वैचित्र्यपक्षपाती अस्ति। अन्यथा जन्मत्रयकथायोजनायां कवेः प्रवृत्तिः कथं स्यात्? कथाविन्यासस्य सूक्ष्मपरिशीलनेन प्रतिभाति यत् यत्र कथा प्रारभते प्रायः तत्रैव समाप्तिं गच्छतीत्यहो निबन्धनं कथासूत्रस्य! इयं कथा प्रथमं तावत् शुकात्मकथारूपेण निबद्धा वर्तते, ततः परञ्च जाबालिमुनिमुखात् कथा आरभते। मध्ये महाश्वेतामुखादपि कथा प्रसरति। एवमस्याः कथायाः वक्तारः

१. कादम्बरीकथामुखभागारम्भे, श्लोकः ८।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

नैकाः जनाः सन्ति। तथापि कथासूत्रमतिसुबद्धमस्ति। अनेन प्रमाणितम्भवति यत् कथाविताने बाणभट्टस्य सौन्दर्यदृष्टिः अद्भुतानुपमा चासीत्। वस्तुतः कथाकाव्यं कवेः कल्पनायाः परिणामरूपम्भवति। तत्र कवेः कारयित्री प्रतिभा सहजतया प्रसरन्ती नित्यनवीनसौन्दर्यभरितकथासूत्रं कल्पयति। कादम्बरीकाव्ये इयं विशेषता आद्योपान्तं मिलति। अस्यां कथायां सर्वप्रथमं कथामुख-भागोऽस्ति, यत्र कथाप्रस्तावना विद्यते। ततः परं मूलकथारम्भो भवति। मूलकथायामपरा कथा वर्तते महाश्वेतावृत्तान्तम्। इयं कथा पूर्वार्द्धभागे चन्द्रापीडकादम्बरीसंयोगपर्यन्तं प्रसरति। अग्रे चन्द्रापीडः पुनरुज्जयिनीं प्रत्यागच्छति पूर्वार्द्धभागश्च समाप्तिं गच्छति। अतः वक्तुं शक्यते यत् कादम्बरीचन्द्रापीडयोः संयोगः तारापीडनिर्देशात् चन्द्रापीडस्योज्जयिनी-प्रत्यावर्तनाच्च कादम्बरीचन्द्रापीडयोः वियोगः इत्येतावत्पर्यन्तं कथा पूर्वार्द्धभागे निबद्धा। इयती कथा बाणभट्टस्य रचना अस्ति। कादम्बरीकथायाः उत्तरार्द्धभागस्तु बाणतनयस्य पुलिनभट्टस्य रचना अस्ति। एवं कादम्बरीकथायाः पूर्वार्द्धभागे कादम्बरीचन्द्रापीडयोः संयोगः तदनन्तरं वियोगः महाश्वेता-पुण्डरीकयोश्च संयोगः तदनन्तरञ्च वियोगः कविनोपनिबद्धः। अस्याः कथायाः पूर्वार्द्धभागः एवम्प्रकारेण वियोगान्तः वर्तते। अग्रे उत्तरार्द्धभागे कादम्बरी-चन्द्रापीडयोः महाश्वेतापुण्डरीकयोश्च संयोगवर्णनमस्ति। अतः उत्तरार्द्धे इयं कथा संयोगान्ता अस्ति। कादम्बरीपूर्वार्द्धभागस्य कथाविताने बाणभट्टस्य सौन्दर्यदृष्टिः अप्रतिमप्रसारं प्राप्तवती येन कथायाः उत्तरार्द्धभागः पुलिनभट्टेन पूरितोऽपि स्वकमनीयतामेकसूत्रतां च न त्यजति।

२. **कादम्बरीकाव्यपात्राणां विन्यासे बाणभट्टस्य सौन्दर्यदृष्टिः**—यथा बाणभट्टः कादम्बरीकथायोजनायां स्वरचनाकौशलं प्रदर्शितवान्, तथैव काव्यस्यास्य पात्राणां विन्यासेऽपि स्वरचनापाटवम्प्रादर्शयत्। काव्यस्यास्य पात्रयोजना परमाह्लादकारिणी आद्योपान्तकुतूहलपूर्णा च वर्तते। तत्र बाणभट्टस्य प्रतिभायाः तस्य काव्यकलायाश्च पूर्णपरिपाकः दृष्टिगोचरो भवति। चन्द्रमसः चन्द्रापीडरूपे चन्द्रापीडस्य च शूद्रकरूपे विन्यासः परमचमत्कारकारकोऽस्ति। एवमेव ऋषिकुमारस्य पुण्डरीकस्य वैशम्पायनरूपे वैशम्पायनस्य च शुकरूपे योजना परमकुतूहलपूर्णा सहृदयहृदयाह्लादकारिणी चास्ति। कपिञ्जलस्य इन्द्रायुधरूपे लक्ष्म्याश्च चाण्डालकन्यारूपे विन्यासः कथायां चारुतामुत्पादयति।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

अत्र तथ्यमिदमवधेयं यत् चन्द्रस्य चन्द्रापीडशूद्रकयोः रूपे पुण्डरीकस्य च वैशम्पायनशुकयोः रूपे परिवर्तनं वर्णितं कविना, परन्तु कादम्बरी महाश्वेता चापरिवर्तिते एव वर्णिते। अर्थात् नायकस्योपनायकस्य च जन्मत्रयकथा वर्णिता, परन्तु नायिकोपनायिके न परिवर्तिते। एवं पात्रविन्यासे बाणभट्टः उत्कृष्टकलाकौशलं प्रमाणयति। अत्र कवेः सौन्दर्यदृष्टिरेव कारणम्। पात्राणामनेकजन्मकथामाध्यमेन योजनायां सहृदयाः अलौकिकमानन्द-मनुभवन्ति येनात्र कवेः विशिष्टा सौन्दर्यदृष्टिः प्रमाणिता भवति। पात्रयोजनायामाद्योपान्तं सहृदयाः कुतूहलोपेताः औत्सुक्ययुक्ताः वा दृष्टिगोचराः भवन्ति। यत् पात्रं कथारम्भे मिलति तस्य रहस्यं कथापूर्णता-याम्प्रकाशितम्भवतीत्यहो कादम्बरीपात्रयोजनायां कवेः सौन्दर्यदृष्टिः। अनेनैव प्रकारेण दिव्यपात्राणां सन्निवेशेन कथायामलौकिकचमत्कारः सञ्जातः।

३. **कादम्बरीकाव्ये रसभावगुणालङ्कारादिविन्यासे बाणभट्टस्य सौन्दर्यदृष्टिः**—काव्ये द्वौ पक्षौ कविना सृज्येते—प्रथमः भावपक्षः, द्वितीयश्च कलापक्षः। भावपक्षे काव्ये कवेः रसभावयोजनायाः विचारः भवति कलापक्षे च गुणालङ्कारादियोजनायाः विचारः भवति। बाणभट्टस्य सूक्ष्मेक्षिकासौन्दर्यदृष्टिः उभयोः पक्षयोः चित्रणे विन्यासे वा सहजतया कमनीयतया च प्रसरति। कादम्बरीकाव्यस्य भावपक्षः कलापक्षश्चेत्युभावेवोत्कृष्टौ स्तः। कविः यत्र रसभावयोजनां करोति तत्र रसभावमयो भवति, यत्र च गुणालङ्कारादियोजनां करोति तत्र गुणालङ्काराः जीवन्ताः भवन्ति। प्रायः सर्वे गुणाः सर्वे अलङ्काराः सर्वे रसाः सर्वे भावाश्च कादम्बरीकाव्ये सौन्दर्यदर्शननिष्णातेन कविना समुपनिबद्धाः सन्ति। वस्तुतः काव्ये यानि तत्त्वानि गुणालङ्कारादीनि भवन्ति तेषां परमप्रयोजनं काव्यसौन्दर्यमेव भवति। अत एव काव्यालङ्कारसूत्रवृत्तिकारः वामनाचार्यः वदति–सौन्दर्यमलङ्कारः[१]।

वस्तुतः काव्यस्य ग्राह्यता उपादेयता वा सौन्दर्याश्रिता भवति। अत एव वामनाचार्यः 'काव्यं ग्राह्यं सौन्दर्यात्' इति प्रतिपादयति। तद्यथा—'काव्यं ग्राह्यमलङ्कारात्। सौन्दर्यमलङ्कारः'[२]।

---

१. काव्यालङ्कारसूत्रवृत्तौ, १.१.२।

२. तत्रैव, १.१.१-२।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

अनेन तथ्यमिदम्प्रमाणितम्भवति यत् काव्यप्रणयने कवये सौन्दर्यदृष्टिः समपेक्षिता भवति। यावत्पर्यन्तं कवेः सौन्दर्यदृष्टिः प्रसरति तावत्पर्यन्तं काव्यं सहृदयहृदयाह्लादकारि भवति। सौन्दर्यदृष्टिसम्पन्नः कविः काव्ये पदे-पदे सौन्दर्यं निभालयति समुचितरीत्या निबध्नाति च। तद्यथा कविः प्रकृतिचित्रणमाध्यमेन उपमानयोजनामाध्यमेन कविसमयविन्यासमाध्यमेन विविधालङ्कारणां विन्यासेन रसभावयोजनया गुणाधानेन व्यङ्ग्यविधानेन औचित्यपालनेन च सौन्दर्यनिरीक्षणपरायणः तस्य विन्यासं करोति काव्ये। अनया दृष्ट्या यदा बाणभट्टस्य कादम्बरीकाव्यस्य परिशीलनं क्रियते तदा प्रतिभाति यत् काव्येऽस्मिन् बाणभट्टस्य सौन्दर्यदृष्टेः अद्भुतप्रसारः विद्यते। रसभाव-योजनापरायणः कविः स्वसूक्ष्मेक्षिकया आलम्बनोद्दीपनविभावयोः योजनां करोति। तद्यथा चन्द्रोदयवर्णनमुद्दीपनविभावत्वेन—

'एकत्र खलु मधुमासमलयमारुतप्रभृतयः समस्ताः एकत्र चायं पापकारी चन्द्रतको न शक्यते सोढुम्। इदमतिदुर्विषहं मे हृदयम्। अस्य चोद्गमनमिदं सदा ज्वरग्रस्तस्याङ्गारवर्षः शीतार्तस्य तुषारपातः विषविस्फोटमूर्च्छितस्य कृष्णसर्पदंशः इत्येवं चिन्तयन्तीमेव चन्द्रोदयोपनीता कमलवनम्लानिनिद्रेव मूर्च्छा मां निमीलितलोचनामकार्षीत्'[1]।

अत्र कवेः सौन्दर्यदृष्टिः महाश्वेतायां चन्द्रोदयस्य प्रभावं सूक्ष्मनिरीक्षणसापेक्षरूपेण चित्रयति। एवमेव विन्ध्याटवीवर्णनपरायणः कविः विविधोपमानयोजनया स्वसौन्दर्यदृष्टिं साधु प्रमाणयति। कविः विन्ध्याटवीकृते भुवः मेखलामुपमानत्वेन गृह्णाति येन तस्य सौन्दर्यदृष्टिः सर्वजनसंवेद्या भवति। सम्पूर्णकादम्बरीकाव्ये कवेः इयं विशेषता क्वचित् विन्ध्याटवीवर्णनमाध्यमेन क्वचित् प्रभातवर्णनव्याजेन क्वचिद् रात्रिवर्णनव्याजेन क्वचित् सन्ध्या-वर्णनव्याजेन क्वचित् प्रावृट्वर्णनव्याजेन दृष्टिपथमायाति। सर्वत्र कविः सौन्दर्यस्य सूक्ष्मनिरीक्षणं करोति। अत्र भवतु नाम निसर्गसौन्दर्य-निरीक्षणस्यावसरः वा स्थापत्यसौन्दर्यनिरीक्षणस्यावसरः वा मानवीयसौन्दर्य-निरीक्षणस्यावसरः वा सर्वत्र कवेः प्रतिभा सहजतया प्रभाविरूपेण च परिस्फुरति। संक्षेपेण वक्तुं शक्यते यत् कादम्बरीकाव्ये रसभावगुणालङ्कारविन्यासे

---

१. कादम्बरीकाव्ये पूर्वार्द्धभागे महाश्वेताभिसारप्रसङ्गे।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

बाणभट्टस्य सौन्दर्यदृष्टिः सर्वथानुपमा वर्तते। भवतु नाम विप्रलम्भशृङ्गारव्यञ्जना वा करुणव्यञ्जना वा वीभत्सव्यञ्जना वा सर्वत्र कविः सौन्दर्यं सूक्ष्मेक्षिकया पश्यति। एवमेवोत्प्रेक्षोपमारूपकादियोजनायां कवेः सौन्दर्यदृष्टिः अप्रतिहतगत्या प्रसरति। परिणामतः कादम्बरीकाव्यस्य रसभावगुणालङ्कारादियोजना संस्कृत-साहित्ये विशिष्टमहत्त्वमधिकरोति।

४. कादम्बरीकाव्ये वर्ण्यवस्तुजीवन्तवर्णने बाणभट्टस्य सौन्दर्यदृष्टिः— बाणभट्टः कादम्बरीकाव्ये यस्य वर्ण्यवस्तुनः वर्णनं करोति तत् साक्षाद्रूपेण जीवन्तरूपेण वा उपस्थितम्भवति। भवतु नाम शूद्रकसभावर्णनं वा चाण्डालकन्यावर्णनं वा अच्छोदसरोवरवर्णनं वा जरद्द्रविणधार्मिकवर्णनं वा अन्यत् किमपि वर्णनं वा सर्वत्र कविः स्वसौन्दर्यदृष्टिं निपुणतया निबध्नाति। यदा कविः विन्ध्याटवीवर्णनं करोति तदा सः सहृदयानां सम्मुखे नृत्यतीव। एवमेव यदा कविः सन्ध्यावर्णनं करोति तदा सा साक्षादुपस्थिता प्रतिभाति। इत्थमेव यस्य यस्य वर्ण्यस्य निबन्धनं करोति कविः तत्तद् वर्णनस्य जीवन्ततया सम्मुखे स्थितमिव प्रतिभाति। अत्र कवेः सूक्ष्मनिरीक्षणपरा सौन्दर्यदृष्टिरेव कारणम्। कवेः सौन्दर्यदर्शने निसर्गसौन्दर्यम्भवतु अथवा मानवीयसौन्दर्यम्भवतु अथवा स्थापत्यसौन्दर्यम्भवतु सर्वत्र जीवन्तता दृष्टि-पथमायाति, तद्यथा—निसर्गसौन्दर्यवर्णनदृष्ट्या सन्ध्याप्रभातप्रावृट्-विन्ध्याटवी-वर्णनानि अन्यानि वा सदृशवर्णनानि। मानवीयसौन्दर्यवर्णनदृष्ट्या कादम्बरी-वर्णनं महाश्वेतावर्णनं चाण्डालकन्यावर्णनं पुण्डरीकवर्णनं शबरसेनापतिवर्णनम् अन्यम्वा किमपि सदृशवर्णनम्। स्थापत्यसौन्दर्यवर्णनदृष्ट्या राजसभावर्णनं राजप्रासादवर्णनमथवा अन्यं किमपि वर्णनम्। एतानि सर्वाणि वर्ण्यवस्तूनि यत्र यत्र कादम्बरीकाव्ये बाणभट्टेन वर्णितानि तत्र तत्र सर्वत्र जीवन्ततया उपस्थितानि प्रतिभान्ति। अनेन कवेः सौन्दर्यदृष्टिः सहृदयजनसंवेद्या भवति।

५. कादम्बरीकाव्ये प्रकृतिचित्रणे बाणभट्टस्य सौन्दर्यदृष्टिः— कादम्बरीकाव्यम् आद्योपान्तं निसर्गवर्णनैः सम्प्रोतमस्ति। यत्र कुत्रापि कविः निसर्गवर्णनावसरं लभते तन्मयतया तस्य निबन्धनं करोति। परिणामतः काव्येऽस्मिन् यादृग् प्रकृतिचित्रणमासूत्रितं कविना तादृग् अन्यत्र सुदुर्लभम्। अत्र कविः क्वचिन्निसर्गस्य वर्णनमालम्बनविभावरूपेण करोति क्वचिदुद्दीपन-

CC-0. Sampurnanand University Collection. Digitized by eGangotri

विभावरूपेण। एकत्र कविः निसर्गस्य कोमलरूपं प्रस्तौति अन्यत्र च तस्य कठोररूपं प्रस्तौति। एकत्र निसर्गमुपमेयरूपेण निबध्नाति अन्यत्र चोपमानरूपेण। क्वचित् कविः निसर्गवर्णनैः विविधालङ्कारान् उपमोत्प्रेक्षाप्रमुखान् निबध्नाति क्वचित् रसाभासभावाभासव्यञ्जनां करोति निसर्गवर्णनेन क्वचिच्च ध्वनियोजनां विदधाति। परिणामतः बाणभट्टस्य प्रकृतिचित्रणमलङ्कारसौन्दर्यपूरितं रसाभिव्यक्तिभरितं भावव्यञ्जनालसितं ध्वनियोजनाझङ्कृतम् औचित्याञ्चितं वक्रोक्तिभूषितं रीतिराजितञ्चास्ति। अत्र कवेः सौन्दर्यदृष्टिरेव मूलकारणम्।

६. कादम्बरीकाव्ये वर्ण्यवस्तुसूक्ष्मनिरीक्षणे बाणभट्टस्य सौन्दर्यदृष्टिः— काव्ये कविः स्ववर्णननैपुण्येन वस्तुयोजनां विदधाति येन तत्र सौन्दर्याधानम्भवति। यावत् पर्यन्तं कविः वर्णने वस्तुनिष्ठो भवति तावत्पर्यन्तं वर्णनं सजीवम्भवति। यथा यदा कविः प्रकृतिवर्णनं करोति तदा प्राकृतिकपरिवर्तनानां जीवजन्तुक्रियाकलापानां फलपुष्पतरुलतादीनां विशेषतानाञ्च मनोहारिविन्यासं करोति। अयं विन्यासः कवेः सूक्ष्मनिरीक्षणेन विना न सम्भवति। तात्पर्यमिदं यत् प्रथमं तावत् कविः सावधानतया वर्ण्यवस्तुनः सूक्ष्मनिरीक्षणं करोति ततः परञ्च ललितभाषया प्रभावकारितया च तस्य निबन्धनं करोति येन तत्रालौकिकसौन्दर्यमुत्पद्यते। तद्यथा यदा बाणभट्टः सन्ध्यावर्णनमुपनिबध्नाति तदा तत्र सान्ध्यकालसम्बद्धसूर्य-प्रकाश-तरु-पल्लव-विहगध्वनि-पुष्प-मुनि-तपोवनाश्रम-जीवजन्तु-वटु-वेदपाठ-धेनु-वत्सादिवर्ण्यानां समवेतरूपमुपस्थापयति येन सन्ध्यावर्णनमिदं सम्मुखे उपस्थितमिव प्रतिभाति। परिणामतोऽत्र कवेः सौन्दर्यदृष्टिः मुखरा भवति। एवम्प्रकारेण सिद्धम्भवति यत् कवेः वर्णनायां यथार्थचित्रणेन सह सौन्दर्याधानायापि प्रवृत्तिः भवति। तेनात्र सत्यशिवाभ्यां सह सौन्दर्यमपि स्थानं प्राप्नोति। इदं सौन्दर्यं काव्यस्य तदितरव्यावर्तकतत्त्वम्भवति। अत एव भवतु नाम तत्र ध्वनियोजना वा अलङ्कारयोजना वा रसभावयोजना वा सर्वत्र कवेः प्रवृत्तिनिमित्तं सौन्दर्यवर्णनमेव। सौन्दर्यभावितः एव कविः काव्यप्रयणनं कुरुते। एतस्मादेव कारणात् काव्यशास्त्रम् अलङ्कारशास्त्रं वा सौन्दर्यशास्त्रनाम्नाऽपि व्यवह्रियते। यदि कवेः प्रवृत्तिः सौन्दर्यदर्शने न भवेत् तर्हि तस्य काव्ये काव्यत्वमपि न भवेत्। अतः काव्ये काव्यताधायकतत्त्वं सौन्दर्यमेवास्ति। यः कविः यावत् पर्यन्तं सौन्दर्यदर्शने सौन्दर्यवर्णने च निपुणः भवति, तावत् पर्यन्तं तस्य

CC-0. Sampurnanand University Collection. Digitized by eGangotri

काव्यमानन्ददायकं भवति। कालिदासादीनां महाकवीनां काव्यलोकप्रियतामूले इयं सौन्दर्यदृष्टिरेव वर्तते।

एवम्प्रकारेण विवेचनेनानेनायं निष्कर्षः प्राप्यते यत् सौन्दर्यदृष्टिः कवीनां कृते परमोपादेया अनिवार्या वा भवति। यद्यपीयं दृष्टिः संस्कृतकवीनां काव्येषु सर्वत्र दृष्टिगोचरा भवति तथापि बाणभट्टस्य कादम्बरीकाव्यन्तु अनया दृष्ट्या सर्वथानुपमं विद्यते। कदाचिद् बाणभट्टस्य सौन्दर्यदृष्टिमेवाभिलक्ष्य सहृदयजगति 'बाणोच्छिष्टं जगत्सर्वम्' 'बाणस्तु पञ्चाननः' सदृशा उक्तयः प्रचलिता जाता इति शम्।

●

CC-0. Sampurnanand University Collection. Digitized by eGangotri

मानवचित्तविकृतिं धर्षयितुं संस्कृतबौद्धजातकसाहित्यस्योपयोगित्वम्

डॉ.धर्मदत्तचतुर्वेदी
संस्कृतविभागाध्यक्षः
केन्द्रीयतिब्बतीशिक्षाविश्वविद्यालयः
सारनाथः, वाराणसी

❋ ❋ ❋

साहित्यं नाम किमपि लोकव्यवहारहनिदर्शकं मानवमनोरञ्जकं चित्तस्थ-वर्तमानभूतभविष्यगतक्रियारहस्यज्ञापकं ज्योतिषमिव तत्त्वं, द्वेषादिशल्यविद्धमानवस्य तत्कण्टकापसारकम् आयुर्वेदमिव, कायवाग्दूषणापसारकं धर्मशास्त्रमिव, किमुत सर्वशास्त्रशिरोमौलिभूतं लोकसुखशान्तिवितरकं पवित्राचरणप्रतिष्ठापकं विविधराग-लयच्छन्दोभिः सङ्गीतशास्त्रविजृम्भितं, वेदव्याकरणादिपरिपोषकं, सत्यशुचिताचार-तपस्त्यागसन्तोषादिभावनाप्रसारकं, दम्भछलक्रौर्यापसारकं, मात्सर्यलोभतृष्णामारकं कामवासनाध्वंसकं विश्वशान्तिवाहकं प्रत्येकं जनेनाराध्यमुपास्यमध्येतव्यमनिवार्यतः किमपि विशिष्टं तत्त्वम्।

मूलतस्तत्साहित्यं संस्कृतभाषानिबद्धं संस्कृतादेवान्यभाषाभिस्तत्सञ्चितं तन्नियमसंहिता वानूदिता। कस्याश्चिदपि भाषायाः साहित्यं तदैव विश्वजनवरणीयं जायते यदा तस्य भाषा विश्वस्मिन् प्रायेण प्रयुज्यते भाष्यते विपुलसंख्यकैर्जनैः। संस्कृतभाषाप्रयोगः साम्प्रतं विज्ञानचिकित्सावाणिज्यगणितादिविषयेषु भूयस्या प्रवृत्त्या क्षीयत उपचीयते च। भाषाप्रयोगाभावे तन्निबद्धसाहित्यं भवेन्नाम समुत्कृष्टं जीवनोपयोगि वा तत्प्रचारितं प्रसिद्धं साधारणजनवरणीयं च कथङ्कारं सम्पद्येत। अद्यातङ्कवादपरसम्पत्तिहरणविश्वासहननक्रियाधर्षकं समुत्कृष्टोदात्तचरितनिर्मापकं किं साहित्यम्? विश्वसमस्यासमाधाने संस्कृतमेधाविदुषां किं नेतृत्वं वैज्ञानिकार्थिक-नीतिनिर्देशकत्वं स्वस्थदृष्ट्युन्मीलकत्वं नापेक्ष्यते किम्? संस्कृतसाहित्यस्याध्येतृवर्गे का स्थितिरित्यपि सत्यभावेन चिन्तयितुं कमपि विशिष्टं प्रस्तावं निर्णयं वा कर्तुं तत्र रसायनविज्ञानाद्यध्ययनविषयं निवेशयितुं विश्वस्मिन् संस्कृताध्ययनं प्रवर्तयितुं वा शक्नुवन्ति किं सूक्ष्मद्रष्टारो विद्वांसः?

CC-0. Sampurnanand University Collection. Digitized by eGangotri

संस्कृतसाहित्ये स्वातन्त्र्योत्तरं विपुलसाहित्यमारचितम्। परं गीता यथा प्रसिद्धिमाप न तथा रामायणं वाल्मीकीयम्, यथा श्रीमद्भागवतं महाभारतं चापि परमप्रसिद्धिमाप्नोत् न तथा साधारणसमाजे भासभवभूतिबाणमाघादीनां काव्यजातम्। संस्कृतबौद्धजातकसाहित्यं मानवचित्तकालुष्यं गवेषयति तदयुक्ताः कुचेष्टा वारयितुं बोधिसत्त्वानामुदात्तचरितेन प्रयतते। बोधिसत्त्वानां बहुजनहिताय बहुजनसुखाय च समुत्कृष्टसमुदाचारित्वं निजसुखोत्सर्गः किमुत निजसमग्रवैभवस्य शरीरस्यापि च परेषां हिताय समर्पणं तर्कयुक्तिपराः संवादाश्च मानवक्रौर्यं धर्षयितुं नूनं क्षमन्ते। बौद्धजातकसाहित्यं हिं समग्रादर्शप्रकाशकं जीवनरहस्योद्घाटकं सर्वाभ्युदयकारकं मोहतृष्णामात्सर्यापहारकं दुश्चिन्तनापसारकं निःस्वभावतया परहितप्रवर्तकं वाक्-कायमलविधूनकं साम्यबन्धुत्वोपकारबुद्धिनियामकं सन्देहभ्रान्त्युच्छेदकं सर्वाशुचि-निधानापहरं सर्वदुःखोन्मोचकं समधिकभोगविलासादिनिवर्तकं चतुरार्यसत्यभावकं त्रिरत्नस्तुतिकारकं मारपराजयज्ञापकं बिम्बप्रतिबिम्बभावसमन्वितं प्रतीत्यसमुत्पादो-पदेशकं करुणाशान्तरसपेशलं प्रसादगुणगुम्भितं च हरतितरां क्लेशकर्माणि।

जातककथानां काव्यत्वमार्यशूरकविनोद्घोषितं यथा—

श्रीमन्ति सद्गुणपरिग्रहमङ्गलानि कीर्त्यास्पदान्यनवगीतमनोहराणि।
पूर्वप्रजन्मसु मुनेश्चरितादद्भुतानि भक्त्या स्वकाव्यकुसुमाञ्जलिनार्चयिष्ये॥

(जातकमाला-१)

अत्र बोधिसत्त्वानां व्यवहारे न लोकयशोऽभिलाषो न च राज्यसुख-वैभवप्राप्तिः। यत् किमपि वस्तु याच्यते येन तदेव वस्तु दीयते तस्मै बोधिसत्त्वेन यथा—

यदेव याच्येत तदेव दद्यान्नानीप्सितं प्रीणयतीह दत्तम्।
किमुह्यमानस्य जलेन तोयैः दास्याम्यतः प्रार्थितमर्थमस्मै॥

(शिबिजातकम्-२५)

एवं विविधजातक-मैत्रीबल-विश्वन्तर-सुपारग-शश-कुम्भादीन्याश्रित्य प्रकृतसन्दर्भे विमृश्यते। इत्थं बौद्धजातककाव्यविषये साकल्येन मदीयानीमानि पद्यान्यपि—

सौन्दर्याधायकं दिव्यं रसभावनिरन्तरम्।
निर्वाणाभिमुखं यद्धि जातकं तद् विशिष्यते॥

CC-0. Sampurnanand University Collection. Digitized by eGangotri

सहजसरसभाषाबद्धमेवं सुकाव्यं
सुगतगुणगरिम्णा मोक्षमार्गं बिभर्ति।
जगति दिशति शीलं ध्यानवीर्यादिकं च।
विलसति ननु काव्यं बौद्धमेतत् शमाय॥

यः कामदेवो विहतोऽपि शास्त्रा बुद्धत्वमाप्तं शुभकर्मयोगैः।
रागाद्यरातेरपवार्य लोकं ज्ञानप्रभाभिर्विहितः प्रकाशः॥

बुद्धोपदिष्टा करुणैव शक्ता दुःखस्य पापस्य च शोधनार्थम्।
सुदारुणं कर्म विहाय सद्यो लोकं समुन्नेतुमसौ विधेया॥

जीवेष्वनाथेषु दयां विधातुं प्रयत्यतां यद्वरबोधिचित्ते।
बुद्धस्य धर्मो जगतां हिताय यश्चित्तशुद्ध्या परिधारणीयः॥

श्रेयः परेषां दहतीति लोके तीव्राग्निवत् तन्निजचित्तदोषः।
यत्नश्रमाभ्यां तु विकारजातं जहातु शीलादिनिषेवणेन॥

मानवचित्तवृत्तिपरिणामा हि बलवद्राष्ट्रेणाद्य निर्बलराष्ट्रस्वातन्त्र्यहरणम् आतङ्कवादिप्रशिक्षणम्, राष्ट्रियसीमासु सुरक्षायै क्रियमाणाया अर्बुदमितधनराशेर्दुरुपयोगित्वं कथञ्चिदपि परकीयभूमिक्षेत्राधिकारापहरणम् अनुचितावैधोपायैर्राष्ट्रधनभक्षणं समाजे जातिक्षेत्रभाषा अधिकृत्य क्रियमाणा राजनीतिः, राजसत्ताप्राप्त्यै चानुचितोपायावलम्बनं, शिक्षाक्षेत्रे निजोन्नत्यै पदाधिकारप्रभावदुरुपयोगित्वम्, अयोग्यानां समर्थनञ्चेति। अधीतविद्यानां मिथ्यासम्भाषणपैशुन्यवञ्चनाभिर्विकृतचित्तानां रागद्वेषलोभादिभिर्हतमतीनां शास्त्रामृतेनापि चित्तकौटिल्यमपहातुमशक्तानां जनानां गीताशपथं मन्त्रिपदप्रतिज्ञया वञ्चयतामपहृतापारधनानां कृते बौद्धजातकसाहित्यं नूनं तन्मनोमालिन्यमपहर्तुं शक्नोति तेषु स्वच्छाचरणं सत्कर्ममतिं च निवेशयितुमर्हति। साम्प्रतं जनेषु क्षमाशीलत्वाभावादेव हिंसाकलहोपद्रवा जायमाना दृश्यन्ते। अमर्यादितमाचरणं गोप्यते। अज्ञानवशादपि विहितक्रूरकर्मणः कृतेऽपि क्षमा न याच्यते प्रत्युत तत् परिपोष्यते मिथ्योक्तिभिः। मैत्रीबलजातके यदा मैत्रीबलाख्यबोधिसत्त्वं तदीयनेत्रमयाचिषुर्यक्षास्तदा स बोधिसत्त्वो राजा सन्नपि निजमांसरक्तदानाय विवर्जितः प्रजया, तद् ददौ। यक्षास्तदर्थं निजाज्ञानवशादेतत्क्रूरकर्मत्वेनं क्षमां याचन्ते मैत्रीबलराजानम्, यथा—

अज्ञानाच्च यदस्माभिरेवमायासितो भवान्।
स्वमप्यर्थमपश्यद्भिर्मृष्यतामेव तच्च नः॥ (मैत्री. जा. ५७)

CC-0. Sampurnanand University Collection. Digitized by eGangotri

तदीयनेत्रमांसादिदानप्रयोजनं तं पप्रच्छुर्यक्षास्तदा राजोवाच—

प्रयत्नलभ्या यदयत्ननाशिनी न तृप्तिसौख्याय कुतः प्रशान्तये।
भावाश्रया सम्पदतो न कामये सुरेन्द्रलक्ष्मीमपि किम्वथेतराम्॥
न चात्मदुःखक्षयमात्रकेण मे प्रयाति सन्तोषपथेन मानसम्।
अमूननाथानभिवीक्ष्य देहिनः प्रसक्ततीव्रव्यसनश्रमातुरान्॥
(मैत्री. सा. ५३,५४)

बोधिसत्त्वा यदात्मदुःखक्षयमात्रेण न तुष्यन्ति ते त्वनाथान् वीक्ष्य तत्तीव्रतम-दुःखानि निवार्यैव तुष्यन्ति तदा समाजेऽद्य कथं निजसौख्याय परपीडनम्? बोधिसत्त्वास्तु परदुःखातुरा नात्मसुखमवेक्षन्ते।

प्रायेण साम्प्रतं धनार्जनप्रयोजिका हिंसा दृश्यते। धनापहरणाय केचिद् धनाढ्यं घ्नन्ति तद्धनमप्यपहरन्ति। विषयेऽस्मिन् ब्राह्मणाख्यजातकस्य प्रासङ्गिकत्वम्। आचार्यो निजदैन्यमपाकर्तुं स्वशिष्यान् समबोधयत्। शिष्या ऊचुः—

प्रतिग्रहकृशोपायं विप्राणां हि धनार्जनम्। ब्राह्मणानां कृते धनसङ्ग्रहोपायानामल्पीयस्त्वम्। तस्मात् 'आपद्धर्मः स्तेयमिष्टं द्विजानाम्' इत्युक्त्या केचन शिष्या गुरुमुपकर्तुं धनार्जनाय चौर्ये चारमन्त परमेको महाब्राह्मणो बोधिसत्त्वश्चौर्याद् धनसङ्ग्रहं नान्वमेने। स चोपाध्यायं ब्रवीति—

न चात्र मे निश्चयमेति मानसं धनार्थमेवं प्रतरेद् भवानपि।
अवेत्य को नाम गुणागुणान्तरं गुणोपमर्दं धनमूल्यतां नयेत्॥
(ब्राह्मणजा. १८)

सद्गुणानुपेक्ष्य को धनमर्जयिष्यति। विगतलज्जेन धर्मं तिरस्कृत्य धनं न चीयताम्। मूर्खा निमित्तमासाद्य धनार्जने धर्मं न पश्यन्ति।

तपःश्रुतज्ञानधनास्तु साधवो न यान्ति कृच्छ्रे परमेऽपि विक्रियाम्।
(ब्राह्मणजा. २०)

साम्प्रतमाधुनिका नवयुवानो राष्ट्रसंस्कृतिसेवामनपेक्ष्य यौवनोन्मत्ताः परदारा विदूषयन्ति न ते सनातनमर्यादां पश्यन्ति, सुरापानोन्मत्ता इव युवानः केऽपि वा चरमवयसश्चापि तरुणीष्वासक्ता रमन्ते परं बोधिसत्त्वैर्नारीष्वाकर्षणं राष्ट्रसेवायां विघ्नोत्पादकं धर्मसंस्कारविदूषकमिवाभिमतम्। 'उन्मादयन्ती'-नामिकैका परमसुन्दरी

CC-0. Sampurnanand University Collection. Digitized by eGangotri

कन्यका पौरमुख्यस्य, तां राज्ञः समक्षं प्रकाशयितुं नेहन्ते प्रजाजनाः। यतो हि राजा तां विलोक्य विकृतचित्तः सन् प्रजासेवापराङ्मुखो न जायताम्। सा कन्यैवम्—

इयं हि सन्दर्शनमात्रकेण कुर्यान्मुनीनामपि सिद्धिविघ्नम्।
प्रागेव भावार्पितदृष्टिवृष्टेर्यूनः क्षितीशस्य सुखे स्थितस्य॥

(उन्मादयन्तीजा. ६)

अभिपारगाख्यमन्त्रिणा सा विवाहिताऽभूत्। केचिज्जनास्तां दृष्ट्वा तत्सौन्दर्यं राज्ञे न्यवेदयन्। राजा तां विवाहितां परस्त्रियं ज्ञात्वापि तदाकृष्ट आह—

परस्य नाम भार्यायां ममाप्येवमधीरता।
तदुन्मत्तोऽस्मि सन्त्यक्तो लज्जयेवाद्य निद्रया॥ (तत्रैव १४)

परस्त्रीष्वपि जनानामाकर्षणं निजभार्यासु कथं न तादृग्। कामासक्त्या तस्यामनुरक्ततया पाण्डुकृशशरीरः स तनुप्रध्यानविनिःश्वसितविजृम्भणपरोऽभूत्। परभार्येयम् इति मत्वा धैर्यं न तत्याज राजा। तत्तरुण्याः पतिर्यदा निजभार्यायामनुरक्तं नृपं वेत्ति तदा स्वयमेव राजानमुपेत्य ब्रवीति तत्प्रतिग्रहीतुमेनामर्हतीति मदनुग्रहार्थं देवः। राजा कामवशगो धैर्यमपरित्यज्योवाच—

पुण्याच्च्युतः स्याममरो न चास्मि विद्याच्च नः पापमिदं जनोऽपि।
तद्विप्रयोगाच्च मनो ज्वलंस्त्वां वह्निः पुरा कक्षमिव क्षिणोति॥

पतिरभिपारगः मित्रस्य पत्नी तदन्यमित्राय मित्रवदेवेति मत्वा पुनरपि तां स्वीकर्तुं राजानं व्यज्ञापयत् तथा घटनां तां कुत्राप्यप्रकाशयितुं स्वीचकार। अदृश्यमानोऽपि पापमाचरन् कदापि समृद्धिं न याति, तत्पापं विशुद्धचक्षुषः दिवौकसो योगिनो नराश्च पश्यन्त्येव इति मत्वा राजा तां नेहते—

अहं हि शस्त्रं निशितं विशेयं हुताशनं विस्फुरदर्चिषं वा।
न त्वेव धर्मादभिगम्य लक्ष्मीं शक्ष्यामि तत्रैव पुनः प्रहर्तुम्॥

(उन्मादयन्ती. ३०)

चेन्ममेयं पत्नीति कृत्वा न स्वीकुरुते भवान् तदा वेश्याभावेन स्वीकरोतु इति निवेदयते चाभिपारगः। राजोवाच—

अदुष्टां सन्त्यजन् भार्यां मत्तो दण्डमवाप्नुयाः।
स धिग्वादास्पदीभूतः परत्रेह च धक्ष्यसे॥ (तत्रैव-३१)

राजा प्रजानुरञ्जनायामर्यादितमाचरणं न स्वीकुरुते। स च निजसंयमं द्योतयति–

CC-0. Sampurnanand University Collection. Digitized by eGangotri

आत्मानमपि चेच्छक्तिर्न स्यात् पालयितुं मम।
कान्ववस्था जनस्यास्य मत्तो रक्षाभिकांक्षिणः ।। (उन्मादयन्ती. ४०)

तदेवं तीव्रदुःखातुराणामपि सतां नीचमार्गनिषण्णयता भवति स्वधैर्यावष्टम्भात् धैर्यक्षान्तिधर्माभ्यासे योगो विधेय इति बौद्धजातकसाहित्यशुभाशयः।

एवमेव मैत्रीदृष्ट्यापि हंसजातकस्य प्रासङ्गिकत्वम्। एको हंसो व्याधप्रक्षिप्तजालाबद्धोऽभूत् तदा तत्सहायो हंस उन्मुक्तः सन्नपि तं हंसं परित्यज्य न पलायते। यथोक्तं तेन—

नैकान्तिको मृत्युरिह स्थितस्य न गच्छतः स्यादजरामरत्वम्।
सुखेषु च त्वां समुपास्य नित्यमापद्गतं मानद केन जह्याम्।।
(हंसजात. २७)

नैष धर्मो महाराज! त्यजेयं त्वां यदापदि।
या गतिस्तव सा मह्यं रोजते विहगाधिप।।

एवं हंसद्वयस्य चापदि सख्यमेवं तदा मानवः दुःखातुरान् कथं नोद्धधरेत्। किं निर्बलान् मतिहीनान् चतुरतया प्रवञ्च्यैव प्रगतिं यास्यति।

महाकपिजातकं तेषां सन्दर्भे प्रस्तोतव्यं ये प्रतिदिनं निजमित्रैः सह भोजनं कुर्वन्ति विश्वासमपि द्रढयन्ति, परं परोक्षे स्वार्थवशान्मित्राणि छलयन्त्यपि। केचित्तु मित्रैरुपकृताः सन्तोऽपि तान् वञ्चयन्ति चोपहसन्ति। महाकपिरूपेणावतीर्णोऽत्र बोधिसत्त्वो महोदारः विशुद्धमना विपत्तौ सहायको दृश्यते। कदाचिद् वने मानव एको वनाद् वनं पर्यटन् मार्गं बहिर्यातुं न लभते। तत्रस्थो महाकपिः सहायतया तं निजपृष्ठे समारोप्य वनाद् बहिर्निस्सारयति। मध्ये महाकपिर्विश्रान्त्यै निद्रां लेभे तदोपकृतः स मानवः निद्रोपगतं कपिं वीक्ष्य बुभुक्षितः सन् महाकपिं भक्षयितुं तस्य शिरसि शिलापट्टेन प्रहरति। प्रहारेण पीडितो बोधिसत्त्वो विचारयति कीदृशोऽयं जनो यन्मया प्रपातादयं निस्सारितः तथापि ममैव मांसमत्तुमीहते। तेने क्तम्—

परलोकादिवानीतो मृत्योर्वक्त्रान्तरादिव।
प्रपातादुद्धृतोऽन्यस्मादन्यत्र पतितो ह्यसि।।

धिगहो बत दुर्वृत्तमज्ञानमतिदारुणम्।
यत् पातयति दुःखेषु सुखाशाकृपणं जगत्।।

पातितो दुर्गतावात्मा क्षिप्तः शोकानलोमयि।
निमीलिता यशोलक्ष्मीर्गुणमैत्रीविरोधिता।।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

गत्वा धिग्वादलक्षत्वं हता विश्वसनीयता।

का नु खल्वर्थनिष्पत्तिरेवमाकाङ्क्षिता त्वया ॥ (महाकपि. २८-३१)

मया त्वं सङ्कटान्मोचितस्तथापि त्वं निजोपकारकं मां प्रहृत्य नरकं पुनरापद्यसे। तवैतत् प्रहारः मां न दुनोति यथा दारुणमिदं ते पापम्। ततस्तस्य विश्वासहतकस्य मनः पश्चात्तापाग्नौ ज्वलति। एतत्पापात् कुष्ठरोगेण सर्वाङ्गं तदीयमाहतं तथापि महाकपिर्महात्मा तं संरक्ष्य राजमार्गं प्रापयत्। महाकपिर्बोधिसत्त्वो विचारयति एवं लोभाविष्टः सन् मिथ्योक्तिभिः निजलाभे द्रव्यार्जने पैशुन्ये हिंसायां च रममाणो मानवः संसारसागरात् कदापि तर्तुं नार्हति तस्मादेव भूयोऽत्र समागत्य दुष्कर्मसु रमते।

महोदाराणां मनसि को विकारस्ते समभावाः वस्तुत्वानभिलाषिणः परेषां सेवायामेव रमन्ते। अद्य धनलोभान्निजपरिजना हन्यन्ते वञ्च्यन्ते। तेषां कृते शरभजातकमतीवप्रासङ्गिकम्। शरभत्वेनावतीर्णो बोधिसत्त्वो वने विहरति तद्देशीयो राजा वने तं पिनाकेन घातयितुमनुधावति। मध्येमार्गं तुरगारूढो राजा प्रपातं पतितः सन् ततो निर्गन्तुं न शक्नोति तथापि स हस्तिशाक्को निजहन्तारं कारुण्येन विभाव्य रक्षितुं प्रयतते। तदा राजा चिन्तयति—

दृष्टावदाने द्विषति का नामास्य दया मयि।

मम विप्रतिपत्तिश्च केममस्मिन्ननागसि ॥ (महाकपि-१३)

मयैतत्प्राणहननायासो विहितस्तथाप्ययं मयि दयते कथं मया चापराद्धम्।

अहमेव मृगो गौर्वा कोऽप्ययं शारभाकृतिः। (तत्रैव-१४)

प्रपातपतनक्लेशान्न त्वहं पीडितस्तथा।

इति कल्याणहृदये त्वयि प्रस्खलनाद्यथा ॥

प्रपातपतनपीडया न क्लान्तस्तथा यथा निजरक्षके प्रहारेण पश्चात्तापः। वस्तुतो जना अद्य निर्निमित्तं वैरं कुर्वन्ति। यथा धम्मपदे—

न हि वैरेण वैराणि शाम्यन्तीह कदाचन।

अवैरेण च शाम्यन्ति एष धर्मः सनातनः ॥

(धम्मपदे यमकवग्ग-५)

वैरभावग्रस्तत्वादेवाद्य कश्मीर-ताइवान-तिब्बतादि-समस्या जायन्ते। यदा विश्वस्मिन् वैरभावो न स्यात्, तदा सर्वाः समस्याः स्वमेव समाहिताः स्युः। भारते

CC-0. Sampurnanand University Collection. Digitized by eGangotri

न्यायालयेषु भूयांसोऽभियोगा जायन्ते। दुर्मतयोऽपराधाद् न बिभ्यति कारागाराच्चापि। लघुविवादादेव वैरभावेन जनप्राणान् घ्नन्ति निजशक्तिं च प्रदर्शयन्ति। ते कदाचित् संस्कृतबौद्धजातकसाहित्यं सेवन्तां तदाऽपराधेषु नैयून्यं सम्भाव्यते। गृहस्था धनलुब्धा दूषितधियः शिक्षिताश्च विलोक्यन्ते। एकस्य गृहस्थस्य दुश्चरितं जातककारेण कथं तिरस्क्रियत इति द्रष्टुं शक्यते। रुरुनामको बोधिसत्त्वः मनुष्यवाचा ब्रुवाणो वने विहरति। कदाचिन्नद्यां प्रवहन्नेको जनो जलधारया प्रवहन् आत्मरक्षायै जनान् आकारयति। रुरुबोधिसत्त्वो दयापरवशः तं नदीधारया मोचयति। सुरक्षितः स मृगाय कार्तज्ञ्यं विज्ञापयति। मृगः निजस्थानमनुद्घाटयितुं निवेदयति। ततस्तद्देशीयराज्ञः पत्नी स्वप्ने शुभगुणाशयं मृगं कञ्चित् पश्यति तं निग्रहीतुं राजानं निवेदयति। राजा मृगान्वेषणाय वनस्य भूयोंऽशं ज्वालयति। यदा मृगो न लभ्यते तदा मृगग्रं हीतारं विपुलधनराशिं पुरस्कारत्वेन दातुमुद्घोषयति। 'स्वार्थी दोषं न पश्यति' इति कृत्वा मृगस्थानविज्ञः स एव जनो यो हि जलधारातो मृगेण निष्कासितो वचनबद्धश्च मृगस्थानानुद्घाटनाय। स विचारयति यदि मृगं तं निग्राहयामि तदा पातकमेव परलोकेऽपि सुखक्षतिः। चेत् परिवारं परिपोषयामि? तदा दैन्यनिवृत्तिः। अतीतं पश्यामि भविष्यं वा? एवं विचार्य तेन निजपक्षे एव मृगस्थानं दर्शयितुं व्यचारि। स राजानं तत्स्थानं विज्ञाप्य तस्मिन् वने मृगं दर्शयामास। बोधिसत्त्वो हि राज्ञा साकं तमुपकृतं जनं वीक्ष्य विचारयति—

सत्य एव प्रवादोऽयमुदकौघगतं किल।
दार्वेव वरमुद्धर्तुं नाकृतज्ञमतिं जनम्॥ (रुरुजात. १४)

जलौघगतदारुनिष्कासनं वरं न चाकृतज्ञमतिजनमुद्धर्तुम्। रुरुबोधिसत्त्वः पुनर्ब्रवीति—

परिश्रमस्य तस्येयमीदृशी प्रत्युपक्रिया।
आत्मनोऽपि न दृष्टोऽयं हितस्यापनयः कथम्॥ (रुरु. २५)

राजा तन्निशम्य विस्मितः सन् तद्रुक्षोक्तिनिमित्तं पृच्छति। तदा मृगस्योक्तिः—

को हि क्षते क्षारमिवावसिञ्चेद् रुक्षाक्षरं विस्खलितेषु वाक्यम्।
प्रिये तु पुत्रेऽपि चिकित्सकस्य प्रवर्तते व्याधिवशाच्चिकित्सा॥
यमुह्यमानं सलिलेन हारिणा कृपावशादभ्युपपन्नवाहनम्।
ततो भयं मां नृवरेदमागतं न खल्वसत्सङ्गतमस्ति भूतये॥
(रुरुजातकम्–२९-३०)

CC-0. Sampurnanand University Collection. Digitized by eGangotri

राजन्! यद्यपि पापिनो निन्द्यस्यापि निन्दा पापाय कल्पते। कः सत्पुरुष एवं यः पापिनो विनिन्द्य तद्व्रणे लवणं क्षेप्स्यति। यः सत्पुरुषो मया जलवेगात् संरक्षितः स एवाद्य मे विपदो हेतुः। राजा तद्विज्ञाय तदपकारिणं जनं हन्तुमुद्यतोऽभूत्, तदा रुरुबोधिसत्त्वस्तं निरोध्य कथयति—

असह्यदुःखोदयपीतमानसाः पतन्ति चैवं व्यसनेषु मानसाः।
प्रलोभ्यमानाः फलसम्पदाशयाः पतङ्गमूर्खा इव दीपशोभया॥

(रुरुजातकम्-३३)

असह्यदुःखोदया जना एव व्यसनेषु पतन्ति, धनलुब्धा राष्ट्रक्षतिमपि विदधति। केचन धनाशया मिथ्योक्ति-मित्रक्षति-द्रोहापकारेषु रमन्ते। तादृशा दयाभावेन क्षन्तव्या एव न च दण्डनीया बौद्धधर्मदृष्ट्या। आत्मनीव स्वजनेऽपि दयां कुर्याज्जनो यदा तदा विक्रिया नापद्यते। दयाक्रान्तचित्तं परद्रोहरभसं न जायते। सद्गुणान् दयैव जनयितुमर्हति सस्यानि सुवृष्टिरिव। दयाभावोत्पादनमेवोपायो ज़गतां शान्तये समृद्धये चित्तविकृत्यपाकरणाय च।

बौद्धजातकसाहित्यं तर्कप्रमाणयरिपुष्टं नितरां सदसन्निर्णायकं विनयविषय-समाधायकं च प्रतिभाति। क्षान्तिपारमितासाहित्यमनुशीलयेत् तत्त्वतः कोऽपि तदा सर्वमपि विश्ववैमनस्यं रसातलं यातु। बोधिसत्त्वास्तु सांसारिकदोषापनयनाय यात्रां कुर्वाणा विलोक्यन्ते। ते निजसम्पत्तिं शरीरं चार्पयितुमुद्यता दृश्यन्ते। सर्वविधत्यागं समाजहिताय विधातुं चापि बौद्धजातकानि चेष्टन्ते। यथा हस्तिरूपेणावतीर्णस्य बोधिसत्त्वस्य महात्यागेन मरुस्थलस्यापि निर्बलजना उपकृता जायन्ते। वने एकाकी हस्ती तरुपर्णेन सलिलेन शमेन च तर्पस्वीवाभिरेमे। कदाचिन्निजदेशान्निष्कासितः सप्ततिर्जनास्तत्र बुभुक्षिता हस्तिनं तमुपाजग्मुः। हस्ती लज्जयावनतः तद्बुभुक्षोपशमाय निजशरीरमांसेन निजप्राणानपहातुं विचारयामास। स च ब्रूते—

करोमि तदिदं देहं बहुरोगशतालयम्।
एषां दुःखपरीतानामापदुत्तरणप्लवम्॥
स्वर्गमोक्षसुखप्राप्तिसमर्थं जन्म मानुषम्।
दुर्लभं च तदेतेषां मैवं विलयमागमत्॥ (हस्तिजा. १४, १५)

इति विचार्यात्मानं हस्ती पर्वततटान्मुमोच। सुरा अपि तदीयावदानेन विस्फारितनेत्रा बभूवुः। बोधिसत्त्वेभ्यो विप्राः शीलवन्तो विशेषेण रोचन्ते ते सुभाषितसूक्तिमर्मज्ञान् विप्रान् पुरस्कुर्वन्ति। सुतसोमाख्यबोधिसत्त्वेन वने विप्रभाषितं सुभाषितं श्रूयते।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

कदाचित्तत्र नरभक्षी कल्माषपादः सौदासाख्यः प्राप। सौदासस्य पिता वने सिंहस्त्रीं समालिङ्ग्य सौदासं जनयामास। तत्सुतस्तस्मादेव नरमांसमत्ति। सौदासो बोधिसत्त्वमाहारयितुं स्कन्धे समारोप्य निनाय। बोधिसत्त्वस्य नेत्रयोरश्रूणि विलोक्य सौदासो ब्रूते—

आपत्सु विफलं धैर्यं शोके श्रुतमपार्थकम्।
न हि तद् विद्यते भूतमाहतं यन्न कम्पते। (सुतसोमजा. १४)

सौदासस्तदश्रुनिमित्तं यदा पृच्छति तदा बोधिसत्त्वो ब्रवीति—

न प्राणान् पितरौ न चैव तनयान् बन्धून्न दारान्न च
नैवैश्वर्यसुखानि संस्मृतवतो वाष्पोद्गमोऽयं मम।
आशावाँस्तु सुभाषितैरभिगतः श्रुत्वा हृतं मां द्विजो
नैराश्येन स दह्यते ध्रुवमिति स्मृत्वास्मि सास्रेक्षणः॥

(सुतसोम-१६)

कश्चित् क्षान्तिवादी मुनिस्तपस्यारतो वने समवर्तत, तदाऽन्तःपुरयोषितः काश्चन तं मुनिं वीक्ष्य तं परितो विराजन्ते। तद्देश्यो राजा युवतिजनपरिवृतमुनिं वीक्ष्य धृष्टरुक्षवचोभिरवमानयँस्तं भर्त्सयति—

वागन्यथान्यैव शरीरचेष्टा दुष्टाशयं मानसमन्यथैव।
तपोवने कोऽयमसंयतात्मा दम्भव्रताडम्बरधीरमास्ते॥

(क्षान्तिजात. ३४)

राजा कुपितस्तं विडम्बयति तदा बोधिसत्त्वो राजानं सम्बोधयति—

अयुक्तवत्साध्वपि किञ्चिदीक्ष्यते प्रकाशतेऽसाध्वपि किञ्चिदन्यथा।
न कार्यतत्त्वं सहसैव लक्ष्यते विमर्शमप्राप्य विशेषहेतुभिः॥

(तत्रैव-४०)

अद्य प्रायेण भूयांसो जनाः कार्यहेतुमविज्ञाय जनापकारे रमन्ते, तस्मादेव विकृतचित्ता जना जायन्ते। राजन् त्वदीयाः स्त्रियोऽभियाताः स्वयमेव ममाश्रमं तस्मान् नापराधः। तस्मात्त्वं क्षान्तिभावनां धेहि—

अथाप्ययं स्यादपराध एव मे क्षमा तु शोभते तथापि ते नृप।
क्षमा हि शक्तस्य परं विभूषणं गुणानुरक्षानिपुणत्वसूचनात्॥

(तत्रैव-४५)

CC-0. Sampurnanand University Collection. Digitized by eGangotri

शक्तिमतो भूषणं क्षमैव, न च दुर्बलेषु बलप्रदर्शनम्। राजा क्षमोपदेशमचिन्त्य तद्दक्षिणहस्तमसिनाऽच्छिनत्। मुनिस्तदर्थं नापि शुशोच न च चुकोप। राजा मुनेरङ्गविच्छेदनाज्ज्वरग्रस्तः सन् तपोवने क्वचिद् विदीर्णभूमौ पपात सहसा। विलपन्ती प्रजा नृपं ततः समुद्धर्तुं मुनिं निवेदयामास। तदा क्षमावतो मुनेः कियद्द्भुतं वचः—

मरणव्याधिदुःखार्ते लोभद्वेषवशीकृते।
दग्धे दुश्चरितैः शोच्ये कः कोपं कर्तुमर्हति ।। (क्षान्तिजात. ६३)

किमेतद् वचः क्षान्तिं न भावयति कोपाविष्टान्। बोधिसत्त्वा दण्डयितुमर्हानपि मर्षयन्ति क्षमया। तत्र दण्डविधानमकल्पितमेव दृश्यते। जातकसाहित्यप्रचारेण समाजे स्वाभाविकी प्रीतिः शान्तिः सामरस्यं च स्थापयितुं शक्यते, परं बौद्धसाहित्यस्योपेक्षया तदीयं साहित्यं प्रचारितं नावलोक्यते। बोधिसत्त्वस्तपोवने समुपविष्टं विप्रं पुनस्कर्तुमीहते। ततः परावृत्य तं च पुरस्कृत्य नरभक्षिणमुपयास्यति। जातकसाहित्ये सुभाषितमाहात्म्यं तेनावोचि यथा—

दीपः श्रुतं मोहतमःप्रमाथी चौराद्यहार्यं परमं धनं च।
सम्मोहशत्रुव्यथनाय शस्त्रं नयोपदेष्टा परमश्च मन्त्री।।
(सुतसोमजात. ३२)

विप्रं पुरस्कृत्य परावृतं स्वयं बोधिसत्त्वमालक्ष्य नरभक्षी विस्मयमानो ब्रवीति—

आश्चर्याणां बताश्चर्यमद्भुतानां तथाद्भुतम्।
सत्यौदार्यं नृपस्येदमतिमानुषदैवतम् ।।

नरभक्षित्वं बोधिसत्त्वेन यदा तिरस्कृतं तदा सौदासेनोक्तं किं शास्त्रज्ञातारो राजानो मृगान् न हन्ति वने? नैके शास्त्रज्ञानिनः किं शास्त्रविरोधं नाचरन्ति? बोधिसत्त्वेनाभाणि सत्यनिष्ठाः शास्त्रज्ञाः शास्त्रविरुद्धं नाचरन्ति। राजनीतीनां कौटिल्यात् परिपालनं न दृश्यते, अहं हि यथा—

अपास्य जिह्मानिति नीतिमार्गान् सत्यानुरक्षी पुनरागतोऽस्मि।

सत्यतानीतिं शुचिशीलवन्त एव जानन्ति नरभक्षिणः किं ज्ञास्यन्ति। सत्यं हि—

द्वारं प्रवेशाय सुरालयस्य संसारदुर्गोत्तरणाय सेतुः।
सात्मीकृतं कर्म च शुक्लमस्माद् धर्मस्थितः को मरणाद् बिभीयात् ।।
(सुतसोम. ६२)

CC-0. Sampurnanand University Collection. Digitized by eGangotri

सत्यनिष्ठः पूर्वजन्मवृत्तं संस्मर्तुं शक्नोति पूर्वपुण्याशयात्। बोधिसत्त्वेन नरभक्षी विनयीकृतश्चोपकृतोऽहिंसया। नरभक्षी बोधिसत्त्वं तं गुरुत्वेनोररीकुरुते यदा, बोधिसत्त्वस्तदा वरचतुष्टयं याचते तं नरभक्षिणम्—

सत्यव्रतो भव विसर्जय सत्त्वहिंसां बन्दीकृतं जनमशेषमिमं विमुञ्च।
अद्याद् न चैव नरवीर! मनुष्यमांसमेतान् वराननवराँश्चतुरः प्रयच्छ॥

नरभक्षी वरत्रयं दातुं स्वीकुरुते परं चतुर्थं मांसाहारवरं नाङ्गीकुरुते, तस्य मांसाहारजीवनत्वात्। बोधिसत्त्वस्य तदा कीदृशी मार्मिक्युक्तिः—

धर्मादर्थात्सुखात्कीर्तेर्भ्रष्टो यस्य कृते भवान्।
अनर्थायतनं तादृक् कथं न त्यक्तुमर्हसि॥ (सुतसोम. ८६)

बोधिसत्त्वस्याहिंसाव्रतमाहात्म्यमवगत्य सौदासो ब्रूते—

शास्ता गुरुश्च मम दैवतमेव च त्वं मूर्ध्ना वचांस्यहममूनि तवार्चयामि।
भोक्ष्ये न चैव सुतसोम मनुष्यमांसं यन्मां यथा वदसि तच्च तथा करिष्ये॥
(तत्रैव-९३)

एवं करालेऽस्मिन् कलिकाले विविधातङ्कहिंसाक्रूरकर्मणां शमने बौद्धजातकसाहित्यं सर्वथा क्षमते। दौर्भाग्यमेतत्साम्प्रतं विश्वस्य यदेवं साहित्यं न समुपास्यते न चाधीयते जनैः। अद्य विस्फोटकास्त्रं वक्षसि बद्ध्वा निर्दोषिणो वध्यन्ते, स्वीयाहुतिश्चापि दीयते। मिथ्याभिमाने वाक्पैशुन्ये वाक्छले परसम्पत्तिहरणे सर्वकारधनापहरणे मिथ्यायशःकामनायां च रमन्ते दुर्मनस्काः शिक्षिताः सन्तोऽपीति महद्दौर्भाग्यम्। बौद्धजातकावदानसाहित्यप्रचारेण तदात्मसात्करणेन च शान्तिः सुखं सामरस्यं तृष्णालोभराहित्यं च सर्वथा विधातुं शक्यते।

●

CC-0. Sampurnanand University Collection. Digitized by eGangotri

साहित्यशास्त्रे ध्वनिविज्ञानम्

डॉ. शरच्चन्द्रद्विवेदी
प्रवक्ता (अंशकालिकः)
रानीपद्मावतीतारायोगतन्त्रादर्शसंस्कृतमहाविद्यालयस्य
शिवपुरम्, वाराणसी

❋❋❋

व्युपसर्गपूर्वकाद् 'ज्ञा-अवबोधने' (१/५४०) इति धातोर्ल्युट्प्रत्ययेन निष्पन्नो विज्ञानशब्दो विशेषस्वानुभवम्, शास्त्रार्थविषयकं ज्ञानम्, शास्त्रार्थ-विषयकमन्यविषयकं च नैपुण्यम्, रहस्यम्, व्यावहारिकं ज्ञानं चार्थानभिव्यनक्ति। छान्दोग्योपनिषदि नारदसनत्कुमारसंवादे सनत्कुमारेण नाम-वाङ्-मनः-सङ्कल्प-चित्त-ध्यान-विज्ञान-बलान्न-जल-तेज-आकाश-स्मराशा-प्राणतत्त्वानाम् उत्तरोत्तरं बलवत्त्वं साधितम् आत्मज्ञानोपदेशाय। तदनुसारं ध्यानापेक्षया विज्ञानं बलवद् भवति। यतो हि पुरुषो विज्ञानबलेनैव ऋग्वेदव्याकरणनक्षत्रविद्यादिकं सर्वं विजानाति। अतः सनत्कुमारेण नारद उपदिष्टो विज्ञानस्योपासनार्थम्। अत्र भगवत्पादशङ्कराचार्यः स्वकीयभाष्ये शास्त्रार्थविषयं ज्ञानमन्यविषयं नैपुण्यं च विज्ञानपदार्थं परिभाषते (द्रष्टव्यं-छान्दोग्योपनिषत्-शाङ्करभाष्यम्-७/७/१-२)। श्रीमद्भगवद्गीतायां "पाप्मानं प्रजहि ह्येनं ज्ञानविज्ञाननाशनम्" (३/४१), "ज्ञानं तेऽहं सविज्ञानमिदं वक्ष्याम्यशेषतः" (७/२) इत्येतस्य वचनद्वयस्य भाष्ये शङ्कराचार्यः स्वानुभवं विशेषानुभवं च विज्ञानपदार्थमङ्गीकरोति (द्र.श्रीमद्भगवद्गीता- शां. भा. ३/४१, ७/२)। अपि च ग्रन्थान्तरेषु रहस्यं व्यावहारिकं ज्ञानं च विज्ञानपदार्थः स्वीक्रियते। एतानेव विज्ञानपदार्थान् ध्यायं ध्यायमत्र व्याकरणशास्त्रीयः साहित्यशास्त्रीयश्च ध्वनिविचारः प्रवर्तयिष्यते।

व्याकरणशास्त्रे ध्वनिविज्ञानम्

'ध्वन्-शब्दे' इति धातोः ध्वनतीत्यर्थे 'इः सर्वधातुभ्यः' (कातन्त्रोणादिसूत्रम्-३/१४) इति सूत्रेण निष्पन्नो ध्वनिशब्दोऽस्पष्टाक्षरः, अक्षरव्यञ्जनात्मक-स्फोटशब्दस्याभिव्यञ्जकम्, शब्दाभिव्यक्त्यनन्तरं जायमानं शब्दगुणं चार्थमभिधत्ते।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

व्याकरणशास्त्रे स्फोटात्मकः शब्दो गृह्यते ध्वनिश्च तावद् भवति तदीयो गुणः। स्फोटात्मके शब्दे नैव प्रवर्तते कश्चिदुपचयोऽपचयश्च, परं च स्फोटात्मक-शब्दाभिव्यक्त्यनन्तरं यो ध्वनिः परिलक्ष्यते स शब्दस्य गुणः। एवं मन्यते स क्वचिदल्पः क्वचिच्च महान् भवति। महाभाष्यकारेण भेरीदृष्टान्तमुपन्यस्य शब्द-ध्वन्योर्भेदो ध्वनिकृता वृद्धिश्च निर्दिष्टा। "एवं तर्हि स्फोटः शब्दः, ध्वनिः शब्दगुणः। भेर्याघातवत्। तद् यथा भेर्याघातो भेरीमाहत्य कश्चिद् विंशतिपदानि गच्छति, कश्चित् त्रिंशत्। कश्चिच्चत्वारिंशत्। स्फोटस्तावानेव भवति। ध्वनिकृता वृद्धिः—

"ध्वनिः स्फोटश्च शब्दानां ध्वनिस्तु खलु लक्ष्यते।
अल्पो महाँश्च केषाञ्चिदुभयं तत् स्वभावतः" ॥ (म.भा. १/१/७०)

गुणरूपो ध्वनिर्भवत्युपकारकः शब्दस्य व्यञ्जकत्वेन। महाभाष्यप्रदीपकारः कैयट इह घटोदाहरणं प्रस्तौति। स वदति यद् यथा घटः पुनः पुनर्दृश्यमानोऽपि नैव भेदमवलम्बते। द्रुतायां मध्यमायां विलम्बितायां च वृत्तौ स एव अकारः पुनः पुनरुपलभ्यत इति वृत्तिभेदेऽपि वर्णस्य भेदो नैव जायते, सर्ववृत्तिषु स्फोटस्य तत्कालत्वात्। वर्णोच्चारणक्रमस्य निवृत्तौ सत्यामेव ध्वनिः प्रतीयते। शब्दस्याभिव्यञ्जको ध्वनिर्भवति प्राकृतध्वनिः। ह्रस्वदीर्घप्लुतोच्चारणे शब्दस्य यः कालो मन्यते स वस्तुतः प्राकृतध्वनेर्भवति। सः प्राकृतध्वनेः कालः शब्दे समारोप्यते। शब्दस्योच्चारणे संजाते सति वैकृतध्वनिना द्रुतादिवृत्तिभेदः प्रवर्तते। शब्दस्याभिव्यक्तिविषये मतत्रयमुपलभ्यते। एके वदन्ति यद् ध्वनिभिरिन्द्रियस्य संस्कारे कृते सति शब्दोऽभिव्यज्यते।

"स्वभावभेदान्नित्यत्वे ह्रस्वदीर्घप्लुतादिषु।
प्राकृतस्य ध्वनेः कालः शब्दस्येत्युपचर्यते॥
शब्दस्योर्ध्वमभिव्यक्तेर्वृत्तिभेदं तु वैकृताः।
ध्वनयः समुपोहन्ते स्फोटात्मा तैर्न भिद्यते॥
इन्द्रियस्यैव संस्कारः शब्दस्यैवोभयस्य च।
क्रियते ध्वनिभिर्वादास्त्रयोऽभिव्यक्तिवादिनाम्"॥
(वा.प. १/७६-७८)

ध्वनिः स्फोटाद् भिन्नरूपेण न गृह्यते, किञ्चैकस्यैव शब्दस्य रूपद्वयमिदं जायते स्फोटो ध्वनिश्च। एतेन स्फोटेनाभिन्नं ध्वनिं केचिदाचार्या असंवेद्यं केचिच्च

CC-0. Sampurnanand University Collection. Digitized by eGangotri

स्वतन्त्रमेव परिकल्पयन्ति। अनेन ध्वनिना शब्दस्वरूपं प्रकाश्यते। एकस्मिन् शब्दे ये विविधा वर्णध्वनयः सन्निहिता भवन्ति, तेषां सर्वेषां परिपाकवशाद् बुद्धावन्त्यध्वनिना शब्दावधारणं संजायते—

स्फोटरूपाविभागेन ध्वनेर्ग्रहणमिष्यते।
कैश्चिद् ध्वनिरसंवेद्यः स्वतन्त्रोऽन्यैः प्रकल्पितः॥
नादैराहितबीजायामन्त्येन ध्वनिना सह।
आवृत्तपरिपाकायां बुद्धौ शब्दोऽवधार्यते॥ (वा.प. १/८१, ८४)

जिह्वाग्रोपाग्रादिकरणैस्ताल्वादिस्थानैः सह यः संयोगो विभागश्च प्रवर्तते, तयोर्माध्यमेनाभिव्यक्तः शब्द एव भवति स्फोटः, तदनन्तरं तस्माज्जायमाना शब्दा एवोच्यन्ते ध्वनय इति। यथा दूरस्थितो दीपो नैव समग्ररूपेण परिलक्ष्यते, केवलं तस्य प्रभैव दृश्यते। एवं घण्टादिवाद्यान्यपि नैव दूरतो दृष्टिपथमायान्ति, केवलं तेषां ध्वनय एव श्रूयन्ते। एवमेव शब्देऽपि ध्वनिमात्रमेव लक्ष्यते—

यः संयोगविभागाभ्यां करणैरुपजन्यते।
स स्फोटः शब्दजाः शब्दा ध्वनयोऽन्यैरुदाहृताः॥
दूरात् प्रभेव दीपस्य ध्वनिमात्रं तु लक्ष्यते।
घण्टादीनां च शब्देषु व्यक्तो भेदः स दृश्यते॥
(वा.प. १/१०३, १०४)

यथा एकस्या ज्वालायाः सकाशाज्ज्वालान्तरमुत्पद्यते, तस्याश्चान्या ज्वाला जायन्ते, तथैव स्फोटशब्दाद् ध्वनयोऽपि प्रभवन्ति। प्रांकृतध्वनिर्भवति स्फोटाभिव्यञ्जकः। शब्दाभिव्यक्तेरूर्ध्वं वैकृता ध्वनयो जायन्ते, ते तु द्रुतादिवृत्तिभेदे भवन्ति कारणानि। "अथ कः शब्दः' इति विचारप्रसङ्गे महाभाष्यकारेण पतञ्जलिना द्रव्याकृतिजातिपक्षान् अस्वीकुर्वता स्थापितं यद् येनोच्चारितेन सास्नालाङ्गूल-ककुदखुरविषाणिनां सम्प्रत्ययो भवति, स एव शब्दो ग्राह्यः। तदनन्तरं पक्षान्तरमुपस्थापयता तेन निश्चितार्थबोधको ध्वनिरपि शब्दत्वेनाङ्गीकृतः। एतेनेदमायाति यद् यः कश्चिद् ध्वनिर्नैव भवति शब्दत्वेन ग्राह्यः, किं च येन कस्यचिन्निश्चितार्थस्यावबोधो भवति स एव ध्वनिर्भवति शब्दः। यथा कश्चिद् बालको ध्वनिं करोति, सोऽन्येभ्यो यदि नैव रोचते, तर्हि स बालकमुद्दिश्य वदति 'शब्दं मा कार्षीः, शब्दकार्ययं माणवकः' इत्यादि। एवं ध्वनिं कुर्वन् बालको यदि शब्दकरणाय निषिध्यते तर्हि ध्वनेः शब्दरूपत्वमवगम्यते, यथोक्तम्—अथवा

CC-0. Sampurnanand University Collection. Digitized by eGangotri

प्रतीतपदार्थको लोके ध्वनिः शब्द इत्युच्यते। तद् यथा—'शब्दं मा कुरु.... ध्वनिं कुर्वन्नेवमुच्यते। तस्माद् ध्वनिः शब्दः' इति (म.भा.-पस्पशह्निके)।

गान्धर्वकलापव्याकरणानुसारं संगीतशास्त्रे शब्दा द्विविधाः स्वीक्रियन्ते—वर्णात्मका ध्वन्यात्मकाश्च। वर्णात्मका शब्दा भवन्ति कादयः कण्ठादिस्थानजन्या आभ्यन्तरप्रयत्नजन्याश्च। ध्वन्यात्मकाश्च शब्दा भवन्ति षड्जादयो मृदङ्गादिवाद्य-प्रभवध्वनिरूपाः। वर्णा अकारादिहकारान्ताः सम्मताः सन्ति, षड्जादयः स्वराः सप्त स्वीक्रियन्ते। यथोच्यते—

शब्दो ध्वनिश्च वर्णश्च मृदङ्गादिभवो ध्वनिः।
कण्ठसंयोगादिजन्या वर्णास्ते कादयो मताः॥
अकारादिहकारान्ता वर्णमाला प्रकीर्तिता।
षड्जर्षभगान्धारा मध्यमः पञ्चमस्तथा॥
धैवतश्च निषादश्च स्वराः सप्त प्रकीर्तिताः॥ इत्यादि।

सङ्गीतार्णवाख्ये ग्रन्थे सुधाकरेणोच्यते यद् हृदयदेशस्योर्ध्वभागे द्वाविंशतिनार्ड्यः सन्ति, तत्र वायुना आहताः ध्वनयः प्रादुर्भवन्ति द्वाविंशतिः। तेषां श्रवणेन्द्रियग्रहणवशात् श्रुतिसंज्ञा संजायते—

"श्रवणेन्द्रियग्राह्यत्वाद् ध्वनिरेव श्रुतिर्भवेत्।
सैव द्वाविंशतिर्ज्ञेया स्वरक्रमविभागतः॥"

(द्र.-गान्धर्वकलापव्याकरणम्)

साहित्यशास्त्रे ध्वनिविज्ञानम्

भारतीयकाव्यशास्त्रे ध्वनिः साहित्यसिद्धान्तरूपेण आलोचनासिद्धान्तरूपेण वा प्रतिष्ठितो दृश्यते। अस्य उद्भावक आचार्यो वर्तते आनन्दवर्धनः। ध्वनिशब्दः संस्कृतवाङ्मयस्यात्यन्तं प्राचीनः प्रतिष्ठितश्च शब्दः प्रतिभाति, यस्य अथर्ववेदे लोकप्रचलितध्वन्यर्थे प्रयोगः प्राप्यते। यथा तदीयं वचनमस्ति—

अन्तरे मे नभसि घोषो अस्तु पृथक् ते ध्वनयो यन्तु"।

(अथर्व. ५/२०/७) इति।

साहित्यशास्त्रीयध्वनिसिद्धान्तस्य स्रोतो वैयाकरणानां स्फोटसिद्धान्ते सुरक्षितमुपलभ्यते। आचार्य आनन्दवर्धनः **सूरिभिः** इति शब्देन वैयाकरणानेव ध्वनेः संप्रेरकान् मनुते। सः व्याकरणं **सर्वविद्यानां मूलं** मन्वानः परिपुष्टिमस्य

CC-0. Sampurnanand University Collection. Digitized by eGangotri

तथ्यस्य करोति। तदनुसारं श्रूयमाणान् वर्णानेव ध्वनिमङ्गीकुर्वन्ति वैयाकरणाः। यथोक्तं तेन—

प्रथमे हि विद्वांसो वैयाकरणाः, व्याकरणमूलत्वात् सर्वविद्यानाम्।
ते च श्रूयमाणेषु वर्णेषु ध्वनिरिति व्यवहरन्ति। (ध्व.लो.वृत्तिः १/१३)

अर्थात् साहित्यशास्त्रीया आचार्याः ध्वनिशब्दं वैयाकरणानां सकाशाद् गृहीतवन्तः। वैयाकरणानां मते स्फोटस्याभिव्यक्तिकारका वर्णाः ध्वनिसंज्ञया व्यवह्रियन्ते। भर्तृहरेः कथनमस्ति यद् वाक्करणानां संयोगेन वियोगेन च शब्दे स्फोट उत्पद्यते परं तत्र शब्दजाः शब्दाः ध्वनयो भवन्ति—

य: संयोगवियोगाभ्यां करणैरुपजायते।
स स्फोटः शब्दजः शब्दो ध्वनिरित्युच्यते बुधैः॥
(वा.प. १/१०३) इति।

वैयाकरणाः स्फोटं व्यङ्ग्यं मत्वा तस्य व्यञ्जकतत्त्वं ध्वनिं कथयन्ति। ते स्फोटात्मकस्य नित्यशब्दस्य सत्तां स्वीकुर्वन्ति, यत् स्फोटतत्त्वं सदा बुद्धौ स्थितं भवति। ध्वनयो भवन्ति अनित्याः, परं च तैरेवानित्यध्वनिभिः स्फोटनामको नित्यशब्दः प्रतीयते। यथा—कमलशब्दस्योच्चारणे "क्+अ+म्+अ+ल्+अ" इत्येते षट् वर्णाः प्रयुज्यन्ते। तेषां सर्वेषामुच्चारणं युगपन्नैव भवति, क्रमेण ते उच्चार्यन्ते। प्रथमवर्णोच्चारणानन्तरं यदा तदीया सत्ता परिसमाप्यते तदैव द्वितीयवर्णोच्चारणं प्रवर्तते। एवमेव तृतीय-चतुर्थ-पञ्चम-षष्ठ-वर्णोच्चारणमवगन्तव्यम्।

अत्राशङ्क्यते यत् श्रोतृपुरुषेण कमलशब्दस्तदर्थश्च कथं गृहीत इति। नैयायिका वदन्ति यदुच्चरितः शब्दः क्षणानन्तरं लुप्यते। प्रसङ्गेऽस्मिन्निदमवगन्तव्यं यदुच्चरिता वर्णा विनाशं प्राप्तवन्तोऽपि श्रोतुरन्तःकरणं तत्तद्वर्णसंस्कारैः संस्कुर्वन्ति। अतः पूर्वपूर्ववर्णानुभवात् समुद्भूतः संस्कारोऽन्तिमवर्ण-पर्यन्तमवतिष्ठते, तेनैवाधारेण श्रोतृजनाय शब्दः आत्मनः समग्रं स्वरूपं प्रस्तौति, अर्थबोधे च कारणं भवति। वैयाकरणमतानुसारं स्फोटेनैवार्थोऽभिव्यज्यते—"स्फुटत्यर्थोऽस्मात्" इति। शब्दं ते द्विविधं मन्यन्ते नित्यमनित्यं च। अत्र च प्रमाणं भवति वचनमिदम्—"अदर्शनं लोपः" (पा. अ. १.१.६०), "वर्णविनाशो लोपः" (तै. आ. १/५८) इति च। वर्णरूपेण विद्यमानशब्दस्यानित्यता संजायते। एतेनानित्येनोच्चार्यमाणशब्देन च नित्यः शब्दः प्रकाश्यते। स्फोटात्मको नित्यशब्द एवानित्यवर्णानाविर्भावयति। उच्चारणानन्तरमेवानित्या वर्णा विनष्टा भवेयुः, परं

CC-0. Sampurnanand University Collection. Digitized by eGangotri

तदीयार्थप्रतीतिकारकोऽखण्डस्तथा नित्यः शब्दः स्फोटरूपेणैवावस्थितो भवति, तेनैव चार्थोपस्थितिर्जायते। अयं स्फोट एव शब्दस्य मूलस्वरूपो वेदितव्यः।

ध्वन्यालोकस्य प्रारम्भे आचार्य आनन्दवर्धनो ध्वनिविरुद्धं मतत्रयमुपस्थापितवान्—अभाववादिनां मतम्, भाक्तवादिनां मतम्, अनिर्वचनीयतावादिनां मतञ्च। स तथ्यमिदमङ्गीकरोति यत् काव्यात्मभूतस्य ध्वनितत्त्वस्य विश्लेषणं विवेचनं पूर्वपरम्परायां प्रवर्तमानमासीत्। तेन भरतमुनिकृतं नाट्यशास्त्रम्, भामहकृतं काव्यालङ्कारम्, उद्भटभट्टकृतं भामहविवरणम् (काव्यालङ्कारटीका), वामनकृतां काव्यालङ्कारसूत्रवृत्तिम्, रुद्रटकृतं काव्यालङ्कारं च समास्थाय ध्वनिविरोधिमतत्रयं सङ्केतितम्। रुद्रटकृतं ध्वन्यालोके—

काव्यस्यात्मा ध्वनिरिति बुधैर्यः समाम्नातपूर्व-
स्तस्याभावं जगदुरपरे भाक्तमाहुस्तमन्ये ।
केचिद् वाचां स्थितिमविषये तत्त्वमूचुस्तदीयं
तेन ब्रूमः सहृदयमनःप्रीतये तत्स्वरूपम् ।। इति।

श्लोकेऽस्मिन् ध्वनिविरुद्धं त्रिविधं मतम्—"तस्याभावम्, भाक्तम्, वाचामविषये स्थितिम्" इत्येभिः शब्दैरुपस्थापितम् (एतेषूत्तरोत्तरमुत्कृष्टं मन्यते)। अत्राभाववादिमतमस्ति विपर्ययमूलकम्। यतो हि अनेन प्राचीनाचार्यग्रन्थेषु ध्वनितत्त्वस्याभावः सिध्यति, आहोस्वित् ते आचार्याः काव्यात्मरूपेण ध्वनिं नैवाङ्गीकुर्वन्ति। विचारोऽयं विपर्ययज्ञानं भ्रान्तिपूर्णज्ञानं वाऽऽश्रूयते। अत एवेदं विपर्ययमूलकमुच्यते। काव्यालङ्कारे भामहविवरणे च गुणवृत्तिशब्दस्य प्रयोगेण ध्वनिर्भक्तिः, अर्थाल्लक्षणागम्यः स्वीक्रियते। मतमिदं नैव साक्षाद् ध्वनिं निषेधति, अत एवेदं सन्देहमूलकं वक्तुं शक्यते। तृतीयमतानुसारेण ध्वनिलक्षणं नैव निर्धार्यते। तस्मान्मतमिदमज्ञानमूलकं मन्तव्यम्। ध्वनिकार आनन्दवर्धनः पूर्वोक्तान् पक्षानिमान् सर्वान् पूर्वपक्षरूपेणोपस्थाप्य विविधतर्कबलेन, निरस्तानकरोत्। प्रथममतस्यालोचनाप्रसङ्गे तदीयं वक्तव्यमस्ति यत् काव्येषु ध्वनिमतस्य स्थापनायाः पूर्वं चारुत्वं मन्यते स्म, तच्च सहृदयैरास्वाद्यमानमप्यासीत्। यदा ध्वनिः काव्यात्मतत्त्वरूपेण प्रतिष्ठितस्तदा पूर्ववर्तीनि काव्यतत्त्वजातानि प्रायेणासिद्धान्येवोद्घोषितानि। आनन्दवर्धनस्य मते पूर्वं ध्वनिशब्दस्य प्रयोगो ध्वनिनामकरणं वा नासीत्। परं पर्यायोक्ति-अपह्नुति-विशेषोक्तिप्रभृत्यलङ्कारेषु व्यङ्ग्यार्थोऽविद्यत, येन व्यञ्जनाया महत्त्वं प्रमापयितुं शक्यते, अपि च व्यङ्ग्यार्थो ध्वनिरूपेण प्रस्तोतुमपि शक्यते।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

किञ्च रसस्य सत्तां सर्वे समामनन्ति। ध्वनिवादिनां मते रसो भवति व्यङ्ग्यः। एतेन रसस्य स्वीकृतौ सत्यां ध्वनेर्व्यङ्ग्यस्य वाऽस्तित्वं स्वयमेव सिध्यति। लक्षणग्रन्थेषु विविधोदाहरणानामुपस्थित्या तथ्यमिदं परिपुष्टं भवति यत् प्राचीन-कालेऽपि ध्वनेरस्तित्वं नूनमेव भवेत्, तदीयसिद्धान्तपक्षस्य स्पष्टीकरणं भवेन्न वेति। ध्वनेरन्तर्भावो गुण-रीति-अलङ्कारादिकाव्यतत्त्वेषु नैव सम्भाव्यते, तेषां वाच्यवाचकभावे समाश्रितत्वात्। ध्वनौ तावद् भवति व्यङ्ग्यव्यञ्जकभावस्य प्राधान्यम्। अलङ्कारादीनां समावेशो ध्वनौ कर्तुं शक्यते, अङ्गिनो ध्वनेस्तेषामङ्गरूपत्वात्। आक्षेप-समासोक्ति-पर्यायोक्ति-अपह्नुति-अप्रस्तुतप्रशंसा-प्रभृत्यलङ्कारेषु ध्वनेरन्तर्भावो नैव कथमपि सम्भाव्यते, ध्वनौ व्यङ्ग्यार्थस्य प्राधान्यात् अलङ्कारेषु च व्यङ्ग्यार्थस्य गौणत्वात्। अलङ्कारेषु वाच्यार्थ एव चारुत्वमभिधत्ते। ध्वनिर्भवति महाविषयः। तस्य परिधेरत्यन्तविस्तृतत्वात् तत्र वाच्यचारुत्वा-श्रितानामलंकारादिकाव्यसिद्धान्तानां समावेशः सम्भाव्यते। प्राधान्येन द्विविधो ध्वनिर्गीयते—१. अविवक्षितवाच्यापरपर्यायो लक्षणामूलो ध्वनिः, २. अभिधामूल-विवक्षितवाच्यापरपर्यायो ध्वनिश्च। प्रथमस्य मूले लक्षणा, द्वितीयस्य मूले चाभिधा शक्तिर्भवति सन्निहिता। वाच्यार्थविवक्षायास्तदीयाकाङ्क्षाया वा सन्निधानाल्लक्षणा-मूलध्वनिरुच्यते अविवक्षितवाच्यध्वनिनाम्ना। अर्थाद् वाच्यार्थेनात्र वक्तुः कथनस्य तात्पर्यं नैव परिज्ञायते। यत्र वाच्यार्थो विवक्षितः सन् व्यङ्ग्यार्थं बोधयति तत्रास्ते अभिधामूलध्वनिः। अर्थादस्मिन् वाच्यार्थे परिज्ञाते सत्येव व्यङ्ग्यार्थः प्रतीयते। ध्वनेर्मुख्यभेदा भवन्ति एकपञ्चाशत्। तद् यथा—अविवक्षितवाच्यध्वनेश्चत्वारः, असंलक्ष्यक्रमव्यङ्ग्यध्वनेः षट्, शब्दशक्तिमूलस्य संलक्ष्यक्रमध्वनेः चत्वारः, अर्थशक्तिमूलकस्य संलक्ष्यक्रमध्वनेः षट्त्रिंशत्, उभयशक्तिमूलकस्य च संलक्ष्यक्रमध्वनेः एकः भेदः। एतेषां संयोजनेन भेदसंख्या प्रवर्तते एकपञ्चाशदिति।

ध्वनेरनन्तभेदा अपि कल्प्यन्ते। उक्तप्रकारेण ध्वनेः शुद्धाः प्रकाराः सन्ति एकपञ्चाशत्। मम्मटमतानुसारं सङ्करसंसृष्ट्योः संमिश्रणेन ध्वनेर्भेदाः परिगण्यन्ते १०४०४ संख्याकाः एकपञ्चाशत्सङ्ख्याकानां शुद्धध्वनिभेदानां योजनेन भेदाः जायन्ते १०४५५ परिमिताः। इदमवगन्तव्यं यत् शुद्धध्वनेरेकपञ्चाशद्भेदेषु प्रत्येकमपि एकपञ्चाशत्प्रकारेषु भिद्यते। अतः एकपञ्चाशत्संख्यायाः एक-पञ्चाशत्संख्यया सह गुणनेन २६०१ संख्या संजायते ध्वनिभेदानाम्। सङ्करसंसृष्ट्योः प्रकारचतुष्टयस्य तत्र गुणनेन संवर्द्धिता संख्या १०४०४ भवति। आचार्यमम्मटानुसारं वाच्यार्थापेक्षया व्यङ्ग्यार्थे चारुत्वं चमत्कारो वातिशयेन प्रवर्तते, स एव चमत्कारो ध्वनिपदवाच्यतामुपैति। यथोक्तम्—

CC-0. Sampurnanand University Collection. Digitized by eGangotri

इदमुत्तममतिशयिनि व्यङ्ग्ये वाच्याद् ध्वनिर्बुधैः कथितः।
(काव्यप्रकाशः, १/८)

ध्वन्यालोककार आनन्दवर्धनोऽपि वाच्यार्थापेक्षयोत्कर्षातिशयविधायकं व्यङ्ग्यार्थं ध्वनिं वदति। व्यङ्ग्यार्थे चमत्कारातिशये उत्कर्षातिशये वा सन्निहिते सति वाच्यार्थापेक्षया व्यङ्ग्यार्थस्य प्राधान्यमङ्गीक्रियते, वाच्यव्यङ्ग्ययोः प्राधान्यस्य चमत्कारोत्कर्षाश्रिततत्वात्। तदीयं वचनं द्रष्टव्यं तावत्—

चारुत्वोत्कर्षनिबन्धना हि वाच्यव्यङ्ग्ययोः प्राधान्यविवक्षा।
(ध्वन्यालोकः, १/१३)

साहित्यदर्पणकारविश्वनाथभट्टः वाच्यापेक्षयाधिकचमत्कारकव्यङ्ग्यमुत्तमकाव्यं ध्वनिकाव्यं वा मनुते। यथोच्यते—

वाच्यातिशयिनि व्यङ्ग्ये ध्वनिस्तत् काव्यमुत्तमम्। (साहित्यदर्पणे-४/१)

सङ्केतार्थाभिधायकैः शब्दैर्विशेषार्थः प्रतीयते। तस्य मूलाधारो वर्तते व्यञ्जना, ययाऽभिधागम्यार्थाल्लक्षणागम्यार्थाच्च भिन्न एव कश्चिद् विलक्षणोऽर्थः प्रतीयते। ध्वनिसमर्थकाचार्याः प्राधान्येन परिगण्यन्ते—लोचनकारोऽभिनवगुप्तः, सरस्वती-कण्ठाभरणकारो भोजराजः, काव्यप्रकाशकारो मम्मटभट्टः, चन्द्रालोककारो जयदेवः, साहित्यदर्पणकारो विश्वनाथः, रसगङ्गाधरकारः पण्डितराजजगन्नाथश्च। ध्वनि-विरोधिष्वाचार्येषु मुकुलभट्टः, लघुवृत्तिकारः प्रतिहारेन्दुराजः, हृदयदर्पणकारः भट्टनायकः, दशरूपककारः धनञ्जयः धनिकः, वक्रोक्तिजीवितकारः कुन्तकः, व्यक्तिविवेककार-महिमभट्टादीनां गणना भवति। ध्वनिपरिचयेनानेनेदमेव तथ्यमव-गन्तव्यं विशेषतो यद् यत्र वाच्यार्थापेक्षया व्यङ्ग्यार्थेऽधिकं चारुत्वं चमत्कारो वा वर्तते तत् साहित्यशास्त्रे ध्वनिपदेन व्यवह्रियते।

●

CC-0. Sampurnanand University Collection. Digitized by eGangotri

रस-सिद्धान्तः

डॉ. वृजेशमणिपाण्डेयः
प्रवक्ता (संस्कृतस्य)
श्रीहरिहरमहादेवोच्चतरमाध्यमिकविद्यालयस्य
देवचन्दपुरम्, वाराणसी

❋ ❋ ❋

ध्वनिसिद्धान्तप्रवर्तकाचार्येण काव्यस्यात्मा ध्वनिरित्यङ्गीकृतं तथा च तस्य प्रतिष्ठापनं स्वयुक्तियुक्तमूलकतर्कैः विहितम्, निगदितञ्च तेन ध्वनिप्रभेद-गणनाप्रसङ्गे—स चासावविवक्षितवाच्यो विवक्षितान्यपरवाच्यश्चेति द्विविधः सामान्येन, तत्र विवक्षितान्यपरवाच्यध्वनेः द्वौ भेदौ—असंलक्ष्यक्रमव्यङ्ग्यः, संलक्ष्यक्रमव्यङ्ग्यश्चेति। स असंलक्ष्यक्रमव्यङ्ग्यः अष्टविधः—रसभाव........... इत्यादि, तत्र प्रथमः रसः।

यद्यपि 'रसो वै सः' इत्यादिश्रुतिवाक्यप्रतिपादितरसपदार्थविवेचनमनेकैः दार्शनिकैः स्वसूक्ष्मतत्त्वार्थदर्शिभिः बुद्धिभिः सम्यक्तया कृतस्तथापि साहित्यतत्त्वविद्भिः रसस्य यादृशं प्रतिपादनं कृतं तत्तु सर्वथा विलक्षण एव। रसनिष्पत्तिविषये आलङ्कारिकैः विभिन्नाचार्याणां मतोद्भावनङ्कृतम्। अखिल-शास्त्रमर्मज्ञैः रसगंगाधरकारैस्तु रसनिष्पत्तिविषये एकादशसिद्धान्तोल्लेखः स्वीये ग्रन्थे कृतः। साहित्यशास्त्रविचक्षणाचार्यमम्मटप्रतिपादितग्रन्थे काव्यप्रकाशे रससिद्धान्त-प्रमुखतमानां चतुर्ण्णां सिद्धान्तानामुल्लेखः वर्तते। यस्य क्रमिकावतरणं वर्णनञ्च निम्नाङ्कितमस्ति—

> कारणान्यथ कार्याणि सहकारीणि यानि च।
> रत्यादेः स्थायिनो लोके तानि चेन्नाट्यकाव्ययोः॥
>
> विभावा अनुभावास्तत् कथ्यन्ते व्यभिचारिणः।
> व्यक्तः स तैर्विभावाद्यैः स्थायीभावो रसः स्मृतः॥

लोके रत्यादिरूपस्थायीभावस्य यानि कारणानि कार्याणि सहकारीणि च भवन्ति तानि यदि काव्ये नाट्ये वा प्रयुक्तानि तर्हि क्रमशो विभावा अनुभावाः

CC-0. Sampurnanand University Collection. Digitized by eGangotri

व्यभिचारिणः कथ्यन्ते। तैः विभावाद्यैर्व्यक्तः व्यञ्जनाख्यवृत्त्या प्रतिपादितः सः स्थायीभावः रसः कथितः। विभावाः द्विविधाः—आलम्बन-विभावः उद्दीपनविभावश्च। यान्यालम्ब्य रत्यादिराविर्भवति तानि ललनादिरूपाणि आलम्बनपदाभिधेयानि जनककारणानि, प्रादुर्भूते च तस्मिन् रत्यादौ यानि तस्य पुष्टिरूपोद्दीपनकारीणि चन्द्रोदयादीनि उद्दीपनपदव्यपदेश्यानि परिपोषककारणानि।

वासनारूपतयातिसूक्ष्मरूपेणावस्थितान् रत्यादीन् स्थायिनो विभावयन्ति आस्वादयोग्यतां नयन्तीति विभावाः। रत्यादीन् स्थायिनोऽनुभावयन्त्य-नुभवविषयीकुर्वन्तीति अनुभावाः, ते च कायिकवाचिकमानसिकभेदेनानेकविधाः कटाक्षभुजाक्षेपकाकूक्तिप्रभृतयः विशेषेणाभिहिताः (सर्वाङ्गव्यापितया) रत्यादीन् स्थायिनः काये चारयन्ति संचारयन्ति मुहुर्मुहुरभिव्यञ्जयन्तीति वा व्यभिचारिणः। उक्तं हि भरतनामकेन नाट्यशास्त्रकारेण मुनिना—

'विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिः''।

सूत्रे प्रयुक्तसंयोगशब्दपर्यालोचनायामाशङ्क्यते यत् संयोगः सम्बन्धः, तच्च 'सम्बन्धो हि सम्बन्धिद्वयभिन्नत्वे सति द्विष्ठत्वे च सति आश्रयतया विशिष्टबुद्धिनियामकः'। यथा घटवद् भूतलमित्यादौ संयोगरूपः सम्बन्धः सम्बन्धिभ्यां भिन्नः द्विष्ठः घटनिरूपितसंयोगाश्रयो भूतलमिति विशिष्टबुद्धि-नियामकश्च। तथा च प्रकृते विभावानुभावव्यभिचारिसंयोगादित्यत्र केन सह विभावादीनां संयोग इति जिज्ञासायामुच्यते यत् स्थायीभावैः सह स्थायीभावाश्च—

रतिर्हासश्च शोकश्च क्रोधोत्साहौ भयं तथा।
जुगुप्साविस्मयश्चेत्यष्टौ स्थायीभावाः प्रकीर्तिताः।।
निर्वेदस्थायीभावोऽस्ति शान्तोऽपि नवमो रसः।।

अतः नवसंख्याकाः स्थायीभावा एते मनुष्याणां (सहृदयानां सामाजिकानां) हृदि स्थायीरूपेण स्थिताः सामान्यतोऽव्यक्तावस्थायां भवन्ति; किन्तु यदा यस्य स्थायीभावस्यानुकूलविभावादिसामग्री समुपलब्धा भवति तदा सः स्थायीभावो व्यक्तो भवति तथा च रस्यमानः आस्वाद्यमानो वा भूत्वा रसरूपतां प्राप्नोति।

धनिकधनञ्जयादिभिराचार्यैर्नवसंख्याकस्थायीभावस्थाने रसस्थाने वा चत्वार एव रसा अङ्गीकृताः, अवशिष्टरसोत्पत्तिरेभ्यः चतुर्भ्य एव।

दशरूपककारेण विषयस्यास्य विवेचनं कुर्वता निगदितम्—

CC-0. Sampurnanand University Collection. Digitized by eGangotri

विकासविस्तरक्षोभविक्षेपैः सः चतुर्विधः।
शृङ्गारवीरवीभत्सरौद्रेषु मनसः क्रमात्।।
हास्याद्भुतभयोत्कर्षकरुणानां त एव हि।
अतस्तज्जन्यता तेषामत एवावधारणम्।।
शृङ्गाराद्धि भवेद् हास्यो रौद्राच्च करुणो रसः।
वीराच्चैवाद्भुतोत्पत्तिर्वीभत्साच्च भयानकः।।

विकासविस्तरक्षोभविक्षेपभेदैरात्मानन्दः चतुर्विधः। चित्तस्यैते च चतुष्प्रकाराः क्रमशः शृङ्गारवीरवीभत्सरौद्ररसेषु भवन्ति। अवशिष्टेषु हास्याद्भुतभयानककरुणरसेष्वपि चित्तस्य ता एव अवस्थाः।

काव्यप्रकाशकारैस्तु नवसंख्याकस्थायीभावाः रसाश्चाङ्गीकृताः। रसनिष्पत्तिविषये भरतमुनिनोक्तम्—'विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिः'। इदं हि भरतसूत्रं तट्टीकाकृद्भिर्भट्टलोल्लटश्रीशङ्कुकभट्टनायकाभिनवगुप्तपादैश्चतुर्भिः सुधीभिः क्रमेण मीमांसान्यायसांख्यालङ्कारमतरीत्या चतुर्धा व्याख्यातम्। तेनोक्त्यनुमितिभुक्त्यभिव्यक्तयश्चैते चतुर्वादा विकसिताः। सूत्रे प्रयुक्तस्य निष्पत्तिशब्दस्य चत्वारोऽर्थाः। भट्टलोल्लटमते उत्पत्तिः निष्पत्तिशब्दार्थः, शङ्कुकमतेऽनुमितिः, भट्टनायकमते भुक्तिः, अभिनवगुप्तमते चाभिव्यक्तिः निष्पत्तिशब्दार्थः।

भट्टलोल्लटमतम्—स्थायीभावैः सह विभावादीनां उत्पाद्योत्पादकभावरूपसम्बन्धाद् अनुभावानां गम्यगमकभावाद् व्यभिचारिणाञ्च पोष्यपोषकभावरूपसम्बन्धाद् रत्यादेः स्थायिनो निष्पत्तिः क्रमेणोत्पत्तिरभिव्यक्तिः (प्रतीतिः) पुष्टिश्च भवतीति भट्टलोल्लटाभिमतभरतसूत्रार्थः। एतद् विवृण्वते—ललनादिरालम्बनविभावैः स्थायी रत्यादिको जनितः उद्यानादिभिरुद्दीपनविभावैरुद्दीपितः। उक्तञ्च विभावद्वैविध्यमग्निपुराणे—

विभाव्यते हि रत्यादिर्यत्र येन विभाव्यते।
विभावो नाम स द्वेधालम्बनोद्दीपनात्मकः।।

एवञ्च यमालम्ब्य लौकिकरस आविर्भवति स आलम्बनविभावः, तेन नायकनिष्ठे लौकिकरसे नायिकालम्बनविभावः, नायिकानिष्ठे च तस्मिन् नायक इति ज्ञेयम्। अनुभावैः कटाक्षभुजाक्षेपप्रभृतिभिः कार्यैः सः प्रतीतियोग्यः कृतः। कटाक्षभुजाक्षेपप्रभृतिरित्यत्र प्रभृतिपदात्—

CC-0. Sampurnanand University Collection. Digitized by eGangotri

स्तम्भः स्वेदश्च रोमाञ्चः स्वरभङ्गोऽथ वेपथुः ।
वैवर्ण्यमश्रुप्रलय इत्यष्टौ सात्त्विकाः मताः ॥

इति भरतोक्ता अपि संगृहीताः।

व्यभिचारिभिर्निर्वेदादिभिः सहकारिभिरुपचितोऽर्थात् पुष्टीकृतः स्थायीभावः साक्षात्सम्बन्धेन रामादावनुकार्ये तद्रूपतानुसन्धानाद् अर्थात् रामस्येव वेशविशेषवाग्विधायिनि नर्तके तत्कालं रामत्वाभिमानात् नर्तकेऽपि आरोप्यमाणः रस इति भट्टलोल्लटः। तथा चायमर्थः फलति—यथा असत्यपि सर्पे सर्पतयाऽवलोकितात् दाम्नोऽपि भयमुदेति तथा सीताविषयिणी अनुरागरूपा रामरतिरविद्यमानाऽपि नर्तके नाट्यनैपुण्येन तस्मिन् स्थितेव प्रतीयमाना सहृदयहृदये चमत्कारमर्पयन्त्येव रसपदवीमधिरोहतीति।

भट्टलोल्लटमतेऽनुकार्ये रामादावेव रसनिष्पत्त्या सामाजिके रसनिष्पत्त्यभावात् सामाजिकानां चमत्कारानापत्तिः, तथा च सम्प्रति अनुकार्यसीतारामादीनामभावादनुकर्तरि नटेऽपि रसोत्पत्तिर्न संभविष्यति इत्यरुचिद्वयं मनसि निधाय श्रीशङ्कुकमतं प्रस्तौति काव्यप्रकाशकारः।

श्रीशङ्कुकमतम्—विभावानुभावव्यभिचारिभिः संयोगाद् अनुमाप्यानुमापकभावरूपात् सम्बन्धाद् रसस्य निष्पत्तिरनुमितिरिति शङ्कुकसम्मतसूत्रार्थः। तथा च व्याख्यानम्—राम एवायम् अयमेव राम इति 'न रामोऽयम्' इत्यौत्तरकालिके बाधे रामोऽयमिति, रामः स्याद् वा न वाऽयमिति, रामसदृशोऽयमिति च सम्यङ्मिथ्यासंशयसादृश्यप्रतीतिभ्यो (अत्र प्रयुक्तस्य प्रतीतिपदस्य सम्यगादिपदैः प्रत्येकमन्वयः) विलक्षणया प्रतीत्या ग्राह्ये नटे राम एवायम् अयमेव राम इति। इयं सम्यक् प्रतीतिः। तथा हि एवकारस्यार्थत्रयम्। यदुक्तम्—

अयोगमन्ययोगं च अत्यन्तायोगमेव च ।
व्यवच्छिनत्ति धर्मस्य एवकारस्त्रिधा मतः ॥ इति।

अस्यायं स्फुटार्थः—यत्र विशेषणान्वित एवकारस्तत्र विशेष्ये विशेषणस्य असम्बन्धरूपयोगं निषेधति। यथा राम एवायमित्यत्र रामस्य विशेषणत्वेन तदन्वितेनैवकारेण इदमर्थे विशेष्ये रामत्वायोगं व्यवच्छिन्दन् अस्य रामत्वं नियमयति। यत्र पुनर्विशेष्यगत एवकारस्तत्र विशेष्येतरस्मिन् विशेषणीभूतधर्मसम्बन्धं वारयति। यथा अयमेव राम इत्यत्र एतद्भिन्ने रामत्वसम्बन्धं वारयन् अस्मिन् रामत्वं नियमयति। उभयरूपा एवेयं प्रतीतिः, अवधारणतया सम्यक् प्रतीतिः। यत्र तु

CC-0. Sampurnanand University Collection. Digitized by eGangotri

क्रियान्वित एवकारस्तत्र अत्यन्तः सर्वदा योऽयोगस्तस्य निषेधकः। तत् क्रियाश्रये कुत्रचिदपि सम्बन्धबोधक इति तु फलितोऽर्थः। यथा 'नीलं कमलं भवत्येव' इत्यत्र हि न सकले कमले नीलत्वं नियम्यते नाऽपि अकमलेऽनीलत्वम्; अपि तु यस्मिन् कस्मिन्नपि कमले नीलत्वसम्बन्ध इति प्रसङ्गादुक्तम्। न रामोऽयमित्यौत्तरकालिके बाधे रामोऽयमिति (मिथ्याप्रतीतिः) यथा नेदं रजतमित्यौत्तरकालिके बाधे सति शुक्तौ रजतप्रतीतिः। रामः स्याद् वा न वाऽयमितीयमुभयकोट्यवलम्बितत्वेन संशयप्रतीतिः। रामसदृशोऽयमितीति सादृश्यप्रतीतिः। एभ्यो विलक्षणया चित्रतुरगादिन्यायेनार्थाद् यथा चित्रे तुरगोऽयमिति पूर्वोक्तप्रतीतिचतुष्टयवैलक्षण्येन प्रतीतिरुदेति तथा रामोऽयमिति प्रतिपत्त्या ग्राह्ये अर्थाद् विषयीकृते नटे यथा शिशूनां चित्रतुरगे वस्तुपरिच्छेदशून्या तुरगोऽयमिति बुद्धिर्भवति तथा रामोऽयमिति प्रतिपत्त्या विषयीकृते नटे अर्थादभिनेतरि—

सेयं ममाङ्गेषु सुधारसच्छटा सुपूरकर्पूरशलाकिका दृशोः।
मनोरथश्रीर्मनसः शरीरिणी प्राणेश्वरी लोचनगोचरं गता॥[१]

इत्यादिकाव्यानुसन्धानसहकाराद् उपदेशेन पुनः पुनरनुशीलनेन च सम्पादितं यत् स्वकार्यस्याभिनयस्य प्रकाशनं तेन नटेनैव प्रकाशितैः कृत्रिमैरपि अर्थात् वस्तुतोऽसद्भिरपि तथा नाभिमन्यमानैर्विभावादिशब्दव्यपदेश्यैः कारणकार्य-सहकारिभिः संयोगाद् अर्थाद् गम्यगमकभावरूपसम्बन्धात् सामाजिकैरनुमीयमानोऽपि (अनुमानाकारश्चैवम्—इयं सीता रामविषयकरतिमती तस्मिन् विलक्षणा स्मितकटाक्षादिमत्त्वात् अथवा अयं रामः सीताविषयकरतिमान् तत्र विलक्षणस्मितकटाक्षादिमत्त्वात्)।

अनुमीयमानाया रतेः सौन्दर्यबलाद् आस्वाद्यमानत्वेन योऽनुमीयमानो वह्न्यादिरूपो लौकिकविषयस्तस्माद् विलक्षणः। अत्राशङ्क्यते यद् रामनिष्ठस्य रत्यादेर्नटेऽसत्त्वात् कथं नटेऽनुमानमत आह—नटगतत्वेन ज्ञायमानो रत्यादिर्भावः। वस्तुतो नटेऽविद्यमानेऽपि सामाजिकानां वासनया चर्व्यमाणो रस इति श्रीशङ्कुकः।

उक्ते द्वितीयव्याख्यानेऽपि 'प्रत्यक्षमेव ज्ञानं चमत्कारजनकं नानुमित्यादिः' इति लोकप्रसिद्धिविरोधस्तथा चानुमित्या सामाजिकानां रसानुभूतिसमस्या समाहिता न भविष्यति। सामाजिकानां रससाक्षात्कारो भवति नानुमितिरित्यरुचिद्वयं मनसि निधाय भट्टनायकसम्मतं तृतीयव्याख्यानमाह।

---

१. काव्यप्र.च.उ.।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

भट्टनायकमतम्—भट्टनायकानुसारेण विभावानुभावव्यभिचारिसंयोगाद् अर्थाद् भोज्यभोजकभावरूपसम्बन्धाद् रसस्य निष्पत्तिर्भुक्तिरिति सूत्रार्थः। एतद् विवृण्वता भट्टलोल्लटेन मुख्यतस्ताटस्थ्ये रामादौ गौणरूपेण च ताटस्थ्ये नटे रसोत्पत्तिः स्वीकृता। परन्त्वत्र सामाजिकानां स्थानं न कुत्रापि वर्तते, अतो मतमेतदुपेक्ष्यम्।

श्रीशङ्कुकेन तटस्थे नटे रसानुमितिरङ्गीकृता तथा चानुमित्या संस्कारवशात् सामाजिकानां रसचर्वणाया उपपादनं कृतम्; परन्त्वनुमितिस्तु केवला परोक्षज्ञानरूपा। साक्षात्कारात्मकरसानुभूतिसमस्यायाः समाधिरनुमित्या न भवितुं शक्यते, अतोऽयमपि सिद्धान्तो नोचितः। अत्र 'नोत्पद्यते' इत्यनेन भट्टलोल्लट-स्वीकृतस्योत्पत्तिवादस्य 'न प्रतीयते' इत्यनेन चानुमितिवादस्य निराकरणं कृतम्। एतदतिरिक्तं रसनिष्पत्तिविषयेऽस्त्येकः सिद्धान्तः अभिव्यक्तिवादः, यस्याचार्या अभिनवगुप्तपादाः सन्ति। तदनुसारेण सामाजिके रसाभिव्यक्तिर्भवति। अनेन सामाजिके रसस्थितिरङ्गीकृता। एतन्मते सामाजिके रसाभिव्यक्तिर्भवति; परन्त्वयमपि सिद्धान्तो नोचितः; यतो हि अभिव्यक्तिः सर्वदा पूर्वविद्यमानवस्तुनो भवति। रसः अनुभूतिस्वरूपः। अनुभूतिकालात् पूर्वं पश्चाद् वा रससत्ता नास्ति। अभिव्यज्यमानवस्तुनोऽस्तित्वम् अभिव्यक्तेः पूर्वं पश्चाच्च भवति. रसस्थितिः अनुभूतिकाले एव, न तु पूर्वं पश्चाद् वा, अतो रसाभिव्यक्तिसिद्धान्तोऽपि नोचितः। अनेन प्रकारेण मतत्रयखण्डनपुरस्सरं भट्टानायकेन भुक्तिवादस्य स्थापना कृता। तच्चैवं भट्टनायकेन काव्ये नाट्ये च शब्दे अभिधालक्षणावृत्त्यतिरिक्त-भावकत्वभोजकत्वरूपाभिनवव्यापारद्वयकल्पनया सामाजिकरसानुभूतेरुपपादनप्रयत्नः कृतः। तच्चैवं तन्मते अभिधया लक्षणया वा यस्यार्थस्योपस्थितिर्भवति सोऽर्थविशेषो नायकनायिकायाः प्रेमकथादिरूपो व्यक्तिविशेषेण च सम्बद्धो भवति। सामाजिकः अभिधयोपस्थितार्थस्य काव्यार्थस्य अभिधालक्षणाऽन्यतरवृत्त्यतिरिक्तभाव-कत्वव्यापारेण विभावादेः साधारणीकरणात्मना साधारणीक्रियमाणः (साधारणीकरणञ्च अन्यसम्बन्धित्वेनासाधारणस्य विभावादेः स्थायिनश्च व्यक्तिविशेषांशपरिहारेणोपस्थापनम्) रत्यादिस्थायीभावः सत्त्वगुणस्योद्रेकेण रजस्तमसी अभिभूयाविर्भावेण यः प्रकाशः सत्त्वानन्दात्मकं संवित्-ज्ञानम्, तस्य ज्ञानस्य या विश्रान्तिरर्थात् ज्ञेयान्तरसम्पर्करहित्येनावस्थानम्, तत्स्वरूपेणार्थाद् ब्रह्मसाक्षात्कारजन्यानुभूतिस्वरूपेण भोजकत्वव्यापारेणास्वाद्यते विषयीक्रियते वा।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

भट्टनायकमते भुक्तिः निष्पत्तिपदार्थः भोज्यभोजकसम्बन्धश्च संयोगशब्दार्थः।

पूर्वोक्तभट्टनायकव्याख्यानेऽपि एतादृशव्यापारद्वयकल्पने प्रमाणाभावः। तथा च यस्य स्थायीभावस्य योगः निगदितः सः रामसीतादिगतोऽथवा नटगतः सामाजिकगतो वा इत्यस्य स्पष्टीकरणमेतन्मते नास्ति इत्यरुचिद्वयं मनसि निधाय अभिनवगुप्तपादाचार्यसम्मतं सिद्धान्तभूतं चतुर्थव्याख्यानमाह।

अभिनवगुप्तपादाचार्यमतम्

स्थायिनां विभावादिभिः समं संयोगात् अर्थात् व्यङ्ग्यव्यञ्जकभावरूपसम्बन्धात् विभावादीनामेव वा परस्परं संयोगात् मिलनात् रसस्य निष्पत्तिरभिव्यक्तिरित्याचार्यसम्मतः भरतसूत्रार्थः। लोकेऽर्थात् काव्य-नाट्यभिन्नस्थले प्रमदोद्यानकटाक्षनिर्वेदादिरूपालम्बनोद्दीपनकारणकार्यसहकारिभिः स्थायिनः रत्यादेरनुमानविषये पुनःपुनरनुशीलनरूपाभ्यासेन नैपुण्यवतां सामाजिकानां काव्ये नाट्ये च प्रमदादिभिरेव कारणत्वकार्यत्वसहकारित्वव्यपदेशपरित्यागेन, वासनात्मतया अतिसूक्ष्मरूपेणावस्थितानां रत्यादीनाम् आस्वादयोग्यतानयनरूपाविर्भावनं विभावनम्। तादृशानां रत्यादीनामनुभवविषयीकरणमनुभावनम्। कार्ये विशेषेण अभितो रत्यादीनां संचारिणं व्यभिचारिणम्। ते एव व्यापारा अलौकिकविभावादिशब्दव्यवहार्यैः (अलौकिकत्वञ्चात्र लोके हर्षशोककारणेभ्यो हर्षशोकावेव जायेते काव्ये तथा नाटके तु सर्वेभ्य एव तेभ्यः सुखम्) ममैवैते शत्रोरेवैते तटस्थस्यैवैते इति सम्बन्धविशेषस्वीकारनियमः, न ममैवैते न शत्रोरेवैते न तटस्थस्यैवैते इति सम्बन्धविशेषपरिहारनियमः, तयोः सम्बन्धविशेषस्वीकारपरिहारनियमयोरनिर्णयात् साधारण्येनार्थात् सीतात्वादिविशेषांशरहितेन कामिनीत्वादिना प्रतीतैरभिव्यक्तः सामाजिकानां संस्काररूपेण सूक्ष्मतया पूर्वमेवावस्थितः स्थायी रत्यादिकः रसास्वादयितृतया निश्चितो यः प्रमाता सामाजिकः तत्सम्बन्धित्वेन स्थितोऽपि व्यक्तिविशेषसम्बन्धित्वेनाप्रतीयमानः यः उपायः विभावादिः तद्बलात् रसास्वादकालेऽप्रतीतः यः परिमितप्रमातृभावः (ममैवैते अहमेव रसास्वादयिता इत्येवंरीत्या अनुभूयमानो यो व्यक्तिविशेषसम्बन्धः) तद्वशेन प्रादुर्भूतः एवं लौकिकघटादिविषयस्य ज्ञानरूपसम्बन्धेन शून्यः चित्तवृत्तिविशेषः यस्य तेन रसास्वादयित्रा सकलानां सहृदयानां संवादभाजा (संवादो नाम एकत्र दृष्टस्य तथाऽन्यत्र दर्शनम्) कामिनीविषयकरतित्वसामान्येन विषयीकृतः।

ननु विवक्षितविवेचने रत्याद्यास्वादस्यैव रसरूपतया कथं रसस्य आस्वादः। अत्रोच्यते आस्वादास्वाद्ययोर्लोके वैलक्षण्यदर्शनादित्यत आह—स्वाकार इव—

CC-0. Sampurnanand University Collection. Digitized by eGangotri

स्वस्य ज्ञानस्य आकारविशेष एव विषयः, न तु ज्ञानादन्यः, इति हि योगाचारमते यथा वस्तुतः ज्ञानस्वरूपस्य विषयस्य ज्ञेयत्वं तथा आनन्दात्मकास्वादस्वरूपस्यापि रसस्य आस्वाद्यत्वमविरुद्धमिति चर्व्यमाणतैकप्राणो विभावादिकालमात्रस्थायि-पानकरसन्यायेनार्थात् पानकरसो हि यथा एलामरिचशर्कराकर्पूरादिवि-लक्षणवस्तुसम्पादितोऽपि एलामरिचादिरसवैलक्षण्येन लोकातीतेन आस्वादेन आस्वाद्यमानः पुर इव परिस्फुरन् हृदयमिव प्रविशन् सर्वाङ्गव्यापनं यथा स्यात्तथालिङ्गन् स्वविषयभूतविभावाद्यतिरिक्तमाच्छादयन्निव ब्रह्मास्वादमिव स्वास्वादमनुभावयन् ब्रह्मास्वादे (मुक्तिदशायां) ब्रह्ममात्रं प्रकाशते, रसे तु विभावाद्यपीति भेदात् सादृश्यम्। सादृश्यलक्षणसमन्वयार्थम् उपमानोपमेयभेद आवश्यक एव, यतो हि सादृश्यलक्षणं तद्भिन्नत्वे सति तद्गत्भूयोधर्मवत्त्वम् इति रूपेण शास्त्रकारैर्व्यवस्थापितम्। लौकिकसामग्रीजन्यविलक्षणचमत्कारकारी शृङ्गारादिको रसः। भट्टनायकमते असत्या अपि रतेरास्वादः, अभिनवगुप्तमते वासनया स्थिताया एवास्वाद इत्यनयोर्भेद इति।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

केशवमिश्रकृतालङ्कारशेखरसमीक्षणम्

डॉ. राजुकमारमिश्रः
प्रवक्ता, साहित्ये
हरियाणा-संस्कृत-विद्यापीठम्
बघौला, पलवल, हरियाणा

❋❋❋

सन्ति भूयांसः संस्कृतसाहित्याम्बरे काव्यशास्त्रालिसम्फुल्लग्रन्थनिचयाः, परं किमपि विशिष्टं स्थानमाधत्ते केशवमिश्रप्रणीतालङ्कारशेखराख्यो ग्रन्थः। भरतादारभ्य अद्यावधि काव्यशास्त्रधारा अक्षुण्णतया प्रवहति। ग्रन्थोऽयं फलेग्रह्यनुसारेण सामाजिकानां स्वान्ते नरीनृत्यतीति निश्चप्रचम्। ग्रन्थस्यास्य प्रणयनं षोडशशताब्द्यां जातमिति बहुधा प्रामाण्येन तथ्यपूर्वकञ्च ज्ञातुं शक्यम्। अयं हि अलङ्कारशास्त्रीयः प्रबन्धः शौद्धोदनिकृतालङ्कारसूत्रव्याख्यानरूपः। 'अलङ्कारशेखरो' नाम केशवमिश्रेण माणिक्यचन्द्रप्रेरितेन विरचितः। इह खलु काव्यस्वरूपरीतिदोषगुणालङ्कारादिकं नातिसंक्षिप्तं नातिविस्तृतं सम्यक्प्रकारेण सरलया प्राञ्जलया भाषया वर्णितं वृत्तिकारेण केशवमिश्रेण।

अतो हि प्रकरणविभागनिर्देशपुरःसरं तत्रत्या विषया निरूप्यन्ते। विषयानुक्रमणिकायां विस्तरेण विषयविवेचने विद्यमानेऽपि स्थूलदृशा विशेष-विषयविवरणरूपेण ग्रन्थसमालोचनं प्रासङ्गिकमेवेति। अस्मिन्नलङ्कारशेखरे रत्नान्यष्टौ विलसन्ति।

१. उपक्रमरत्नम्, २. दोषरत्नम्,
३. गुणरत्नम्, ४. अलङ्काररत्नम्,
५. वर्णरत्नम्, ६. कविसम्प्रदायरत्नम्
७. कविसामर्थ्यरत्नम्, ८. विश्रमरत्नं चेति तेषां नामानि।

आदितस्त्रिषु रत्नेषु मरीचित्रयं, चतुर्थे मरीचिचतुष्टयं, पञ्चमे त्रयः, षष्ठे चत्वारः, सप्तमे त्रयः, अष्टमे तु द्वाविति। अस्य ग्रन्थस्य साम्यं प्रायेण विश्वनाथप्रणीतसाहित्यदर्पणेन कर्तुं शक्यते। एतद्ग्रन्थोपरि नितरां विश्वनाथस्य प्रभावो विविधैरालोचकैः समर्थित इति निश्चप्रचम्। ग्रन्थारम्भे शिष्टाचारानुगतं

CC-0. Sampurnanand University Collection. Digitized by eGangotri

नमस्कारात्मकमादौ मङ्गलपद्यद्वयं तदनु ग्रन्थनिर्माणकारणप्रस्तावं पुनश्च ग्रन्थप्रेरयितुर्वंशवर्णनम्। तदनु सज्जन-स्तुतिं दुर्जननिन्दाञ्च विधाय काव्यस्वरूपं निरूपितम्—

'काव्यं रसादिमद्वाक्यं श्रुतं सुखविशेषकृत्'[१]।।

अत्राप्यवलोकयितुं शक्यो विश्वनाथकाव्यलक्षणप्रवाहः। इह ननु काव्यप्रयोजनसन्दर्भे काव्यात् कीर्तिमत्त्वं प्राप्यते, एतदेव ग्रन्थकारेण निजाभीष्टत्वमुपश्रुतम्[२]। अलङ्कारशेखरे काव्यहेतुत्त्वं प्रदर्शयता मम्मटाचार्यवीथ्या ग्रन्थकारेण हेतुत्रयत्वं साधिष्ठं प्रेष्ठञ्च समुपबृंहितम्, तद्यथा—'प्रतिभा व्युत्पत्त्यभ्यासाश्च'।

काव्यहेतुवर्णनस्थले मम्मटोक्तहेतुरपि प्रदर्शितो ग्रन्थकार-केशवमिश्रेण।

संस्कृतप्राकृतपैशाचीमागधीभेदेन संक्षेपतो भारत्याश्चतुर्विधत्वं देवकिन्नर-पिशाचहीनजातीयानां क्रमेण संस्कृतादिभाषाभाषित्वं च प्रतिपाद्य संस्कृतस्य सर्वापेक्षया मूर्धन्यत्वनिरूपणमपि भूरि राजते। तद्यथा—

संस्कृतं प्राकृतं चैव पैशाची मागधी तथा।
विद्याश्चतस्र एवैताः संक्षेपात्काव्यवर्त्मनः।।
पैशाचीं च पिशाचाद्या मागधीं हीनजातयः।
देवाद्याः संस्कृतं प्राहुः प्राकृतं किन्नरादयः।।
चतसृष्वपि मूर्धन्यं संस्कृतं मुनयो विदुः[३]।।

अत्र ग्रन्थकारेण संस्कृतभारत्याः चतुर्विधत्वविषये दण्डिमतमपि प्रदर्शितम्।

अत्र एतद् वैशिष्ट्यमवधेयं ग्रन्थकारस्य केशवमिश्रस्य, साहित्यकाव्यलक्षणप्रसङ्गे विविधैरप्याचार्यैस्सद्भिश्चैकमेव काव्यलक्षणं प्रतिपादितं स्व-स्वकरपल्लवपल्लविताऽऽप्लावितपरिमलपरिशोभितपणायितग्रन्थेषु। परं साहित्यशास्त्रकल्पद्रुमाप्लावितपरिपोषितवीथ्यां ग्रन्थकारेण काचनाभिनवा सृतिः स्थापिता। काव्यलक्षणद्वयं विधाय—

रीतिरुक्तिस्तथा मुद्रा वृत्तिः काव्यस्य जीवितम्।
त्रिविधस्यापि दोषास्तु त्याज्याः श्लाघ्या द्वये गुणाः।
अलङ्कारस्तु शोभायै रस आत्मा परे मनः[४]।।

---

१. अलङ्कारशेखरप्रथमरत्न-प्रथममरीचिः; २. अलङ्कारशेखरप्रथमरत्न-प्रथममरीचिः।
३. अलङ्कारशेखरप्रथमरत्न-प्रथममरीचिः; ४. अलङ्कारशेखरप्रथमरत्न-द्वितीयमरीचिः।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

काव्यलक्षणेऽस्मिन् पूर्वं रीतिप्रयोगो विराजितः, अतश्च रीतिः प्रतिपाद्यते—

तत्तद्रसोपकारिण्यस्तत्तद्देशसमुद्भवाः।
पद्येषु रीतयो गौडी वैदर्भी मागधी तथा[१]॥

तदनु केन प्रकारेण का रीतिरित्यपि प्राचीनाचार्याणां विवेचनानुरूपं स्वभावतस्तत्सेव्यत्वं च प्रदर्श्य तस्या बहुविधत्वोक्तिरपि विवेचिता।

आचार्यकेशवमिश्रेण प्राचीनवीथीमवलम्ब्य शक्तिलक्षणव्यञ्जनारूपेण पदवृत्तेस्त्रैविध्यं शक्तेर्लक्षणं प्रोच्य कोशव्याकरणादीनां तद्बोधौपयिकत्वं कथयित्वा लक्षणाया लक्षणं निरूप्य तात्पर्यानुपपत्तेर्मुख्यार्थानुपपत्तेर्वा तद्बीजत्वं प्रदर्श्य तदुदाहरणमपि लक्षणानुगुणं प्रदत्तम्।

पुनश्च काव्यस्योत्तममध्यमाधमदृशा त्रिविधत्वं प्रतिपादितं ग्रन्थकारेण। इहोत्तमकाव्यलक्षणम्—

तत्र वाच्यनिरूपितव्यङ्ग्यप्रकर्षाधारत्वमुत्तमत्वम्।

मध्यमकाव्यलक्षणमेवञ्चाधमकाव्यलक्षणम्, यथा—

वाच्यनिरूपितव्यङ्ग्यप्रकर्षाऽनाधारत्वं मध्यमत्वम्।

चमत्कृतिहेतुव्यङ्ग्यरहितत्वमधमत्वम्।

इह खलु लक्षणानुरूपमुदाहरणमपि ग्रन्थंकारेण प्रपञ्चितम्।

तदनु लक्षणे क्रमप्राप्तदोषचर्चा विधीयते, दोषाणां कथं व्याजत्वं काव्ये,अतो हि दण्डिमतमुद्धृत्य पदेऽष्टौ दोषा भाषिताः, तद्यथा—

कष्टाप्रयुक्तसन्दिग्धव्यर्थाश्लीलाप्रतीतकाः।
असाध्ववाचकौ दोषाः पदेऽष्टावेव भाषिताः[२]॥

तदनु, द्वितीयरत्ने द्वितीयमरीचौ द्वादशसंख्याका वाक्यदोषाः समाख्याता ग्रन्थकारेण—

न्यूनं विसन्धिव्याकीर्णं समाप्तपुनरात्तकम्।
भग्नक्रमयतिच्छन्दो वाक्यगर्भमरीतिमत्॥
अविमृष्टविधेयांशसमुदायार्थवर्जितम्।
विरुद्धमतिकृद्वाक्ये दोषा द्वादश कीर्तिताः॥[३]

---

१. अलङ्कारशेखरप्रथमरत्न-द्वितीयमरीचिः; २. अलङ्कारशेखरद्वितीयरत्न-प्रथममरीचिः।
३. अलङ्कारशेखरद्वितीयरत्न-द्वितीयमरीचिः।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

इत्थमेव अष्टावर्थदोषा अपि स्वीकृता ग्रन्थकारेण—

अष्टाऽर्थदोषा विरसग्राम्यव्याहतखिन्नताः।
हीनाधिकाऽसदृक्साम्यं देशादीनां विरोधि च[१]॥

पुनश्च काव्यलक्षणगुणचर्चानुरूपं पञ्चशब्दगुणा अथ चार्थगुणाः चत्वार इति सम्यक् प्रपञ्चिताः। पुनश्च वैशेषिकगुणानामपि चर्चा विहिता ग्रन्थकारेण। अत्र गुण-रीति-दोष-विवेचनावसरे केशवमिश्रस्य काव्यशास्त्रीयपाण्डित्यं प्रतिपलं नितरां द्रष्टुं शक्यते सहृदयैः।

पुनश्च समेषां काव्यतत्त्वानां वर्णनत्वात् केशवमिश्रेणाऽपि काव्येऽलङ्कार-झङ्कारप्राधान्यं सन्दर्शितम्—

गुणवत्यपि निर्दोषेऽलङ्कारैः काव्यराजनि।
जायतेऽन्यैव सुषमा रत्नालङ्करणैरिव॥

अलङ्कृत्यावश्यकत्वन्तु पदे पदे ग्रन्थकारेण लक्ष्यीकुर्वता शब्दा-लङ्कारार्थालङ्कारभेदेन विभज्य शब्दालङ्काराणाम् अष्टविधत्वं समुपपादितम्—

चित्रवक्रोक्त्यनुप्रासगूढश्लेषप्रहेलिकाः।
प्रश्नोत्तरं च यमकमष्टाऽलङ्कृतयो ध्वनौ[२]॥

इत्थमेव अर्थालङ्कारा अपि चतुर्दशविधत्वेन विभज्यन्ते ग्रन्थकारेण केशवमिश्रेण—

उपमा रूपकोत्प्रेक्षा समासोक्तिरपह्नुतिः
समाहितं स्वभावश्च विरोधः सारदीपकौ।
सहोक्तिरन्यदेशत्वं विशेषोक्तिविभावने
एवं स्युरर्थालङ्काराश्चतुर्दश न चापरे[३]॥

इहालङ्कारशेखराभिधाने ग्रन्थरत्ने न केवलं काव्यशास्त्रीयं तत्त्वं निरूपितं सम्यक् ग्रन्थकारेण केशवमिश्रेण, प्रत्युत नाट्यशास्त्रीयसिद्धान्तानामपि मनोहारि वर्णनं विहितम्। अत्र सर्वमपि तत्त्वविशेषं साहित्यशास्त्रस्य अनन्तरितमिति। परिशीलनोन्मुखप्रखरधिया ग्रन्थजातवैशद्येन पूर्णग्रन्थतया साहित्यशास्त्रस्यैतस्य स्वीकरणे न दोषः।

●

---

१. अलङ्कारशेखरद्वितीयरत्न-तृतीयमरीचिः; २. अलङ्कारशेखरचतुर्थरत्न-प्रथममरीचिः।
३. अलङ्कारशेखरचतुर्थरत्न-द्वितीयमरीचिः।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

पण्डितश्रीसुरतिनारायणमणित्रिपाठिवर्य्याणां

वाग्वैभवम्*

काश्यां श्रीशङ्कराचार्यजयन्तीमहोत्सवसभायाम्
२८.०४.१९६३ दिनाङ्के भाषणम्

यस्माज्जातं जगत्सर्वं यस्मिन्नेव प्रलीयते।
येनेदं धार्यते चैव तस्मै ज्ञानात्मने नमः॥१॥

त्रातुं द्वैतविषाद् विश्वम् अद्वैतामृतवर्षिणम्।
वन्दे वेदोदधौ लग्नं शङ्कराचार्यवारिदम्॥२॥

श्रीशङ्करभगवत्पादारविन्दमकरन्दमिलिन्दायमानाः सज्जना देव्यश्च!

इदमस्माकं महत् सौभाग्यं यदद्य वयं भगवतः आद्यशङ्कराचार्यस्य जयन्ती-महोत्सवं सम्मानयितुम् अत्र सानन्दं समवेताः स्मः। आद्यः शङ्कराचार्यः सच्चिदानन्दविग्रहस्य भगवतः शङ्करस्य महनीयोऽवतार इति प्रायः समग्राया आस्तिकजनताया विश्वासः। अयमवतारः तादृशे भीषणे समये सञ्जातः, यदा भारतवर्षस्य सनातन्याः संस्कृतेः, पुरातन्या आदर्शजीवनपरम्परायाश्च धर्मः, आत्मा, परमेश्वरश्च इति त्रय स्तम्भाः, समेषां तेषाम् आधारभूमिभूता वेदत्रयी च आमूलचूलं प्राकम्पन्त। इतिहासस्य अध्येतारः तथ्यमिदं सम्यग् जानन्ति, यद् भगवतः शङ्कराचार्यस्य प्रादुर्भावात् पूर्वं देशस्य सम्पूर्णो मानवसमाजः विभिन्नमतवादवारुणीं निपीय मूर्च्छित इतस्ततः स्खलत्पादश्च अजायत। वैदिको धर्मः तदानीं न केवलम् अनेकैः अवैदिकैः भूतवादैः एव प्रत्यहन्यत, अपि तु विभिन्नैः वैदिकैः मतवादैः अपि पर्यपीड्यत। किं बहुना, यया संस्कृतभाषया विशालो विचित्रश्च अयं देशः अतिप्राचीनकालाद् ऐक्यस्य सुदृढशृंखलायां

---

* सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य (तदानीन्तनवाराणसेयसंस्कृतविश्वविद्यालयस्य) कुलपतिचराणां पण्डितश्रीत्रिपाठिवर्य्याणां वाग्वैभवात्मकानीमानि प्रस्तुतानि भाषणानि गोरक्षपुरस्थ-त्रिपाठिभवनतः प्रकाशितात् 'मणिप्रवचनमाला'ख्यग्रन्थरत्नात्साभारं गृहीतानि सन्ति। —सम्पादकः

CC-0. Sampurnanand University Collection. Digitized by eGangotri

संरक्षित: अविद्यत, तदुपरि अप्रकटम् आक्रमणमपि कतिपयप्रकारैः उपाक्राम्यत। देशस्य यादृश्यां दु:स्थितौ भगवान् विष्णुः रामकृष्णादिरूपेण अवततार ततोऽपि अधिकतरायां दु:स्थितौ भगवान् शङ्करः शङ्कराचार्यरूपेण अवततार इति सर्वः सुविज्ञो लोकः सम्मन्यते। अस्य मुख्यं कारणम् इदमेव, यत् रामकृष्णादीनां पूर्ववर्तिनः समकालिकाश्च नास्तिका जनताया धार्मिकम् आध्यात्मिकं च जीवनम् अभिभवितुं बाह्यं भौतिकं बलम् आश्रयन्ते स्म, परं शङ्कराचार्यस्य पूर्ववर्तिनः समकालिकाश्च नास्तिका आन्तरिकं प्रज्ञाबलं प्रयुञ्जते स्म, बौद्धिकबलप्रयोगो भौतिकबलप्रयोगादधिकं घातक इति निर्विवादम्।

भगवान् शङ्करः इदमनुबभूव, आन्तरेण बलेन क्रियमाणस्य आक्रमणस्य प्रतीकारः आन्तरेणैव बलेन कर्तुं शक्यः समुचितश्च। अतः स जगतः कल्याणाय कृपया केरलप्रदेशे कालटीग्रामे विशुद्धे ब्राह्मणकुले प्रादुर्बभूव, अल्पीयस्येव वयसि साङ्गान् सरहस्यान् निखिलान् वेदान् अधीत्य श्रीगोविन्दभगवत्पादतः संन्यासदीक्षां जग्राह। उपनिषद्, ब्रह्मसूत्रम्, भगवद्गीता इति नामभिः सुप्रसिद्धं प्रस्थानत्रयम् आत्मनो भाष्यप्रभया प्रकाशयामास। आसेतु हिमाचलं शास्त्रार्थसङ्ग्रामेषु वैदिकान् अवैदिकाँश्च विपक्षिणः हेलयैव पराबभूव। अद्वैतामृतवर्षैः द्वैतविषं विधूय समग्रां मानवजातिम् उज्जीवयामास। धर्मस्य आध्यात्मिकतायाश्च मङ्गलप्रदीपः भारतस्य क्वापि भागे नास्तिक्यवातेन पुनः निर्वापितो न भूयाद् इति भावनया देशस्य चतुर्दिक्षु चतुरो मठान् प्रतिष्ठाप्य सुरेश्वराचार्यपद्मपाद-हस्तामलक-तोटकाचार्यनामकान् सर्वज्ञकल्पान् आत्मनश्चतुरः प्रधानशिष्यान् तत्र नियोजयामास। ततः आत्मनोऽवतारस्य सम्पूर्णं कार्यं कृतं मन्वानः उत्तराखण्डे केदारक्षेत्रं गत्वा वयसो त्रिंश एव वर्षे तत्रैव स्वशुद्धबुद्धं वास्तवं ब्रह्मस्वरूपं समवाप। यथोक्तं शिष्टैः—

अष्टवर्षे चतुर्वेदी द्वादशे सर्वशास्त्रवित्।
षोडशे कृतवान् भाष्यं द्वात्रिंशे मुनिरभ्यगात्।।

सुरेश्वराचार्यप्रभृतयो भगवतः शिष्याः तदुत्तराधिकारिणश्च सर्वज्ञेन जगद्गुरुणा आद्यशङ्कराचार्येण प्रतिष्ठापितानां पीठानाम् अधिपतित्वेन शङ्कराचार्यपदवीं प्राप्य प्रवचनेन, धर्मदर्शनग्रन्थनिर्माणेन, विद्यावृत्तमयेन आदर्शजीवनेन च वैदिकस्य सनातनधर्मस्य अध्यात्मज्ञानस्य च सार्वत्रिके प्रचारे निरन्तरं जागरूका अभूवन्।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

महानुभावाः!

ये किल जगतः सृष्टिम् अनीश्वरां मन्यन्ते, वैदिकं धर्मं मानवस्य बाधकं ब्रुवते, वेद-शास्त्रं मनुष्यप्रज्ञाया मानवसभ्यतायाश्च विकासप्राक्कालिकं मेषचारिणाम् अर्थशून्यं गीतसंग्रहं सङ्गिरन्ते, भगवन्तं श्रीकृष्णं काल्पनिकम् अनार्याकुक्षिप्रसूतम् अपूर्णं मानवं वा व्याहरन्ते, तेषां दुरभिप्रायभङ्गाय भगवद्गीताभाष्योपक्रमे भगवान् शङ्कराचार्यः स्पष्टमाचष्टे, तथा हि—"स भगवान् सृष्ट्वेदं ज़गत् तस्य च स्थितिं चिकीर्षुः मरीच्यादीन् अग्रे सृष्ट्वा प्रजापतीन् प्रवृत्तिलक्षणं धर्मं ग्राहयामास वेदोक्तम्। ततोऽन्याँश्च सनकसनन्दनादीन् उत्पाद्य निवृत्तिधर्मं ज्ञानवैराग्यलक्षणं ग्राहयामास। द्विविधो हि वेदोक्तो धर्मः प्रवृत्तिलक्षणो निवृत्तिलक्षणश्च। तत्रैको जगतः स्थितिकारणम्, प्राणिनां साक्षादभ्युदयनिःश्रेयसहेतुः यः स धर्मः ब्राह्मणाद्यैः वर्णिभिः आश्रमिभिश्च श्रेयोऽर्थिभिः अनुष्ठीयमानः दीर्घेण कालेन अनुष्ठातॄणां कामोद्भवाद् हीयमानविवेकविज्ञानहेतुकेन अधर्मेण अभिभूयमाने धर्मे, प्रवर्धमाने च अधर्मे जगतः स्थितिं परिपालयिषुः स आदिकर्ता नारायणाख्यो विष्णुः भौमस्य ब्रह्मणो ब्राह्मणत्वस्य रक्षणार्थं देवक्यां वसुदेवाद् अंशेन कृष्णः किल सम्बभूव। ब्राह्मणत्वस्य हि रक्षणेन रक्षितः स्याद् वैदिको धर्मः तदधीनत्वाद् वर्णाश्रमभेदानाम्। स च भगवान् ज्ञानैश्वर्यशक्तिबलवीर्यतेजोभिः सदा सम्पन्नः त्रिगुणात्मिकां वैष्णवीं स्वां मायां मूलप्रकृतिं वशीकृत्य अजः अव्ययः भूतानाम् ईश्वरोऽपि सन् स्वमायया देहवान् इव जात इव लोकानुग्रहं कुर्वन् परिलक्ष्यते।"

अयमर्थः तृतीयब्रह्मसूत्रस्य भाष्येऽपि ब्रह्मलक्षणं प्रदर्शयता भगवता संक्षेपेण परिपोषितः। तद् यथा—"अस्य जगतो नामरूपाभ्यां व्याकृतस्य अनेककर्तृभोक्तृसंयुक्तस्य प्रतिनियतदेशकालनिमित्तक्रियाफलाश्रयस्य मनसाऽपि अचिन्त्यरचनारूपस्य जन्मस्थितिभङ्गो यतः सर्वज्ञात् सर्वशक्तेः कारणाद् भवति तद् ब्रह्म। एवम् "महत् ऋग्वेदादेः शास्त्रस्य अनेकविद्यास्थानोपबृंहितस्य प्रदीपवत् सर्वार्थविद्योतिनः सर्वज्ञरुपस्य योनिः कारणं ब्रह्म"।

सज्जनाः!

भगवतः शङ्कराचार्यस्य सर्वोपदेशानां सारः अयमेव यद् भयमेव मनुष्यस्य सर्वविधे शुभोदये बाधकम्। तच्च भेददृष्टेः अधीनम्। ताम् अदूरीकृत्य न कश्चित् निर्भयो भवितुं कल्पते। समयश्च न कश्चित् क्वापि वरिष्ठे पुरुषार्थे

CC-0. Sampurnanand University Collection. Digitized by eGangotri

प्रगल्भते। भेददृष्टेः अपाकरणं च अभेददर्शने एव निर्भरम्। यथोक्तं तैत्तिरीयके—"यदा हि एव एष एतस्मिन् दृश्ये अनात्म्ये अनिरुक्ते अनिलयनेन अभयं प्रतिष्ठां विन्दते, अथ सः अभयं गतो भवति। यदा हि एव एष एतस्मिन् उदरम् अनन्तरं कुरुते, अथ तस्य भयं भवति"। इमम् अंशं व्याचक्षाणेन भगवता शङ्कराचार्येण स्पष्टमुक्तम्—"सर्वतो हि निर्भया ब्राह्मणा दृश्यन्ते सत्सु भयहेतुषु, तच्च अयुक्तम्, असति भयत्राणे ब्रह्मणि। तद् ब्रह्म तु एव भयं भेददर्शिनः। तस्माद् विद्वानपि अविद्वान् एक.असौ, योऽयम् एकम् अभिन्नम् आत्मतत्त्वं न पश्यति"। अतः—

विद्याविनयसम्पन्ने ब्राह्मणे गवि हस्तिनि।
शुनि चैव श्वपाके च पण्डिताः समदर्शिनः।।

इति गीतोक्तन्यायेन सर्वत्र समदर्शनमेव पाण्डित्यस्य लक्षणं भगवतः शङ्कराचार्यस्य अभिमतम्।

किन्तु देशस्य जगतश्च महदिदं दुर्भाग्यं यद् इदानीन्तनः समाजः आचार्यस्य उपदेशामृतं दूरतः परिवर्ज्य भेदमद्यमाधुर्येणैव अहर्निशम् आकृष्यमाणो विद्यते। राज्यस्य धर्मनिरपेक्षतायां शिक्षिताशिक्षितानां मतगणनया नीतिनिर्धारणे एव तस्य विश्वासः, 'शतमपि अन्धानां न पश्यति, एकश्च चक्षुष्मान् पश्यति" इति त्रिकालसत्ये न तस्य लेशोऽपि समादरः।

एकोऽपि वेदविद् धर्मं यं व्यवस्येद् द्विजोत्तमः।
स विज्ञेयः परो धर्मः नाज्ञानाम् उदितोऽयुतैः।।

इति मनुवचनस्य तन्नये न किमपि सार्थक्यम्। भौतिकक्षुद्रस्वार्थपरवशो भूत्वा सम्पूर्णो देशः संसारश्च विभिन्नेषु राजनीतिकवर्गेषु सैनिकसंघटनेषु वा विभज्यामानः वेदप्रतिपादितात् सनातनाद् धर्मात् सर्वव्याधीनाम् एकमात्र-महौषधाद् अद्वैतदर्शनाच्च प्रत्यहं सुदूरं पलायमानो वर्तते। अत ईदृशे संकटमये समये शङ्कराचार्यसदृशानां जगन्नेतृणां जयन्तीमहोत्सवं समायोज्य यैः सज्जनैः वैदिकस्य धर्मस्य वैदिक्या जीवनदृष्टेश्च व्यापकप्रचारार्थं प्रयत्नः अनुष्ठीयते, ते अतितरां प्रशंसनीया अभिनन्दनीयाश्च। शृङ्गाद्रिमठस्य आचार्यपरम्परा शिष्य-परम्परा च अस्यां दिशि अजस्रं जागरूका अग्रणीश्च आसीत्। अद्यापि च विद्यते। अत एव अस्मादृशाः सहस्रशो जनाः शृङ्गाद्रिं द्वितीयां काशीं मन्यमाना इत्थम् अभिवन्दन्ते—

CC-0. Sampurnanand University Collection. Digitized by eGangotri

विश्वनाथः स्थितो यत्र चन्द्रमौलीश्वरात्मना।
अन्नपूर्णा च यत्रास्ते शारदाम्बावपुर्गता।।१।।
गङ्गा च यत्र तुङ्गायाः प्रवाहे नित्यसङ्गता।
वन्दे तां शङ्कराचार्यश्रितां शृङ्गाद्रिकाशिकाम्।।२।।

अन्ते, अस्य उत्सवस्य संयोजकान् तत्सहयोगिनश्च हार्दिकैः धन्यवादैः सभाजयामि, यैः अस्मिन् पवित्रे आयोजने समवैतुम् अहम् आमन्त्रितः, आचार्यचरणेषु श्रद्धाञ्जलिसमर्पणस्य अवसरप्रदानेन धन्यतां च नीतः।

ॐ शान्तिः शान्तिः शान्तिः।।

●

प्रयागे विश्वसंस्कृतसम्मेलनस्य द्वितीयाधिवेशने भाषणम्

१९६६

देव्यः सज्जनाश्च,

इदं तावद् महतो हर्षस्य स्थानं यद् गतवर्षे प्रयागस्य यस्मिन् पवित्रे त्रिवेणीतटे विश्वसंस्कृतसम्मेलनस्य प्रथममधिवेशनं समपद्यत तस्मिन्नेव पावनस्थले ऐषमस्तस्य द्वितीयमधिवेशनं सोत्साहं सप्रमोदं च प्रवर्तते। सम्मेलनस्य द्वितीयस्मिन् वर्षे सोत्सवं पदार्पणं द्वितीयमधिवेशनं च विस्पष्टमिदं विज्ञापयति यत् संस्कृतस्य सम्बन्धे सम्मेलनस्य कार्यकर्तॄणां व्यापिका विशिष्टा स्थायिनी च अभिरुचिर्विद्यते। संस्कृतस्य विषये तेषामुत्साहः क्षणिकः प्रदर्शनमात्रं नास्ति। तेषां प्रस्तुता प्रवृत्तिरेव अत्र प्रमाणं यज्जनाः संस्कृतस्य महत्त्वं साम्प्रतमेव हृदयेन मन्यन्ते, वर्तमानयुगेऽपि तस्य उपयोगितां स्वीकुर्वते च। एवं प्रतीयते यत् नास्तीदानीं जनमनो मनागपि दोलायमानं संस्कृतस्य गरिम्णः तदध्ययनस्य प्रयोजनवत्तायाश्च विषये। उचितमेवैतत् सर्वथा, यतः को नाम नेदमङ्गीकुर्याद् यत् संस्कृतमेतस्मिन् विपत्काले यदा समग्रा भारतभूमिः वैदेशिकशासकानां क्रूरैः पदाघातैः प्रत्यहमभ्यभूयत, देशस्य महती सेवा कृता। यदा हि वैदेशिकशासनबलेन वैदेशिकी भाषा, वैदेशिकी संस्कृतिः, वैदेशिकी जीवन-पद्धतिश्च भारतं सर्वात्मना आत्मसात्कर्त्तुं निरंकुशं वर्द्धमाना आसीत्, तदा तासां बहुविधानि प्रबलानि आक्रमणानि सहमानापि संस्कृतभाषा न केवलं स्वकीयं जीवनमेव अरक्षत्; अपि तु सम्पूर्णं भारतराष्ट्रम् एकतासूत्रे सङ्ग्रथ्य

CC-0. Sampurnanand University Collection. Digitized by eGangotri

तदीयं धर्मं तदीयां सभ्यतां तदीयां मौलिकीं जीवनदृष्टिं चाप्यरक्षत्। वस्तुतो यदि संस्कृतं नाभविष्यत्, यदि वेदाः, उपनिषदः, पुराणानि, दर्शनानि, धर्मशास्त्राणि, तन्त्राणि, रामायणम्, महाभारतम्, कालिदासप्रमुखानां महाकवीनाम् अमराणि काव्यानि नाभविष्यन्, लौकिकं लाभं शासनिकीम् उपेक्षां च अवगणय्य संस्कृतभाषाया एषां निधीनां रक्षणे देशस्य ब्राह्मणवर्गो धार्मिकः समाजश्च जागरूकः प्रवृत्तश्च नाभविष्यत्, तदा वैदेशिकैः निष्करुणं शोष्यमाणं भारतं स्वस्वरूपं केन साधनेन केन च माध्यमेन अरक्षिष्यत्। स्पष्टमिदं यत् पाश्चात्त्यैः नितान्तं निर्धनीकृत्य परित्यक्तस्य भारतस्य पार्श्वे पैतृकं किं रिक्थमवशिष्टमिति जिज्ञास्येत तदा संस्कृतं विहाय नान्यत् किमपि वक्तुं शक्यते। तदेवमस्माकं पूर्वजानाम् उपार्जनेषु यद्येकं संस्कृतमेव साम्प्रतम् अवशिष्यते तदा तस्य संरक्षणं संवर्द्धनं तद्द्वारा देशस्य अन्यान्यविशिष्टानां पुनरुन्नयनं च कर्तुमस्माभिः सर्वतोभावेन प्रवर्तितव्यम्। नास्त्यत्र कोऽपि सन्देहो यद् यदि संस्कृत-शिक्षाया व्यापिका समृद्धा च व्यवस्था विधीयेत तदा देशस्य सर्वतोमुखो विकासोऽविलम्बमेव सम्पद्येत। यतः संस्कृतसाहित्यमेव बहुमुखं सुसमृद्धं सुविशालं च विद्यते, यत्र जगतो मानवजीवनस्य च सर्वमपेक्षितं सृष्टेः आरम्भकालात् सम्पद्यमानं सर्वविधमुपार्जनं च सञ्चितं सुरक्षितं च वर्तते। संसारस्य अन्यान्यभाषाः साहित्यानि च संस्कृतभाषायाः संस्कृतसाहित्यस्य च अपेक्षतया अर्वाचीनतया संसारस्य अर्वाचीना उपलब्धीः अर्वाचीनम् इतिहासं चैव अस्माकं समक्षमुपस्थापयन्ति। अतो विश्वस्य चिरप्राचीनेतिहासानां मानवजातेरतिप्राचीनप्रवृत्तीनां च परिचयो यदि प्राप्तुमिष्यते तदा तदर्थं संस्कृतभाषैव संस्कृतसाहित्यमेव साधनं भवितुमर्हति नान्यत्।

अद्यत्वे जनाः साधारणतया इदम् अवबुध्यन्ते यत् संस्कृतं हिन्दुजातेः तत्रापि द्विजातीनां ब्राह्मणक्षत्रियवैश्यानां धर्मभाषा, हिन्दूधर्मविषये व्यापकस्य विशदस्य च परिचयस्य प्राप्तये नूनं तद्भाषाया अध्ययनम् आवश्यकम्। परं हिन्दूधर्मस्य परिचयो विश्वमानवानां न तथा आकाङ्क्षणीयो यथा हिन्दूनाम्, हिन्दूनामपि न केवलं धर्ममात्रम् आकाङ्क्षितम् अपि तु नूतनस्य विश्वस्य नवनवा उपलब्धयो धर्मादप्यधिकम् आकाङ्क्षिताः। अतो हिन्दू-धर्मज्ञापनमात्रप्रयोजनाया संस्कृत-भाषाया अध्ययनस्य सर्वजनीनत्वेन व्यवस्थापनप्रयत्नो राष्ट्रस्य नवनिर्माणसन्दर्भे लाभप्रदो नास्ति। परमियं जनमान्यता नितान्तं भ्रममूलिका, संस्कृतं हि न कदापि धर्मभाषामात्रमासीत्। यदि इयं भारतवर्षस्य बहुकालपर्यन्तं जनभाषा शासनभाषा च नाभविष्यत् तदा

CC-0. Sampurnanand University Collection. Digitized by eGangotri

अस्यां भाषायां विविधस्य लोकसाहित्यस्य राजनीतेश्च, विज्ञानस्य, कलायाः ग्रन्थानां रचना कथमभविष्यत्। यया भाषया प्रतिपादनीयो विषयः, प्रकटनीयो विचारः, वितरणीयं ज्ञानम्, श्रावयितव्यः सन्देशः जनजनं प्रापयितुं शक्यो भवति तयैव भाषया ग्रन्थनिर्माणे विद्वांसः प्रवर्तन्ते, यथा अद्य आंग्लभाषा विश्वस्य भाषासु सर्वापेक्षया जगति अधिकां व्यापिका। अतो ये विचारा जगतोऽधिकाधिकजनतापर्यन्तं प्रापयितव्या भवन्ति ते आंग्लभाषया प्रकटीक्रियन्ते, एवं यस्मिन् राष्ट्रे या भाषा अधिकं व्यापिका भवति तस्मिन् राष्ट्रे तयैव भाषया ग्रन्थनिर्माणं क्रियते। अनया प्रवृत्त्या निःसन्देहमिदं निर्णेतुं वक्तुं च शक्यते यत् कदाचिद् भारतवर्षे संस्कृतं नूनं समग्रराष्ट्रव्यापिका जनभाषा आसीद् येन तस्यां भाषायां सर्वविधस्य साहित्यस्य निर्माणं जातम्। अवश्यमियं कदाचित् शासनभाषाप्यासीत्, येन तस्यां भाषायां शासननीतीनां वर्णनं बहूनां राजनीतिग्रन्थानां निर्माणं चाभूत्। यदि लोको व्यापकरूपेण संस्कृतज्ञो नासीत् तदा कस्मै संस्कृतमाध्यमेन सहस्रशो नाटकानि काव्यानि च लिखितानि। केषामवबोधाय विस्तृतानि पुराणानि, रामायण-महाभारत-प्रभृतीनि अनेकग्रन्थरत्नानि च निर्मितानि। संस्कृतभाषायां यद्धर्मस्य प्रतिपादनमभूत्, यद्धार्मिकसाहित्यस्य निर्माणम् अभूत्, तदपि अस्मादेव कारणाद् यत्तदानीं संस्कृतं लोकभाषा आसीत्। अतो लोकस्यावबोधाय लोकहितावहस्य लोकप्रियस्य धर्मस्य तद्भाषायां विस्तरेण वर्णनं धर्मज्ञैः विद्वद्भिः कृतम्। धर्मसंस्कृतयोः सम्बन्धस्येदमेकं फलमवश्यमस्ति यद् यदा देशे वैदेशिकानां शासनस्य प्रतिष्ठिततया संस्कृतभाषाया उपेक्षा आरब्धा, शासनकार्यं नूतनसाहित्यनिर्माणं च वैदेशिकशासकानां भाषासु प्रावर्तत, तदा प्राधान्येन धर्मसम्बन्धादेव संस्कृतम् अजीवत्। वैदेशिकानां भारतीयधर्मस्य उज्जीवने प्रचारणे च कश्चित् स्वार्थो नासीदतो धर्मक्षेत्रे स्वभाषाप्रवेशाय ते प्रयत्नमाग्रहं च नाकुर्वन्। तत्फलतया धर्मसंस्कृतयोः सम्बन्धोऽक्षुण्णोऽतिष्ठत्। तेन च धर्मद्वारा संस्कृतस्य संरक्षणे महत् साहाय्यं समभवत्। देशस्य पारतन्त्र्ययुगे उज्जीवितत्वे धर्मस्य अस्मात्प्रामुख्यादेव जनानामियं भ्रान्तिर्जाता यत् संस्कृतं तु भारतस्य केवलं धर्मभाषा। वस्तुतस्तु यथोक्तन्यायेन संस्कृतं पारतन्त्र्यपूर्वकाले भारतस्य पूर्णा राष्ट्रभाषाऽऽसीत्। संस्कृतभाषैव अशिक्षामूलकेन उच्चारणवैरूप्येण विभिन्नजलवायुप्रभावेण भाषाप्रसारस्य स्वाभाविकेन क्रमेण च प्राकृतादिभाषाणां विविधापभ्रंशभाषाणां तत्तत्प्रदेशभाषाणां च विभिन्नेषु रूपेषु विकासं प्रापत्। मम तु इदं स्पष्टं मतमस्ति, यद् यदि भारतस्य स्वातन्त्र्यं संरक्षणीयमस्ति, यदि समग्रं राष्ट्रम् एकतासूत्रे संग्रथनीयमस्ति, यदि सर्वासां

CC-0. Sampurnanand University Collection. Digitized by eGangotri

प्रादेशिकभाषाणां वास्तवो विकासः आकाङ्क्षणीयोऽस्ति, यदि च देशस्य तदीये निजस्वरूपे समुन्नयनं काम्यमस्ति तदा संस्कृतशिक्षायाः सम्बन्धे सर्वप्रथमं सर्वाधिकं च ध्यानं देयम्। संस्कृतशिक्षाया भारतव्यापिन्यै व्यवस्थायै प्रयतनीयम्।

संस्कृतशिक्षायाः सम्बन्धे विचारो प्रक्रमे इदमवश्यं ध्यातव्यं यत् संस्कृतं केवलं व्याकरणे काव्ये दर्शन एव च न परिसमाप्यते किन्तु तस्य कलेवरम् अत्यन्तं विस्तृतम्। तस्मिन् अनेकानि विज्ञानानि, अनेका भौतिकाभ्युदयप्रदा विद्याश्चापि सन्ति। अतः संस्कृतशिक्षायां तेषां विज्ञानानां तासां विद्यानां चापि समावेशो नूनं कार्यः। वर्तमाने युगे यदा विज्ञानप्रभावेण विज्ञानोद्भावितानां नवनवानां साधनानां द्वारेण संसारो नभोमण्डले प्रभुत्वं संस्थाप्य चन्द्रादिलोकान् अधिकर्तुम् अश्रान्तभावेन चेष्टमानो विद्यते, तदा संस्कृतं काव्य-व्याकरणादीनां कतिपयग्रन्थमात्रे सीमितं सत् लोकस्य श्रद्धामाकर्षणं च कथं प्राप्स्यति। यदि उच्येत यद् भवतु संस्कृते विज्ञानस्य काचिच्चर्चा कस्याश्चित् चामत्कारिकविद्याया उल्लेखो वा, परं तेन साम्प्रतं किं प्राप्तुं शक्यते। पाश्चात्यदेशैः आविष्कृतं भौतिकं विज्ञानम् उत्कर्षस्य यां पराकाष्ठामारोहत् सा संस्कृते चर्चितेन नगण्यविज्ञानेन किं कथमपि शक्यते समारोढुम्। शक्यत्वेऽपि यदि विश्वाय तेन काचन नूतनोपलब्धिर्न दीयते तदा तदुद्धारप्रयासस्य का उपयोगिता। एतत्प्रसङ्गे इदं वक्तुं कामये यत् संस्कृते येषां विज्ञानानां यासां विद्यानां च निर्देशो लभ्यते, तानि विज्ञानानि ता विद्याश्च वर्तमानविज्ञानापेक्षया धनजनसमयानाम् अल्पव्ययेन साध्या महाफलाश्च। यादृश्या उपलब्धये अद्यतनं विज्ञानं प्रभूतं धनं महान्तं जनसहयोगं विशालं कालं च अपेक्षते, तादृशी उपलब्धिः भारतीयेन विज्ञानेन भारतीयया विद्यया च अल्पेनैव धनेन स्वल्पेनैव जनसहयोगेन लघुनैव च कालेन सुलक्षीक्रियते। दृष्टान्तरूपेण मार्कण्डेयपुराणे प्राप्यमाणमिदं कथानकम् उपन्यसितुं शक्यते। यत्र अनुलेपनविद्याया अग्न्युपासनाविज्ञानस्य च चर्चा समुपलभ्यते। कथानकमित्थमस्ति—

वरुणानद्यास्तटे अरुणास्पदनाम्नि स्थाने कश्चिद् विपश्चित् सदाचारो दर्शनीयो ब्राह्मणः प्रतिवसति स्म। एकस्मिन् दिने कश्चिदतिथिस्तदालयमाजगाम। स ब्राह्मणेन कृताद् आतिथ्यात् तुष्टो भूत्वा तस्मै एकं लेपं ददौ। पादयोः तस्य लेपस्य प्रयोगेण यथाकामम् अप्रयासं कुत्रापि गन्तुं शक्यते स्म। ब्राह्मणः आत्मनः चिरन्तनीं देशाटनेच्छां पूरयितुं लेपेन पादौ उपलिप्य सर्वप्रथमं हिमालयं जगाम। पर्वतस्य विभिन्नानां रम्यप्रदेशानां दर्शने निषक्तचित्ततया स

CC-0. Sampurnanand University Collection. Digitized by eGangotri

पादलेपस्य रक्षणे ध्यानं न ददौ। फलतया निर्झराणां जलधारया पादलेपस्य प्रक्षालनं जातम्। दिनावसाने सन्निहिते यदा स गृहं गन्तुमना बभूव। तदा पादलेपस्य लुप्ततया आत्मानं परावर्तनेऽसमर्थं विदित्वा प्रत्यहं यथाविधि उपास्यमानं गार्हपत्यमग्निं सस्मार। गार्हपत्योऽग्निः तस्मिन् सद्यः तादृशं बलमादधौ येन स शीघ्रमेव गृहं प्राप्य सायन्तनीम् अग्न्युपासनां समयेन सम्पादयितुं शशाक। विस्पष्टमस्ति यदस्य लेपस्य निर्माणे अग्न्युपासनायां च' ययोर्बलेन ब्राह्मण एतावतो महतो दूरस्य यात्रां स्वल्पतमेनैव कालेन कर्तुं प्रबभूव, तावतो धनस्य जनस्य चापेक्षा नास्ति, यावद् धनं यावाँश्च जन ईदृशस्य त्वरितगमनस्य विमानप्रभृतीनाम् आधुनिकसाधनानां निष्पादने व्ययो भवति।

रामायणे वर्णितेषु विभिन्नविज्ञानेषु द्वयोः विज्ञानयोः चर्चां कर्तुं कामये। एकं रेखाविज्ञानम्, अपरं छायाविज्ञानं च।

यदा कनकमृगमनुधावन् रामोऽतिदूरं ययौ सीता च स्वरक्षायां सन्नद्धं लक्ष्मणमनुरुरोध यत् स राममन्वेषयितुं तत्कालमेव गच्छेत्। तदा तदनुरोधमुपेक्षितुमसमर्थो लक्ष्मणः प्रस्थानात्पूर्वं धनुष्कोट्या परितः सीतामेकामीदृशीं रेखां निर्ममे या लङ्घनकारिणं सद्यो दग्धुं प्रभवति स्म। इत्थमेकस्याः साधारण्या रेखाया निर्माणं विधाय लक्ष्मणेन सीताया रक्षणस्य या व्यवस्था कृता, किं तादृशीं धनजनाद्यसाध्यां रक्षणव्यवस्थां कर्तुं वर्तमानं वैज्ञानिकयुगं प्रभवति। छायाविज्ञानमपि एवमेव आश्चर्यपूर्णं विद्यते, यदा सीतान्वेषणार्थं लङ्कां गन्तुं हनुमान् आकाशमार्गेण समुद्रं पारयन्नासीत् तदा लंङ्कापतिना लङ्कागामिनां बाह्यजनानां निरीक्षणाय नियोजितया राक्षस्या समुद्रजले दृश्यमानां हनुमच्छायां पाणिना गृहीत्वा तस्य गतिरोधः कृतः। छायाग्रहेण गतिरोधस्य विधिः किमद्यतनेन विज्ञानेन अधुनावधि ज्ञातः।

कालिदासस्य रघुवंशकाव्येऽपि अनेके ईदृशाः प्रसङ्गाः प्राप्यन्ते ये विज्ञानस्य तदानीन्तनमुत्कर्षं निर्दिशन्ति।

वसिष्ठमन्त्रोक्षणजात् प्रभावादुदन्वदाकाशमहीधरेषु।
मरुत्सखस्येव वलाहकस्य गतिर्विजघ्ने नहि तद्रथस्य॥

इति पद्येन कविना वसिष्ठस्य मन्त्रविज्ञानप्रभावो भृशं वर्णितः। आसीदयं वसिष्ठेन मन्त्रद्वारा प्रोक्षणस्यायं महिमा यद् रघोः रथः समुद्रेषु, आकाशप्रदेशेषु, पर्वतेषु च निष्प्रतिबन्धं गच्छति स्म।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

शस्त्रास्त्रविज्ञानमपि संस्कृतवाङ्मये अतीवाप्रतिमं पठ्यते। कालिदासस्य रघुवंशस्थं पद्यमिदम् एतद्विषये पर्याप्तं प्रकाशं प्रक्षिपति—

सम्मोहनं नाम सखे ममास्त्रं प्रयोगसंहारविभक्तमन्त्रम्।
गान्धर्वमादत्स्व यतः प्रयोक्तुर्न चारिहिंसा विजयश्च हस्ते।।

संस्कृतस्य अध्ययनाध्यापने प्रोत्साह्य यदि ईदृशानामस्त्राणां पुनर्निर्माणं भवेद् येषां प्रयोगेण शत्रूणां प्राणहानिं विनैव विजयो हस्तगतो भवेत् तदा भारतवर्षस्य न केवलं जगद्गुरुत्वमेव अपि तु जगत्प्रभुत्वमपि प्रतिष्ठापयितुं शक्येत इति निर्विवादम्।

संस्कृतसाहित्ये शिल्पविज्ञानमपि अत्यद्भुतं दृश्यते यस्योदाहरणे महाभारतात् मयनिर्मितस्य पाण्डवानां तस्य सभाभवनस्य उल्लेखः कर्तुं शक्यते, यत्र राज्ञो दुर्योधनस्य जलं स्थलमिव, स्थलं जलमिव, द्वारम् अद्वारमिव, अद्वारञ्च द्वारमिव अदृश्यत्।

इदं तु दिग्दर्शनमात्रं कृतमा वेदेषु, पुराणेषु, संस्कृतस्य अन्यान्येषु अङ्गेषु च विज्ञानस्य वैविध्यं तस्य नानाविधम् उपलब्धिजातं च तादृशं वर्णितमस्ति यद् भिमुखं वर्तमानस्य विज्ञानस्य दृष्टिरपि अधुनावधि न गता।

अस्मादेव कारणादस्माभिरुच्यते यत्—संस्कृतवाङ्मये निर्दिष्टानां विज्ञानानां विद्यानां च पुनरुद्धाराय संस्कृतस्य पुस्तकीयं प्रायोगिकं च शिक्षणमत्यावश्यकम्। एतदतिरिक्तमप्येकं तात्कालिकं महत्प्रयोजनमस्ति संस्कृतशिक्षाया व्यापकप्रचारप्रसारयोः। तदिदं यत् पाश्चात्त्येन भौतिकविज्ञानेन आत्मनः प्रादुर्भावेन अभ्युदयेन च सार्द्धं मानवजातये या अनीश्वरवादिनी अनात्मवादिनी च दृष्टिः प्रदत्ता, यस्याः कारणाद् विज्ञानं वरदानस्य पूर्णामर्हतां दधानमपि विश्वाय अभिशापरूपं संवृतमस्ति। यस्याः कारणाच्च मानवो देहादिव्यतिरेकेण आत्मनः अस्तित्वं दृश्यमानाज्जगतः परं न किञ्चित् श्रद्दधते। यत्फलतया च मनुष्यो वर्गबद्धो भूत्वा अनेकविधेऽशान्तिबहुले संघर्षे संसारे सन्तापयन् विद्यते। जगतो हिताय मानवताया अस्मात् जडवादानलात् त्राणाय वैज्ञानिकोपलब्धीनां जनहिते नियोजनाय च अस्या अनात्मदृष्टेर्निवारणाय प्रयासः सद्य एव अपेक्ष्यते। कार्यं चैतत् संस्कृतशिक्षयैव सम्पादयितुं शक्यं नान्यथा। यतः संस्कृतवाङ्मयं विस्पष्टं ब्रूते—

अन्यच्छ्रेयः अन्यदुतैव प्रेयः, त उभे नानार्थे पुरुषं सिनीतः।
तयोः श्रेय आददानः साधुः भवति, हीयतेऽर्थाद् य उ प्रेयो वृणीते।।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

न सम्परायः प्रतिभाति बालं प्रमाद्यन्तं वित्तमोहे न मूढम्।
अयं लोकः नास्ति पर इति मानी पुनः पुनर्वशमापद्यते मे।।

सुखं शान्तिश्च कस्य भवितुमर्हति इत्यपि संस्कृतसाहित्यं सुस्पष्टमुद्घोषयति—

एको वशी सर्वभूतान्तरात्मा न लिप्यते लोकदुःखेन वाह्यः।
तमात्मस्थं येऽनुपश्यन्ति धीरास्तेषां सुखं शाश्वतं नेतरेषाम्।।

अतो यदि संसारे विश्वबन्धुतायाः स्थापनं यदि सर्वेषां विश्वराष्ट्राणां सुखशान्त्योः मार्गस्योद्घाटनम्, यदि च परस्परं भावयद्भिः जगतो राष्ट्रैः पारस्परिकस्य श्रेयसः समुपार्जनं काम्यमस्ति तदा संस्कृतशिक्षाया देशव्यापिन्यै समृद्धप्रतिष्ठायै जनतायाः परिकरो बन्धनीयः। प्रशासनस्य दृष्टिरस्यां दिशि आकर्षणीया।

कार्यमिदं यदि विश्वसंस्कृतसम्मेलनेन दृढसङ्कल्पपूर्वकं हस्ते गृह्येत उत्तरप्रदेशे वाराणसेयसंस्कृतविश्वविद्यालयमिव देशस्य प्रतिप्रदेशं यदि एकैकं संस्कृतविश्वविद्यालयं स्थापयितुं प्रशासनमनुरोद्धुं शक्येत, तन्माध्यमेन च संस्कृतवाङ्मये सङ्कोतितानां विविधविद्यानां पुनरुद्धाराय पन्थानं प्राप्तुं प्रयतेत, तदैव अस्य सम्मेलनस्य साफल्यं, संस्कृतस्य श्रीसंवर्द्धनं, राष्ट्रस्य गौरवाधानञ्च भवितुमर्हति।

●

वाराणसेयसंस्कृतविश्वविद्यालयस्य द्वितीय-विशिष्टदीक्षान्तमहोत्सवे ११.०९.१९६५ दिनाङ्के भाषणम्

आदरणीयाः प्रतिकुलपतयः,

महतो हर्षस्यैष विषयो यदद्य वयं फ्रांसशासने युवजनसंस्कृति-विज्ञानविभागस्य मन्त्रिणां मनीषिप्रवराणाम् 'श्री-आन्द्र-मालरो'-महोदयानां 'वाचस्पति'-सम्मानोपाधिसमर्पणसमारोहे अत्र सोत्साहं समवेताः। विद्यायाः, संस्कृतेः, सभ्यतायाः, अध्यात्मभावनायाश्च चिरन्तनकेन्द्रभूते विश्वप्रसिद्धे ऐतिहासिके अस्मिन् वाराणसीनगरे एषां महानुभावानाम् इदं द्वितीयं महत्त्वपूर्णं पदार्पणम्। अस्मिन् प्रमोदावसरे अस्य नगरस्य, अस्य विश्वविद्यालयस्य, भवतां समेषाम्, स्वात्मनश्च पक्षेण एषां महाभागानां सुस्वागतं व्याहरामि।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

वाराणसी हि भारतस्य सांस्कृतिकम्, शैक्षिकम्, धार्मिकम्, आर्थिकं च यत् प्राचीनम् अर्वाचीनं च जीवनम्, तदुभयोः समीचीनस्वरूपस्य सम्पूर्णं प्रातिनिध्यं विधत्ते। संस्कृतक्षेत्रे तु अस्याः स्थानम् अत्यद्भुतम्, अद्वितीयम्, अविप्रतिपन्नं च।

वाराणस्या महत्त्वसम्बन्धे इदं निवेदनम् मन्ये पर्याप्तम्, यद् भारतस्य कोऽपि नेता संस्कृतविद्यानां सनातने सर्वोत्तमे च अस्मिन् शिक्षापीठे समागत्य अत्रत्यानां पण्डितप्रकाण्डानाम् अनुमोदनं यावन्न प्राप्नोति स्म, तावत् समाजस्य धर्मस्य शिक्षाया वा विषये तदीया काऽपि संस्कारयोजना पूर्णा न मन्यते स्म। काश्मीराद्, दक्षिणभारतात्, नवद्वीपात्, शान्तिपुरात्, अन्येभ्यश्च विद्याकेन्द्रेभ्यो विद्वज्जना अत्रागत्य आत्मनो विद्यायां ग्रन्थे च अत्रत्यानां पण्डितानां स्वीकृतिसम्मानमुद्रां प्राप्य आत्मानं धन्यं कृतार्थं च मन्यन्ते स्म। इमां पुरातनीं परम्परामनुस्मृत्य शङ्कराचार्य-रामानुजाचार्य-तुलसीदासप्रमुखा महामहिमानो लोकसंस्कर्तारः अत्र आगच्छन्, यथा-सुविधम् अत्र चिरं वा अचिरं वा न्यवसन्, अस्य यशश्चयं च तुन्दिलतरम् अकुर्वन्।

भारतीयदृष्ट्या वाराणस्या इदमप्येकं सर्वातिशायि महत्त्वम्, यदत्र जगत्पिता विश्वनाथः लोकमाता अन्नपूर्णा च समग्रैः अध्यात्मवैभवैः निरन्तरं विराजेते। इदं च अस्या अपरं गौरवम्, यद् हिमालयस्य सर्वस्वम् अन्तर्दधाना सुरतरङ्गिणी गङ्गा आत्मनः पावनैः पाथःप्रवाहैः वाराणस्याः स्वाभाविकं सौन्दर्यं द्विगुणीकरोति, निसर्गसिद्धां पवित्रतां पोषयति च। भारतीयानाम् इयं दुष्प्रधर्षा प्रामाणिकी च धारणा, यदत्र देहं त्यजन्तो जना जन्ममृत्युबन्धनतो विमुच्य ब्रह्मभावं भजन्ते।

वाराणस्या अनन्यसाधारणं वैशिष्ट्यं तु तावदेतद् यत् कालक्रमेण प्रवर्तमानानां विविधानां परिवर्त्तनानां मध्ये पदन्यासं कुर्वाणा वाराणसी नवीनं जगदेव आत्मसात् कृतवती, न पुनः स्वयं नवीनेन जगता आत्मसात्कृता। तदित्थम् अनेकप्रकारम् अनन्यलभ्यं गौरवं दधानाया अस्याः पवित्रनगर्या अलङ्कारभूते अस्मिन् संस्कृतविश्वविद्यालये 'श्री-आन्द्रे-मालरो'-महोदयानां शुभागमनेन महान्तम् आनन्दमनुभवन् पुनस्तेषां हार्दिकीः स्वागतगिरो व्याहरामि।

अस्माकं देशस्य महामान्य-'श्री-आन्द्रेमालरो'-महोदयस्य जन्मदायिनो देशस्य च अस्ति सांस्कृतिकं राजनीतिकं च महत् साम्यम्। अष्टादशवर्षपूर्वं

CC-0. Sampurnanand University Collection. Digitized by eGangotri

यदा देशोऽयं वैदेशिकशासनस्य दुर्वहां धुरं दूरीकृत्य स्वातन्त्र्यश्रिया समुद्भासितः अभूत् तदा स्वकीयां गणतन्त्रपरम्परां व्याख्यातुम् प्रतिष्ठापयितुं च मार्गदर्शकस्य अपेक्षायां जगति स्वतन्त्रताऽऽन्दोलनस्य आद्यजनकत्वेन विख्यातं भवतां देशमेव प्रथमतया अन्ववेक्षत। फ्रान्सो विश्वस्य स देशः, येन समानतायाः, स्वतन्त्रतायाः, बन्धुतायाश्च सिंहनादः संसाराय सर्वप्रथमम् उपायनीकृतः। फ्रान्सदेशो गणतन्त्रजुषे जगते न केवलं समुचितं सिंहनादं समुपहृत्यैव विरतः; अपि तु स एव एकलो देशः यः स्वोद्घोषमनुसरन् समानतायाः स्वतन्त्रतायाश्च उच्चतमं लक्ष्यं पूरयितुम् अनवरतं जागर्त्ति, उपनिवेशशासनाधीनानि राष्ट्राणि सर्वैः प्रकारैः प्रोत्साहयति, तेषां पक्षे निस्सङ्कोचं संघर्षं समाचरति च। फ्रान्स एव सः प्रथमो देशः यो भारते स्वातन्त्र्यप्रभया समुद्भासिते विना कञ्चिदुपचारम्, विना च कञ्चिद् वणिक्कैतवं पाण्डिचेर्याः चन्द्रनगरे, अन्येषु च स्वाधिकृतस्थानेषु भारतस्य पक्षे स्वीकायां सार्वभौमताम् अत्यजद्, यदर्थं भारतीयाः तस्य कृतज्ञतां वहन्ति।

फ्रान्सो हि संस्कृतिसभ्यतयोः क्षेत्रे, ललितकलायाम्, साहित्ये, सौन्दर्ये च सर्वाग्रणीः। एतेषां समेषां समुन्नयने फ्रान्सदेशस्य पूर्वपुरुषैः यत् महत्त्वपूर्णम् अनुष्ठानं साधितं, तत् सर्वथा अविस्मरणीयम्। संस्कृतशिक्षाक्षेत्रेऽपि फ्रान्सः कस्मादपि योरपीयदेशात् पश्चात्पदो नास्ति। फ्रान्सदेशीया न केवलं भारतस्य राजनीतिकगतिविधौ एव साभिनिवेशाः, अपि तु तस्य साहित्ये, भाषासु, विशेषेण च कदाचित् समग्रस्य भारतस्य सङ्ग्रथनसूत्रभूतायां संस्कृतभाषायां भृशं बद्धादराः। 'केजी'-महोदयः, फ्रान्सदेशस्य प्रथमो विपश्चिद् येन संस्कृतसाहित्ये जनानाम् अभिनिवेशम् उत्पादयितुं तस्य व्यापकं संवर्धनं च कर्तुं समुल्लेख्यं बहु कार्यं कृतम्। स हि शाकुन्तलस्य योरपीयं प्रथमं संस्करणं प्रकाशयत्, अनेकान् ग्रन्थान् व्यरचयत्, श्लेगलं संस्कृतम् अशिक्षयत्। तत्पश्चाद्वर्तिनः सर्व एव फ्रान्सदेशीया विद्वांसः स्थान एव तस्य अनुगमनम् अकार्षुः।

फ्रान्सदेशस्य विद्वत्परम्परया सृष्टस्य अस्य संस्कृताभिनिवेशस्य प्रसारो जर्मनी-इंग्लैण्ड-प्रभृतिषु प्रतिवासिदेशेषु द्रुततरगत्या अजायत। अद्य च न केवलं योरपीया एव देशाः, अपि तु अमेरिकासदृशा भौतिकताप्रधाना देशा अपि संस्कृतसाहित्यस्य तदीय-शिक्षायाश्च महत्त्वं सर्वलोकोपयोगितया समाकलयन्ति।

●

CC-0. Sampurnanand University Collection. Digitized by eGangotri

वाराणसेयसंस्कृतविश्वविद्यालयस्य द्वितीयदीक्षान्तमहोत्सवे उपकुलपतीनां श्रीसुरतिनारायणमणित्रिपाठिमहोदयानां धन्यवादप्रदानभाषणम्

दिनाङ्कः ११.०९.१९६५

महानुभावाः,

साम्प्रतं मम इदं पवित्रं परमावश्यकं च कर्तव्यं यदहं तेषां सर्वेषां महानुभावानां धन्यवादैः कृतज्ञताज्ञापनैश्च सभाजनं कुर्याम्, ये अस्मत्प्रार्थनया अस्मिन् समारोहे समवेताः।

तत्र सर्वप्रथमम् अस्माकं मुख्यातिथयः 'श्री-आद्रेमालरो' एव हार्दिकैः धन्यवादैः अस्माभिः सम्मान्याः, यैः अत्रागत्य अस्य विशिष्टदोक्षान्तसमारोहस्य आयोजनायाः शुभावसरः प्रादायि। अस्माकं प्रतिकुलपतयः श्रीकाशीनरेश-महाभागा अस्य विश्वविद्यालयस्य सर्वतोमुखमभ्युदयम् अनवरतं चिन्तयन्ति, तैरद्यास्य विशिष्टदीक्षान्तसमारोहस्य यत् साभापत्यं सम्पादितं तदर्थम्, तेषां बहुविधान्योपकारार्थं च तान् धन्यवादैः संयोजयामि सत्करोमि।

भारतस्थिताः फ्रान्सदेशीया महामान्या राजदूतमहोदयाः, केन्द्रीय-शिक्षासचिवाः श्रीकृपालमहोदयाश्चागत्यास्य समारोहस्य यद्गौरवस्य शोभायाश्च संवर्धनं कृतवन्तः, तदर्थं ते उभये अपि महाशया अस्माकं भूयसो धन्यवादान् अर्हन्ति।

वाराणसेया विशिष्टा नागरिकाः, अधिकारिणः, विद्वांसः, विद्यार्थिनः, अन्ये संस्कृतानुरागिणः विश्वविद्यालयस्य सर्वविधाः सदस्याश्च यैः आत्मन उपस्थित्या, सक्रियेण सहयोगेन च अस्य समारोहस्य साफल्यं सम्पादितम्, तान् सर्वानेव महानुभावानहमनेकैर्धन्यवादैः समाद्रिये।

अन्ते पुनः सर्वान् सज्जनान् हार्दिकैः धन्यवादैः सभाजये।

ॐ शान्तिः, शान्तिः, शान्तिः।

●

वाराणस्यां विवेकानन्दसंस्कृतविद्वद्गोष्ठीसमारोहे भाषणम्

देव्यः, कुमार्य्यः, सज्जनाः, सभ्याश्च,

अद्याहं श्रीस्वामिविवेकानन्दपादानां जन्ममहोत्सव-समारोहे समायोजितायाः संस्कृतविद्वद्गोष्ठ्याः (साभापत्ये नियुक्तः) काशीस्थ-

CC-0. Sampurnanand University Collection. Digitized by eGangotri

श्रीरामकृष्ण-अद्वैत-आश्रमस्यैतस्य विश्रुतसंस्थानस्य अध्यक्षमहाभागानां श्रीअपूर्वानन्दस्वामिमहोदयानां भृशमाभारान् आवहामि। एतेषां स्वामिमहोदयानां संस्कृतभाषां प्रति किमपि नैसर्गिकं प्रेम परिलक्ष्यते। एतैर्न केवलं श्रीरामकृष्ण-परमहंसमहाभागानां श्रीविवेदानन्दस्वामिपादानां च उपदेशान्वितं जीवनचरितं सुबोधसंस्कृतवाण्या संस्कृतज्ञानां ज्ञानवर्धनाय निबद्धम्, अपि तु प्रत्यब्दमेष संस्कृतविद्वद्गोष्ठी अपि वेदान्तधर्मस्य तत्त्वपरिज्ञानाय संस्कृते छात्राणां विपश्चितां च अभिरुचिवर्धनाय संयोज्यते। एतदर्थं सर्वेऽपि धर्मतत्त्वजिज्ञासवो विद्वज्जनाः स्वामिमहाभागानामुपकारततिं नितान्तमामन्वते।

'धर्मो विश्वस्य जगतः प्रतिष्ठा'। धर्मस्य हि निखिलस्य विश्वस्य धारकत्वेन जागर्ति कोऽपि विश्रुतो महिमा। धर्मो हि निखिलानां कल्याणानां मङ्गलानां च जन्मभूमिः, ऐहिकानाम् आमुष्मिकाणां च भोगापवर्गाणामा-विर्भावस्थली। धर्मस्य प्रतिपादकः अपौरुषेयो वेद एव। "चोदनालक्षणोऽर्थो धर्मः" इति प्रतिपादयन् जैमिनिर्धर्मस्य साक्षात् सम्बन्धं भगवत्यां श्रुतावेव संस्थापयति। अत एव सम्प्रदायविदो वेदस्य अकुण्ठितां शक्तिं दर्शयन्ति। तथा च शाबरभाष्ये "चोदना हि भूतं भवन्तं भविष्यान्तं सूक्ष्मं व्यवहितं विप्रकृष्टमित्येवं जातीयकमर्थं शक्नोति अवगमयितुम्"। वेदमूला स्मृतिरत एव प्रामाण्यं भजते। वैदिको धर्मो न देशेन व्यवच्छिन्नः, न वा कालेन। अत एव अन्येभ्यो देशकालाभ्यां परिच्छिन्नेभ्यो धर्मेभ्यो नितरां विलक्षणो निखिलानां प्राणिनां च हितोपदेशकत्वेन सर्वथा उपकारकृत् वर्तते।

वैदिककालादारभ्य न कुत्रापि सनातनधर्मस्यास्य परम्परा विच्छिन्ना जाता। उपनिषत्सु पुराणेषु रामायणमहाभारतादिषु काव्यग्रन्थेषु मनुयाज्ञवल्क्य-पाराशरादिस्मृतिषु च स एव स्वीयां विशुद्धां विवृतिं भजते। अवैदिकानां चार्वाकाणां बौद्धादीनां च प्रयासैर्मन्दतामुपगतेऽस्मिन् कुमारिलभट्टशङ्कराचार्य-भगवत्पादैरस्य दृश्यमानास्त्रुटीर्निरस्य महान् परिष्कारो विहित इति न परोक्षं प्रेक्षावताम्।

वैदिकधर्मोऽयं न केवलं पारलौकिकनिःश्रेयसाय कल्पते, अपि तु लौकिकाभ्युदयायापि। स्वार्थपरमार्थयोः ऐहिकामुष्मिककल्याणयोश्च सद्यः सिद्धिप्रदो धर्मो वैदिकः। धर्मार्थकामरूपे त्रिवर्गे धर्म एव प्रामुख्यं भजते इति तु सत्यम्, परन्तु नायं धर्मोऽर्थकामौ विहाय केवलया स्थित्या वर्तते इति ध्रुवं विचारणीयं पण्डितैः। भारतीया संस्कृतिः धर्मार्थकामानां परस्परं सन्तुलामाश्रित्यैव विजृम्भते। भारते अर्थो धर्मानुकूलो भूत्वैव साफल्यं भजते।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

तथैव कामोऽपि धर्माविरुद्धो भूत्वैव स्वमहिमानमाविष्कुरुते। अत एव भगवद्गीताया विभूतिविवरणप्रसङ्गे 'धर्माविरुद्धः कामोऽस्मि लोकेऽस्मिन् भरतर्षभ' इति भगवद्वाक्यं सङ्गच्छते। इदमेव तथ्यं श्रीवेदव्यासेन महाभारते बहुशः प्रत्यपादि। तथा चात्र विषये वेदव्यासस्यैतद् वचो निपुणं निभालनीयं जिज्ञासुभिः—

धर्मार्थकामाः सममेव सेव्या यो ह्येकसक्तः स जनो जघन्यः।
तयोस्तु दाक्ष्यं प्रवदन्ति मध्यं स उत्तमो योऽभिरतस्त्रिवर्गे।।

अर्थात् त्रयोऽपि धर्मार्थकामाः सममेव अनासक्तिभावेन सेवनीया भवन्ति। यो हि एकस्मिन् आसक्तो भवति, स निन्दनीय एव। एषु द्वयोर्दाक्ष्यसम्पन्नो नरो मध्यमो भवति। त्रिवर्गेऽभिरतः पुरुष एव मानवसमाजे उत्तमो भवतीति महर्षेर्वेदव्यासस्य हार्दम्।

साम्प्रतं विश्वस्मिन् जगति राष्ट्राणां देशानां मानवानां च यः खलु नितान्तं क्षोभकरो भीषणः संघर्षः साक्षात्क्रियते तत्र को हेतुरिति विचारयन्तु। कर्त्तव्यनिरसनपूर्वकम् अधिकारलिप्सैव तत्र मुख्यं निदानम्। सर्वे एव मानवाः स्वाधिकारायैव प्रयतन्ते, स्वकर्तव्येषु मन्दादरा एते स्वाधिकाराणामधिलब्धय एव नित्यमुद्युक्ता वर्तन्ते। अयमेव वर्तमानकालिकराष्ट्रकलहस्य सर्वत्र साक्षात् क्रियमाणो हेतुः। वैदिकधर्मस्तु मानवानां कर्त्तव्यमेव सातिशयमुपदिशति। कर्तव्यपरायणा एव जनाः स्वाभीष्टाधिकारानपि स्वत एवोपलब्धुं पारयन्तीति धर्मस्य रहस्यम्। अधिकारचिन्तनं विहाय कर्तव्यनिष्ठायामेव मानवानां कल्याणं समुपजृम्भत इति तदुपदेशसंक्षेपः।

नरनारायणस्य सेवायामाग्रहो वर्तते वैदिकधर्मस्य। प्रत्यक्षभूतं नारायणं परित्यज्य अप्रत्यक्षभूते नारायणे कः खलु प्रयतताम्। नर एव नारायणः, तस्यैव सेवा महते फलाय कल्पते। नराणां समूहो नारम्। नारमेव अयनं यस्येति व्युत्पत्त्या नारायणस्य नराश्रितत्वं स्वत एव सिद्ध्यतीति सुधीभिः स्वयं निभालनीयम्। इत्थं यदि जनताजनार्दनस्य सेवैव राष्ट्राणामादर्शो भवेत् तर्हि किं मानवानां संग्रामे एतावान् संक्षयो भविष्यति। स्वत्वविषये श्रीमद्भागवत-स्योपदेशं सावधानेन मनसा विमृशन्तु स्वार्थपरायणा अपि मनुष्याः—

यावद् भ्रियेत जठरं तावत् स्वत्वं हि देहिनाम्।
अधिकं योऽभिमन्येत स स्तेनो दण्डमर्हति।।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

स्वेनार्जितेऽपि धनराशौ कियत् स्वत्वम् अधिकारोवा वर्तते देहिनामिति प्रश्नः। यावता द्रव्येण जठरं भ्रियेत उदरपूर्तिः सञ्जायेत, तावतैव स्वामित्वं पुरुषस्येति तदुत्तरम्। यः तस्मादपि अधिके धनराशौ स्वामित्वं मन्यते, स तु स्तेनः चौर एव। स तु समाजे दण्डनीयो भवति। अन्यार्जितधनापहरणं नाम चौरत्वम्। अत्रापि अन्याभिलषितद्रव्यापहरणे कथं चौरत्वं न परिस्फुरतु। इत्थं स्वत्वमीमांसा विवृता महर्षिणा वेदव्यासेन। साम्प्रतं समुपजृम्भमाणस्य साम्यवादस्य मूलतत्त्वं समुन्मीलितम्। साम्यवादस्तु जनानां समत्वे प्रतितिष्ठते। स तु वैदिकधर्मे एव मूलरूपेण विद्योतते। इत्थं विश्वस्मिन् जगति सर्वेषां मानवानां स्वाधिकारप्राप्तिसाधनत्वेन कर्तव्यनिष्ठामुपदिशन्, धर्मानुकूलकामार्थौ सेवितव्याविति प्रतिपादयन् मनुष्याणां परस्परप्रेमाभिवृद्धये साम्यभावं विवृण्वन् महनीयोऽयं वैदिको धर्मः समुपजृम्भते। सर्वेषां मतानां समन्वयप्रतिपादकोऽयं श्लोकः प्रसङ्गेऽस्मिन् साधु स्मर्तव्यः—

श्रोतव्यः सौगतो धर्मः कर्तव्यः पुनरार्हतः।
वैदिको व्यवहर्तव्यो ध्यातव्यः परमः शिवः॥

अस्यैव वेदान्तधर्मस्य विपुलः प्रचारः, प्रचुरोपदेशो विहितः श्रीविवेकानन्दस्वामिचरणैः। साम्प्रतं जगति परिदृश्यमानविपुलमहिम्नः साक्षात् क्रियमाणविमलयशोराशेर्वैदिकधर्मस्य तत्त्वजिज्ञासायां पाश्चात्त्यानां यः खलु भृशमादरोऽवलोक्यते तस्य प्रधानं कारणं वर्तते वेदान्तधर्मोपदेशपराणां श्रीस्वामिचरणानाम् अमेरिका-आङ्ग्लदेशादिनानादेशेषु वेदान्ताश्रमाणां संस्थानं नाम। रामकृष्णसेवाश्रमोऽयं मानवानां कियन्तमुपकारं विधत्ते इति वयं सर्वे जानीमः। पाश्चात्त्यदेशेऽपि तद्देशीया नानाभाषाः परिशील्य तत्रत्यजनानां धर्माभिवृद्धये कल्याणाय च विवेकानन्दस्वामिपादानां शिष्याः तद्भाषाभिः स्ववैदिकसिद्धान्तान् कियता कौशलेन कियता तर्केण च साम्प्रतं प्रचारयन्ति इति जिज्ञासवो विद्वज्जनाः 'Hinduism in vades America' इत्यांग्लभाषानिबद्धं ग्रन्थं स्वैरं परिशीलयन्तु इति मदीया मनीषा। इत्थं परमहंसरामकृष्णमहाभागानां विवेकानन्दस्वामिपादानां चोपदेशं जगति, विशेषतो भारते वर्षे प्रचारयन्, अयं रामकृष्णसेवाश्रमो नित्यं वर्धतां जनताजनार्दनस्य सेवायां नितान्तमुद्युक्तो भूत्वा समुपजृम्भतामिति मम भगवतः श्रीभूतभावनविश्वनाथस्यान्तिके प्रत्यहं प्रार्थना विलसति।

ॐ शान्तिः, शान्तिः, शान्तिः॥

●

CC-0. Sampurnanand University Collection. Digitized by eGangotri

वाराणसेयसंस्कृतविश्वविद्यालयस्य दीक्षान्तमहोत्सवे धन्यवादभाषणम्

महामान्याः श्रीकुलपतिमहोदयाः धन्यमूर्धन्याः श्रीआयङ्गरमहाभागाः, श्रीप्रतिकुलपतिमहोदयाः सम्मान्याः काशिराजाः, पूज्याः विद्वांसः, स्नातकाः, स्नेहभाजनच्छात्राः, समादरणीया देव्यश्च!

इदं तत् परमं पवित्रं प्रमोदप्रदं च कर्तव्यं यदहं वाराणसेयसंस्कृतविश्वविद्यालयस्य उपकुलपतिरूपेण आत्मनो व्यक्तिगतरूपेण च हार्दिकैः धन्यवादैः कृतज्ञताज्ञापनैश्च मनीषिप्रवरान् श्रीकुलपतिमहाभागान् श्रीमतः आयङ्गरमहोदयान्, श्रीप्रतिकुलपतिमहोदयान् सर्वान् समागतान् सभाजयेयम्। श्रीआयङ्गरमहोदयानाम् अयं महान् अनुग्रहो यदेभिः अस्मत्-प्रार्थनां स्वीकृत्य स्वकीयं किमपि असौविध्यम् अविगणस्य स्वोपस्थित्या दीक्षान्तमहोत्सवोऽयं सफलीकृतः। स्वकीयैः शुभाशीर्वादैः सदुपदेशैश्च अस्माकं स्नातकाः कृतार्थतां नीताः। एभिः यदद्य पाण्डित्येन ओजसा सद्विचारैश्च परिपूर्णं प्रेरणाप्रदं भाषणं प्रादायि, तदर्थमिमान् प्रभूतैः धन्यवादैः सम्मानयन्तः एतेषां महतीं कृतज्ञताम् अधमर्णतां च विभृमः। एतेषां भाषणे प्रतिपदं गम्भीरा अर्थाः, प्रतिवाक्यं समुन्नता विचाराः, विचारेषु च महानसो दीर्घानुभवभाजो वरिष्ठस्य प्राच्यविदः सुपरिणता अनुभूतयः, प्राच्यप्रतीच्ययोः श्रेयस्तत्त्वयोः सुमधुरः समन्वयश्च सर्वमिदं समवेतः समुल्लसति।

अस्मिन् भाषणे श्रीआयङ्गरमहोदयैः ये उदात्ततरा विचाराः प्रकटीकृतास्ते समयानुरूपतया शाश्वतसत्यतया च मननं चिन्तनम् आत्मसात्करणम् अनुवर्तनं च अर्हन्ति।

श्रीआयङ्गरमहोदयाः प्राच्यप्रतीच्ययोरुभयोरपि विद्ययोः सुविख्याताः विद्वांसः पुरातन्याः भारतीयसंस्कृतेः समुपासकाः भारतस्य युगानुरूपाणां संस्कृतविदुषाम् अग्रेसराश्च। अत एव एतेषाम् उपदेशः स्नातकैः सर्वैः संस्कृतप्रणयिभिश्च सर्वथा श्रोतव्यः शिरोधार्यश्च।

विगतासु. कतिपयशताब्दीषु वैदेशिकैः संस्कृतभाषायाः तदुपजीविन्याः संस्कृतेश्च न केवलम् उपेक्षैव कृता अपि तु तेषु अनेकैः कूटनीतिज्ञैः तयोः अवस्थितिं वैदेशिकशासनस्य दार्ढ्याय बाधिकां मत्वा तयोः अभिभवाय आस्कन्दनाय च बहुप्रकाराः कपटाचाराः अपि कृताः। बहुभिश्च विस्पष्टम् इदम् उद्घुष्टं यत् संस्कृतभाषा मृतभाषा कदापि लोकव्यवहारभाषा नाभूत्। इत्थमनेकैः प्रकारैः कदर्थ्यमानायाः अपि संस्कृतभाषायाः यत्किमपि स्वरूपं साम्प्रतम्

CC-0. Sampurnanand University Collection. Digitized by eGangotri

उपलभ्यते तत् संस्कृतपण्डितानां तपश्चर्यायाः त्यागस्य च फलम्। सांसारिकवैभवं सुखसमृद्धिं च उपेक्ष्य आधुनिकैः कृतम् उपहासम् अवमानं च अविगणय्य सुमहत्या निष्ठया भक्त्या च भाषेयं संरक्षिता। लौकिकं किमपि प्रतिफलम् अनाकांक्षमाणैः विपुलं धैर्यम् आधृत्य विषमेऽपि समये संस्कृतभाषायाः गौरवध्वजः सर्वोपरि समुत्तोलितः। तदानीन्तनः समाजोऽपि संस्कृतपण्डितानां वैशिष्ट्यं स्वीकृत्य तेषां सम्माननं परिपोषणं च अकरोत्। परं वैदेशिकशासनाद् विमुक्तिप्राप्त्यनन्तरं समाजव्यवस्थायां प्रभूतं परिवर्तनं प्रारब्धम्। परिवर्तनक्रमश्चायम् उत्तरोतरं द्रुततरगत्या प्रवर्तमानः परिलक्ष्यते, प्रतीयते यद्देशस्य नवनिर्माणप्रयासे आर्थिकेन वैज्ञानिकेन राजनीतिकेन च आधारेण समाजस्य यादृशं स्वरूपं निष्पद्यमानम् अस्ति तस्मिन् संस्कृतपण्डितानां प्राक्कालिकी प्रतिष्ठाविशिष्टता च क्रमशः तिरोहिते भविष्यतः।

जनजीवने संस्कृतविद्यायाः पुनः प्रतिष्ठापनाय अस्य संस्कृत-विश्वविद्यालयस्य स्थापना अभूत्। उत्तरप्रदेशप्रशासनेन साभिनिवेशं कृतया एतद्विश्वविद्यालयस्थापनया अस्य महतो लक्ष्यस्य पूर्तिः सम्प्रतम् सम्पूर्णदेशस्य लक्ष्यभूता प्रतिभाति। फलतया विहारप्रशासनेनापि सुप्रसिद्धे दरभङ्गानगरे एकः अपरः संस्कृतविश्वविद्यालयः स्थापितः। पश्चिमबङ्गप्रशासनेनापि संस्कृत-विश्वविद्यालयस्य संस्थापनायै एका समितिः संघटिता। यस्याः सदस्यैः अस्य विश्वविद्यालयस्य संघटनपद्धतेः अध्ययनार्थम् अस्य विश्वविद्यालयस्य निरीक्षणं कृतम्, आशास्यते यद् अविलम्बमेव पश्चिमबङ्गेऽपि संस्कृत-विश्वविद्यालयः प्रतिष्ठापितो भवेत्।

अस्माकं देशे चतुरस्रम् उपक्रम्यमाणोऽयं संस्कृतशिक्षायाः पुनः प्रतिष्ठाप्रयासः सर्वथा स्थाने एव, यतो अधुनातनस्य भौतिकविज्ञानस्य अधुनातन्या। अर्थकाममात्रप्रधानाया राजनीतेश्च अन्योन्यानुबन्धेन समग्रे जगति महतो विनाशस्य या विभीषिका समुत्पन्ना वर्तते, तस्याः निराकरणं संस्कृतभाषाया व्यापकं शिक्षणं विना सुदुष्करम्। वस्तुतः पवित्रसंस्कृत-वाङ्मयस्य समस्ताः वेदाः शाखाः उपशाखाः उपनिषदः पुराणानि धर्मग्रन्थाः विविधानि शास्त्राणि च विश्वस्मिन् सुखशान्त्योः प्रतिष्ठापने सर्वाधिकं समर्थाः। शान्तिः, सौमनस्यं, कलहो वैमनस्यं वा, समाजस्य राष्ट्रस्य च व्यवहारनीतौ निर्भरम्। व्यवहारनीतिस्तु जनानां राष्ट्राणां वा संस्कृतेरधीना। संस्कृतिश्च पुनः कस्यचित् समाजस्य साहित्यशिक्षणपद्धतौ च निहितां विचारपद्धतिमनुवर्तते।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

अस्माकं व्यवहारनीतिः सर्वदा शान्तिपूर्णा शान्तिप्रिया चावर्तत। सति वैमत्येऽपि अनिवार्ये समुपस्थिते च युद्धे अस्माकं युद्धनीतिरपि अद्यतनीव क्षुद्रानुवर्तिनी भावानुवर्तिनी अधार्मिकी वा नासीत्। अस्माकं युद्धक्षेत्रं धर्मक्षेत्रं युद्धानि च धर्मयुद्धानि मन्यन्ते स्म। अस्माकं युद्धानां लक्ष्यं सत्यप्रतिष्ठयोः स्थापनं संरक्षणमेवावर्तत, न तु भूम्यादीनां बलात् स्वायतीकरणम्। देशोऽयं सर्वदा विश्वकल्याणमेव अचिन्तयत्, इयमेव अस्य प्रात्यहिकी प्रार्थना अभूत्—

सर्वे भवन्तु सुखिनः, सर्वे सन्तु निरामयाः।
सर्वे भद्राणि पश्यन्तु, मा कश्चिद् दुःखभाग्भवेत्।।

एवंगुणायाः संस्कृतभाषायाः प्रचारप्रसारयोः प्रयत्नः सर्वथा स्तुत्यः परमावश्यकश्च। परमेतत्कार्यस्य पुरः काश्चित् कठिनाः समस्याः सन्ति यासां समाधानमन्वेषणं च संस्कृतहितैषिणां प्रथमं कर्तव्यम्। तत्र प्रमुखतया समस्या तेषां स्नातकानां जीविकायाः कृतेः विद्यते, ये स्वशिक्षां समाप्य संस्कृतविद्यालयेभ्यः विश्वविद्यालयेभ्यो वा बहिः निस्सरन्ति। यथा यथा संस्कृतविश्वविद्यालयस्य स्नातकानां संख्या विवर्धते तथा तथा तेषां जीविकायाः कृते समस्याऽपि जटिलतरा जायते।

भवद्भिरर्थकरत्वदृष्ट्या संस्कृतस्य समस्यानां समीचीनं विवेचनं कृतम्। मन्ये, संस्कृतस्नातकाः भवताम् आशासंवलितैर्वचोभिः प्रभूतं प्रोत्साहनं प्रेरणामालोकं चाधिगमिष्यन्ति। भवद्भिरिदं निर्दिष्टं यत्संस्कृताध्येतॄणां पुरस्ताज्जीविकोपार्जनस्य जटिलः प्रश्नः प्रतिकूलतयाऽवतिष्ठते। वस्तुतः काऽपि विद्या स्वत एवार्थकरी न भवति। विद्याया अर्थकरीत्वे शासनसाहाय्यं नूनमपेक्षितं भवति। शासनेन कस्याश्चिदपि विद्याया अर्थकरीत्वमुपपादयितुं शक्यते।

दृढं विश्वसिमि यदस्माकं कुलपतिमहोदयानां शासनस्य च सहानुभूत्या समस्येयमन्ततो गत्वा सुसाध्यतामेष्यति।

संस्कृतस्नातकानां जीविकासाधनोपलब्धिप्रसङ्गे भवद्भिर्विश्वविद्यालयेऽस्मिन् अध्यापकप्रशिक्षणकक्षाणां व्यवस्थायां निर्देशो विहितः। तदत्र सूच्यते यद् विश्वविद्यालयेऽस्मिन् एकः अध्यापकप्रशिक्षणविभागः पूर्वत एव प्रचलितो वर्तते, यत्राधुनिकशास्त्रिपरीक्षोत्तीर्णाः, संस्कृतेन सह बी.ए. परीक्षोत्तीर्णाश्च स्नातकाः अध्यापनकलायां प्रशिक्ष्यन्ते।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

भवद्भिरत्र पुस्तकालय-विज्ञान-विषयस्याध्यापनव्यवस्थायै अपि सामयिकः सङ्केतो विहितः। विषयेऽस्मिन् वयं कृतप्रयासाः स्मः। कार्येऽस्मिन् चेदन्तरायबाहुल्यं न बाधे तर्हि आशास्महे यदचिरेण कालेन पुस्तकालय-विज्ञानकक्षाः अपि अस्मिन् विश्वविद्यालये प्रचालयिष्यन्ते।

संस्कृतसाहित्ये हिन्दूसंस्कृतौ च साम्प्रदायिकभावना, तन्मूलकः संघर्षश्च कुत्रापि न वर्तते। वस्तुतो देशेऽस्मिन् साम्प्रदायिकभावनाया जनयितारो वर्धयितारश्च वैदेशिका एवाभवन्। देशेऽस्मिन् धर्मस्य प्रचारः सर्वदा तर्कसंवलितैः सदुपदेशैरेव विहितो न तु बलेन। अत्र हि बुद्धधर्मस्य प्रचारः सदुपदेशसरणिरेवास्य प्रचारसाधनमवर्तत, न तु बलम्। तथैव शङ्करस्वामिपादैरपि युक्तियुक्तानां सिद्धान्तानां प्रतिपादनं विधाय उपदेशपद्धत्यैव बुद्धधर्मो निराकृतः, न राजबलं सैन्यबलं वा समाश्रित्य। इत्थं देशोऽयं सर्वदा प्रजातन्त्रोचितायां तर्कसमर्थितायां च विचारपद्धतौ, विचारस्वातन्त्र्ये च श्रद्धामदधात्, न तु कदाचिदप्यन्यान् स्वविचाराणां धर्मस्य वा स्वीकरणाय बलादबाधत।

परं भवद्भिर्यदभ्यधायि यत् संस्कृतज्ञानं विना हिन्दूधर्मस्य तथ्यावगतिः असम्भवा, तन्निर्विवादमेव। वस्तुतः संस्कृतज्ञानं विना कोऽपि स्वाभाविकीं हार्दिकीं च देशभक्तिम्, विश्वबन्धुत्वं तथ्यतयाऽवगन्तुं न शक्नोति। संस्कृतभाषा हि अस्माकं संस्कृतेः प्राणभूता विद्यते, यतः अस्माकं जन्मकालादारभ्य मरणपर्यन्तं तत उपरि च सर्वमपि कृत्यजातं संस्कृतभाषयैव नियन्त्रितं निर्दिष्टं च विद्यते।

निःसंशयम्, भवतां सुविचारितैः, बहुमूल्यैश्च निर्देशैः स्नातका भृशं लाभान्विता भविष्यन्ति। या च भवता संस्कृतशिक्षया पुरातनमहर्षिकल्पानां विदुषां निर्माणविषये सम्मतिर्दत्ता साऽपि विश्वविद्यालयेनानेन सविशेषं सावहितं च परिपालयिष्यते। यच्चात्रभवद्भिः विविधक्लेशान् कार्यातिपातांश्च अविगणय्य अत्र पदार्पणेन, सपरिकरं दिवसचतुष्टयमत्रोषित्वा च वयमनुगृहीताः, तदर्थमहं पुनरत्रभवन्तं भवन्तं धन्यवादैः समाजयामि। भवतामत्र निवासावधौ याः काश्चिदपि अस्माकं त्रुटयो भवतामसौविध्यमुत्पादयन् तदर्थमहं विश्व-विद्यालयस्यास्य प्रातिनिध्येन, आत्मना च सानुनयं क्षमां प्रार्थये।

अस्माकं मनीषिणः कुलपतयः संस्कृतस्य सर्वतोमुखाय विकासाय व्यापकप्रचाराय च निरन्तरमनुरक्ताः प्रयत्नशीलाश्च सन्तीति ते विशेषेण

CC-0. Sampurnanand University Collection. Digitized by eGangotri

धन्यवादार्हाः। एतैः संस्कृतशिक्षायाः सूक्ष्मतमेष्वपि विचारेषु अवधानं दीयते तत्सम्बन्धेषु सर्वथा असाधारणेष्वपि कार्येषु सहयोगः क्रियते, तदभिमुखीनां जटिलतमानामपि समस्यानां समाधानार्थं चेष्ट्यते। एते महोदयाः संस्कृतशिक्षणसंस्थानां विशेषतश्चास्य विश्वविद्यालयस्य साहाय्यार्थं सर्वथा प्रयतन्ते, एतदर्थमेभ्यः प्रदीयमानाः कियन्तोऽपि धन्यवादाः अपर्याप्ता एव।

इदानीमहं विश्वविद्यालयस्यास्य प्रतिकुलपतीन् महाराजश्री-काशिनरेशमहोदयान् धन्यवादैः सभाजयामि, ये संस्थाया अस्याः समस्यानां समाधाने सर्वविधे विकासे च अनवरतं प्रयतन्ते। एतेषां सहयोगः सर्वदैव अस्माकं विश्वासमुत्साहं च द्रढयति।

अस्माकम् अध्यापका अधिकारिणश्चापि धन्यवादार्हाः, यैः समारोहस्यास्य साफल्याय अश्रान्तभावेन भूयान् प्रयासो विहितः।

अन्ते चाहं सर्वेभ्योऽतिथिभ्यो हार्दिकान् धन्यवादान् वितरामि यैः स्वोपस्थित्या समारोहोऽयं संवर्धितः सफलीकृतश्च। सर्वेभ्योऽन्यसज्जनेभ्यः देवीभ्यश्च विशेषतः श्रीनगरप्रमुखेभ्यः येषां साहाय्येन सर्ववेदशाखा-स्वाध्यायसमारोहः सुसम्पन्नोऽजायत सौहार्दमधुरान् धन्यवादान् वितरामि।

देवानां भद्रा सुमतिर्ऋजूयतां देवानां रातिरभिनो निवर्तताम्।
देवानां सख्यम् उपसेदिमा वयम् देवान् आयुः प्रतिरन्तु जीवसे।।

ॐ शान्तिः, शान्तिः, शान्तिः।।

●

वाराणसेयसंस्कृतविश्वविद्यालयस्य दीक्षान्तसमारोहावसरे २१.११.१९६५ दिनाङ्के रविवासरे धन्यवादभाषणम्

माननीया राष्ट्रपतिमहाभागाः, श्रीमन्तः कुलपतिमहोदयाः, देव्यः, सज्जनाः, उपाध्यधिकारिणः छात्राश्च!

इदं हि मे परमसुखावहं कर्तव्यं यदहं संस्कृतविश्वविद्यालयस्य आत्मनश्च पक्षेण हार्दिकान् धन्यवादान् महामान्यानां भारतराष्ट्रपतीनां डा. सर्वपल्लीराधाकृष्णमहोदयानां सभाजने उपन्यस्यामि। एते महानुभावाः महद् वैयक्तिकं कष्टं सोढ्वापि अत्रागमनाय अस्माद् विश्वविद्यालयाद् अस्मिन् वर्षे

CC-0. Sampurnanand University Collection. Digitized by eGangotri

छात्राणां सम्बोधनाय स्वीकृतिं दत्तवन्तो यद्यपि क्षणे क्षणे एतेषाम् उपस्थितिः दिल्ल्याम् अपेक्ष्यते। अहं खलु विशेषेण अनुपदं कृताय वैदुष्यपूर्णाय विशदाय विचारोत्तेजकाय च भाषणाय आभारान् प्रकटयामि। येषां प्रतिशब्दं प्रकाशः, प्रेरणा, प्रेम च प्रतिस्फुरति, प्रतिवाक्यं च ओजः, अर्थगाम्भीर्यं, प्रवाहश्च परिलक्ष्यते तथा भाषणे सर्वत्रैवास्माकं महात्मनां महर्षीणां परिपक्वमतीनां विदुषां चानुभूतिः प्रत्यक्षं प्रवहन्ती दृष्टिगोचरीभवति। इत्थं हि तेषां महानुभावानां प्रवचनं सर्वदैव प्राच्यप्रतीच्ययोः विचारपद्धत्योः मूर्तिमत् स्वरूपं समुपस्थापयतः अस्माकं श्रेयः सन्तनोति।

एतेषां व्युत्पत्तिपूर्णा विद्वत्ता, प्राचीनसंस्कृतिसभ्यतामहिमनि विश्वासः, संस्कृतभाषायाः गम्भीरं प्रगाढज्ञानम्, शैक्षिकसमस्याभिः सह जीवनव्यापी सम्पर्कः, परिपक्वा बुद्धिमत्ता, सर्वमेतत् श्रोतॄणां संस्कृतस्य विदुषां विद्यार्थिनां च समाजे साधिकारे सविश्वासे भाषणे एतेषाम् अधिकारित्वं व्यनक्ति। एभिः उदीरितः एकैकशब्दः गभीरमननार्हो विवेचनयोग्यः आस्वाद्यः आत्म-सात्करणीयः आचरणानुगश्च। इमे न केवलम् अस्माकं प्राचीनसंस्कृतेः प्रतिमूर्तयः भारतीयप्रज्ञानाम् अग्रगामिनश्च, अपि। तु विश्वस्य विचारकेषु मूर्धन्याः, अनेकेषां विश्वविद्यालयानां भूतपूर्वप्राध्यापकोपकुलपतिरूपेण अद्वितीयाः, शैक्षिकशिक्षासंस्थानां प्रशासनकुशला अपि समासतः एते हि ते आदर्शमहापुरुषाः, येषां वचनम् अस्माकं युवकस्नातकैः श्रोतव्यं चरितव्यम् अहमहमिकया अनुकर्तव्यञ्च।

अस्माकं विज्ञानां कुलपतीनां तैः सततं संस्कृतविद्यायाः प्रगतौ कृताय अभिनिवेशविशेषाय विशेषेण धन्यवादैः सम्माननं मे कर्तव्यम्। ते सर्वदा संस्कृतसंस्थानां विशेषतश्चास्य संस्कृतविश्वविद्यालयस्य साहाय्याय समेषां साधनानाम् अवलम्बने दृढनिश्चयाः सन्ति। तेभ्यः प्रदीयमानाः कोऽपि धन्यवादराशिः सन्ततम् अपर्याप्त एव।

प्रतिकुलपतीनाम् अपि धन्यवादैः समादरणं मे कर्तव्यं ये विश्वविद्यालयाय महत्तमशक्तिसाधनं बद्धपरिकराश्च सर्वदा अस्मभ्यं साहाय्यं तथा वितरितुं प्रयतन्ते यथा वयम् अभिलषामः।

अहं तेभ्यः सर्वेभ्योऽध्यापकेभ्यः अधिकारिभ्यश्च धन्यवादान् वितरितुं वाञ्छामि ये इमम् उत्सवं साफल्यं नेतुं कठोरश्रमेण कार्यं सम्पादितवन्तः। अन्ते अहं सर्वान् अतिथीन् धन्यवादैः सभाजयितुं कामये ये महनीयया स्वोपस्थित्या

CC-0. Sampurnanand University Collection. Digitized by eGangotri

उत्सवस्य शोभावर्द्धनम् अकुर्वन् अस्योत्सवस्य साफल्ये सविशेषं योगं दत्तवन्तः।

अहम् एकवारं पुनः सर्वान् धन्यवादैः सभाजयामि।

ॐ शान्तिः शान्तिः शान्तिः॥

●

अखिलभारतीयान्तरविश्वविद्यालयपरिषत्सदस्यानां शुभागमनावसरे स्वागतभाषणम्
२३.११.१९६३ दिनाङ्के

प्राच्यप्रतीच्यविद्याविशारदाः डा. श्रीदेशमुखमहोदयाः! विद्वन्मूर्धन्याः म.म. श्रीपोतदारमहोदयाः! डा. श्रीलारोडियामहोदयाश्च!

संस्कृतशिक्षायाः सुप्रतिष्ठितायाम् अस्याम् ऐतिहासिकसंस्थायां भवतां प्रथमपदार्पणावसरे व्याराणसेयसंस्कृतविश्वविद्यालयस्य अध्यापकानां छात्राणां च प्रातिनिध्येन, यक्तिगतरूपेण चाहं भवतां हार्दिकं स्वागतं व्याहरामि। मन्ये, अत्रोपस्थितेषु न कोऽपि तादृशो जनो विद्यते यो भवतां समुन्नतं व्यक्तित्वं शिक्षाक्षेत्रे सम्पादितम् अविस्मरणीयं सेवासम्भारं च न जानीयात्, तथापि अतद्विदः कस्यचिल्लाभाय समयोचितसमुदाचारपरिपालनाय च स्व-विशिष्टातिथीनां समुज्ज्वलजीवनस्यातीतवर्तमानयोर्विषये किञ्चिद् विवक्षामि।

डा. देशमुखमहोदया मुम्बय्यां कैम्ब्रिजे च उच्चतमां शिक्षां समवाप्य (एकोनविंशत्युत्तरैकोनविंशतितमे, १९१९ ख्रिस्ताब्दे), आई.सी.एस. नाम्ना सुविदितायां भारतीयशासनसेवायां प्राविशन् प्रासाधयंश्च प्रायो विंशतिवर्षाणि मध्यप्रदेशे बरारप्रशासकपदम् निरवहंश्च नितान्तं निपुणतया द्वितीयस्य राउण्डटेबुलनाम्नः सम्मेलनस्य संयुक्तसचिवत्वम्।

(एकत्रिंशदुत्तरैकोनविंशतितमे ख्रिस्तवर्षे) एते महानुभावा यदा भारतीय-रिजर्वबैंकनाम्नो राजकोषस्य गवर्नरपदे व्यराजन्त तदा योरपे अमेरिकादेशे च भारतशासनस्य आर्थिकं प्रतिनिधित्वमपि प्रशस्तरूपेण समपादयन्।

(पञ्चाशदुत्तरैकोनविंशतिशततमे ईशवीयवर्षे) अन्ताराष्ट्रियस्य पुनर्निर्माण-विकासकोषस्य 'इण्टरनेशनल बैंक फॉर रिकान्स्ट्रक्शन एण्ड डेवलपमेन्ट' इत्याख्यस्य अन्ताराष्ट्रियस्य अर्थकोषस्य 'इण्टरनेशनल मोनिटरी फण्ड'

CC-0. Sampurnanand University Collection. Digitized by eGangotri

इत्याख्यस्य च अध्यक्षपदमप्येभिः अतीवदाक्ष्येण अधिष्ठितम्। ततः परं भारतशासनस्य वित्तमन्त्रिपदं स्वीकृत्य राष्ट्रस्य आर्थिकनिर्माणे एभिर्यन्महनीयं कार्यं कृतं तद् देशे निस्संशयं सुचिरं संस्मरिष्यते, तदनु विश्वविद्यालयानुदानायोगस्य अध्यक्षपदे प्रतिष्ठामासाद्य विश्वविद्यालयानां यद् आर्थिकं साहाय्यमेभिरनुष्ठितम्, विश्वविद्यालयशिक्षाया मानदण्डस्य उन्नयनार्थं यः प्रयासश्च एतैर्विहितस्तयोरपि स्मरणं विश्वविद्यालयेषु बहुकालं करिष्यते।

हैदराबादे स्थितस्य प्रशासनप्रशिक्षणमहाविद्यालयस्य अध्यक्षपदेन कृता सेवापि एषां चिराय सुस्मरणीया। साम्प्रतमेते महोदया दिल्लीविश्वविद्यालयस्य उपकुलपतिपदप्रतिष्ठामावहन्तो देशस्य शैक्षिकीं सेवां सम्पादयन्तो विद्यन्ते। देशस्य सर्वविधासु प्रमुखसमस्यासु विशेषेण शैक्षिकसमस्यासु आर्थिकसमस्यासु च डा.देशमुखमहोदयानां विचाराः सम्मतयश्च ससम्मानं प्रावधानं च प्रशासनेन अङ्गीक्रियन्ते। एतेभ्यः समग्रवैशिष्ट्येभ्यो व्यतिरिक्तम् एकमपरं वैशिष्ट्यं श्रीदेशमुखमहाभागानां विद्यते यस्योल्लेखं विना मे मनागपि मनस्तोषो न भवितुमर्हति तदिदं यदेते महानुभावाः प्रतीच्यविद्यास्विव प्राच्यविद्यास्वपि अतीवनिष्णाताः सन्ति, संस्कृतवाङ्मये भवतां प्रीतिरेव केवलं नास्ति अपि तु प्रशस्तं वैदुष्यमपि विद्यते।

एते हि संस्कृतस्य न केवलमाशुकवयः किन्तु कुशलकवयोऽपि सन्ति, एतेषां सच्छन्दोनद्धविग्रहां श्रवणामृतशब्दबहुलां सालङ्कारां रसमयीं कवितां निशम्य विशिष्टाः कवयोऽपि प्रमाद्यन्मनसो भवन्ति। इत्थमेतेषां सुमहत्याः प्रतिभायाः स्पृहणीयायाः संस्कृतविदग्धतायाः विपुलाया अनुभवसमृद्धेः विविधक्षेत्रीयाया देशसेवासम्पदश्च सुविशिष्टा प्रतिष्ठा राष्ट्रस्य जीवने न कस्यापि अविदिता।

महामहोपाध्यायश्रीदत्तोवामनपोतदारमहोदयाः देशस्य प्रमुखेषु शिक्षा-शास्त्रिषु अन्यतमाः। महाराष्ट्रियस्य इतिहासस्य साहित्यस्य क्षेत्रे एतेषामनुसन्धानकार्यं सर्वत्र सुविख्यातम्। एतैर्हि पञ्चत्रिंशदधिकैकोन-विंशतिशततमे (१९३५) खिस्ताब्दे पुण्यपत्तने इतिहाससम्मेलनस्य स्थापना कृता तस्याध्यक्षपदीयं दायित्वमप्येभिरश्रमेण मनसा सोत्साहं सन्धार्यते। भारतीयशासनेन सङ्घटितस्य "भारतीयेतिहासाभिलेखायोगस्य", "भारतीय-सांस्कृतिकसम्पर्कसमितेश्चापि" एते सदस्याः सन्ति। पुण्यपत्तने प्रतिष्ठितस्य "तिलकविद्यापीठस्य" कुलगुरुपदम्, "महाराष्ट्रराष्ट्रभाषासभायाः" अध्यक्षपदं

CC-0. Sampurnanand University Collection. Digitized by eGangotri

चाप्येतैरलङ्कृतम्। (षट्पञ्चाशदधिकैकोनविंशतिशततमे, १९५६ खिस्ताब्दे) फ्लोरेन्सनगरे समायोजिते तृतीये "अन्ताराष्ट्रियप्राचीनाभिलेखसम्मेलने" श्रीपोतदारमहोदयैः मुम्बई-शासनस्य प्रातिनिध्यमकारि।

श्रीपोतदारमहोदयानां संस्कृतज्ञानसम्बन्धे किमपि कथनमनावश्यकं यतो हि संस्कृतवैदुष्यस्य प्रमाणभूता महामहोपाध्यायपदवी एव एतेषां संस्कृतशास्त्रीयपाण्डित्यस्य साक्षित्वं बिभर्ति। एभिः ये ये ग्रन्था विरचितास्तेषु सर्वेषु एतेषां संस्कृताभिज्ञत्वं सुस्पष्टं समुच्छलति। आत्मनः असामान्य-प्रतिभावैभवेन बहुविधेन देशसेवाकर्मणा च एते देशस्य विद्वज्जनैः श्रीपोतदाराभिनन्दनग्रन्थसमर्पणेन सम्मानिताः। एते महानुभावाः साम्प्रतं केन्द्रीयसंस्कृतपरिषदः अध्यक्षपदेन संस्कृतजगतः यां सेवां कुर्वन्ति तां सर्वे जानन्त्येव।

आभिश्चतुरस्रयोग्यताभिरुपश्लिष्टा एते सम्प्रति पूनाविश्वविद्यालयस्य उपकुलपतिपदेन देशस्य शिक्षाजगत् स्वसेवाभिः समुद्भासयन्तो विद्यन्ते। तदित्थमुभावप्येतौ महानुभावौ शिक्षाक्षेत्रे सुविशिष्टौ लब्धप्रतिष्ठौ च वर्तेते। अखिलभारतीयान्तरविश्वविद्यालयपरिषदः सचिवैः श्रीलारोडियामहोदयैः सह एतौ महोदयौ आत्मनो मध्ये समधिगत्य वयमद्य महान्तं प्रमोदमनुभवामः।

श्रीलारोडियामहोदया हि आधुनिकरसायनशास्त्रस्य विशिष्टाः प्राध्यापकाः। विश्वविद्यालयानुदानायोगे अवस्थाय एतैः शिक्षायाः विशेषेण विज्ञानस्य विकासाय प्रसाराय च विशिष्टाः बहुमूल्याश्च सेवाः सम्पादिताः।

समादरणीया अतिथिमहोदयाः!

भवतामत्रागमनेन विश्वविद्यालयस्यास्य विविधसमस्यानां विषये भवद्भिः सह परामर्शस्यावसरोऽस्माभिर्लब्धः। संस्थेयमनेकदृष्टिभिर्देशे विशिष्टं स्थानमावहति।

प्रथमतस्तु अयं विश्वविद्यालयस्तस्य भूतपूर्वस्य "काशिकराजकीय-संस्कृतमहाविद्यालयस्य" विकसितं रूपं यो हि देशे विद्यमानेषु संस्कृतशिक्षणसंस्थानेषु प्राचीनतमोऽभूत्। भूतपूर्वस्य महाविद्यालयस्यास्य स्थापना एकनवत्यधिकसप्तदशशततमे (१७९१) खिस्ताब्दे ब्रिटिशशासनेन विहिता। अस्य स्थापने ब्रिटिशशासनस्य अयमभिप्राय आसीद् यदत्र कृताध्ययना विद्वांसो हिन्दुविधिशास्त्रस्य जटिलेषु विवादेषु शास्त्रीयव्यवस्थां प्रदाय देशस्य न्यायाधिकरणानां समुचितं साहाय्यं विदध्युः।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

इदञ्चात्र सगर्वं वक्तुं शक्यते यदनया संस्थया स्वस्थापनाया अस्य लक्ष्यस्य पूर्तौ आशातीता सफलता समासादि। अत्र अधीतवद्भिर्विद्वन्मूर्धन्यैः या प्रतिष्ठा या च सत्कीर्तिः समुपार्जिता तया न केवलमियं संस्था अपि तु काशी नगरी अपि कीर्तिमती अजायत।

यद्यप्यद्यत्वे जनजीवने धर्मनिरपेक्षता अनुदिनं वर्धते, आर्थिकदृष्टेः प्राधान्यञ्चोपचीयमानमुपलक्ष्यते। संस्कृताध्ययनविषये पूर्ववज्जनानुरागो न विद्यते। हिन्दुविधिशास्त्रस्य जटिलेषु विवादेषु देशस्य न्यायाधिकरणैः शास्त्रीयव्यवस्थाया आवश्यकता पूर्ववन्नैवानुभूयते, तथापि प्रमोदास्पदमेतद् यत्सम्प्रति देशस्य शिक्षितवर्गे संस्कृतशिक्षाया विकासप्रसारविषये काचिदभिनवा रुचिः समुन्मिषन्ती दृश्यते।

अन्यच्च अधुना प्राचीनपद्धत्या शिक्षितानां तथाविधानां प्रौढपण्डितानां निर्माणस्यापि आवश्यकता अनुभूयते, ये खलु विविधशास्त्रेषु लिखितानां तेषां जटिलग्रन्थानाम् अध्ययनाध्यापने विदध्युर्येषु सामान्यस्य संस्कृतज्ञस्य गतिर्न भवति।

भूतपूर्वकाशिकराजकीयसंस्कृतमहाविद्यालय इवैव वाराणसेयसंस्कृत-विश्वविद्यालयोऽपि प्राचीनपद्धत्या शिक्षितानां प्रौढपण्डितानां निष्पादनस्य लक्ष्यमभिमुखीकृत्य प्रयतमानो वर्तते।

भवतु नाम विदुषां तादृशां निष्पादने प्रयोजनान्तरमपि परमिदं यद् यावत् संस्कृतभाषा संस्कृतसाहित्यञ्च अस्तित्वमावहतस्तावत्संस्कृते प्रौढपण्डितानामावश्यकता सर्वथा अनपनेया अनिवार्या च, यतो हि तेषामभावे संस्कृतवाङ्मये निहितो ज्ञानराशिः ध्रुवम् अनुपलभ्यः अनभिज्ञातश्च आपद्येत।

आशास्यते यत्समुचितं प्रोत्साहनमवाप्य संस्कृतशिक्षाया मूर्धन्यता स्वकीयेनाभिनवरूपेण स्वाभिमतम् उद्देश्यं नूनं पूरयेत्।

उत्तरप्रदेशस्य इतरविश्वविद्यालयानां संविधानसरणिमनुसृत्यैव अस्य विश्वविद्यालयस्यापि संविधानं विनिर्मितम्, काममयं बहुषु विषयेषु तेभ्यो भिन्नस्तथापि अस्य संस्कृतविश्वविद्यालयस्य स्थापनात् पूर्वं देशेऽन्यः कश्चिदित्थम्भूतो विश्वविद्यालयो नाभूत्। फलतया विश्वविद्यालयस्यास्य अनेके विषयाः येषां पूर्तौ प्रयोगानुभवयोरावश्यकता अवर्तत, अधुनावधि अपूर्णा एवावतिष्ठन्ते। अतोऽत्र याः काश्चिदपि संवैधानिकत्रुटयोऽभूवँस्ताः स्वाभाविक्य एव न तु प्रमादमूलाः सप्रयोजना वा।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

आशासे यदित्थम्भूताः प्रारम्भिकत्रुटयोऽपि अनुभवाधिगमेन क्रमशो दूरीकरिष्यन्ते। विश्वसिमि श्रीदेशमुखमहोदयसदृशानां श्रीपोतदारमहोदयसदृशानां च संस्कृतविद्वन्मूर्धन्यानां साहाय्येन आशीर्वचोनिचयेन च विश्वविद्यालयोऽयम् अपेक्षितं प्रोत्साहनमवाप्य स्पृहणीयां समृद्धिं क्रमशो नूनमवाप्नुयात्।

एभिः कतिपयैः शब्दैः डा. देशमुखमहोदयानां श्रीपोतदारमहोदयानां श्रीलारोडियामहोदयानां च सबहुमानं स्वागतं निर्वर्तयन् सप्रश्रयम् अभ्यर्थये यत्ते महानुभावाः स्वभाषणेन विश्वविद्यालयस्य अध्यापकान् विद्यार्थिनः समवेतान् अन्यसभ्याँश्च कृपया कृतार्थयन्त्विति।

सखेदमत्र सूच्यते यदद्य अस्माकं पुरतो हृदयविदारिणी सुमहती राष्ट्रिया अन्ताराष्ट्रिया च विपत्तिः अतर्कितमुपनता। अस्माकं वायुसेनायाः स्थलसेनायाश्च मूर्धन्यभूताः षट्पदाधिकारिणः, अमेरिकादेशस्य राष्ट्रपतिः श्रीकेनेडीमहोदयश्च अनुपकल्पितायाः दुर्घटनायाः ग्रासतामुपगताः। नैतत् कस्यापि तिरोहितं यदमेरिकादेशस्य भूतपूर्वराष्ट्रपतीनां मध्ये श्रीकेनेडीमहोदयो भारतस्य विशिष्टो हितचिन्तकः सहायश्च आसीत्।

तदिदानीमहम् अत्रभवताम् अभ्यागतानाम् अस्य विश्वविद्यालयस्य आत्मनश्च पक्षेण तेषां स्वर्गीयाणाम् आत्मोपशान्तये भगवन्तं विश्वनाथं प्रार्थये, कामये च यत्तेषां विपद्ग्रस्तः परिवारः सम्बद्धं राष्ट्रं च अस्याः विपदः सहनशक्तिं शान्तिञ्च समुपलभेत।

●

वाराणसेयसंस्कृतविश्वविद्यालये समायोजितस्य सर्ववेदशाखास्वाध्यायसमारोहस्य १२.१२.१९६३ दिनाङ्के स्वागतभाषणम्

देवानां भद्रा सुमतिर्ऋजूयतां देवानां रातिरभिनो निवर्तताम्।
देवानां सख्यमुपसेदिमा वयं देवा न आयुः प्रतिरन्त जीवसे।।

श्रीमन्तो माननीयाः प्रतिकुलपतयः, विशिष्टातिथयः, वेदशास्त्रप्रतिमूर्तयो वैदिकवरेण्याः विद्वांसः, छात्राः, सभ्याश्च!

CC-0. Sampurnanand University Collection. Digitized by eGangotri

समुपलब्धवाङ्मयेषु आद्यस्य विद्यास्थानस्य वेदस्य स्वरूपपरिज्ञापनाय संस्कृतविश्वविद्यालये समायोजितेऽस्मिन् सर्ववेदशाखास्वाध्यायसमारोहे वाराणसेयसंस्कृतविश्वविद्यालयस्य अध्यापकानां छात्राणाञ्च प्रातिनिध्येन व्यक्तिगतरूपेण चाहं समागतानां सर्वेषां श्रीमतां स्वागतं व्याहरन् आत्मानं धन्यं मन्ये। भवतामागमनमस्माकं सौभाग्यस्य विशेषाधायकम्, त्रिकालयोग्यतां च मम व्यनक्ति।

काशीति प्रसिद्धा नगरी भगवता ज्ञानमूर्तिना महेश्वरेण सन्ततमविमुक्ता सर्वातिशायिनी सर्वश्लाघ्या पुण्यपुरी। उक्तं च श्रीमद्‌भगवता शङ्कराचार्येण—

काशी पुण्यतमा विमुक्तिनगरी साऽलंकृता गङ्गया
तत्रेयं मणिकर्णिका सुखकरी मुक्तिर्हि तत्किङ्करी।
स्वर्लोकस्तुलितः सहैव विबुधैः काश्यां समं ब्रह्मणा
काशी क्षोणितले स्थिता गुरुतरा स्वर्गो लघुः खे गतः।।

विश्वेश्वरस्य आनन्दवनमिदं सुसमृद्धविद्याचारतपोज्ञानवृद्धानां शङ्कराचार्यरामानुजाचार्यनिम्बार्काचार्यप्रभृतीनां वैदिकमार्गप्रतिष्ठापनव्रतिनां पूज्याचार्याणामपि परमललामभूतं निवासस्थानम्। आसीत् कश्चन समयः यदा जगज्जनन्याः भगवत्याः अन्नपूर्णायाः स्निग्धापाङ्गानुग्रहेण समेधितविग्रहा भूतभावनस्य आशुतोषस्य भगवतो विश्वनाथस्य आशिषा साक्षात्कृत-शास्त्रतत्त्वाः पण्डितपुरन्दरा एवात्र समभूवन् येषां शास्त्रीयमनुशासनं समस्तेऽपि भारते सबहुमानमवितर्कितेन चेतसा समाद्रियते स्म। अधुनापि शास्त्रश्रद्धालवः आस्तिकाः भारतीयाः काश्याः व्यवस्थां सर्वात्मना श्रद्दधते। आधुनिके युगेऽपि आधुनिकेषु विद्यास्थानेषु अस्मिन् समस्तभूतले काश्याः विशिष्टं स्थानं वर्तते, यतो नात्र कापि अन्या नगरी यत्र त्रयः विश्वविद्यालयाः वर्तन्ते। एवं भागीरथीप्रवाहपरिपावितेऽस्मिन् देवजनकामिते विद्याक्षेत्रे संस्कृतविश्व-विद्यालयोऽयं भारतीयानां शास्त्राणां विचाराणां च परिपोषं कुर्वाणो धारावाहिकतया च शास्त्रतत्त्वं शिक्षार्थिषु समावपन् भवतां स्नेहभाजनं सुविदित एव।

मान्याः! यद्धि सार्वदेशिकं बहुकालिकं प्रचारमाधत्ते तत्र कुत्रचन कश्चन स्वरूपकृतो व्यत्यासो भवत्येवेति सामान्यो नियमः। स च शब्दराश्यात्मके ग्रन्थजातेऽपि प्रवर्तते। सुबहुप्रचारमाश्रितेषु ग्रन्थेषु सम्प्रति पाठभेदादिशब्द-स्वरूपव्यत्यासोऽस्माभिः प्रत्यक्षीक्रियते एव परं वेदेषु स्वरवर्णमात्राकृतोऽपि

CC-0. Sampurnanand University Collection. Digitized by eGangotri

व्यत्यासो नोपलभ्यते। कोऽत्र हेतुरिति विचारे भारतीयपरम्परायां वेदस्य शब्दब्रह्मरूपत्वम्, ऐहिकपारलौकिकसमभिलषितफलप्रदत्वं वेदाभ्यासविधासु पञ्चधा व्यवस्थापनं चेति निदानं प्रतीमः।

वेदस्य शब्दब्रह्मरूपत्वं तु तस्य 'ब्रह्म'शब्देन व्यवहारः, वेदात्मकस्य शब्दस्य 'ब्रह्मणः' प्राप्त्यर्थं धारणार्थं च क्रियमाणस्य व्रतस्य 'ब्रह्मचर्य'शब्देन व्यपदेशः, ब्रह्मणः ग्रहण-धारण-प्रयोगानुष्ठानादिभिः जनितुः निरवच्छिन्न-साम्प्रदायिकानुवंशिकक्रमेण जीवयितुः वर्गविशेषस्य 'ब्राह्मणपदेन' नैरुक्तैः सम्माननम्, दक्षिणभारते वेदवित्सु 'ब्रह्मर्षि'-पदेन समलङ्करणं चेत्यादि स्पष्टयति।

भारतीयानां ब्रह्मत्वसिद्धिर्मुख्यं लक्ष्यम्। यथा हि विचारेण औपनिषदस्य ब्रह्मणः स्वरूपसाधनं सर्वविधपापतापसमुन्मूलनाय अलं भवति, एवं शब्दस्य वेदात्मकस्य ब्रह्मणो ग्रहणधारणात्मकप्रयत्नानुष्ठानमपि पापतापसमुन्मूलनाय अलमिति श्रुतिस्मृतिवाक्येभ्यः सुस्पष्टमवगम्यते। यथा हि—

यथा महाह्रदं प्राप्य क्षिप्तो लोष्ठो विनश्यति।
एवं दुश्चरितं सर्वं वेदे त्रिवृति मज्जति॥

संहिता नयते सूर्यपदं च शशिनः पदम्।
क्रमश्च नयते सूक्ष्मं यत्तत्पदमनामयम्॥ (या.शि.)

वेदमेव सदाभ्यस्येत् तपस्तप्यन् द्विजोत्तमः।
वेदाभ्यासो हि विप्रस्य तपः परमिहोच्यते॥ (मनु. १/१६६)

आहैव स नखाग्रेभ्यः परमं तप्यते तपः।
स्रग्व्यपि स द्विजोऽधीते स्वाध्यायं शक्तितोऽन्वहम्॥ (मनु. २/१६७)

बिभर्ति सर्वभूतानि वेदशास्त्रं सनातनम्।
तस्मादेतत्परं मन्ये यज्जन्तोरस्य साधनम्॥ (मनु. १२/९९)

वेदे हि कर्मकाण्डम् ऐहिकम्, आमुष्मिकं च फलं साधयतीति सर्वविदितमेव अनुभूतचरं च भारतीयानाम्। मनुष्यो हि बहुविधानां मानसिकविचाराणां सङ्कलितमूर्तिस्तत्पूरणसापेक्षो जीवः। सः स्वाभिलषितानां कामानां पूरणाय लौकिकं कार्यकारणभावेनानुभूतम् उपायं यथा श्रद्धते तथा श्रद्धाप्रधानः लौकिकोपायविकलः समनुष्ठितलौकिकोपायोऽपि समीहितावाप्तौ असफलश्चेति त्रिविधोऽपि पुरुषः अलौकिकमुपायं शरणीकरोत्येव। स

CC-0. Sampurnanand University Collection. Digitized by eGangotri

चायमलौकिक उपायः कामनाभेदेन, अधिकारिभेदेन, देशकालादिस्थितिभेदेन च वेदे सुस्थितः तत्त्वदृग्भिर्महर्षिभिः स्वतपस्यया जगन्नियन्तुर्वेदपुरुषस्यानुग्रहेण साक्षात्कृतश्च तत्तद्ग्रन्थेषु सुस्पष्टं निरूपितो व्यवस्थापितोऽपि अनुभावितः प्रतिष्ठापितश्च। एवं स्वसमीहितार्थसाधनाय उपायप्रतिपादनपरत्वाच्च वेदस्य संरक्षणार्थमासीत् महान् प्रयत्नः। अलौकिके चोपाये लोकानभिज्ञात-कार्यकारणभावे शब्दः, प्रक्रिया चेत्युभयं लघ्व्या अपि मात्रया अन्यथयितुं न शक्यम्। अन्यथात्वे हि फले वैकल्यं कर्तृवैफल्यं वा समुत्पादयेदिति हि स्मरन्ति, यथा—

मन्त्रो हीनः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह।
स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोऽपराधात्।।

अत एव वेदस्य अभ्यासदार्ढ्याय बहुधा विधाः समाद्रियन्ते वेदाभ्यासस्य पञ्चधा व्यवस्थापनमपि वेदसंरक्षणे भारतीयसंस्कृतेः शिरस उन्नमने च महान् हेतुः। ताश्च पञ्चविधाः—

वेदस्वीकरणं पूर्वं विचारोऽभ्यसनं जपः।
तद्दानं चैव शिष्येभ्यो वेदाभ्यासो हि पञ्चधा।।

भारतीयपरम्परायां वेदस्वीकरणेऽपि वैधस्य उपनयनस्य गुरुमुखोच्चारणानुच्चारणात्मकस्य अध्ययनधर्मस्य च समादरः क्रियते, न तु यथालिखितस्ववाचितवेदाक्षरस्वीकारस्य परिग्रहः। एवमभ्यसनमपि सन्निधा-(संस्था) गुणनिका-(गुन्नी) चर्चादि-साम्प्रदयिकं प्रयत्नविशेषं परिगृह्णाति। शिष्येभ्यो दानमपि शास्त्रीयं प्रकारमाश्रयते। एवञ्च शास्त्रतः सम्प्रदायतश्च ब्रवीमो यत् संरक्षणविधाभिः सुदृढीकृतोऽयं वेदशब्दराशिः मात्राकृतेनापि विपर्यासेन न व्यत्यस्ते इति महदिदं गौरवस्थानं भारतीयानाम्।

वेदस्य प्रामाण्यपरिचिन्तनम्, साम्प्रतिक उपयोगः, संरक्षण-विधापर्यालोचनम्, एवमादिविषया विवादाश्रिता भवन्तु नाम। अथापि तेषां निर्णयाय, अनुसन्धातृणां मनीषिणाम् अनुसन्धानमार्गप्रशस्तये, श्रद्धावतां संरक्षणप्रवृत्तिसमुद्बोधनाय, वेदशास्त्राध्यापकानां वेदविद्यार्थिनां च परिज्ञेयवेदान्तस्वरूपपरिचायनाय तत्रोत्साहसंवर्द्धनाय, प्रशासनाधिकारिणां च वाङ्मयस्वरूपपरिज्ञापनाय, विश्वस्य समुपलब्धसाहित्येषु पूर्वरुषायितस्य भारतगौरवप्रख्यापकस्य वेदशब्दराशेः पुरातत्त्वसंरक्षणविधयापि

CC-0. Sampurnanand University Collection. Digitized by eGangotri

संरक्षणीयतामाप्तस्य संहिताब्राह्मणारण्यकोपनिषद्-पदक्रम-जटाघनादिप्रकृति-विकृतिरूपसर्वावयवपरिचायनाय चायमत्र सर्ववेदशाखास्वाध्यायसमारोहः कस्य विचारकस्य श्रद्धेयतां नावहेत्।

वेदस्य साम्प्रदायिकी उच्चारणपरम्परा भारत एव प्रसृता वर्तत इति भारतस्य सर्वेभ्यः प्रान्तेभ्यः चतुर्णामपि वेदानां तत्तच्छाखासु ये प्रसिद्धा मूर्धन्या वैदिकाः सन्ति तेषामत्र आह्वानं कृतमस्ति। येषां मधुनिष्यन्दिवदनारविन्दाद् भवन्तो वेदवाचो सौरभं सौन्दर्यं सद्विन्यासं च परिज्ञाय परमं प्रमोदं स्वाभिलषितायां विचारपरम्परायां च कामपि अनुगुणां वृत्तिं प्राप्स्यन्तीति विश्वसिमि। एवञ्च अनेन आयोजनेन भारतस्य विभिन्नभागेषु प्रथितानां शाखानां कीदृशी संरक्षण-प्रवचनपरम्परा इति सुविज्ञातं भविष्यति।

एवमेतस्य भारतसर्वस्वभूतस्य ज्ञानस्रोतसो वेदराशेः गौरवसमृद्धये संरक्षणाय च सर्वे यथार्हं स्वस्वानुरूपं यावच्छक्यं प्रयत्नमनुतिष्ठेयुः इत्येतदर्थम् आचार्यश्रीशङ्कराचार्यभगवत्पूज्यपादानाम् अहम् अनुशासनानि संस्मारयामि—

वेदो नित्यमधीयतां प्रतिदिनं कर्म स्वनुष्ठीयताम्,
तद्विद्वानुपसृप्यतां सुविधया तत्पादुके सेव्यताम्।
दुस्तर्कात् सुविरम्यतां श्रुतिनुतस्तर्कोऽनुसन्धीयताम्,
देहेऽहंमतिरुज्झ्यतां बुधजनैर्वादः परित्यज्यताम्।।

महतः खेदस्यायं विषयो यदयं विश्वविद्यालयो भवादृशां विशिष्टविदुषां स्वरूपानुरूपं स्वागतं सत्कृतिं संविधातुं नाशक्नोत्। भवन्तः सुदूरयात्रायाः अनेकान् आयासान् उररीकृत्य अत्र समागतवन्तः। तदायासानां कृते वयं क्षमाप्रार्थिनः आशास्महे भवन्तोऽस्माकं हार्दिकीं श्रद्धाम् अवधार्य अस्माकं साधनानां त्रुटीः नावधास्यन्ति।

●

वाराणसेयसंस्कृतविश्वविद्यालये सम्पत्स्यमाने सर्ववेदशाखास्वाध्यायसमारोहे स्वागतभाषणम्

भद्रं कर्णेभिः शृणुयाम देवा भद्रं पश्येमाक्षभिर्यजत्राः।
स्थिरैरङ्गैस्तुष्टुवां सस्तनूभिर्व्यशेमहि देवहितं यदायुः।।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

सम्मान्या विशिष्टातिथयः, प्रतिकुलपतयो महाराजद्विजराजश्रीकाशिराज-महोदयाः, प्रातःस्मरणीय-पुण्यश्लोक महाराजश्रीकरपात्रस्वामिमहाभागाः, वेदप्रतिमूर्तयो वैदिक-वरेण्याः, वेदशास्त्रप्रणयिनो विद्वांसः, प्रेष्ठाश्छात्राः, नागरिकसज्जनाः, देव्यश्च! स्वागतं वः सुस्वागतम्।

विद्यागुरोर्भगवतो भूतभावनविश्वनाथस्य विद्यासंस्कृत्योः चिरन्तननगर्याः अस्याः श्रीकाश्याः मुकुटायमाने वाग्देवतायाः श्रीसरस्वत्याः पवित्रे मन्दिरेऽस्मिन् वाराणसेयसंस्कृतविश्वविद्यालये सम्प्रवर्तमानस्य द्वितीयस्य सर्ववेदशाखास्वाध्यायसमारोहस्य अवसरे समागतानां समेषां तत्रभवतां स्वागतं कुर्वन्नात्मानं धन्यं कृतकृत्यं च मन्ये। भवतां कृपापूर्णेन सोत्साहेन शुभागमनेन वाराणसेयसंस्कृतविश्वविद्यालयीयाः वयं सर्वेऽपि नितरामुपकृताः प्रमुदिताश्च स्मः।

मान्याः,

काशीतोऽतिदूरस्थानेभ्यः विविधप्रान्तेभ्यः, अनेकान् यात्रायासान् सोढ्वाऽपि समागतानां वैदिकमहाभागानां विशेषतः कृतज्ञः सन् तेषां कृते भूयो भूयः स्वागतवाचमुपहरामि। स्वागतकरणे मम मत्सहयोगिनां विश्व-विद्यालयाधिकारिणां कर्मचारिणां चानवधानेन सञ्जातानां त्रुटीनां कृते क्षमां च याचे।

महानुभावाः,

भवन्तः सर्वे स्वस्वयात्राकष्टम्, अत्रत्यं स्वागतसेवासम्भाराणां काञ्चिदनुपलब्धिं चानुभूयापि प्रसन्ना एव स्युरिति मन्ये। यतो हि यथास्माकम् तथैव श्रीमतामपि नायं परदेशः परगृहं वा प्रत्युत स्वदेशः स्वगृहमेव, यतश्च काशी नामेयं नगरी सर्वेषां भवतां परम्परागता अतिप्राचीना धर्मनगरी नाम। एतस्याः मोक्षदात्रीणां सर्वासामपि सुप्रसिद्धानाम् अयोध्या मथुरा माया काशी काञ्ची अवन्तिका पुरी द्वारावती इति तासां धर्मनगरीणां मध्ये सर्वोत्तमस्थानमस्ति। नहि भवतां केवलमार्याणाम् अपि तु, अन्येषामपि बहूनां काशीं प्रति परमसमादरमयी भावनास्ति। धर्मार्जनबुद्ध्या विद्यासंचयबुद्ध्या च भारतवर्षस्य सर्वेषां प्रान्तानां जना अत्र निवसन्ति। काशी खलु सम्पूर्णस्य भारतवर्षस्य प्रतीकभूता नगरी, अतो यतः कुतश्चिदपि समागता भवन्तो भवेयुः, भवतां सर्वेषाम् कृते काशीभूमिरियं न परदेशः, न च परगेहम्; अपि तु स्वदेशः स्वगेहमेवेति। नहि कोऽपि सहृदयः स्वगृहे स्वागताभावे मनागपि

CC-0. Sampurnanand University Collection. Digitized by eGangotri

अप्रसन्नतामनुभवति, अतोऽहं स्वागतं वः सुस्वागतमित्येव उदीरयन् मत्कर्तृकं भवतां सर्वविधं स्वागतं सुसम्पन्नम्। भवन्त एतावतैव प्रसन्नाः स्युरिति विश्वसिमि। समेषां भवतामुपस्थितिः समारोहस्यास्य सफलतादायिका भवत्येवेति सौभाग्यमस्माकम्।

समादरणीयाः सज्जनाः!

अस्माकं भारतीयसभ्यतायाः संस्कृतेः सर्वभूमिप्रसिद्धाया मानवतायाश्च उद्गमस्थानं वेदा एवेति नास्ति मतद्वयस्य अत्रावकाशः अस्माकं भारतीयानां कृते। सृष्टौ वेदादेव सर्वं प्रसिद्धं भवति, सर्वा अपि इमाः प्रवृत्तयो वेदाद् एवेति शास्त्रकाराणां सिद्धान्ताः—

अनादिनिधना नित्या वागुत्सृष्टा स्वयम्भुवा।
आदौ वेदमयी दिव्या यतः सर्वाः प्रवृत्तयः।। (व्यासः)

चातुर्वर्ण्यं त्रयो लोकाश्चत्वारश्चाश्रमाः पृथक्।
भूतं भव्यं भविष्यं च सर्वं वेदात् प्रसिद्ध्यति।। (मनुः)

वेदाः प्रलयेऽपि न प्रलीयन्ते, सूक्ष्मरूपेण परमात्मनि तिष्ठन्ति। नित्यशब्दस्वरूपा वेदाः त्रिकालाबाधिताः कल्पादौ महर्षिभिः स्वीयेषु समाधिशुद्धान्तःकरणेषु श्रूयन्ते। स्मृतयः पुराणानि च भावरूपेणैव नित्यानि, वेदास्तु शब्दस्वरूपेणापि नित्याः। कालप्रभावतः लोके वेदानां केवलम् आविर्भावतिरोभावौ भवतः। प्रत्यक्षेण अनुमित्या वा यो हि बोद्धुम् अशक्यः स वेदेनैव बुद्ध्यते नान्येन इति धारणा विश्वासश्चेति प्रसिद्धमेवास्माकम्। स्मरामश्च वयमेवम्—

युगान्तेऽन्तर्हितान् वेदान् सेतिहासान् महर्षयः।
लेभिरे तपसा पूर्वमनुज्ञाता स्वयम्भुवा।।

अग्निवायुरविभ्यस्तु त्रयं ब्रह्म सनातनम्।
दुदोह यज्ञसिद्ध्यर्थमृग्यजुःसामलक्षणम्।।

प्रत्यक्षेणानुमित्या वा यस्तूपायो न बुध्यते।
एनं विदन्ति वेदेन तस्माद् वेदस्य वेदता।।

पुरा किल एतादृशानां वेदानाम् आसन् बह्व्यः शाखाः—

CC-0. Sampurnanand University Collection. Digitized by eGangotri

एकशतमध्वर्युशाखाः सहस्रवर्त्मा सामवेदः।
एकविंशतिधा बाह्वृच्यं नवधाऽथर्वणो वेदः।।

इति सर्वे जानन्ति। एताः सर्वा अपि शाखा गुरुमुखोच्चारणानुच्चारणक्रमेण स्वाध्यायोऽध्येतव्यः, ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयश्चेति धारणया धर्मबुद्ध्या अधीयन्ते स्म पुरा ब्राह्मणैः तपस्विभिः। वेदाध्ययनमस्माकं स्वाभाविको धर्म इति कृत्वा सर्वे पठन्ति स्म।

योऽनधीत्य द्विजो वेदमन्यत्र कुरुते श्रमम्।
स जीवन्नेव शूद्रत्वमाशु गच्छति सान्वयः।।

इत्यादिधारणाबलेन वेदाध्ययनाध्यापनयोः आसीत् महान् प्रचारः। तदानीं सर्वा अपि वेदशाखा लभ्यन्ते स्म। हन्त! दुर्दैववशाद् बह्व्यो लुप्ताः, अधुना काश्चिदेव शाखाः समुपलभ्यन्ते, ताश्चापि सर्वसाधारणजनानां संस्कृतच्छात्राणां विदुषामपि बहूनां नहि श्रवणगोचरीभूता भवन्ति। जानन्त्येव भवन्तः वेदानाध्ययनाध्यापनयोः तेषु-तेषु प्रयोगेषु उच्चारणस्य पारायणस्य च सन्ति कश्चिद् विशिष्टा निश्चिताः परम्परागताः शैल्यः, सृष्ट्यारम्भाद् आब्रह्मणः अद्य यावद् रक्षिताः सन्ति। स्वरसंस्कारयोश्छन्दसि नियम इति प्रातिशाख्यादौ तथा—

मन्त्रो हीनः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह।
स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोऽपराधात्।।

इत्यादिवचनैश्च कश्चिद् अस्ति महान् आग्रहः वेदोच्चारणपरम्पराणां विषये। अतः वेदपुस्तकं दृष्ट्वा उच्चारणपरम्परां शैलीं विहाय वेदस्य पठने पाठने प्रयोगे च न कोऽपि लाभो भवतीति निष्चप्रचमेव। अतः सम्प्रति अवशिष्टानां शाखानां याः परम्परा उच्चारणादीनां सुरक्षिता वर्तन्ते, ताः सर्वाः सर्वैरप्यस्माभिः रक्षणीया इति कृत्वा समुपलभ्यमानानां सर्वासां वेदशाखानां समुच्चारण-पद्धतिपरिज्ञापनाय तथा तत्तद्वेदशाखानां प्रकृतिविकृतिपाठप्रक्रियायाः, ब्राह्मणग्रन्थानाम्, आरण्यकानाम्, उपनिषदां च स्वाध्यायशैल्याः परिचायनाय वेदाध्यापनानुसन्धानरहस्यं जिज्ञासूनां श्रद्धावतां च भारतीयानां वेदसंरक्षण-प्रवृत्तेरुद्बोधनाय च सर्ववेदशाखास्वाध्यायसमारोहोऽयं प्रवर्तमानोऽस्ति। अत्र समारोहे काशीस्थाः काशीतो बहिः मद्रास-केरल-आन्ध्र-महाराष्ट्र-गुजरात-राजस्थान-प्रभृतिभ्यः भारतवर्षस्य विविधप्रान्तेभ्यः प्रायः सर्वेभ्यः यत्र यत्र

CC-0. Sampurnanand University Collection. Digitized by eGangotri

वैदिकाः कण्ठस्थीकृतवेदराशयः सन्ति तेभ्यः विशिष्टा वैदिकाः आमन्त्रिताः समाहूताः सन्ति। अत्र केचिद् गतवर्षेऽपि आगता आसन् किन्तु बहूनामेतेषामत्र प्रथमागमनमेवास्ति। मया विचारितमासीत् यद् देशे यावन्त एतादृशा वैदिकाः सन्ति तेषां सर्वेषां पर्यायक्रमेणापि आवाहनमत्र भवतु नाम, अतो गताब्दे ये समागताः तेषां सर्वेषामावाहनं न कृतम्, तेऽपि वेदमूर्तयोऽत्र स्मर्यन्ते तान् एतांश्च सर्वान् वेदपुरुषप्रतिरूपकान्, 'यावतीर्ह वा खलु देवताः ताः सर्वा वेदविदि ब्राह्मणे वसन्तीति कृत्वा सश्रद्धं वन्दे, तेषां भवतां च सर्वेषां कृते भूयोऽपि स्वागतं वः सुस्वागतमिति व्याहरामिति शम्!

●

प्रयागे त्रिवेणीतटे माघमेलावसरे विश्वसंस्कृतसम्मेलनस्योद्घाटनाधिवेशने ०६.०२.१९६५ दिनाङ्के स्वागतभाषणम्

सज्जना देव्यश्च!

अहमद्य गङ्गायमुनासरस्वतीनां पवित्रतमे त्रिवेणीसङ्गमे विश्वसंस्कृतसम्मेलनावसरे बहुश्रुतेभ्यः संस्कृतमनीषिभ्यो हार्दिकं स्वागतं व्याहरामि। अस्मिन्नवसरे समवेतेषु सज्जनेषु भारवर्षस्य विभिन्नेभ्यो राज्येभ्यः समागता विद्वांस एव न सन्ति, अपि तु देशान्तरशासनानाम् अनेके प्रतिनिधयोऽपि सन्ति। एते बहुंख्याकाः सज्जना अस्माकं आमन्त्रणं स्वीकृत्य राज्यान्तरेभ्यः अस्मिन् सम्मेलने समुपस्थिता इत्यतोऽस्माकं महान् सन्तोषः प्रमोदश्च।

सम्मेलनमिदम् अस्मिन् देशे संस्कृताध्ययनस्य पुनर्जीवनं जायेत, अन्येषु देशेषु संस्कृतशिक्षां प्रति अधिकतरोऽभिनिवेशश्च जागृयात्, इत्येतदर्थमेव आयोजितम्। साम्प्रतं सत्यमिदम् अस्वीकर्तुं न शक्यते, यद् विश्वस्य सम्पन्नतमासु भाषासु अन्यतमायाः संस्कृतभाषाया अनुशीलनं तथस्या जन्मभूमावेव द्रुतगत्या पतनोन्मुखम्। अधुना संस्कृतशिक्षां प्राप्नुवत्सु छात्रेषु तीव्रो ह्रासोऽनुभूयते, संस्कृतवाङ्मयस्य प्रौढपाण्डित्यरूपे ज्ञानस्तरे महती अधोगतिश्च दृश्यते। अत्रेदं न विस्मर्तव्यं यत् प्रौढपाण्डित्यस्य ह्रासे सति विभिन्नेषु विषयेषु अपरिमितज्ञानागारादपि संस्कृतसाहित्यराशेः कोऽपि उपकारः प्राप्तुं दुःशको भविष्यति, यतो मूलग्रन्थानां स्खलनहीने विवेचने न केवलं विषयस्यैव विशिष्टं ज्ञानमपेक्ष्यते, अपि तु मूलभूताया भाषाया अपि उच्चतमं ज्ञानमपेक्ष्यते।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

अद्यत्वे ये लौकिके विभवे बुद्धौ च दीनतमाः, प्रायस्त एव संस्कृतमध्येतुं प्रवर्तन्ते, ये तु तयोः सम्पन्नास्ते आधुनिक्यां शिक्षायामेव साग्रहं प्रविशन्ति, यतो हि तत्र विस्तीर्णो भवति जीविकालाभस्य अवसरः। निर्धनेष्वपि ये कुशाग्रबुद्धयस्तेऽपि आधुनिकीषु शिक्षासंस्थासु एव अध्ययनार्थं प्रविशन्ति, यतस्तत्र तैः यथाधिकारं हरिजनच्छात्रवृत्तिः दुर्गतजातिच्छात्रवृत्तिः, योग्यताच्छात्रवृत्तिः, निर्धनच्छात्रवृत्तिः, अन्यविधा वा काचिच्छात्रवृत्तिः नूनं लभ्यत एव। आधुनिकीषु शिक्षासंस्थासु साधनहीनस्य किन्तु व्युत्पन्नस्य तादृशस्य छात्रस्य कल्पनापि न कर्तुं शक्यते यः छात्रजीवनम् उत्तरीतुम् अपेक्षितां काञ्चिद् आर्थिकसहायतां न लभेत।

ये समाजे उपेक्षिता हीनमनसश्च किन्तु शिक्षाया अभिलाषुकास्त एव संस्कृतविद्यालयेषु अध्ययनार्थम् आगच्छन्ति। तेषु च बहवः संस्कृताध्ययनार्थं संस्कृतविद्यालयेषु प्रविष्टा अपि आधुनिकीषु शिक्षासंस्थासु प्रवेशमेव सततं लक्षयन्ति। संस्कृतशिक्षायाः पाठ्यक्रमेषु आधुनिकविषयाणां सन्निवेशस्तेषां लक्ष्यमिदं सुसाध्यं करोति, फलतया यदैव तेऽनुकूलमवसरं लभन्ते, तदैव संस्कृताध्ययनं शिथिलीकृत्य आधुनिकेषु महाविद्यालयेषु प्रविश्य आत्मानं कृतार्थयन्ति।

छात्राणाम् अस्याः प्रवृत्तेः कारणान्वेषणं न दुरूहम्। यतो हि अस्मिन् युगे विज्ञानस्य प्रविधेश्चैव शिक्षाया महत्त्वं मन्यते, देशस्य आर्थिके विकासे एव समग्रमवधानं दीयते, सर्वत्र सर्वदैव प्रतिष्ठितैः प्रभावशालिभिः पुरुषैः अर्थस्थितेः उन्नयनमेव कर्तव्यतया अहोरात्रम् उद्घोष्यते, मानसिकी शारीरिकी च सर्वविधा शक्तिः लौकिक्याः समृद्धेः उपार्जनार्थमेव सर्वप्रकारैः उन्मुखीक्रियते। जीवनव्ययश्च असाधारणीं तुङ्गतामुपारूढो विजृम्भते। अस्मिंश्च युगे संस्कृतशिक्षा भौतिक्याः समृद्धेः उपार्जने न किमपि साहाय्यं विधत्ते, संस्कृतपाठशालाध्यापकानां वेतनमानं च आधुनिकविद्यालयाध्यापकानां वेतनमानतो नितान्तं न्यूनं दयनीयम्, अत एव संस्कृतशिक्षां प्रति अनुरागोत्पत्तेः प्रतिकूलं च, यस्य परिणामः संस्कृतच्छात्राणां संख्याया उत्तरोत्तरं शोचनीयः ह्रासः, तत्फलतया प्रौढपाण्डित्यस्य अवसादश्च तादृशे वर्तमाने युगे किमत्र आश्चर्यम्? यदि छात्राः संस्कृतपाठशालासु अध्ययनार्थं न प्रविशन्ति, प्रविश्य वा आधुनिकीषु शिक्षासंस्थासु प्रवेशसौविध्ये ताः परित्यजन्ति। तेषां मातापितरौ च तादृशीषु शिक्षासंस्थासु तान् प्रेषयतो यत्र प्राप्तशिक्षास्ते शीघ्रमेव

CC-0. Sampurnanand University Collection. Digitized by eGangotri

जीविकोपार्जनयोग्या भवन्ति, लौकिकसमृद्धिकरेषु जीवनक्षेत्रेषु कार्यावसरं च प्राप्नुवन्ति। दशेयं सर्वैः विचारपरायणैः अनुशोचनार्हा।

इदमत्र प्रष्टुं शक्यते यत् कस्मै प्रयोजनाय संस्कृताध्ययनम् अवश्यम् अपेक्षितव्यम्। मन्ये, प्रश्नोऽयं बहूनाम् अभीष्टः कामं विस्पष्टं न पृच्छ्येत। प्रश्नस्यास्य कदाचित् तेषु देशेषु बहुमहत्त्वं न स्याद् यत्र प्रत्यग्रे अतीते संस्कृतं केवलं तस्य ज्ञानस्य प्राप्तये परिपुष्टये च पठ्यमानमासीद्, यत् संस्कृतादेव प्राप्यं, यच्च काभिश्चन दृष्टिभिः अपूर्वं, यस्य च प्रतिभटभूतं समानं वा देशान्तराणां साहित्येषु अप्राप्यम्। तेषु देशेषु संस्कृतं तस्य ज्ञानस्य परिचयार्थम् अधीयते। इंग्लैण्ड-जर्मनी-फ्रान्स-अमेरिकाप्रभृतिदेशेषु यत् संस्कृतशिक्षायाः प्रोत्साहनं क्रियते, तस्य उद्देश्यं यथा ज्ञानप्राप्तिः अस्ति, न तथा तद्द्वारा लौकिक्याः समृद्धेः उपार्जनमस्ति। तत्र तु संस्कृतस्याध्ययनं निःसंशयं ज्ञानस्य प्राप्त्यर्थमेव क्रियते। इंग्लैण्डदेशे प्राच्यविद्यानां पाठशालाभिः सह षड् विश्वविद्यालया अपि ईदृशाः सन्ति, यत्र संस्कृतविभागाः प्रतिष्ठापिताः परिचाल्यमानाश्च विद्यन्ते। जर्मनी, देशे विंशतिविश्वविद्यालयेषु संस्कृतविभागाः सन्ति। अमेरिका-देशे ततोऽपि अधिका विश्वविद्यालया विद्यन्ते येषु संस्कृतविभागानां सुव्यवस्था विद्यते। छात्रा भारतवर्षादपि संस्कृतमध्येतुं जर्मनीम् अमेरिकां च यान्ति, यतो हि तत्र गवेषणात्मककार्याणां सुप्रबन्धः सौविध्यं च उपलभ्यते। इदं हि संस्कृतसम्बन्धे देशान्तराणां वृत्तम्।

भारतवर्षे तु संस्कृतशिक्षायाः प्रोत्साहनं प्रवर्धनं च अतिरिक्तकारणेभ्योऽपि आवश्यकम्। यदि संस्कृतसाहित्ये निहितस्य महतो ज्ञानस्य स्वाभिमानम् अपास्य विचार्येत तदापि राष्ट्रे एकतायाः प्रतिष्ठापनार्थम्, अस्य देशस्य शान्तिप्रधानायाः विशिष्टायाः संस्कृतेः उपबृंहणार्थं विश्वस्मिन् सततं वर्धमानानां विध्वंसकवृत्तीनां प्रतिरोधार्थं, विविधानां वर्गवादानां समूलमुन्मूलनार्थं तथा अस्माकं पूर्वजैः प्रदत्तस्य भाषात्मनः, स्वरूपात्मनः, वस्त्वात्मनश्च सुमहतो रिक्थस्य संरक्षणार्थं च संस्कृतशिक्षायाः सर्वविधं प्रोत्साहनं, विश्वव्यापि प्रसारणं च परमावश्यकम्।

इदं किल सर्वविदितं तथ्यं यद् देशस्य बहुतराः प्रादेशिकभाषाः संस्कृतादेव प्रादुर्भूताः संस्कृतस्याधिकाधिकैः शब्दैः भरिताश्च। इदमपि निर्विवादं यद् अस्य देशस्य संस्कृतिः सर्वतोभावेन संस्कृते एव समाश्रिता। सत्यमिदं यद्, भवन्ति स्म भूतकालेऽपि शस्त्रसंघर्षाः संग्रामाः, परं तदानीं तेषां बलानां

CC-0. Sampurnanand University Collection. Digitized by eGangotri

तासाम् अध्यात्मशक्तीनां च सर्वोच्चः विकासः कृत आसीद्, यत्प्रभावेण हिंसाऽहिंसयोः स्पर्धायां हिंसायाः पराजयः अहिंसायाः विजयश्च ध्रुवोऽविद्यत। वसिष्ठविश्वामित्रयोः पुराणप्रसिद्धः ऐतिहासिकः कलहो विध्वंसकशस्त्रेषु आस्थावताम् आधुनिकजनानां श्रेष्ठः समीचीनश्च मार्गनिर्देशको भवितुमर्हति। यदा विश्वामित्रः प्रचण्डतमैः अपूर्वैः अस्त्रैः वसिष्ठं क्रूरतया आचक्राम, तदा वसिष्ठः, प्रतिहिंसया तत्प्रतीकारं न चकार, किन्तु चिरसञ्चितेन तपसा लब्धया आध्यात्मिकशक्त्या एवं विश्वामित्रस्य सर्वं प्रयत्नं पराभूतं विफलं च अकरोत्। तस्य परिणामोऽयमभूद् यद् विश्वामित्रः न केवलं स्वं पराजयमेव स्वीकर्तुं विवशोऽभवत्, अपि तु आत्मनो जीवनक्रमं परित्यज्य वसिष्ठस्यैव जीवनविधिम् अङ्गीचकार, तत्याज च शस्त्रप्रयोगं, विजहौ च राज्यम्, प्रविवेश च संन्यासाश्रमम्। निदर्शनमिदं विश्वस्य वाङ्मये अन्यत्र अलभ्यम्। संस्कृतवाङ्मयं तादृशैः उदाहरणैः परिपूर्णम्, येषामयं निष्कर्षः यत् हिंसायाः उत्तरं प्रतिहिंसया न कार्यम्। किन्तु हिंसा अहिंसयैव विजेतव्या। वर्तन्ते अत्र बहूनि निदर्शनानि संस्कृतसाहित्ये निबद्धानि।

विश्वम् अद्य विनाशस्य आसन्नं प्रतीयते। तादृश्यः शक्तयः अधुना परस्परम् उदायुधाः सन्ति, यासां संघर्षे न केवलं सीमितव्यक्तीनामेव सैनिकानामेव वा विनाशः, अपि तु सम्पूर्णाया मानवजातेरेव विनाशः सम्भाव्यते। यावत् ताः शक्तयः अवधीरिता न भविष्यन्ति, तावत् प्रत्याक्रमणस्य प्रतिपीडनस्य च आतङ्कः अपरिहार्यः। सत्यमिदं सुव्यक्तं, यदद्य विश्वं सततं तस्यां युद्धविभीषिकायां श्वसिति, यया मानवसभ्यतायाः लक्षाणां मानवजीवानां च विनाशः अवश्यम्भावी। संस्कृतस्य अध्ययनं तां प्रतिभां, तां परम्परां, तां शिक्षां च आधत्ते, यया मानवानां विध्वंसकभावनाया अवसानं, शान्तिपूर्णस्य सहास्तित्वस्य दिशि आभिमुख्यं च सुनिश्चितम्।

आधुनिके जगति व्यवसायस्य जीवनस्य च धनिक-श्रमिकप्रभृतयो बहवो वर्गाः सन्ति, ये वर्गचेतनां स्पर्धाभावं, मिथः संघर्षं च जनयन्ति, परं संस्कृतसाहित्ये तु—

सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः।
सर्वे भद्राणि पश्यन्तु मा कश्चिद् दुःखभाग् भवेत्।।
किञ्च, "लोकाः समस्ताः सुखिनो भवन्तु।"
तथा—"आत्मनः प्रतिकूलानि परेषां न समाचरेत्।"

CC-0. Sampurnanand University Collection. Digitized by eGangotri

ईदृशा अपूर्वा आदर्शभूता भावाः सन्ति, ये समग्रमानवजातौ कुटुम्बभावनाम् उद्भाव्य विश्वं प्रेममयं, सुखशान्तिपूर्णं च कर्तुं क्षमन्ते।

अस्माकं विशाले पुराणसाहित्ये प्रसङ्गोऽयमुपलभ्यते यद् देशस्य ऋषयो विद्वांसश्च समये समये समवैत्य मनुजक्लेशानां निराकरणोपायान् विचारयितुं कथाया उपक्रमं कुर्वन्ति स्म। ते तदानीं मनुष्यस्य केवलं तात्कालिकदुःखानामेव अपाकरणस्य उपायान् न गवेषयन्ति स्म, अपि तु भविष्यति कालेऽपि सम्भावितानां मानवक्लेशानां प्रतीकारस्योपायान् चिन्तयन्ति स्म। ते हि परस्परं विचारविनिमयेन त्रिकालिकान् उपायान् निश्चित्य शास्त्रेषु संचितवन्तो येभ्यो मनुष्यः पुरा क्लेशेभ्यः त्राणं प्राप्तः, अद्यापि प्राप्तुमर्हति, अग्रेऽपि प्राप्तुं प्रभविष्यति। पूर्वैः मनुष्यैः महर्षिभिश्च सुचिरं गम्भीरं च अनुसन्धाय संस्कृतवाङ्मये क्लेशत्राणस्य शान्तेः सौख्यस्य सर्वविधाया उन्नतेश्च यद् उपायजातं संगृह्य निबद्धं तन्न केवलं भारतस्यैव, अपि तु समग्रस्य विश्वस्य कृते वर्तते। यदि संस्कृतसाहित्यस्य सम्यग् अनुशीलनं कृत्वा तेषामुपायानां प्रयोगः क्रियेत, तदा विश्वव्यापिन्याः शान्तेः समृद्धेश्च द्वारोद्घाटनं सर्वासां विध्वंसकभावासर्वप्रकारेभ्यो विपज्जालेभ्यो निस्तारश्च निस्संशयं भवितुमर्हति। अतो विध्वंसकशक्तीनाम् आविष्कारे सञ्चये च धनश्रमयोः महान्तं व्ययं परित्यज्यं अधिकाधिकमवधानं धनं च संस्कृतशिक्षायाः प्रोत्साहनाय प्रवर्धनाय प्रदेयम्।

यदाऽहं संस्कृताध्ययनस्य चर्चां करोमि तदा संस्कृतस्य सीमितम् अध्ययनम् अर्थात् भाषामात्रस्य व्याकरणा मात्रस्य वा अध्ययनं ममाभिमतं न भवति, किन्तु संस्कृतवाङ्मये आधुनिक-विज्ञान-प्रविधिप्रभृतिविद्यानां समाना याः प्राचीनविज्ञानप्रविधिप्रभृतयो विद्या निर्दिष्टाः सन्ति, तासामपि अध्ययनं ममाभिप्रेतं भवति। यतो हि यावत् संस्कृतसाहित्ये विद्यमानानां प्राचीनविज्ञानादिविद्यानां पुनरुद्धारो न भविष्यति तावत् संस्कृतस्य अध्ययनं निस्संशयम् अपूर्णमेव स्थास्यति। संस्कृताध्ययनस्य पूर्णतायाः सिद्धये कार्यद्वयम् आवश्यकम्। एकं तु इदं यद् आधुनिकविज्ञानादिविद्यानां प्राचीनविज्ञानादिविद्यानां च संवादात्मकम् अध्ययनम्, अपरं च इदं यद् विज्ञानप्रविधिप्रभृतीनां विषये या विद्या अधुनातनस्य जगतः अज्ञाताः किन्तु संस्कृतसाहित्ये सङ्केतिताः तासां पुनः उपबृंहणम्। सत्यमिदं यद् अधुनातनः संसारः विज्ञानादीनां क्षेत्रे बहुदूरं गतः, परं सहैव इदमपि सत्यं, यत् शिल्पज्यौतिषायुर्वेदादिविज्ञानानां प्राचीनाः पद्धतयः, कामं सीमितमेव भवतु

CC-0. Sampurnanand University Collection. Digitized by eGangotri

क्षेत्रम्, किन्तु यं सुनिश्चितं चरमं निष्कर्षं प्रतिष्ठापितवत्यः, विज्ञानादीनाम् आधुनिकपद्धतयः तस्य स्पर्शमपि कर्तुं न प्रभवन्ति। एभिः कारणैः इदमावश्यकं यत् संस्कृतशिक्षायाः प्रोत्साहनं न केवलं संस्कृतशिक्षायाः सामान्ये अर्थे अर्थात् भाषामात्रस्य वा अध्ययनाध्यापनरूपे अर्थे एव करणीयम्, किन्तु विज्ञानादिविद्यानां याः परम्परागताः पद्धतयः संस्कृतसाहित्ये निर्दिष्टाः तासां पुनरुज्जीवनपुनःप्रतिष्ठापनादिरूपे अर्थेऽपि कर्तव्यम्।

एतदर्थं वाराणसेयसंस्कृतविश्वविद्यालयः बहोः कालाद् मन्दप्रचाराणां लुप्तप्रायाणां च विविधविद्यानां पुनरुज्जीवनाय प्रयतमानो विद्यते, तथा व्याकरणम्, साहित्यम्, ज्योतिषम्, न्यायः, वैशेषिकम्, सांख्यम्, योगः, पूर्वमीमांसा, उत्तरमीमांसा, वेदान्तः, पुराणम्, धर्मशास्त्रम्, सर्वासां विद्यानाम् उद्गमभूमिभूता वेदाः, जैनदर्शनम्, बौद्धदर्शनम्, पालिवाङ्मयम्, संस्कृतविषयेषु कृतकार्या अनेका वैदेशिकभाषाः, अर्वाक्कालिकं शिक्षाशास्त्रम्, इमे सर्वे विषयाः संस्कृतविश्वविद्यालये यथा अध्याप्यन्ते, तथैव अवशिष्टानाम् अन्यासामपि विद्यानां पठन-पाठनगवेषणादीनां प्रबन्धः क्रियमाणो विद्यते। इदानीं तत्र अर्थशास्त्र-राजनीतिशास्त्रयोः विभागः प्रतिष्ठापितः, अस्य विभागस्य प्रयत्नै रामायणे, महाभारते, पुराणेषु, काव्येषु, अन्यत्र च अर्थशास्त्रस्य, राजनीतिशास्त्रस्य च बहुविधसिद्धान्ता ये विकीर्णाः सन्ति, तेषां सर्वेषां सङ्कलनं अर्वाचीनयोः अर्थशास्त्र-राजनीतिशास्त्रयोः प्रकाशे तेषां समीक्षा च अर्थशास्त्रस्य राजनीतिशास्त्रस्य च नूतनानां ग्रन्थानां प्रणयनं प्राचीनयोः नवीनयोश्च तयोः शास्त्रयोः तुलनात्मकम् अध्ययनं च सम्पादयिष्यते।

इत्थमेव योगतन्त्रविभागोऽपि एकः अधुनैव प्रतिष्ठापितः। अयं विभागः अन्ताराष्ट्रियख्यातिभाजां म.म.पण्डितश्रीगोपीनाथकविराजमहोदयानाम् आध्यक्ष्ये विरलप्रचारं गतानां क्रमेण लुप्यमानां च योगविद्यानां तन्त्रविद्यानां च पुनर्जीवनाय पुनः प्रचारणाय च इतस्ततो विकीर्णम् अंशम् संकलय्य अभिनवग्रन्थानां रचनायै तयोः विद्ययोः प्रायोगिकविज्ञानस्य प्रतिष्ठापनाय च सचेष्टो विद्यते। तदनुसारेण आगामिनि मार्चमासे एकम् सकलभारतीयं योगतन्त्रसम्मेलनम् आयोजयिष्यते यत्र योगतन्त्रयोः भारत-प्रसिद्धान् विदुषः प्रयोगकुशलान् साधकान् च सह सुलभान् कर्तुं प्रयासः विधीयमानो वर्तते।

एवमेव अत्रैव विधिशास्त्र-Indian Gurisprudence विभागस्यापि प्रतिष्ठापनम् अविलम्बं करिष्यमाणतया सङ्कल्पितमस्ति, तदर्थं सर्वोच्च-

CC-0. Sampurnanand University Collection. Digitized by eGangotri

न्यायालयाधीशस्य श्रीगजेन्द्रगडकरमहोदयस्य अध्यक्षतायां भारतीयविधिशास्त्रविदां पण्डितानाम् अर्वाचीनविधिविदां मनीषिणां च विचारगोष्ठी गतवर्षे दिल्लीनगरे समपद्यत, एनं विभागं प्रतिष्ठाप्य इदं प्रमाणयितव्यं वर्तते यत् पुरातने युगे भारतस्य निजसर्वाङ्गपूर्णं विधिशास्त्रमासीद् यस्यानुसारेण सहस्रशो वर्षं यावत् स्वतन्त्रस्य भारतस्य शासनं प्रावर्तत, येन च अधुनातनं भारतीयं विधिशास्त्रं बहुषु अंशेषु अनुप्राणितं वर्तते।

पुराणानां ग्रामेषु प्रसिद्धानां प्राचीनानां लोकोक्तीनां च द्वारा इदं ज्ञायते यद् भारतवर्षे पुरा वायुविज्ञानम् अत्यन्तं समृद्धं पूर्णं च अविद्यत, अधुनातनस्य वायुविज्ञानस्य वेत्तारो भविष्यद् ऋतुपरिवर्तनं जानन्ति, परं संस्कृतसाहित्ये निहितस्य वायुविज्ञानस्य वेत्तारः पूर्ववायुस्वरूपं समधीत्य सुदूरम् भविष्यति अपि घटयिष्यमाणान् प्राकृतान् भावान् ज्ञातुम् उद्घोषयितुं च प्रभवन्ति स्म।

पशुविज्ञानमपि अस्मद्देशे पूर्वयुगेषु अतीवसम्पन्नम् आसीत्। पशूनां जननस्य, पालनस्य, संवर्धनस्य, चिकित्सायाश्च विशिष्टज्ञानं पूर्वपण्डितानामासीद् इति अनेकतः पुराणसंसर्गतोऽवगम्यते। अग्निपुराणं बहूनां लौकिकालौकिकविधानां संकेतकोषः, तथा विस्तृतस्य सर्वाङ्गसम्पन्नस्य आयुर्वेदशास्त्रस्य, सर्वाङ्गीणायाः युद्धविद्यायाः, गान्धर्वादिविद्यायाः, शिल्पविद्यायाः, अनेके संकेताः प्राप्यन्ते। वाराणसेयसंस्कृतविश्वविद्यालये क्रमेण सर्वासाम् आसां विद्यानां पुनरुद्धारं वयं कामयामहे, येन भारतवर्षस्य पुरातनम् अद्वितीयं गौरवं यद् मनुना कथितम्—

एतद्देशप्रसूतस्य सकाशादग्रजन्मनः।
स्वं स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्वमानवाः।।

सैनापत्यं च राज्यं च दण्डनेतृत्वमेव च।
सर्वलोकाधिपत्यं च वेदशास्त्रविदर्हति।।

इत्यादिरूपेण उद्घोषितस्य तस्य भारतवर्षस्य पुनः अत्यन्तम् ऊर्जस्विरूपेण प्रतिष्ठापनं स्यात्।

किन्तु प्रश्नोऽयम् उत्तिष्ठति, यत् कया रीत्या संस्कृतशिक्षासंस्थायाः सर्वोत्तमरूपेण प्रोत्साहनं क्रियेत, को विधिश्च अवलम्ब्येत, येन न केवलं सामान्यच्छात्राणामपि तु मेधाविनामुत्साहिनां च छात्राणां संस्कृतशिक्षासंस्थाः

CC-0. Sampurnanand University Collection. Digitized by eGangotri

प्रति विशालसंख्यायामाकर्षणं भवेत्। सम्मेलनमिदं संस्कृतस्य जगतश्च महदुपकुर्याद् यदि अस्य प्रश्नस्य सुलभम् उत्तरम् उपस्थापयेत्।

पुरा संस्कृतस्य पण्डिताः समाजे समादरदृष्ट्या दृश्यन्ते स्म, जीवनस्य आवश्यकानि उपकरणानि लोकेन तेभ्यः उपहरन्ते स्म। जीविकार्जनचिन्तां विहाय ते निराडम्बरं जीवनं यापयन्तः समाजस्य कल्याणोपायं चिन्तयतः निरन्तरं शास्त्राणि परिशीलयन्तो विश्वस्मै जीवनस्यादर्शम् उपस्थापयन्ति स्म, परं लोकस्य समाजस्य च भावनायाः परिवर्त्तनेन सर्वं अधुना विलोपं गतम्। नेदानीं लोकः संस्कृतपण्डितेभ्यः समादरं ददाति, न च प्रबध्नाति तेषां साधारणमपि आजीविकाविधिम्। अस्मादेव कारणात् संस्कृतशिक्षाया ह्रासः।

अधुनातन्यां स्थितौ, मन्ये, संस्कृतशिक्षायाः प्रोत्साहनस्य अयमेव एको मार्गः विद्यते यत् संस्कृतशिक्षाया उपाधीनाम् आधुनिकशिक्षोपाधिभिः सह सर्वथा समाना स्थितिः स्वीक्रियेत, संस्कृतविद्यार्थिभ्यः प्राशासनिकसेवानाम्, लोकसेवान्तराणां च ते सर्वेऽवसराः समानरूपेण प्रदीयेरन् ये आधुनिकशिक्षाप्राप्तविद्यार्थिभ्यो दीयन्ते। आजीविकाक्षेत्रे संस्कृतच्छात्रान् प्रति वैदेशिकवद् व्यवहारो नितान्तमनुचितः। अतो येषां पुरुषाणां शासने समाजे च अधिकारः प्रभावश्च अस्ति, तेषां यदि किञ्चित् प्रेम, भारतीयसंस्कृतिं प्रति काचित् निष्ठा, संस्कृतं प्रति च कश्चिद् अनुरागः, तदा तैः यथाशक्ति यथावसरं संस्कृतच्छात्रेभ्यः आजीविकायाः प्रदाने स्वमित्रैः अधिकारिभिः प्रदापने च सततं सचेष्टैः सावधानैश्च भवितव्यम्। विभिन्नेषु जीविकाक्षेत्रेषु संस्कृतच्छात्राणां प्रवेशस्य सौलभ्ये सत्येव संस्कृतशिक्षां प्रति जनाकर्षणं सम्भाव्यं नान्यथा। एतदतिरिक्ता अपि केचन उपायाः संस्कृतशिक्षायाः प्रोत्साहनस्य सन्ति, तेऽपि यथोचितं प्रयोक्तव्याः।

ममायं दृढो विश्वासः यद् भवन्तः सर्वे सम्भूय सावधानेन मनसा तान् उपायान् उपस्थापयिष्यन्ति, यैः संस्कृतशिक्षायाः प्रोत्साहनात्मकस्य उद्देश्यपूर्तिः, मेधाविनां विद्यार्थिनां संस्कृतशिक्षासंस्थासु भूयस्यां संख्यायाम् आकर्षणं, सर्वातिशयरूपेण प्रौढपाण्डित्यस्य संरक्षणं कर्तुं शक्येरन्।

अत्र सम्मेलने अस्माकं प्रबन्धदोषात् साधनानाम् अभावाच्च यत् कष्टं भवद्भिरनुभूतं तदर्थं वयं विनम्रभावेन क्षमां प्रार्थयामहे, विश्वासश्चास्माकं विद्यते यत् साधनानां प्रबन्धविधीनां च त्रुटितो भवन्तोऽस्माकं सुखसम्मान-प्रदानभावनायां मनागपि सन्देहं न करिष्यन्ति। मन्ये, भवतां धार्मिकमुदारं च

CC-0. Sampurnanand University Collection. Digitized by eGangotri

अन्तरङ्गं सम्मेलनप्रसङ्गेन पवित्रायां त्रिवेण्याम् अवगाहनलाभसौभाग्येनैव सन्तुष्टं भविष्यति, येन वयं न केवलं शरीरमेव निर्मलं मन्यामहेऽपि तु आत्मानमपि उपकृतं कृतार्थं च मन्यामहे। अन्ते पुनः सर्वेभ्यो भवद्भ्यः हार्दिकान् आदरभावान् उपहरामः।

●

वाराणसेयसंस्कृतविश्वविद्यालयस्य अष्टमे स्थापनोत्सवे विशेषदीक्षान्तसमारोहावसरे च ०३.०४.१९६५ दिनाङ्के स्वागतभाषणम्

माननीयाः कुलपतिमहाभागाः!

अस्मिन् अवसरे भवतां त्रयाणां विशिष्टातिथीनां च, यान् 'वाचस्पतिः' इति सम्मानोपाधिना सभाजयितुम् विश्वविद्यालयस्य अयं विशेषदीक्षान्त-महोत्सवः समायोजितः, अहं बहुमानपूर्णं हार्दिकं सुस्वागतं व्याहरामि। एते त्रयोऽपि सम्मानितातिथयः अस्य विश्वविद्यालयस्य प्रतिष्ठापकाः, उत्तरोत्तरविकासस्य साधकाः, जीवनाधायकाः, चेतनाप्रदाश्च। अद्य एतान् महानुभावान् सह प्राप्य विश्वविद्यालयोऽयम् आत्मानम् अतीवप्रमुदितं धन्यं च मन्यते।

महानुभावाः, अद्य विश्वविद्यालयस्य अष्टमः स्थापनादिवसोत्सवः। अतो विगतवर्षस्य कार्याणां पर्यवेक्षणं समुचितं सप्रयोजनं चेति श्रीमतां समक्षं संक्षेपेण तद्विषये विनिवेदयामि। अयं विश्वविद्यालयः भारतस्य प्राचीनानां विद्यानाम्, प्राचीनानां विज्ञानानाम्, प्राचीनायाः संस्कृतेश्च पुनरुज्जीवनाय सततं प्रयतते। विगतवर्षे सप्तानां नूतनविभागानां प्रतिष्ठापनस्य योजना केन्द्रीयविश्वविद्यालयानुदानायोगस्य प्रादेशिकशासनस्य च समक्षं समुपस्थापि। तत्र प्रस्तावितविभागेषु द्वयोः विभागयोः महामहोपाध्यायपण्डित-श्रीगोपीनाथकविराजमहोदयानाम् आध्यक्ष्ये सांख्ययोगतन्त्रागमविभागस्य, पण्डितराजश्रीराजेश्वरशास्त्रिद्रविडमहोदयानाम् आध्यक्ष्ये अर्थशास्त्र-राजनीति-शास्त्रविभागस्य च प्रतिष्ठापनं जातम्। इमे द्वयेऽपि विद्वांसः स्वकीयेषु ज्ञानक्षेत्रेषु न केवलं वाराणस्या एव न वा केवलम् उत्तरप्रदेशस्यैव अपि तु समग्रस्य भारतवर्षस्य मूर्द्धन्या मनीषिणः। अनयोः विभागयोः संचालनस्य सम्पूर्णं व्ययभारं केन्द्रीयविश्वविद्यालयानुदानायोगः स्वयं वक्ष्यति।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

विश्वविद्यालये आयुर्वेदविभागस्य स्थापनाया द्वितीया योजना आसीत्। यदर्थं जनताया महद् औत्सुक्यम् अविद्यत। आयुर्वेदो हि प्राचीनयुगस्य एकं मुख्यं विज्ञानम्। यस्य अध्ययनाध्यापनयोः प्रबन्धाभावेन विश्वविद्यालये एका महती न्यूनता अन्वभावि। तस्याः निराकरणम् उत्तरप्रदेशस्य शासनेन आयुर्वेदविभागस्य प्रतिष्ठापनया कृतम्। आशास्यते, यद् आगामिनः जुलाईमासाद् आयुर्वेदविभागस्य कार्यारम्भः अवश्यं भविता।

अस्मिन् विश्वविद्यालये ग्रन्थप्रकाशनस्य कार्यं बहोः कालात् प्रवर्तते। परं स्वकीयमुद्रणालयस्य अभावेन तत् कार्यं यथापेक्षितं न जायते स्म। किन्तु साम्प्रतं केन्द्रीयविश्वविद्यालयानुदानायोगस्य प्रादेशिकशासनस्य च कृपया आवश्यकधनलाभेन मुद्रणालयस्य निर्माणं समजनि। मुख्यानि यन्त्राणि अपि क्रीतानि। केवलं देशान्तरात् क्रेतव्यानां कतिपयोपकरणानाम् अभावेन मुद्रणकार्यम् अधुनावधि नारब्धम्। आशासे, शीघ्रमेव तानि उपलभ्य मुद्रणकार्यं प्रारप्स्यते। स्वकीयायाः मुद्रणव्यवस्थायाः सम्पन्नतया साम्प्रतं सम्भाव्यते यत् सरस्वतीभवनपुस्तकालये सुरक्षितानां महत्त्वशालिनां हस्तलिखितपुस्तकानां प्रकाशनम् अधुना सुकरं भवेत्।

अस्य विश्वविद्यालयस्य परीक्षाकेन्द्राणि भारतस्य विभिन्नेषु प्रदेशेषु विततानि। एषु परीक्षाधीक्षकाः परीक्षानिरीक्षकाश्च पारिश्रमिकं विना परीक्षाकार्यसम्पादने सोत्साहं न प्रवर्तन्ते स्म। अतः परीक्षाकार्ये सम्भावितायाः शिथिलतायाः अपाकरणाय परीक्षाकेन्द्राणां कार्यकर्तृभ्यः पारिश्रमिकं प्रदातुं विश्वविद्यालयेन शासनं प्रति पुनः पुनः अनुरोधः कृतः। शासनेन च औचित्यं स्वीकृतम्। परं प्रदेशाद् बहिः स्थितानां केन्द्राणां परीक्षाकार्यकर्तृभ्यः धनप्रदाने तत्समक्षम् अनेकाः बाधाः आसन्। किन्तु विश्वविद्यालयस्य अनुरोधम् आवश्यकतां च विचार्य शासनेन प्रदेशस्थानां प्रदेशबाह्यानां च केन्द्राणां कार्यकर्तृभ्यः पारिश्रमिकप्रदानमुद्घोषितम्। अनया व्यवस्थया न केवलं परीक्षाकार्यसञ्चालने सौविध्यमेव भविष्यति, अपि तु अतिस्वल्पेन अपर्याप्तेन च वेतनेन अध्यापनकार्यं कुर्वतां जीवनस्य अनिवार्यावश्यकतापूर्त्तये धनापेक्षिणां संस्कृतविदुषां मात्रया मनस्तोषाधानम् आर्थिकं साहाय्यं च भविष्यति।

पुस्तकालयस्य छात्रावासस्य च द्वयोः नवीनभवनयोर्निर्माणं जायमानम् आस्ते। विगते अगस्तमासे स्नातकोत्तरशिक्षाभवनस्यापि शिलान्यासो विहितः। तस्य निर्माणमपि क्रियमाणमस्ति। आशास्यते, वर्षान्तं यावत् तत् कार्यं नूनं

CC-0. Sampurnanand University Collection. Digitized by eGangotri

सम्पद्येत। एतदतिरेकेण एकस्य स्वास्थ्यकेन्द्रस्य एकस्य अध्यापकानाम् आवासखण्डस्य तथा एकस्य च्छात्रभवनस्य च निर्माणयोजना केन्द्रीय-विश्वविद्यालयानुदानायोगेन स्वीकृता। मन्ये, विस्तीर्णस्य विस्पष्टस्य च आनुमानिकव्ययस्य स्वीकारोत्तरम् एतेषां निर्माणकार्यं प्रारम्भेत।

विश्वविद्यालयस्य पार्श्वे स्थानस्य महती न्यूनता विद्यते। आयुर्वेदविभागस्य कार्यारम्भार्थम् एको विस्तृतो भूखण्ड: अपेक्षित:। विश्वविद्यालयस्य समीपे स्थितं विस्तृतं भूखण्डम् आयत्तीकर्तुं शासनं प्रार्थितम्। तेन च कृपया पञ्चशतसहितषट्पञ्चाशत्सहस्राधिकपञ्चलक्षरूप्यकप्रदानस्य स्वीकृति: प्रदत्ता। अपेक्षितं भूखण्डं प्राप्य आयुर्वेदविभागार्थं भवनस्य निर्माणकार्यं सत्वरमेव प्रारप्स्यते।

लोकप्रियतासम्पादनप्रमुखै: अन्यैरपि प्रकारै: प्राचीनानां विद्यानां, प्राचीनाया: संस्कृतेश्च पुन: उज्जीवनाय महान् प्रयत्न: विश्वविद्यालयेन क्रियमाणो विद्यते। गतदिसम्बरमासे विश्वविद्यालयस्य दीक्षान्तमहोत्सवावसरे सर्ववेदशाखास्वाध्यायस्य आयोजनं कृतम्। तत्पूर्ववर्षेऽपि ईदृशमेव आयोजनं कृतमासीत्। इदम् आयोजनं सर्वथा नूतनम् अभूतपूर्वं च। अनयो: आयोजनयो: देशस्य विभिन्नप्रदेशेभ्य: समागतानां वैदिकपण्डितानां शाखास्वाध्यायस्य कार्यक्रम: अतीवगम्भीर: सर्वाङ्गसम्पन्न: प्रभावपूर्णश्च अभूत्।

अनुपदं व्यतीते मार्चमासे एकं महत् तन्त्रसम्मेलनं विश्वविद्यालयेन आयोजितम्। तत्र शैक्षणिकदृष्ट्या अत्यन्तम् उपयोगिन्या: तान्त्रिकप्रदर्शिन्या: दर्शनेन शतप्रायाणां तान्त्रिकनिबन्धानां श्रवणेन देशस्य विभिन्नेभ्य: प्रदेशेभ्य:, देशान्तरेभ्यश्च समागतानां शतप्रयाणां तान्त्रिकविदुषां सम्पर्केण च तन्त्रप्रणयिना लोकेन महान् मनस्तोष: प्राप्त:। अस्मिन् दिनचतुष्टयव्यापिनि आयोजने कुलपतिमहोदयानां विहारप्रदेशस्य राज्यपालानां श्रीआयङ्गरमहोदयानाम् अन्येषां बहूनां विशिष्टशिक्षाविदां च उपस्थिति: उल्लेखनीया उत्साहवर्द्धिका प्रेरणाप्रदा च आसीत्।

विश्वविद्यालय: (ग)वर्गस्य संस्कृतविद्यालयाध्यापकानाम् अपि वेतनमानस्य उन्नयनार्थं सततं सचेष्ट: प्रयत्नशीलश्च विद्यते। एतत्सम्बन्धे गतवर्षे केन्द्रीयशिक्षामन्त्रिण: श्रीछागलामहोदयस्य पार्श्वे मया एकं पत्रं लिखितं तथा मौखिकं निवेदनमपि कृतम्। यत्फलतया सितम्बरमासे केन्द्रस्य शिक्षामन्त्रालयेन राजधान्यां संस्कृतसम्बन्धे एकं सम्मेलनम् आयोजितम्। तत्र

CC-0. Sampurnanand University Collection. Digitized by eGangotri

विभिन्नप्रदेशशासनानां प्रतिनिधिभिः (ग)वर्गस्यं संस्कृतविद्यालयाध्यापकानां वेतनमानस्य उन्नयनं समर्थितम्। केन्द्रीयशासनेन एतदर्थम् अपेक्षितस्य धनराशेः प्रतिशतं पञ्चाशद्भागं दातुं समुद्घोषितम्। प्रदेशानां शासनैः अस्यां दिशि विचारः क्रियमाणो विद्यते। आशास्यते, आगामिनि वर्षे इदं कार्यं नूनं सम्पन्नं स्यात्। येन संस्कृतविदुषां न केवलं वेतनसम्बन्धिनः आक्रोशस्य परिहरणमात्रमेव स्यात्, अपि तु वेतनाल्पतामूलिका आत्महीनत्वभावनापि तेषां विलीयेत।

संस्कृतशिक्षायाः लोकप्रियतावर्द्धनाय प्रचारोऽपि अस्माभिः अनवरतं क्रियते। विगते माघमासे कुम्भमेलावसरे प्रयागे त्रिवेणीतटे एकं विश्वसंस्कृतसम्मेलनम् आयोजितम्। तत्र न केवलं भारतस्य विभिन्नप्रदेशानाम् एव अपि तु अन्यराष्ट्राणाम् अपि प्रतिनिधयः विद्वांसः समवेता अभवन्। सम्मेलनमिदम् अतीवसफलं संस्कृतशिक्षायाः लोकप्रियतासम्पादने सुतरां सहायकं च आसीत्। इत्थं संस्कृतशिक्षासम्बन्धे बहूनि कार्याणि जातानि, बहूनि च क्रियमाणानि सन्ति। तथापि संस्कृतशिक्षायाः कार्यक्रमः एतावान् व्यापकः विस्तृतश्च विद्यते, यस्य कतिपये महत्त्वपूर्णा अंशा इदानीं यावत् स्पृष्टा अपि न सन्ति, तेऽस्माकं तेजस्विनीं सक्रियतां प्रादेशिकशासनानां केन्द्रीयशासनस्य च प्रोत्साहनं साहाय्यं च अपेक्षन्ते।

संस्कृतशिक्षा बहोः कालात् तिरस्कृता उपेक्षिता च। अत इदानीं देशस्य स्वातन्त्र्ये जाते तस्याः सम्माननं तत्र व्यापृतानां जनानां सम्भरणं संस्कृतस्य विद्वत्सु छात्रेषु च आत्मविश्वासस्य जागरणम्, संस्कृतपण्डितानाम् आधुनिकपण्डितैः सह वेतनसम्बन्धिन्याः असमानताया निराकरणं जीविकायाः सर्वविधक्षेत्रेषु संस्कृतज्ञानां प्रवेशसौकर्यस्य सम्पादनं च अतितरम् आवश्यकम्।

सज्जनाः!

अस्य वक्तव्यस्य समापनात् पूर्वं कुलपतिमहोदयान् प्रति विश्वविद्यालयस्य पक्षेण हार्दिककृतज्ञतायाः ज्ञापनं परमावश्यकम्। यतो हि यत् किमपि कार्यम् अस्मिन् विश्वविद्यालये अद्यपर्यन्तं जातं तस्य सर्वस्य श्रेयः अस्माकम् एतेषां कुलपतीनामेव विद्यते। संस्कृतसम्बन्धे य एषामुत्साहः, संस्कृतं प्रति य एतेषाम् असाधारणोऽनुरागः, संस्कृतशिक्षायाः संवर्द्धन-सम्बन्धे च यद् एतेषां प्रोत्साहनं मार्गदर्शनं च, अस्माकं प्राचीनायां संस्कृतौ, प्राचीनेषु विज्ञानेषु, प्राचीनासु विविधासु विद्यासु च य एतेषां दृढः समादरः तस्मादेव

CC-0. Sampurnanand University Collection. Digitized by eGangotri

सर्वस्मात् प्रेरणां प्राप्य संस्कृतशिक्षायाः विशेषेण अस्य विश्वविद्यालयस्य कार्येषु वयं सोत्साहं प्रवर्तामहे।

कुलपतिमहाभागाः!

साम्प्रतं सबहुमानं समाहूतान् विशेषकृपया च अत्रागतान् विशिष्टातिथीन् 'वाचस्पति' इति सम्मानोपाधये भवतः समक्षं प्रस्तोतुं भवतां कृपामयीम् अनुमतिं कामये।

●

'सदर-ए-रियासत जम्मूकश्मीर' इति विरुदभाजां डॉ. कर्णसिंह-महाभागानां वाराणसेयसंस्कृतविश्वविद्यालये शुभागमनावसरे स्वागतभाषणम्

सम्मान्याः कश्मीरसदसस्पतयः, समादरणीया विद्वांसः, प्रेयांसश्छात्राश्च!

अस्माभिरद्य सुमहद् गौरवं गर्वश्चानुभूयते यद् भारतस्य प्राचीनतमे लोकविश्रुते चास्मिन् देववाण्या मन्दिरे अस्माकं मध्ये महाराजाः डॉ.कर्णसिंहमहाभागाः 'सदर-ए-रियासत जम्मू-कश्मीर' इति पदभाजो विराजन्ते। संस्कृतवाङ्मयं प्रति महाराजानां विशेषानुरागः सर्वविदित एव। अस्माकम् आमन्त्रणम् उररीकृत्य स्वकीयेषु बहुमूल्यसमयेषु कानिचित् क्षणानि अस्मभ्यं प्रददद्भिः भवद्भिरस्मासु महत्यनुकम्पा प्रादर्शि।

अयं भारतस्य ललाटभूतकश्मीरप्रदेशः संस्कृतवाङ्मयस्योद्भटविदुषां प्रसूः। अस्माकं संस्कृतेः साहित्यस्य च विकासे तस्य समुहद् अवदानं वर्तते। वेदस्य प्राचीनो भाष्यकारः उव्वटोऽत्रत्य एवासीत्। अथर्ववेदस्य पिप्पलादशाखायाः हस्तलिखिता दुर्लभा प्रतिलिपिः प्रथमं कश्मीरे एवोपलब्धा। भारतीयदर्शनेषु प्रत्यभिज्ञाशैवागमदर्शनस्य महत्त्वपूर्णं यद् अवदानं तदविस्मरणीयं वर्तते। प्रत्यभिज्ञादर्शने तथा संस्कृतसाहित्ये आचार्यश्रीमदभिनवगुप्तस्य प्रमुखतमं स्थानमस्ति। अस्य जन्मभूमिः कश्मीर एव। अलङ्कारशास्त्रस्य प्रकाण्डपण्डितः श्रीमम्मटः तत्रत्य एवासीत्। किम्बहुना, सुश्रुतस्य टीकाकारो कल्हणो राजतरङ्गिण्याः रचयिता कल्हणोऽपि अस्या एव भूमेः श्लाघ्यतनयौ आस्ताम्। इदमेव कारणं यद् भारतस्य भालोपरि सुरम्यहिमालयश्रेणिभिः आवृतः तिलकायमानोऽयं प्रदेशो विराजते।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

भारतीया विद्वांसः अतीते स्वकीयानां विचाराणां वैदुष्यस्य च परीक्षणार्थं कश्मीरप्रदेशम् अगच्छन्, तत्रत्यैः विद्वद्भिः सङ्गत्य तेषां समर्थनम् अवाप्यैव च स्वमतं परिनिष्ठितम् अघोषयम्। जगद्‌गुरुः आद्यशङ्कराचार्योऽपि आत्मनः प्रामाण्योपलब्धये कश्मीरप्रदेशम् अगच्छत्। आदिकालादेव जनाः कश्मीरप्रदेशं विद्याधिष्ठातृदेवतायाः भगवत्याः सरस्वत्याः निवासस्थानम् अमन्यन्त तथा भगवतीं सरस्वतीम् अस्तुवन्।

नमस्ते शारदे देवि कश्मीरपुरवासिनी।
त्वामहं प्रार्थये देवि विद्यादानं च देहि मे॥

अस्य च कश्मीरराजवंशस्य सुरभारतीसमुपासना विश्वविश्रुता। कश्मीरराजवंशोऽपि भारतीय-संस्कृतेः संस्कृतभाषायाश्च संरक्षणवर्धनयोः अग्रेसरताम् आवहति। कश्मीरराज्यस्य कश्मीर-संस्कृत-ग्रन्थावलिश्चापरा कीर्तिः।

महामहिमानः!

अद्यापि संस्कृतस्य प्रसारे प्रोत्साहने च भवतां प्रयासाः अद्वितीयाः। जम्मूप्रदेशे द्वौ संस्कृतमहाविद्यालयौ भवतां संरक्षणे प्रचलतः। काश्यामपि रणवीरसंस्कृतमहाविद्यालयः एतद्विषयस्य जाज्वल्यमानं निदर्शनमस्ति। अध्ययनक्षेत्रे भवतां प्रयासाः श्लाघनीयाः अनुकरणीयाश्च सन्ति। राजवंशप्रथाम् अविगणय्य, दूनविद्यालये प्रविश्य च भवद्भिः (पञ्चचत्वारिंशदुत्तरैकोनविंशतिशततमे ईशवीयाब्दे) "सीनियर-केम्ब्रिज" परीक्षा समुत्तीर्णा। तदनन्तरम् (एकपञ्चाशदधिकैकोनविंशतिशततमे ईशवीयाब्दे) जम्मू-कश्मीर विश्वविद्यालयतः स्नातकोपाधिमधिगत्य (सप्तपञ्चाशदुत्तरैकोनविंशतिशततमे ईशवीयाब्दे) भवद्भिः देहलीविश्वविद्यालयतः प्रथमश्रेण्यां सर्वप्रथमं स्थानमवाप्य राजनीतिशास्त्रे एम.ए. उपाधिरासादितः। इतः परमपि "स्वाध्याय-प्रवचनाभ्यां न प्रमदितव्यम्", इति तैत्तिरीयोपनिषदो वचनम् अनुसृत्य, सत्स्वपि प्रत्यवायबहुलेषु प्रशासनादिकार्येषु, स्वाध्यायक्रमस्य अविच्छिन्नतां परिपाल्य भवद्भिः पी-एच्.डी. उपाधिरप्यधिगतः। एते हि प्रयासा भवतां विद्यानुरागित्वं सुस्पष्टं ख्यापयन्ति। राजनीतिशास्त्रे दर्शने च सुचिरम् अवगाहमानानामपि भवतां शास्त्रीयसङ्गीते सविशेषा रुचिर्विद्यते।

विद्याकेन्द्रभूतैः विश्वविद्यालयैः सह भवतां सुमहान् सम्बन्धोऽपि भावत्कं विद्यानुरागमेव द्रढयति। भवन्तो न केवलं जम्मू-कश्मीर-विश्वविद्यालयस्य, परं काशी-हिन्दू-विश्वविद्यालयस्यापि कुलपतिपदम् अलङ्कुर्वन्ति।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

विपुलवैषम्यसंकुलेऽपि राजनीतिक्षेत्रे भवतां स्थानं सर्वथा सुदृढम् अविचलं च विद्यते। विधानपरिषदा भवन्तः प्रथमं ''सदरे-रियासत''-पदे निर्वाचिताः। द्वितीयनिर्वाचने, तृतीयनिर्वाचने चापि भवतां स्थानं सर्वसम्मतम् अवर्तत। उत्तरदायित्वबहुले अस्मिन् पदे संस्थाय भवद्भिः यत्कार्यं समपादि तन्न कस्यापि अविदितम्। इत्थं सुविशिष्टं गौरवावहं च व्यक्तित्वं स्वमध्ये अधिगत्य वयमद्य महान्तं प्रमोदम् अनुभवामः।

विश्वेश्वरस्येयं नगरी काशी आदिकालत एव विद्यायाः धर्मस्य च केन्द्रभूता आसीद् अस्ति च। प्रायः सर्व एवाचार्याः स्वीयमतस्य पुष्टये काश्याः सम्मत्यर्थम् आगतवन्तः। गौतमबुद्ध-आद्यशङ्कराचार्य-वल्लभाचार्य-चैतन्य-महाप्रभु-रामानन्द-कबीर-रामकृष्णपरमहंसप्रभृतयः सर्वे आचार्याः अत्रागताः, एवं अत्रत्यविद्वद्भिः सह विचारविनिमयं कृतवन्तः।

अयं विश्वविद्यालयः एकनवत्युत्तरसप्तदशशततमे (१७९१) ईसवीये तदानीन्तनब्रिटिशरेजीडेन्टश्रीजीनाथनडंकनमहोदयस्य प्रयासेन अंग्रेज-न्यायाधीशेभ्यो हिन्दूविधिशास्त्रसम्बन्धिव्यवस्थां प्रदातुं राजकीयसंस्कृत-पाठशालारूपेण संस्थापितोऽभूत्। अल्पीयसि एव काले इयं पाठशाला संस्कृतवाङ्मयस्य कृते अस्मिन् देशे एकं मुख्यं संस्थानम् अभवत् तथा षट्पञ्चाशदुत्तरैकोनविंशतिशततमं १९५६ ईसवीयं यावद् राजकीयसंस्कृत-महाविद्यालयरूपेण देशे विदेशे च संस्कृतविद्यालयेभ्यः मान्यतां प्रादात् तथा संस्कृतपरीक्षाणां संचालनम् अकरोत्। नामतो यद्यप्ययं विश्वविद्यालयो नासीत् किन्तु कार्यतः पूर्णरूपेण संस्कृतविश्वविद्यालय एवासीत्।

अष्टपञ्चाशदुत्तरैकोनविंशतिशततमे (१९५८) ईसवीये (द्वाविंशति २२ दिनाङ्के) डॉ.सम्पूर्णानन्दमहोदयस्य मुख्यमन्त्रित्वकाले स संस्कृतमहाविद्यालयः संस्कृतविश्वविद्यालयरूपे पर्यणीयत। अत्र विभागानाम् एकोना विंशतिः, तथाशु एव आयुर्वेद-योगतन्त्रविधिशास्त्राणामपि विभागाः प्रारप्स्यन्ते। सर्वासां विद्यानां मूलभूतानां चतुर्णामपि वेदानाम् अध्ययनार्थं सर्वविधः प्रबन्धोऽत्र विहितो वर्तते। राज्यप्रशासनेन अचिरमेव अग्निहोत्रव्यवस्थार्थम् अनुमतिः प्रदत्ता। सुरभारत्याः विश्वविश्रुतेऽस्मिन् मन्दिरे वयं भवतां स्वागतं व्याहरामः। एवमाशास्महे यद् भवतां राजत्वकाले कश्मीरे संस्कृतवाङ्मयं पुनरपि अतीतं नैजं गौरवं लभेत।

●

CC-0. Sampurnanand University Collection. Digitized by eGangotri

वाराणसेयसंस्कृतविश्वविद्यालये समागतानां श्रीमतां दलाईलामा-महोदयानां कृते साधुवादसमर्पणम् ०४.०१.१९६६ दिनाङ्के

सज्जना:,

अधुना इदं मे परमोचितं पवित्रं च कर्तव्यं यदहं भवतां सर्वेषाम्, अस्य विश्वविद्यालयस्य आत्मनश्च पक्षेण परमादरणीयेभ्यो दलाईलामामहोदयेभ्यो धन्यवादान् अर्पयेयं कृतज्ञतां च ज्ञापयेयम्। एते महानुभावा अस्माकं प्रार्थनां स्वीकृत्य अत्र कृपया समागता आत्मनो महत्त्वपूर्णेन प्रवचनेन सर्वान् अस्मान् सविशेषमुपकृतवन्तश्च। एभिः स्वकीये गभीरे भाषणे धर्मस्य नैतिकताया आचारस्य अध्यात्मिकतायाश्च ये सारभूता सन्देशा दत्तास्ते मानवजीवनस्य उन्नायका मानवताया: प्राणभूताश्च। तेषामुपदेशानां संसारस्य राष्ट्रैः यदि पालनं, जनजीवने व्यापकरूपेण निष्ठापूर्वकम् अवतारणं च क्रियेत, तदा भोगवादमूलकानां सांसारिकसंघर्षाणां निराकरणं, जने जने मैत्रीभावनाया: संवर्द्धनं च नूनं स्यात्।

अस्माकमयं ध्रुवो विश्वास: यत् सत्यस्य, तपसः, त्यागस्य, धर्मस्य, नैतिकतायाश्च विजयोऽवश्यम्भावी। नास्ति स समयो दूरे यदा संसारो मानवस्य एषु सद्गुणेषु आकृष्टः सन् दलाईलामासदृशानां महामान्यपुरुषाणां स्वनेतृत्वेन वरणं करिष्यति, भगवतो बुद्धस्य तदीयाया जन्मभूमेर्भारतस्य च पन्थानमनुसृत्य आत्मनो वास्तवं कल्याणं च करिष्यति। एभिरेव शब्दैरहं धन्यवादप्रदानेन कृतज्ञताज्ञापनेन च परममान्यानां दलाइलामामहाभागानां सभाजनं करोमि। अहमेतेषां तेभ्य: परिकरपुरुषेभ्योऽपि धन्यवादान् दित्सामि यैरेतैः सार्द्धं समागत्य अस्माकम् उत्साहोऽभिवर्द्धितः। सर्वेभ्यो भवद्भ्य: पारिषद्भ्योऽपि अहं साधुवादान् प्रदित्सामि यतो भवद्भिः अत्रागमनेन धार्मिकाध्यात्मिकप्रवचनेऽभिरुचिदर्शनेन च स्वकीये कर्तव्यमार्गेऽस्माकं निष्ठाया अभिवृद्धिः कृता। अन्ते पुनरहं भवतां सर्वेषां पक्षेण आत्मनो व्यक्तिगतेन च पक्षेण माननीयेभ्यो मुख्यातिथिभ्यो धन्यवादान् समर्पयामि।

●

वाराणसेय-संस्कृत-विश्वविद्यालये तन्त्रसम्मेलने शुभाशंसनम्

सज्जना:,

एकस्याः सुविस्तृतायाः सांस्कृतिकपरम्पराया उत्तराधिकारी भारतीयैः प्राप्तो विद्यते। अतो देशस्य जागरणसमकालमेव साम्प्रतिकसांस्कृतिकक्षेत्रे

CC-0. Sampurnanand University Collection. Digitized by eGangotri

परीक्षणसंशोधनपरिष्कारादिषु सावहितमनुध्यानं स्वाभाविकम्। अस्मिन् प्रसङ्गे वैदिकपौराणिकबौद्धादिसाहित्यसंरक्षेणन सह बह्वीनामन्यासामपि संस्कृतीनां परिशीलनस्य प्रशस्तः प्रयत्नो विधीयते। आगमसंस्कृतिरपि भारतस्य बहुमूल्यो निधिः। भारतस्य बाह्याभ्यन्तरजीवनं चिरात्तन्त्रसंस्कृतिप्रभावेणाप्लावितमासीत्। वैदिकतान्त्रिकभेदेन श्रुतिद्वैविध्यं सर्वसम्मतम्। तन्त्रचेतनया न केवलं साधनभूमिरेव प्रभाविता, अपि तु एकं गम्भीरं दर्शनमपि प्रस्तुतम्। किं बहुना, कलाविज्ञानादिव्यावहारिकक्षेत्रस्यापि तन्त्रीकृतत्वं सर्वविदितम्। तन्त्रेषु योग-ज्ञानयोर्गभीरं रहस्यं निहितम्। अस्य महतो देशस्य भाविनीमभ्युन्नतिमभिलक्ष्य आगमानामपि समुद्धारः कस्मैचिन्महते कल्याणायैव कल्पेत।

एतान् मूर्तिमतः शुभसङ्कल्पानास्थायैव वाराणसेयसंस्कृतविश्वविद्यालये देशस्य प्रकाण्डविदुषां महामहोपाध्यायानां श्रीमतां पण्डितश्रीगोपीनाथ-कविराजमहोदयानामाध्यक्ष्ये योगतन्त्राख्यस्यैकस्य स्वतन्त्रस्य विभागस्य स्थापना सञ्जाता।

समस्ते देशे तन्त्राणामागमानां च शतसहस्रं ग्रन्थाः परम्पराश्च स्वीयसङ्कुचितसीमाभिराबद्धाः विकीर्णा उपेक्षिताश्च सीदन्ति। परम्पराणां विच्छिन्नतया प्रचाराल्पत्वेन च तन्त्राणां विभिन्नाः शाखा अद्यत्वेपरिचिता अज्ञाताश्च सञ्जाताः। एषां समुन्नयनायेदमावश्यकं यद् विभिन्नेषु प्रदेशेषु निवासिनां तन्त्रशास्त्रविदुषां प्रयोगज्ञानवतां च विपश्चितामेकं सम्मेलनमायोज्येत, ज्ञानकेन्द्रभूतायाः काश्या ऋतेऽन्यत्र एतादृशस्य विद्वत्सम्मेलनस्य नोपयुक्तं स्थानमिति निश्चप्रचम्। काश्यामपि महत्त्वपूर्णस्यास्य आयोजनस्य कृते संस्कृत-विश्वविद्यालय एव उत्तमं स्थानं यत्र सर्वाङ्गशालिनी भारतीयसंस्कृतिरनुक्षणं पूजिता बहुभिः प्रकारैः सम्मानिता च समुल्लसति। इमाः सत्प्रेरणास्तन्त्रसम्मेलनस्य बीजम्।

अधिवेशने समामन्त्रितैर्विद्वद्भिर्लुप्तप्रायाणां तन्त्रविज्ञानशाखाप्रशाखानां प्रामाणिकी सूचना प्राप्ता स्यात्। एषां विदुषां शास्त्रीयविचारविनिमयेन परस्परं चर्चितसाधकबाधकयुक्त्यादिभिश्च उत्तरकालस्य प्रत्यक्षविज्ञानस्य परिशीलनदिङ् निर्धारयितुं शक्येत्। संरक्षणसंवर्धनप्रचारोपायाश्च स्थिरीकर्तुं शक्येरन्। तन्त्रसाहित्यं सुविस्तृतम्। दर्शनसाधनयोः प्रत्येकं क्षेत्रयोर्विपुलो ग्रन्थराशिः सर्वत्र देशे विकीर्णः। यथा बाह्याभ्यन्तरभेदेन साधनाया विभिन्ना भागाः, तथैव द्वैत-द्वैताद्वैत-अद्वैत-परमाद्वैतादिभेदेन दर्शनस्यापि बहवो विभागास्तन्त्रेषु विलसन्ति। अस्य बृहतो वाङ्मयस्य सम्यग् अनुसन्धानाय समुन्नयनाय च सुमहान्

CC-0. Sampurnanand University Collection. Digitized by eGangotri

समारम्भोऽपेक्षितः। अतः प्रथमेऽस्मिन् प्रसङ्गे मा भूदधिकं किञ्चित् किन्तु सामान्यतया किमप्येतादृशं लक्ष्यं तु निर्धारणीयमेव येन लुप्तानां लुप्तप्रायाणां च ग्रन्थानां ग्रन्थांशानां वा समुद्धारो दर्शनसाधनयोर्विभिन्नचिन्तनस्रोतसां समुद्भावनं च स्यादिति। एतादृशोऽपि प्रयत्न आयतीकार्यो येन कलासु विद्यासु च अभिनवा ज्ञानधारा आविर्भवेयुः। गवेषणायाश्चाविच्छिन्नप्रयासेन ज्ञानक्षेत्रमुत्तरोत्तरं प्रसरेत्। सङ्कल्पजातस्यास्य साफल्यं विद्वदायत्तम्।

तन्त्रविदुषामिदं सम्मेलनं सङ्केतितदिशि एको लघुः किन्तु अपेक्षितः प्रयासः। परम्परागतानां विद्याव्रतसम्पन्नानां विदुषां परस्परं सहयोगेन, ज्ञानवृद्धतन्त्रविदामाचार्याणां परिचयसम्पर्कादिभी रुचिसम्पन्नेषु नूतनेषु तन्त्रजिज्ञासुष्वभिनवोत्साहसञ्चारणेन, अपूर्वं किमपि जिज्ञासातृप्तिकरं फलं प्रसविष्यति। एतावदेवात्रेदानीं फलतया परिकल्पनीयम्।

इत्थमेतादृशैरायोजनैर्वयं स्वोद्देश्यसिद्धौ अग्रेऽधिकं शुभोदर्कमधिगच्छेमेति ध्रुवमाशास्ते।

●

संस्कृतविश्वविद्यालये वार्षिकोत्सवे भाषणम्

प्रतिकुलपतिमहोदयाः, आदरणीया विद्वज्जनाः, भविष्णवो विद्यार्थिनो नागरिकाः सभ्याश्च!

अयं सर्वेषामस्माकं विश्वविद्यालयः षट्वर्षाणि निर्विघ्नं साभ्युदयं च परिसमाप्य अद्य सप्तमे वर्षे आत्मनः पदं न्यस्यति।

यद्यपि एतावान् स्वतपःकालः कस्याश्चिदपि विशिष्टसंस्थायाः उद्देश्यपूर्त्तये पर्याप्तो न भवति, अतोऽस्य विश्वविद्यालयस्य लक्ष्यपूर्तिसम्बन्धे किमपि आलोचनं केनापि पक्षेण क्रियमाणं विश्वविद्यालयस्य अनुत्साहाय न भवितुमर्हति। तथापि नूतनवर्षप्रवेशसमये अस्य गतवर्षाणां कार्येषु दृष्टिपातः आत्मपरीक्षायै आवश्यकः, यतो हि विगतकार्याणां पर्यालोचनेन तत्र जातानां त्रुटीनां परिज्ञानं भवति। यासां संशोधनम् अग्रे कर्तुं शक्यते। येन पूर्वतोऽपि अधिकेन परिश्रमेण अधिकतरया निष्ठया च उद्देश्यपूर्तेः दिशि प्रवृत्तिः सम्पद्यते। इत्थं च यदि वयं विश्वविद्यालयेन अद्यावधि कृतानि कार्याणि समीक्षामहे तदा स्वप्रयत्नस्योपरि गर्वपूर्णः कश्चन प्रमोदो न जायते, यतो हि अयं विश्वविद्यालयः नाम्ना विधानेन च नवीनः सन्नपि भूतपूर्वकाशिक-

CC-0. Sampurnanand University Collection. Digitized by eGangotri

राजकीयसंस्कृतमहाविद्यालयस्य अत्यन्तं समृद्धायां विश्वप्रतिष्ठतायां च पीठिकायां संस्थापितः। अत एव अस्य पृष्ठे महती परम्परा विद्यते यस्याः साहाय्येन एतावति स्वल्पेऽपि काले एतस्माद् विश्वविद्यालयात् महतां कार्याणां निष्पत्तिः जनैः आशास्यते।

अस्मिन् विश्वविद्यालये विद्यमानः सरस्वतीभवनपुस्तकालयः संस्कृतवाङ्मयस्य सर्वासां शाखानां बहुमूल्यैः हस्तलिखितग्रन्थराशिभिः सुसम्पन्नो विद्यते। अतस्तेषां समेषां गवेषणपूर्णेन परिशीलनेन नूतनानां ज्ञानानां प्रकाशः अनेन विश्वविद्यालयेनावश्यं कर्तव्यः। 'सारस्वती सुषमा' या विश्वविद्यालयस्यानुसन्धानपत्रिकारूपेण प्रकाश्यते तत्रापि अनुसन्धानपत्रिकात्वेन यथा स्वीकर्तुं शक्यते तथा प्रयत्नकरणम् अत्यावश्यकम्।

विश्वविद्यालये ये विद्वांसः अध्यापनकर्मणि साम्प्रतं नियुक्ताः सन्ति तैः राजकीयसंस्कृतमहाविद्यालयस्य सुप्रतिष्ठितानां पण्डितश्रीबालशास्त्रिपण्डित-शिवकुमारमिश्रप्रभृतीनां महाविदुषाम् अपूर्वं पाण्डित्यं चरित्रं च स्मृत्वा तथा प्रयतनीयं यथा तेषु ततोऽपि विशिष्टं वैदुष्यं चरित्रबलं च सम्पद्यते। येन तैः सर्वैः अध्याप्यमानाश्छात्राः ज्ञानचरित्रयोरुभयोरेव सम्बन्धे समुचितां प्रेरणां प्राप्य भारतस्य सुयोग्याः नागरिकाः भवितुं शक्नुयुः।

अद्य एतत् सूचयतो मे महान् हर्षो भवति यद् विश्वविद्यालयोऽयं शिक्षायाः केवलं ज्ञानपक्षमेव न लक्ष्यीकरोति, अपि तु क्रियापक्षमपि। फलतो अग्निहोत्रव्यवस्था अचिरमेव प्रारप्स्यमाना विद्यते। पूर्वं काश्यां प्रायः प्रतिवीथि वैदिकगृहे अग्निहोत्राणि भवन्ति स्म। परं दुर्भाग्याद् बहोः कालात् प्रचलितानीमानि समाप्तप्रायतां गतानि। अतः विश्वविद्यालस्यायमुपक्रमोऽतीव-श्लाघनीयः विद्यते। एकः अपरोऽपि विषयः विज्ञापितः सन् भवतां हर्षाय कल्पिष्यते। स चायं यद् विश्वविद्यालयेन प्राच्यपाश्चात्त्यविधिशास्त्राणां तुलनात्मकाध्यापनप्रबन्धः शीघ्रमेव करिष्यमाणो विद्यते। अनेन कार्येण धर्मशास्त्राणाम् अध्ययने सजीवता सफलता च भविष्यतीति प्रत्याशा।

●

CC-0. Sampurnanand University Collection. Digitized by eGangotri

लघु-ग्रन्थमाला

[७२]

पद्मश्रीपण्डितश्रीरघुनाथशर्मप्रणीतः

श्रीरामस्तवः

सम्पादकः

प्रो. नरेन्द्रनाथपाण्डेयः

आचार्योऽध्यक्षश्च

प्राचीनराजशास्त्रार्थशास्त्रविभागस्य

सम्पूर्णानन्द-संस्कृत-विश्वविद्यालये

वाराणस्याम्

वाराणस्याम्

वि.सं. २०६८

CC-0. Sampurnanand University Collection. Digitized by eGangotri

CC-0. Sampurnanand University Collection. Digitized by eGangotri

भावविवृतिः

श्रीरामस्तवो वाङ्मय्याः सपर्यायाः कस्यचन प्रयासस्य मूर्तरूपेण वर्तमानः—

एतद्ध्यातुरचित्तानामिच्छतामकुतोभयम् ।
भवाम्भोधिप्लवो दृष्टो हरिचर्यानुवर्णनम् ।।

इति श्रीमद्भागवतीयव्यासोक्तिं स्मारयन् शृण्वतां पठताञ्च रसज्ञानां मनांस्यावर्जयन् भगवन्तं श्रीसीताजानिमपि अक्षिगोचरं कर्तुं मनो निबध्नाति तच्चरणसरसिजे, मनसिजञ्च निरुणद्धि बाधकभूतमिति कलौ भवसिन्धुप्लवरूपतां भजति।

अयं सुकल्पः प्लवः श्रुतिपुराणेतिहासादिपर्यालोचनया निःसृतेन केनापि सारभूतेन तत्त्वेन कविमनःसंस्कृतेन निर्मितः श्रद्धया भक्तिपूर्वकं पठ्यमानो मनोवैकल्यशमनपुरःसरं चित्तैकाग्र्यं भगवति रतिञ्च प्रयच्छति। भगवद्रत्या च जगदभिलाषुकत्वं पूर्णतया समाप्तिमेति, तेन च भगवतः स्फुरणाद् अमन्दानन्दसन्दोहरूपचिदेकरसस्य भगवतो विस्फुरणार्थम् अपेक्षितं विषयस्फुरणं निरुद्धं भवतीति महत्त्वातिशयं न केवलमस्यैव स्तोत्रस्य, अपि तु सम्पूर्णस्यापि स्तोत्रवाङ्मयस्य वक्तुं सुशकम्।

पितृचरणैरेतस्य स्तवस्याविष्कारो यशोऽधिगन्तुं प्रयोजनान्तरं वोद्दिश्य न कृतः, अपि तु शिवेतरक्षतिपूर्वकं शिवनुतेर्भगवतो रामस्य भक्तप्रसादसुमुखस्य चतुर्भुजस्य द्विभुजस्य वा दर्शनार्थं कृत इति तेषां मुहुर्मुहुः क्रोशनेन प्रमाणान्तरनिरपेक्षेण सूच्यते। एतत्प्रसङ्गे तेषामियमुक्तिः—

अरिघ्नं सिंहसङ्काशं कदा द्रक्ष्यामि राघवम्।
लक्ष्मणञ्च धनुष्पाणिं छाताद्द्वारमुपागतम्।।

उक्त्यन्तरञ्च—

कठिनं हृदयं राम! क्षात्रधर्माश्रितस्य ते।
यदेवं क्रोशते मह्यं प्रतिवाचो ददासि नो।।

उदाहर्तुं शक्यम्।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

अत्र श्लोकयोः प्रयुक्ताः शब्दा न केवलम् अल्पप्रयासेन कण्ठताल्वाद्यभिघातेनोत्पन्नाः, अपि तु विशदाशयस्य भावप्रवणचेतसोऽनायासनिःसृता मन्दं मन्दं भक्तिभावमाकलयन्ति पठतां मनःसु।

जीवनस्य चरमे वयसि वर्तमानानामेषां मनोभावं विगाह्य भक्ताभीष्टपूरकेण अनन्यशरणेन भक्तवाञ्छाकल्पद्रुमेण भगवता लक्ष्मणभ्रात्रा रामनवम्यां प्राकट्यदिवसे मध्याह्ने सभ्रातृकस्य स्वस्याविष्करणं कृतं स्तोत्रनुत्यनन्तरम्। धृतबालविग्रहौ द्वावपि भ्रातरौ रयलयानेन सरयूस्नानार्थं गच्छतां पितृपादानां चक्षुषोर्गोचरतां प्राप्तौ। सामान्यबालकाविव दृश्यमानौ तौ निगूढतेजसावपि श्रीरामचक्षुःस्राविप्रकाशपुञ्जेन पितृपादानां नेत्रयोरुपरि पतितेन परिचायितौ परस्परालापस्याप्यवसरं दत्तवन्तौ। अनेकजन्मार्जितप्राक्तनपुण्यवशाद् भक्तेरुद्रेकाच्चानुग्रहाद्भगवत एतादृशोऽवसरः प्रायो भक्तैर्लभ्यते युगे युगे। तथ्यमिदम्—

परित्राणाय साधूनां विनाशाय च दुष्कृताम्।
धर्मसंस्थापनार्थाय सम्भवामि युगे युगे।।

इति भगवद्गीतावचनं पोषयति। अत्र प्रयोजनत्रयम् अवतारकृते उक्तं भगवता। तत्र साधूनां परित्राणं दुष्कृतां विनाशपूर्वकमेव भवति चेत्, दुष्कृतां विनाशेनैव साधुपरित्राणस्य गतार्थत्वात् प्रयोजनत्रयं न प्रदर्शनीयं भगवता। अतो भगवद्वचनस्य सङ्गतिर्यथा स्यात् तदर्थं साधूनां परित्राणार्थं किमपि उद्देश्यमेतादृशं वक्तव्यं येन असङ्कीर्णता स्यात् तथा प्रयोजनत्वमपि तस्य स्फुटं स्यात्। अतः साधूनां परित्राणं न केवलमसाधूनां विनाशादेव भवति, अपि तु भगवच्चरितानामनुध्यानेन साधूनां परित्राणं भवतीति स्वीकर्तव्यम्। इदमेव च वास्तवं प्रयोजनम्, अन्यथा खलनिग्रहस्तु भगवच्चक्रादिनाऽपि कर्तुं शक्यः। यथा अम्बरीषप्रसङ्गे बलिप्रसङ्गे च सुदर्शनचक्रस्य चर्यया प्रमाणितं भवति। चक्रमेव दुर्वाससोऽम्बरीषं रक्षति विपक्षाँश्च बलेर्वारयति। तदेव चक्रं भगवत्तेजसाऽऽप्यायितं समस्तान् भक्तान् रक्षितुं समर्थं वर्तते चेत् किं चक्रं प्रेरयितुं भगवान् अवतरति। इदं स्वीकर्तुं न शक्यते यतः एकदा भगवता प्रेरितमेव चक्रम् अम्बरीषं रक्षति चेत् तथैव सर्वत्रापि वक्तुं शक्यते। अतो भगवतो लीला साधूनां परित्राणार्थं भवतीति स्वीकर्तव्यम्। तदर्थमेव भगवान् विग्रहमाविष्करोति द्विभुजं चतुर्भुजमष्टभुजं वा।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

अत एवोच्यते श्रीमद्भागवते—

शृण्वन्ति गायन्ति गृणन्त्यभीक्ष्णशः स्मरन्ति नन्दन्ति तवेहितं जनाः।
त एव पश्यन्त्यचिरेण तावकं भवप्रवाहोपरमं पदाम्बुजम्।।

साधुपरित्राणकुक्षौ इदं स्तोत्ररचनमपि आयाति, यतो भगवल्लीला यत्र तत्र विस्तीर्णाः समाश्रित्यैव अत्रत्या विभिन्नश्लोका रचिता विद्यन्ते। लीलानां वर्णनं वेदे वेदाङ्गेषु अन्यत्र वा यत्र कुत्रापि भवेत् सर्वतस्तद् गृहीत्वा स्वमनसा परिष्कृत्य स्तोत्रस्य रचनं जातमिति महदिदमस्माकं प्रमोदास्पदम्। मन्ये, अयं स्तवः प्राकाश्यं नीयमानो विदुषां लेखकवर्याणां विद्यापाकवशान्निष्पन्नोऽस्माकं महते उपकाराय भवति। रामचरितं विभिन्नासु भाषासु स्तोत्ररूपेण, महाकाव्यरूपेण, गद्यात्मकविधया चम्पूसाहित्येऽपि उट्टङ्कितं वर्तते, तेन लेखकवर्याणामयं प्रयासो निष्फलो भवतीति न मन्तव्यम्, यतो हि एतादृशाः स्तवाः स्वात्मतोषाय लिखिता अस्माकं समेषामुपकाराय भविष्यन्तीति विश्वसिमि। अन्ते श्लोकद्वयेन भगवन्तं स्मरन् वाचमुपसंजिहीर्षामि—

रामं कारणविग्रहं श्रुतिनुतं भक्ताभिलाषप्रदं
वाञ्छाकल्पतरुं समस्तजगतां भावैकभूतिं शिवम्।
नानारूपभिदा प्रकाशिततनुं संग्रामधीरं प्रभुं
ब्रह्माशम्भुसुरेशसेव्यमनिशं देवाधिदेवं भजे।।

शेषेऽशेषगुरो भवन्नकरुणस्तोकानि नैव श्रयन्
येषां नास्ति कृपाकरः परतरः किं क्षात्रधर्मे स्थितः।
तन्नो देव विधिं विहाय करुणो रक्षाव्रतं पालयन्
बालान् दोषजुषः पुनीहि कलितो भीतान् स्वभक्तान् प्रभो।।

नरेन्द्रनाथपाण्डेयः

(प्रो. नरेन्द्रनाथपाण्डेयः)
निदेशकः
शिक्षण-शोध-प्रकाशन-संस्थानस्य
सम्पूर्णानन्द-संस्कृत-विश्वविद्यालये

वाराणस्याम्
गुरुपूर्णिमायाम्,
२०६८ तमे वैक्रमाब्दे

CC-0. Sampurnanand University Collection. Digitized by eGangotri

CC-0. Sampurnanand University Collection. Digitized by eGangotri

पद्मश्रीपण्डितश्रीरघुनाथशर्मप्रणीतः

श्रीरामस्तवः

❋❋❋

रामाय रामभद्राय रामचन्द्राय वेधसे।
रघुनाथाय नाथाय सीतायाः पतये नमः॥१॥

यमिह कारुणिकं शरणंगतोऽप्यरिसहोदर आप महत्पदम्।
तमहमाशुहरिं परमाश्रये जनकजाङ्कमनन्तसुखाकृतिम्॥२॥

ध्येयं सदा परिभवघ्नमभीष्टदोहं तीर्थास्पदं शिवविरिञ्चिनुतं शरण्यम्।
भृत्यार्तिहं प्रणतपालभवाब्धिपोतं वन्दे महापुरुष ते चरणारविन्दम्॥३॥

त्यक्त्वा सुदुस्त्यजसुरेप्सितराजलक्ष्मीं धर्मिष्ठ आर्यवचसा यदगादरण्यम्।
मायामृगं दयितयेप्सितमन्वधावद् वन्दे महापुरुष ते चरणारविन्दम्॥४॥

यो निर्गुणोऽप्यमितगौणकदम्बवित्तो यो वीर्यभग्नधनुरुग्ररवैस्त्रिलोकीम्।
विस्मापयन् जनकजामुपवर्ण्य ईशो मां पातु राघवकुलप्रवरः स रामः॥५॥

यो धर्मज्ञो धर्मसेतुः प्रवृत्ते हेतुर्देवः सत्यवाक्यः कृतज्ञः।
दृढव्रतः शुचिचारित्र्यचित्तस्तं चिन्तये सर्वभूतार्तिनाशम्॥६॥

यः सत्यवाक् सत्यसंधश्च विद्वान् समर्थ एकः प्रियदर्शनश्च।
य आत्मवान् योजितक्रोधवेगोऽनसूयकं पुरुषं तं नतोऽस्मि॥७॥

कान्त्या कामं योजयत्येव देवो देवा भीता यस्य रोषे द्रवन्ति।
तं मानवं मनुवंशे प्रजातममानवं पुरुषं सम्प्रपद्ये॥८॥

य इक्ष्वाकोरन्वये संप्रसूतो रामो नाम्ना विश्रुतो यो जनौघैः।
जितस्वान्तोऽनल्पवीर्यो वशी च द्युतिमान् धीरो पातु मां रामभद्रः॥९॥

यो बुद्धिमान् नीतिमान् वाग्विलासैः श्रीमान् शत्रून् वर्हयन्यः प्रतीतः।
पृथुस्कन्धो दीर्घबाहुर्महात्मा कम्बुग्रीवो जयताद् रामभद्रः॥१०॥

CC-0. Sampurnanand University Collection. Digitized by eGangotri

महाहनुर्गूढजत्रुर्महौजा महेष्वासो दमयन् सर्वशत्रून्।
आजानुबाहुः सुललाटः सुमूर्धा सुविक्रमः सर्वदा पातु रामः॥११॥

समो भूतेष्वसमो नैर्ऋतेषु समं विभक्तावयवोऽङ्गकेषु[१]।
सुस्निग्धवर्णः प्रतपन् दुष्टवर्गं पीनोरस्कः पातु मां रामभद्रः॥१२॥

लक्ष्मीकान्तः शुभलक्ष्माभ्युपेतो विशालदृग् धर्मसत्त्योपपन्नः।
यशःशुद्धो ज्ञानसम्पत्समेतः शुचिर्वश्यो जयताद्[२] रामभद्रः॥१३॥

प्रजापतीनां यशसोपमानं धाता प्रजानामविता जीवलोकान्।
य आत्मनश्चात्मजनस्य पाता पाता स्वधर्मस्य स पातु रामः।॥१४॥

यो वेदवेदाङ्गरहस्यविद्वान् धनुर्वेदे निष्ठितः सर्वशास्त्रे।
यस्य स्मृतिः प्रतिभा चाद्वितीया लोकप्रियः सततं पातु रामः॥१५॥

विचक्षणः साधुरदीनचित्तः सद्भिः सदाऽभिगतश्चार्यवृत्तः।
गाम्भीर्ये यः सागरस्योपमानं धैर्ये हिमाद्रेरवताद् रामभद्रः॥१६॥

यः कौसल्यानन्दनो विष्णुवृत्तो यस्य क्रोधे कालवह्निः करालः।
क्षान्त्या क्षमां यस्तिरयत्यभीक्ष्णं स मां देवो रक्षताद् रामभद्रः॥१७॥

त्यागे च यो यक्षपतेः समानः सत्त्ये च धर्मेण समान एकः।
अनन्तकल्याणगुणोपपन्नः स मां भयाद् रक्षतु रामभद्रः॥१८॥

पितुर्निदेशाद् विपिनं व्रजन्तं यं लक्ष्मणो भ्रातरमन्वगच्छत्।
सीता च साध्वी विरहासहिष्णुस्तं रामभद्रं शरणं गतोऽस्मि॥१९॥

यन्नाम चान्ते विवशा गृणन्तः सदा स्मरन्तश्च यदङ्घ्रिपद्मम्।
मृत्योर्भयं नैव विजानते द्राक् तं रामभद्रं शरणं प्रपद्ये॥२०॥

स जयति जीवनिवासः कौसल्याहृदयनन्दनो रामः।
यदुदरविवरविसूतं भुवनमिदं स्थावरञ्च चरम्॥२१॥

---

१. निर्धारणे सप्तमी। प्रशंसायां कन्।
२. मम मन इति शेषः।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

श्रीरामो भुवनेषु विक्रमगुणैः प्राप्तः प्रतिष्ठां परां,
मूढा भाग्यविपर्ययान्न विविदुर्ब्रह्म प्रजातं क्षितौ।
वन्दीवैष यशांसि गायति मरुद् यस्यैकबाणाहति-
श्रेणीभूतविशालताल[1]विवरोद्गीर्णैः स्वरैः सप्तभिः॥२२॥

वनं यास्यन् पौरवर्णैश्च पित्राऽप्यनुद्रुतो दूरतरं प्रयातः।
गङ्गाकूले सरथं सूतमुज्झाञ्चक्रे यस्तं देवदेवं प्रपद्ये॥२३॥

भरद्वाजस्याभ्यनुज्ञामवाप्तो गुहेन यो दर्शिताध्वा प्रयातः।
सम्प्राप्तवान् पर्वतं चित्रकूटं निवासहेतोर्दैवतं तं प्रपद्ये॥२४॥

पितुर्मृतस्यापि निदेशनिष्ठो नैच्छद्राज्यं भरतेनार्थ्यमानः।
न्यासं दत्त्वा पादुके राज्यहेतोर्न्यवर्तयन्तं देवदेवं प्रपद्ये॥२५॥

महारण्यं दण्डकान् सम्प्रविष्टो रक्षोवरं यो विराधं निहत्य।
मुनिं सुतीक्ष्णं शरभङ्गञ्च दृष्ट्वा घटीसुतं भ्रातरञ्चास्य वीक्ष्य॥२६॥

अगस्त्यवाचा धनुरैन्द्रकं यो जग्राह तूणीरमथाक्षयञ्च।
खड्गं निशातं परमप्रहृष्टो नमामि तं राघवमाहतारिम्॥२७॥

यो दण्डकारण्यतपस्विवर्यैः संयाचितो राक्षसनिग्रहाय।
विरूपितां शूर्पणखां विधाय रक्षोविहीनं विपिनं चकार॥२८॥

जनस्थाने विपिने सञ्चरन्तं मायामृगं प्रियया प्रार्थितोऽहन्।
गृध्रं हतं पितृभक्त्योद्दधार कस्तं न दीनः शरणं श्रयेत॥२९॥

यो दण्डके दयितां संविचिन्वन् घोरं रक्षोविकृतं सन्ददर्श।
कबन्धनामानमसह्यवेगं तं तस्य हन्तारमहं प्रपद्ये॥३०॥

यो राघवः शबरीं धर्मशीलां कष्टे मार्गे श्रामणे वर्तमानाम्।
गत्वोद्दधारागमनप्रतीक्षां स मां सदा रक्षतु रामभद्रः॥३१॥

पम्पातीरे सञ्चरन् भ्रातृसार्थो यः सङ्गतो वानरेणानिलेन।
हनूमता श्रुतवृत्तः प्रहृष्टः सख्यं चक्रे सौरिणा सस्पृहेण॥३२॥

---

१. भूतस्यापि प्रसिद्धत्वाद् वर्तमानवद्व्यपदेशः।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

य: सुग्रीवप्रत्ययं संविधास्यन् वपुर्बृहद् दुन्दुभेरप्रमेयम्।
पादाङ्गुष्ठेनैककेन स्मयित्वा चिक्षेपालं दूरतस्तं नतोऽस्मि॥३३॥

य: सरसूनोर्वचनाद् विविक्ते स्थितो नियुद्धे बलिनं जघान।
इन्द्रात्मजं बालिनमन्यसक्तं तं भक्तभीतापनुदं नमामि॥३४॥

यो बालिनं यापयित्वा परत्र राज्यं ताराञ्चार्कये सम्प्रदाय।
सेतुं सिन्धौ वानरै: कारयित्वा प्राप्तो लङ्कां शरणं तं प्रपद्ये॥३५॥

यो रावणं दारहरं तु हत्वा वितीर्य राज्यञ्च विभीषणाय।
सीतां समासाद्य निवृत्तरोषस्तं रोषदग्धारिपुरं प्रपद्ये॥३६॥

रामचन्द्रचरणारविन्दयोरन्तरङ्गचरभृङ्गलीलया।
तत्र सन्ति हि रसाश्चतुर्विधास्तान् यथारुचि सदैव निर्विश॥३७॥

वन्दामहे महोद्दण्डदोर्दण्डौ रघुनन्दनौ।
तेजोनिर्जितमार्तण्डमण्डलौ लोकनन्दनौ॥३८॥

त्रैलोक्यशल्योद्धरणाय सिन्धोश्चकार बन्धं मरणं रिपूणाम्।
पुण्यप्रणामं भुवनाभिरामं रामं विरामं विपदामुपासे॥३९॥

सञ्जीवनं मैथिलकन्यकाया: सौन्दर्यसर्वस्वमहानिधानम्।
शशाङ्कपङ्केरुहयो: समानं रामस्य वन्दे रमणीयमास्यम्॥४०॥

आरण्यकं गृहस्थानं श्वशुरौ यद्रज:कणा:।
स्वयमौद्वाहिकं गेहं तस्मै रामाय ते नम:॥४१॥

वृन्दारका यस्य भवन्ति भृङ्गा मन्दाकिनी यन्मकरन्दबिन्दु:।
तवारविन्दाक्षपदारविन्दं वन्दे चतुर्वर्गचतुष्पदं तत्॥४२॥

नमो रामपदाम्भोजरेणुभ्यो यत्र सन्ततम्।
कुर्वन्ति कुमुदप्रीतिमरण्यगृहमेधिन:॥४३॥

यत्पादपांसुसम्पर्कादहल्याऽऽसीदपांसुला।
कारुण्यसिन्धवे तस्मै नमो वैदेहिबन्धवे॥४४॥

मनसो मम संसारबन्धमुच्छेतुमिच्छत:।
रामचन्द्रपदाम्भोजयुगलं निगडायताम्॥४५॥

CC-0. Sampurnanand University Collection. Digitized by eGangotri

यस्मिन् महीं शासति मानवानां सौख्यं निराबाधमनामयञ्च।
न क्षुद्भयं नाग्निभयं कथञ्चिन्नाद्भ्यो भयं तं नृपतिं प्रपद्ये॥४६॥

यस्यैतदाख्यानमनन्तशक्तेर्गायन्नरः पापभयाद् विमुक्तः।
सपुत्रपौत्रः सगणः परत्र मोमुद्यते शरणं तं प्रपद्ये॥४७॥

चैत्रे मासे कर्कटे लग्नसंस्थे स्वोच्चस्थानेष्वाश्रितेषु ग्रहेषु।
पञ्चस्वेते[१] वाक्यताविन्दुयोगं नक्षत्रे चादित्यके भाति चान्द्रे॥४८॥

मध्यं दिनं गतवत्यर्कबिम्बे तिथौ नवम्यां मीनराशिं गतेऽर्के।
यः कौसल्यां नन्दयन् सम्प्रजातो रामं गुणैरभिरामं प्रपद्ये॥४९॥

विष्णोरर्धं यं महाभागमाहुर्यतः परं नापरमस्ति किञ्चित्।
तं लोकानामाश्रयं श्रीनिवासं भृत्यार्तिहं शरणं सम्प्रपद्ये॥५०॥

विश्वामित्रो यं ययाचे मखार्थं विद्याद्वयं मुनिना ग्राहितो यः।
बलां तथाऽतिबलां सौम्यरूपः स मां भयाद् रक्षतु रामभद्रः॥५१॥

यस्ताटकां नागसहस्रशक्तिं हत्वा वीरः सुगमान् सञ्चकार।
करूषकान् मलदाँश्चैव देशान् स मां भयाद् रक्षतु रामभद्रः॥५२॥

वैश्वामित्रं यज्ञवाटं प्ररक्षन् मारीचं योजनानां विदूरे।
शतं वीरश्चिक्षिपे सस्मितास्यः सुबाहुमाश्वाहतवान् तं प्रपद्ये॥५३॥

कमठपृष्ठकठोरतरं धनुर्जनकजाकरुणेक्षणवीक्षितः।
सपदि वीक्ष्य विनाम्य बभञ्ज यः दहतु मे दुरितं रघुनन्दनः॥५४॥

योऽहल्यां मुनिना विप्रशप्तां पुनर्हल्यां विदधे पादपूताम्।
शिला जाता कामिनी कम्ररूपा स मां पदोः पतितं पातु रामः॥५५॥

यः पश्यतां नृसहस्रायुतानामारोपयल्लीलया शैवचापम्।
धनुर्मध्ये तद् बभञ्जाशु दिव्यं विकर्षतो मे शरणं सोऽस्तु रामः॥५६॥

धनुर्धरं बद्धगोधाङ्गुलित्रमिषुं तथैवेषुधिमादधानम्।
मन्दस्मितालोकविकाशिवक्त्रं रामं भजे मेघमालाभिरामम्॥५७॥

---

१. एति गच्छतीति इत् इत् एव ऐतः तस्मिन् ऐते।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

यः शम्बुकं शूद्रजातं तपन्तं धर्माच्च्युतं धूममधः पिबन्तम्।
जीवातवे ब्रह्मसूनोर्जघान तं दीनबन्धुं शरणं यामि रामम्॥५८॥

यो रावणस्योद्धतविक्रमस्य बधार्थिभिर्देवगणैर्विनूतः।
सनातनो विष्णुरिह प्रजातस्तं रामभद्रं शरणं गतोऽस्मि॥५९॥

यो वीर्यवान् रूपवान्योऽनसूयो यश्चासमः सकले भूमिभागे।
पितुर्गुणैरधिकः शान्तचित्तस्तं भाषिणं मृदुपूर्वं प्रपद्ये॥६०॥

यः शीलवृद्धैर्ज्ञानवृद्धैश्च मान्यो वयोवृद्धैः सततं सेव्यमानः।
अस्त्रग्रामे निपुणो यस्त्रिलोक्यां तं दीनबन्धुं शरणं यामि रामम्॥६१॥

यो बुद्धिमान् मधुरं भाषते यः पूर्वं ब्रूते यः प्रियं वक्ति रामः।
यो वीर्यवान् न च वीर्येण दृप्तस्तं दीनबन्धुं शरणं यामि रामम्॥६२॥

न चानृतं वक्ति बुधो बुधानां वृद्धायुषां सततं सत्करो यः।
प्रजासु रक्तः त्रिजगज्जनानां सदा प्रियः सततं पातु रामः॥६३॥

यस्यावताराः खलनिग्रहार्थाः सतां सदा त्राणकरा भवन्ति।
यन्नाम संश्रुत्य दिशः श्रयन्ते रक्षांसि भीतानि स पातु रामः॥६४॥

सानुक्रोशो जितरोषो जितात्मा गवां द्विजानां हितकृत्परो यः।
दीनानुकम्पी नियतो धर्मवेत्ता शुचिः शुचीनां सततं पातु रामः॥६५॥

कुलोचितां सन्मतिमादधानः क्षात्रं स्वधर्मं बहुमन्यमानः।
कीर्त्या स्वया चेतयन् सर्वलोकान् स पातु मां सततं रामभद्रः॥६६॥

नाकल्याणे निरतो यश्च विद्वान् न वै कथाः कुरुते सद्विरुद्धाः।
समुत्तरं युक्तिभिश्चानुविद्धं सदा ब्रूते शरणं तं प्रपद्ये॥६७॥

यश्चारोगस्तरुणः साधुरेको वाग्मी वक्ता देशकालौ समीक्ष्य।
लोके नृणां सारवेत्ताऽप्यगर्वो गेयैर्गुणैः सततं पातु रामः॥६८॥

सम्यग् विद्याव्रतयोः स्नातको यः साङ्गं वेदं वेत्ति सर्वं यथावत्।
इष्वस्त्रे यो जनकञ्चातिशेते दीनं द्विजं सततं पातु रामः॥६९॥

यः कल्याणाभिजनः साधुवृत्तः सत्त्यार्जवाभ्यामनुरक्तलोकः।
वृद्धैर्द्विजैरर्थधर्मौ दिशद्भिः प्रशिक्षितः सततं पातु रामः॥७०॥

CC-0. Sampurnanand University Collection. Digitized by eGangotri

यश्चादीनो धर्मकामार्थतत्त्वं वेत्ता स्मृतिप्रतिभाभ्यामुपेतः।
लोके सतां समये यः प्रगल्भः सदाचारे कृतकल्पोऽवतान्नः॥७१॥

विशारदो निभृतो गुप्तमन्त्रो गूढाकारो यः सहायैरुपेतः।
यस्यामोघौ रोषहर्षौ प्रतीतौ स मां सदा प्रणतं पातु रामः॥७२॥

यस्त्यागे संग्रहे कालविज्ञः स्थिरप्रज्ञो दृढभक्तिर्गुरौ यः।
नासद्ग्राही दुर्वचो नैव रामो निस्तन्द्रिं तं शरणं सम्प्रपद्ये॥७३॥

निजं दोषं परदोषं च वेत्ता स्वीयं धर्मं सेवते सर्वदा यः।
लोकान् सतां वर्त्म समादिशन्तं तं कौशल्यानन्दनं सम्प्रपद्ये॥७४॥

यः शास्त्रज्ञः कृतविद्यश्च वीरो यो वीराणामन्तरं वेत्ति धीरः।
यः प्रग्रहानुग्रहयोर्यथावद् विचक्षणस्तं शरणं सम्प्रपद्ये॥७५॥

यः सङ्ग्रहे सज्जनानां प्रसक्तो ग्रहे कराणां निग्रहे चासतां यः।
आयक्रियाणां विधि विद् व्ययानां निर्धारितानां विधिवद्विधिज्ञः॥७६॥

श्रैष्ठ्यञ्च शास्त्रेषु समेष्ववाप्तो व्यामिश्रकेषु प्रतिपन्नबुद्धिः।
धर्मार्थकामान् परिसेवमानो न चालसस्तं शरणं प्रपद्ये॥७७॥

विहारसंगीतकलाविधिज्ञो यः सञ्चितार्थं विविनक्ति विद्वान्।
आरोहणे विनये चैव युक्तं [1]गजार्वतां शरणं सम्प्रपद्ये॥७८॥

यो धनुर्वेदविद्याविदामुत्तमो योऽतिवित्तो रथान् सम्मतो यः क्षितौ।
योऽभियाता प्रहर्ता च सेनानयान् वेत्ति तं देवदेवं प्रभुं संश्रये॥७९॥

क्रुद्धैः सुरासुरगणैरपि यो न धृष्यः संग्राममूर्धनि शुचिस्मितशोभिवक्त्रः।
यो नाभ्यसूयति जनान् जितरोषदोषोऽदृप्तः समामवतु राघववंशदीपः॥८०॥

नो मत्सरी न च तिरस्कृतिकृज्जनानां कालस्य नैव वशगश्च मतस्त्रिलोके।
बुद्ध्या बृहस्पतिसमः क्षमया क्षितेर्यो वीर्येण शक्रमपि यो विनतं करोति॥८१॥

लोकस्य वृद्धिमभिकाङ्क्षति लोकरक्तो लोकञ्च रञ्जयति यः स्वकृतैः सुरम्यैः।
सर्वांश्च भूतनिवहाननुकम्पते यः स मां सदाऽवतु ककुत्स्थकुलप्रदीपः॥८२॥

---

१. गजवाजिनाम् इत्यर्थः।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

सर्वत्र वर्षति घनोदितवृत्तकान्तो वीर्येण वासवयमौ यमयत्यभीक्ष्णम्।
यो वै मतो गुरुसमो धृतिमान् धराभृद् धन्यः स मामवतु राघववंशदीपः॥८३॥

दिव्यैर्गुणैः शक्रसमस्तु गीतो यः सत्यविक्रान्तिविशेषवित्तः।
इक्ष्वाकुवंश्यानतिरोचमानो मां पातु रामो भुवनाधिनाथः॥८४॥

लोकेषु यः सत्यधर्मानुवर्ती परः पुमान् विदितः सर्वलोकैः।
साक्षाद् यतः श्रीश्च धर्मश्च जातौ तं राघवेयं[1] प्रणतोऽस्मि रामम्॥८५॥

प्रह्लादनो यः प्रजानां प्रकृष्टैश्चान्द्रैर्गुणैः क्ष्मां विजेता क्षमातः।
बुद्ध्या गुरोस्तुल्य उदारवीर्यः समः शचीशस्य स पातु रामः॥८६॥

यो धर्मज्ञः सत्यसन्धश्च वित्तो यः शीलवान् अनसूयो जनानाम्।
शान्तः सदा सान्त्वयिता प्रजानां जितेन्द्रियः सततं पातु रामः॥८७॥

स्निग्धः कृतज्ञः स्थिरचित्तो मृदुर्यः सदा भव्यो प्रियमेव प्रवक्ता।
सत्यं वक्ता योऽनसूयो द्विजानां स मां भयाद् रक्षतु रामभद्रः॥८८॥

बहुश्रुतानां द्विजपुङ्गवानां जराजीर्यद्वपुषां यः समेता।
विद्याव्रतस्नात उदारचित्तः सदा प्रगल्भः परिपातु रामः॥८९॥

साङ्गान् वेदान् निपुणं यो हि वेत्ता गान्धर्वेयः प्रथमो भाति भूमौ।
यः कल्याणाभिजनः साधुवृत्तो न दीनचेताः सततं पातु रामः॥९०॥

महामतिर्यो विनीतो विनीतैर्द्विजैः श्रेष्ठैर्धर्मकामार्थविज्ञैः।
सलक्ष्मणः सगरं यो हि गत्वा नैवाजित्वाऽऽवर्तते तं नतोऽस्मि॥९१॥

यो वै प्रजानां व्यसनेषु दुःखी सुखी सदा सकलेषूत्सवेषु।
महेश्वासो वृद्धसेवी जितात्मा सत्त्याग्रही सततं पातु रामः॥९२॥

स्मितं कृत्वा भाषते यश्च नित्यं धर्मं श्रितः सर्वदा सर्वभावैः।
सम्यग्योक्ता श्रेयसां नैव रामः काश्चित्कथाः कुरुते विग्रहस्यं॥९३॥

परं परं भाषते युक्तिपूर्वं सुभ्रूः सदा स्वायतताम्रनेत्रः।
योऽसौ साक्षाद् विष्णुरेवामरेशः स लोकवन्द्यः शरणं मेऽस्तु रामः॥९४॥

---

१. राघवाणां इः (लक्ष्मीः) राघवेः तां याति राघवेयरतमित्यर्थः।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

शौर्यं वीर्यं विक्रमं चादधानः प्रजापालने रागरोषाद् विमुक्तः।
योऽसौ शक्तो भूर्भुवः स्वर्नियन्तुं दीनस्य मे शरणं सोऽस्तु रामः।।९५।।

यस्य क्रोधो नैव यस्य प्रसादो लोके जनैर्विफलः क्वापि दृष्टः।
हन्त्येव यो नियमाद् बध्यमीशो न चावध्ये प्रसरत्यस्य कोपः।।९६।।

युनक्त्यर्थैस्तमसौ यत्र तुष्टो रुष्टस्तु तैर्वियुनक्त्येव तञ्च।
दान्तैः प्रजाकान्तगुणैर्निकामं विरोचितं संश्रये रामभद्रम्।।९७।।

लोकेषु विख्यातपराक्रमो यो दीर्घौ दोषौ भजते रामभद्रः।
आजानुबाहुः सुशिरा भद्रमालो महासत्त्वो मदमत्तेभयातः।।
चन्द्राननो यः प्रियदर्शनश्च रूपौदार्यप्रशमैश्चित्तहारी।।९८।।

तं तापतप्तां जनतां ह्लादयन्तं वामे श्रिया सीतया सेव्यमानम्।
तडित्वन्तं वारिवाहं क्षिपन्तं स्वया भासा शरणं यामि रामम्।।९९।।

यः 'कामरोषप्रभवाणि नित्यं मनोभवानि व्यसनानि हित्वा।
प्रत्यक्षया वर्त्तते विट्सुवृत्त्या परोक्षया चापि स पातु रामः।।१००।।

यस्मिन् नारीशतसाहस्रकाणां परीवादश्चोपजीविव्रजानाम्।
ज्ञातीनां वाऽप्यवादो न दृष्टस्तमार्यगृह्यं प्रणतोऽस्मि रामम्।।१०१।।

यः सान्त्वयन् सर्वभूतानि रामः स्वान्तेन शुद्धेन प्रियैर्वचोभिः।
जग्राह पौरान् विषयस्थितांश्च स मे गतिर्भविता रामभद्रः।।१०२।।

सत्त्येन योजितवान् लोकपूगान् दानेन दीनाँश्च रघुप्रवीरः।
गुरून् जिग्ये परया सेवया यो स मे गतिर्भविता रामभद्रः।।१०३।।

यः संगरे धनुषा शात्रवाणां वर्गं जित्वा जितकाशीप्रतीतः।
न विव्यथे विनयच्छन्नगर्वः स मां सदा रक्षतु रामभद्रः।।१०४।।

सत्त्यं दानं मित्रता चार्जवञ्च तपस्त्यागः शौचमेवाभयञ्च।
विद्यागुरूणां परिचर्या च नित्या स मां भयाद् रक्षतु रामभद्रः।।१०५।।

क्षमा यस्मिन् त्याग औदार्यधर्मौ सत्त्यं दमः कृतबुद्धिर्विशिष्टा।
भूताविहिंसा समता प्रियत्वं स मे गतिर्भविता रामभद्रः।।१०६।।

यो ब्रह्मचर्यैर्गुरुभिश्चोपतप्तो व्रतैश्च नानानियमोपपन्नैः।
भोगं तुच्छं गणयामास धीरः स मे गतिर्भविता रामभद्रः।।१०७।।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

यो वै शूरः कृतविद्यश्च रामो जितक्रोधः क्षमया साधुशस्तः।
महाबलः पद्मपत्रायताक्षः स मां भयाद् रक्षतु रामभद्रः॥१०८॥

इन्दीवरश्यामतनुःकपाटवक्षाः सुवृत्तायतबाहुवित्तः।
लोकाभिरामो विपदां विरामः स मां भयाद् रक्षतु रामभद्रः॥१०९॥

यश्च रामं न पश्येत्तु यं च रामो न पश्यति।
निन्दितः स वसेल्लोके स्वात्माऽप्येनं विगर्हते॥११०॥

यस्यारण्यं गन्तुकामस्य दृष्टो वसुन्धरां त्यजतो नैव भेदः।
तमद्भुतं देवकर्मप्रसक्तं लोकातिगं राममहं प्रपद्ये॥१११॥

यस्य श्रीमान् श्रीमतः सत्त्यवक्तुर्जनो विकारं बुबुधे नैव वक्त्रे।
पितुर्निदेशं शृण्वतो यौवराज्ये घोरं वनं गच्छतो वा विशालम्॥११२॥

यः पिङ्गलाय त्रिजटाय गर्गकुलोद्भवाय द्विजपुङ्गवाय।
वनं प्रयास्यन् विततार धेनूः सहस्रमव्यात् सततं स रामः॥११३॥

अनुक्रोशः श्रुतशीले दमश्च शमो दया चानृशंस्यं तपश्च।
यस्मिन् गुणाः षड्भिश्शौचसिद्धाः स मे सदा राघवः शं तनोतु॥११४॥

यो मानवानां मूलभूतो महात्मा महाद्युतिर्धर्मसारः प्रतीतः।
शाखाः पत्रं पुष्पफले परे च स मे रघूणामृषभः प्रसीदतु॥११५॥

यो वा अनाथस्य च दुर्बलस्य तपस्विनो शरणं गतस्य।
गोप्ता शरण्यः सममार्दितस्य भयेन रामः कुशलं करोति॥११६॥

यो न क्रुध्यत्यभिशप्तोऽपि रामो यो वर्जयन् क्रोधनीयान्नि याति।
क्रुद्धाँस्तु यः सान्त्वयत्येव नित्यं स मामदुःखः सततं पातु रामः॥११७॥

कैकेय्या क्लिश्यमाने राज्ञा संचोदितो दण्डकान् यो जगाम।
परित्राता जगतः शाश्वतस्य महाभयाद् रक्षतु रामभद्रः॥११८॥

जीवप्रियं जीवलोकस्य राजा निश्चेतनोऽयापयद् दण्डकेषु।
सत्त्यव्रतं धर्म्यमनुव्रतञ्च यं स मां भयाद् रक्षतु रामभद्रः॥११९॥

यस्मिन् याते दण्डकारण्यकेषु नाहूयनास्माग्निहोत्राणि रामे।
गृहस्थिता नापचन् शोकमूढाः सर्वापणाः पिहिताः शून्यकाश्च॥१२०॥

CC-0. Sampurnanand University Collection. Digitized by eGangotri

सूर्यश्चैवान्तर्हितो नालुलोके नागा दुःखाद् व्यसृजन् ग्रासपिण्डान्।
नादीधपन् वत्सकान् धेनवोऽपि प्रभुः स मां रक्षतु रामभद्रः।।१२१।।

यस्मिन् वनं प्रस्थिते रामभद्रे पुत्रं जातं जननी नाभ्यनन्दत्।
भौमो गुरुश्चन्द्रसूनुस्त्रिशङ्कुः सर्वे ग्रहा दारुणाः सोमजाताः।।१२२।।

यस्मिन् वनं प्रस्थिते रामभद्रे तारा आसन् गतरोचिःप्रभासाः।
सर्वे ग्रहा गततेजोविधूम्रा ध्यायन् सदा शरणं तं प्रपद्ये।।१२३।।

विशाखिका धूमधूम्रा बभूवुश्चकाशिरे नाम्बरे मेघमालाः।
झञ्झावातैस्ताडिता उल्लसन्त्यो महोदधेर्विभ्रमं प्रापुरुग्राः।।१२४।।

दिशः सर्वा व्याकुला अन्धकारैर्ग्रहास्तारा न व्यभासन्त सर्वे।
पौरा जना दैन्यमुपाश्रयन्तो नाहारं चक्रिरे नो विहारम्।।१२५।।

शोकैस्तप्ताः सततं दीर्घमुच्चैः श्वसन्त आर्याः शुशुचुर्भूपमीशम्।
यस्मिन् वने प्रस्थिते रामभद्रे साकेतकास्तं शरणं प्रपद्ये।।१२६।।

सर्वो जनो राजमार्गं प्रयातो बाष्पाप्लुतास्यो न च हृष्टपुष्टः।
शोकेन दीनोऽश्रुपरिप्लुताक्षो यं चिन्तयन् सततं तं प्रपद्ये।।१२७।।

यस्मिन् वनं याति न वाति वायुः शीतो न सोमः प्रियदर्शनश्च।
सूर्यो न भाभिस्तपति त्रिलोकीं सर्वं जगत् परिवृत्तं बभूव।।१२८।।

अनर्थिनो दारका मातृवर्गे दारान्न भर्तार उपाश्रयन्ते।
भ्रातॄन् वा भ्रातरो यस्मिन् वनं प्रस्थिते रामभद्रे।।१२९।।

सर्वे सर्वं सम्परित्यज्य रामं लोकारामं चिन्तयन्तः प्रकामम्।
शोकोद्विग्ना नैव जानन्ति किञ्चित् तं भूतानां सुहृदं सन्नतोऽस्मि।।१३०।।

रामस्य ये सुहृदस्ते विमूढाः शोकार्दिताः शयनं न त्यजन्तः।
यस्मिन् याते मनसा प्रस्थितास्तं मायामनुष्यं हरिमानतोऽस्मि।।१३१।।

येनोज्झिता महतीपूरयोध्या पुरन्दरेणाद्रियुता महीव।
चचाल घोरं भयशोकपीडिता सनागयोधाश्वगणा नमामि तम्।।१३२।।

यः कीर्तिभूतां भ्रमयन् पताकां लोके वनं प्राविशदस्तशत्रुः।
स धर्मसत्यव्रतरानिकामं दीनस्य मे दैन्यमपाकरोतु।।१३३।।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

शौचं वीर्यं यस्य विज्ञाय सूर्यो गात्रं न यस्यातपदुग्रभानुः।
तं देवेशं देवकार्याय यान्तं वनं घोरं शरणं सम्प्रपद्ये॥१३४॥

यं काननेभ्यो निःसृतः पुण्यगन्धः शिवो वातः सेवते स्मानुकूलः।
शीतश्चोष्णो मन्दतामादधानः सुखः स मामवताद् रामभद्रः॥१३५॥

यं रश्मिभिः संस्पृशन् गौरगौरैः शीतैश्चन्द्रोऽच्छादयद् भीतभीतः।
रात्रौ दूर्वा शयने संशयानं रामं भजे विपदां तं विरामम्॥१३६॥

तिमिध्वजस्यात्मजमप्रमेयं हतं दृष्ट्वा वृद्धहर्षो महर्षिः।
ब्रह्मा ददावस्त्रजातं तु दिव्यं तमादिदेवं शरणं यामि रामम्॥१३७॥

यः शूरो नरसिंहः स्वबाह्वोर्बलं श्रयन् दण्डकं वीतशोकः।
असन्त्रस्तोऽरण्यकं सम्प्रविष्टो हर्म्यं यथा शरणं तं प्रपद्ये॥१३८॥

यस्येषुमार्गं समधिश्रयन्तः सर्वे गताः शमनं शत्रुसैन्याः।
यो रुद्रसाहस्रमिलां शशास स मे गतिर्दीनदीनस्य रामः॥१३९॥

यः श्रीसमृद्धः शौर्यवीर्योपपन्नः कल्याणसत्त्वो विनिवृत्तो वनान्तात्।
पित्र्यं राज्यं बुभुजे वीततन्द्रस्तं दीनानां शरणं सम्प्रपद्ये॥१४०॥

प्रभाकरो यस्तु विभाकरस्य वह्नेर्वह्निः शासतां यः प्रशास्ता।
श्रियो यः श्रीः कीर्तिकीर्तिः क्षमायाः क्षमा स मामवताद् रामभद्रः॥१४१॥

यो वै महीं पालयन् राजराजो विदेहराजस्य सुतां श्रियञ्च।
समं भेजेऽनुगतः सर्वलोकैस्तं देवानां दैवतं सम्प्रपद्ये॥१४२॥

यस्मिन् वनं गन्तुमभिप्रवृत्तेऽत्यजन्नास्त्रं दुःखजं सर्वलोकाः।
साकेतकाः शोकवेगाभिभूतास्तं दीनानां शरणं यामि रामम्॥१४३॥

कौशं चीरं संवसन्तं व्रजन्तं वनं घोरमजितं शत्रुवर्गैः।
सीतेव यं पृष्ठतोऽगाच्च लक्ष्मीस्तं देवदेवं शरणं सम्प्रपद्ये॥१४४॥

यो दैवतं दैवतानां च रामो यो भूतानां सत्तमो भूतमेकः।
न यस्य राष्ट्रे वसतो वा पुरे वा प्रियाप्रिये भवतस्तं प्रपद्ये॥१४५॥

वनं यातः पुरतो गातु यस्य धनुर्हस्तो बाणखड्गास्त्रभृच्च।
सौमित्रेयो लक्ष्मणो लक्षणेड्यस्तं दीनानां दैवतं सम्प्रपद्ये॥१४६॥

CC-0. Sampurnanand University Collection. Digitized by eGangotri

योऽयोध्यानिलयानां जनानां पूर्णः प्रियश्चन्द्र इव द्वितीयः।
न याच्यमानोऽपिं निवृत्त आर्यः सत्योत्तीर्णं पितरं तर्तुकामः॥१४७॥

यं ब्रह्मण्यं प्रव्रजन्तं वनाय क्षिप्रं पश्चात्प्रययौ विप्रवर्गः।
स्कन्धारूढा वह्नयोऽपि प्रयातास्तं दीनानां दैवतं सम्प्रपद्ये॥१४८॥

यं वाजपेयप्रभवाणि रामं छत्राणि विप्रैः समुपार्जितानि।
यान्तं वनं छादयन्ति स्म कामं तं वीतमोहं शरणं प्रपद्ये॥१४९॥

यं दण्डकान् प्रस्थितं रामभद्रमनुप्रयान्तो वेदमन्त्रान् स्मरन्तः।
वने वासं रोचयन्ति स्म विप्रा वृद्धास्तस्मै सततं सन्नतोऽस्मि॥१५०॥

यं प्रयान्तमनुगन्तुमशक्ता वायुवेगपरिकम्पितशाखाः।
पादपा निषिषिधुः करकल्पैः पल्लवैस्तमहमाशु नतोऽस्मि॥१५१॥

यं निश्चेष्टाहारसञ्चारभारा वृक्षे वृक्षेऽधिष्ठिताः कम्पिताङ्गाः।
विकूजन्तः करुणं पक्षिसंघान्यवारयन् शरणं तं प्रपद्ये॥१५२॥

चन्द्रेण हीनं गगनं यथैव तोयेन हीनश्च महार्णवं वा।
यस्मिन् पुरा विपिनं सम्प्रविष्टेऽपश्यन् पुरं तं शरणं प्रपद्ये॥१५३॥

यः पूर्णचन्द्रेण समानवक्त्रः श्यामो युवा गूढजत्रुर्निकामम्।
अरिन्दमः पद्मविशालनेत्रो भयात्स मां रक्षतु रामभद्रः॥१५४॥

यः सौमित्रेरग्रजः पूर्वभावी महाबलः सत्यवादी च सौम्यः।
चन्द्रप्रियः सर्वलोकस्य हृद्यो भयात्स मां रक्षतु रामभद्रः॥१५५॥

यो मत्तमातङ्गगतिर्महात्मा लोके पुमान् सिंह इव प्रतीतः।
चरन् वनं घोरघोरन्तु सत्त्वैश्चक्रेऽघोरं शरणं तं प्रपद्ये॥१५६॥

यस्मिन् वनं गहनं सम्प्रविष्टे नष्टज्वालज्वलना पूरयोध्या।
शान्तघोषा नष्टलोकप्रचारा रुदन्नरा शरणं तं प्रपद्ये॥१५७॥

प्रशान्तगीतोत्सवनृत्तवादना व्यपास्तहर्षा पिहितापणोदया।
यस्य प्रयाणे नगरी बभूव सा तमाश्रयेऽहं परमाश्रयं हरिम्॥१५८॥

यस्य प्रसादादवरो निषादयोनिः परापत्सुमहद्यशश्च।
धर्मं तथा विपुलञ्चार्थमग्र्यं तं रामभद्रं शरणं प्रपद्ये॥१५९॥

CC-0. Sampurnanand University Collection. Digitized by eGangotri

यो नैव देवैरसुरैश्च सर्वैः शक्यो विसोढुं युधि पन्नगैश्च।
तं सीतया पल्लवे संशयानं रामं भजेऽहं भुवनाभिरामम्॥१६०॥

यो वै मन्त्रैर्विविधैर्वा तपोभिर्लब्धः श्रमैर्बहुभिर्भूरिभेदैः।
एकः पुत्रः पङ्क्तिरथस्य राज्ञस्तं रामभद्रं शरणं प्रपद्ये॥१६१॥

यस्मिन् वनं प्रव्रजिते पिताऽसौ जहावसून् पुत्रशोकाभितप्तः।
जाता मही विधवा वीतहर्षा तं धीरवीरं शरणं यामि रामम्॥१६२॥

यस्मिन् गते विपिनं रामभद्रे सुखावलोका नगरी रक्तलोका।
राजाघौघैरर्दिता विप्रणष्टा तं रामभद्रं शरणं संप्रपद्ये॥१६३॥

यो लोकपालप्रतिमप्रभाववान् तीर्त्वा महात्मा वरदो महानदीम्।
वत्सान् समृद्धान् प्रययौ विलोकयन् वनं स मां रक्षतु रामभद्रः॥१६४॥

यस्मिन् गते विपिनं पूरयोध्या विनिष्प्रभा शर्वरीवास्तचन्द्रा।
तं धन्विनां धैर्यहरं रघूणां वरं सदा राममहं प्रपद्ये॥१६५॥

विहृत्य ये बर्हिणपूगनादिते शुभे वने वानरवारणायुते।
समं नदीवप्रमुपेत्य सम्मतं निवासमाजग्मुरहं नतोऽस्मि तान्॥१६६॥

यस्मिन् गते विपिनं रामभद्रे सन्तापदुःखेन सुदुःसहेन।
दग्धा पुरी साश्वगजा सपाला सपौरिका तं शरणं प्रपद्ये॥१६७॥

यस्मिन् गते विपिनं रामभद्रे तद्दुःखशोकव्यसनाभितप्ताः।
वृक्षाः सपुष्पाङ्कुरकोरकाढ्या म्लाना मुहुस्तं शरणं प्रपद्ये॥१६८॥

यस्मिन् गते विपिनं रामभद्रे सरांसि तानि खलु पल्वलानि।
तप्तोदकानि प्रबभूवुरीशे तं दैवतं देवतानां प्रपद्ये॥१६९॥

यस्मिन् गते विपिनं रामभद्रे वनावलीशुष्कपलाशवृन्ता।
आरामकायं परिचिन्तयन्तो विपल्लवास्तं शरणं प्रपद्ये॥१७०॥

यस्मिन् गते विपिनं रामभद्रेऽसर्पन्नसत्त्वानि हर्षवन्ति।
व्याला न च प्राचरन् जातशोकास्तं दैवतं देवतानां प्रपद्ये॥१७१॥

यस्य शोकाभिभूतं वनं सत्त्ववद् निश्चलं निःस्वनं जातमेकान्ततः।
तं सदा सर्वभूतानुकम्पापरं यामि रामं विरामं धियां शाश्वतम्॥१७२॥

CC-0. Sampurnanand University Collection. Digitized by eGangotri

पद्मिन्यस्तप्तपद्माः प्रजाता लीना मीना विहगा बद्धवाचः।
नदीजलं कलुषं जातमच्छं लीनानि पद्मानि पयःसु चैव॥१७३॥

यस्मिन् गते विपिनं रामभद्रे जलोद्भवानि स्थलजानि चैव।
पुष्पाणि माल्यान्यपि मन्दगन्धीन्यहं हरिं तं शरणं प्रपद्ये॥१७४॥

यस्मिन् प्रयाते विपिनं बभूवुः शून्यानि लीनद्विजपुङ्गवानि।
उद्यानकान्याशु न चाभिरामा आरामकास्तं शरणं प्रपद्ये॥१७५॥

येन हीनं पुरं प्राविशन्तं पुरा प्रेक्षमाणा रथं निःश्वसन्तो मुहुः।
नाभ्यनन्दन् जना अश्रुपूर्णास्यका राजमार्गं गतास्तं नमामो हरिम्॥१७६॥

हर्म्यवर्यं गताः सौधपृष्ठाश्रिता यद् विहीनं रथं संनिवृत्तं मुहुः।
लोकमान्याः स्त्रियः सभ्यगार्त्तस्वरा अश्रुपूर्णेक्षणाश्चुक्रुशुस्तं नुमः॥१७७॥

यस्य मित्राण्यमित्रा उदासीनका आर्तरूपा विशेषो न संलक्षितः।
यत्परिव्राजनोद्भूतदुःखातुरा भात्ययोध्यापुरी वत्सहीनेव गौः॥१७८॥

अप्रहृष्टा नरा दानहीना गजा नैव चाश्वा महीं दारयन्तः खुरैः।
ह्रेषितैर्हर्षयन्ति स्म पालान् मुहुस्तं प्रपद्ये हरिं सादरं सुन्दरम्॥१७९॥

यं वृत्तदंष्ट्रं महनीयचापं श्यामं युवानं परिलोहिताक्षम्।
आजानुबाहुं मणिकुण्डलाभ्यां स्मरन् पिताऽस्तं गतवान् स मे गतिः॥१८०॥

यद्वियोगोत्थशोको महानर्णवो भूमिकन्यावियोगेन पारातिगः।
श्वासनिःश्वासवीचीमहावर्तको बाष्पफेनोऽश्रुतोयाविलः सर्वतः॥१८१॥

बाहुविक्षेपमीनौघविष्वक्चितः क्रन्दितस्वाननिःश्वानघोरोऽप्रियः।
विप्रकीर्णैः शिरोजैर्महाशैवलः केकयीवाडवोऽध्यश्रुवारिव्रजः॥१८२॥

कुब्जिकावाक्यपूगग्रहैः संकुलो वारवेलातटो रामयानायतः।
दुस्तरो यत्र मग्नो महाभूपतिस्तं श्रयेऽकिञ्चनानां धनं शाश्वतम्॥१८३॥

यस्य दुःखाभितप्तो गुणैर्मोहितो भ्रातृभाग् भूरिभाग्यो जनानां प्रियः।
नैव चैच्छन्महद्राज्यमृद्धं पुरा केकयीपुत्रकस्तं हरिं संश्रये॥१८४॥

यो गतिः सर्वभूताश्च यो दुःखिनां यः सदा बाहुवीर्याश्रयः सत्त्ववान्।
यः स्त्रिया व्राजितो दण्डकान् मन्यते धर्ममेवोन्नतं तं हरिं संश्रये॥१८५॥

CC-0. Sampurnanand University Collection. Digitized by eGangotri

मेघश्यामं दीर्घबाहुं जगत्याः शोकस्यान्तं स्थिरसत्त्वं प्रशान्तम्।
कदाऽऽलोके संस्तुवन् वाग्विरामं रामं स्मरन् मनसा चाभिरामम्॥१८६॥

दृष्ट एव हि नः शोकमपनेष्यति राघवः।
तमः सर्वस्य लोकस्य समुद्यन्निव भास्करः॥१८७॥

यावन्न रामं द्रक्ष्यामि लक्ष्मणं वा महाबलम्।
वैदेहीं वा महाभागां न मे शान्तिर्भविष्यति॥१८८॥

यावन्न चन्द्रसङ्काशं द्रक्ष्यामि शुभमाननम्।
भर्तुः पद्मपलाक्षस्य न मे शान्तिर्भविष्यति॥१८९॥

यावन्न चरणौ भर्तुः पार्थिवव्यञ्जनान्वितौ।
शिरसा धारयिष्यामि न मे शान्तिर्भविष्यति॥१९०॥

सिद्धार्थाः खलु भक्तास्ते ये चन्द्रविमलोपमम्।
मुखं पश्यन्ति रामस्य राजीवाक्षं महाद्युतिम्॥१९१॥

सुभगश्चित्रकूटोऽसौ गिरिराजोपमो गिरिः।
यस्मिन् वसति काकुत्स्थः कुबेर इव नन्दने॥१९२॥

अहं लोकसमाक्रुष्टः पादेष्वद्य प्रसादयन्।
रामस्य निपतिष्यामि सीतायाश्च पुनः पुनः॥१९३॥

यो दण्डकेषु प्रसभं चरन्तं विराधमुग्रायुधशूलहस्तम्।
निहत्य बाणैर्निचखान गर्ते तं रामभद्रं शरणं प्रपद्ये॥१९४॥

यः कोपमाप्तः खलु विक्रमेण वेगं हरेत् सरितो निम्नगायाः।
ताराग्रहर्क्षैर्ललितं नभश्च निपातयेत्तं शरणं गतोऽस्मि॥१९५॥

यो मज्जन्तीं सलिले सागरीये महालये धरणीं सौकरेण।
समुज्जह्रे मनसोऽगम्यरूपस्तं देवानां दैवतं सम्प्रपद्ये॥१९६॥

यो बाणवर्षैर्जलधेस्तु वेलां भित्त्वाऽखिलान् प्लावयितुं समर्थः।
लोकान् समुद्रस्य च मारुतस्य वेगं हरेत् शरणं तं गतोऽस्मि॥१९७॥

रुष्टस्तु यः संहरणे समर्थः सर्वस्य लोकस्य चराचरस्य।
तुष्टः पुनस्तादृशमेव कर्तुं तं रामभद्रं शरणं गतोऽस्मि॥१९८॥

CC-0. Sampurnanand University Collection. Digitized by eGangotri

यत्संकल्पात्प्रभवत्यण्डलक्षं यस्य क्रतोस्तत्र चैवापियन्ति।
यस्मिन् स्थिता अण्डकोषाः सहस्रं तं देवानां दैवतं सम्प्रपद्ये॥१९९॥

यं दुर्दशं गूढमनुप्रविष्टं गुहाहितं गह्वरेष्ठं पुराणम्।
अध्यात्मयोगाधिगमेन देवं मत्वा धीरो हर्षशोकौ जहाति॥२००॥

तं वाचाऽनभ्युदितं मानसेन न वा गतं धरणं लोकसेतुम्।
हेतुं त्रय्या ब्रह्मणश्चैव केतुं रामं भजे भवभीतिं विनेतुम्॥२०१॥

दीर्घबाहुर्विशालाक्षश्चीरकृष्णाजिनाम्बरः।
कन्दर्पसमरूपश्च रामो दशरथात्मजः॥२०२॥

शक्रचापनिभं चापं विकृष्य कनकाङ्गदम्।
दीप्तान् क्षिपति नाराचान् सर्पानिव महाविषान्॥२०३॥

नाददानं शरान् घोरान् न मुञ्चन्तं शिलीमुखान्।
न कार्मुकं विकर्षन्तं रामं पश्यामि संयुगे॥२०४॥

रक्षसां भीमरूपाणां सहस्राणि चतुर्दश।
निहतानि जनस्थाने येनैकेन पदातिना॥२०५॥

अर्धाधिकमुहूर्तेन खरश्च सह दूषणः।
ऋषीणामभयं दत्तं कृतक्षेमाश्च दण्डकाः॥२०६॥

तमहं धीरवीराणां वरं खरनिषूदनम्।
व्रजामि मनसा रामं भवभङ्गाय भूपतिम्॥२०७॥

रामो विग्रहवान् धर्मः साधुः सत्यपराक्रमः।
राजा सर्वस्य लोकस्य देवानां मघवानिव॥२०८॥

जातव्यञ्जनः श्रीमान् पद्मपत्रनिभेक्षणः।
एकवस्त्रधरो धन्वी शिखी कनकमालया॥२०९॥

शोभयन् दण्डकारण्यं प्रदीप्तं स्वेन तेजसा।
योऽदृश्यत तदा रामो बालचन्द्र इवोदितः॥२१०॥

यं महामेघसंकाशो मारीचः स्वर्णकुण्डलः।
धर्षयन् दूरतः क्षिप्तस्तं वन्दे रघुनन्दनम्॥२११॥

CC-0. Sampurnanand University Collection. Digitized by eGangotri

चन्द्रे लक्ष्मीः प्रभा सूर्ये गतिर्वायौ भुवि क्षमा।
एतच्च नियतं सर्वं रामे चानुत्तमं यशः॥२१२॥

यः सुग्रीवप्रियं कर्तुं पम्पायां युधि दुरासदः।
प्राप्तो मात्रा सहायेन विख्यातो रणकर्कशः॥२१३॥

रामः परबलामर्दी युगान्ताग्निरिवोत्थितः।
निवासवृक्षः साधूनामापन्नानां परा गतिः॥२१४॥

आर्तानां संश्रयश्चैव यशसश्चैकभाजनम्।
ज्ञानविज्ञानसम्पन्नो निदेशे निरतः पितुः॥२१५॥

धातूनामिव शैलेन्द्रो गुणानामाकरो महान्।
तं श्रये शरणप्रेप्सुः शरण्यं शूरमर्दनम्॥२१६॥

कुलीनः सत्त्वसम्पन्नस्तेजस्वी चरितव्रतः।
रामः करुणवेदी च प्रजानां च हिते रतः॥२१७॥

सानुक्रोशो महोत्साहः समयज्ञो दृढव्रतः।
इति ते सर्वभूतानि कथयन्ति यशो भुवि॥२१८॥

दमः शमः क्षमा धर्मो धृतिः सत्त्यपराक्रमः।
पार्थिवानां गुणा ह्येते दण्डश्चाप्यपराधिषु॥२१९॥

तान् गुणान् सम्प्रधार्याहमग्र्यं चाभिजनं तव।
अनर्हः करुणायास्ते शरण्यं शरणं गतः॥२२०॥

त्वमप्रमेयश्च दुरासदश्च जितेन्द्रियश्चोत्तमधार्मिकश्च।
अक्षय्यकीर्तिश्च विचक्षणश्च क्षितिः क्षमावान् क्षतजोपमाक्षः॥२२१॥

त्वमात्तबाणासनबाणपाणिर्महाबलः संहननोपपन्नः।
मनुष्यदेहाभ्युदयं विहाय दिव्येन देहाभ्युदयेन युक्तः॥२२२॥

कुलस्य हेतुः स्फीतस्य दीर्घबन्धुश्च राघवः।
अप्रमेयप्रभावश्च स्वयं चाप्रतिमो गुणैः॥२२३॥

प्लवङ्गप्रवरैर्दृष्टः प्लवने कृतनिश्चयः।
वृद्ध्यर्थं यस्य ववृधे मारुतिः स हि पातु माम्॥२२४॥

CC-0. Sampurnanand University Collection. Digitized by eGangotri

रामाय रामभद्राय रामचन्द्राय वेधसे।
रघुनाथाय नाथाय सीतायाः पतयें नमः॥२२५॥

ये रुद्रा वसवो ये च सर्वे तथाऽऽदित्यश्चरते रोचमानः।
यौ चाश्विनौ मरुतो मातरिश्वा नमामि तान् राघवं द्रष्टुकामः॥२२६॥

नमोऽस्तु रामाय सलक्ष्मणाय देव्यै च तस्यै जनकात्मजायै।
नमोऽस्तु रुद्रेन्द्रयमानिलेभ्यो नमोऽस्तु चन्द्रार्कमरुद्गणेभ्यः॥२२७॥

संक्लिष्टोऽयं मयाऽऽत्मा च रामार्थे बहु पालितः।
सिद्धिं दिशन्तु मे सर्वे देवाः सर्षिगणास्त्विह॥२२८॥

ब्रह्मा स्वयंभूर्भगवान् देवाश्चैव दिशन्तु मे।
सिद्धिमग्निश्च वायुश्च पुरुहूतश्च वज्रभृत्॥२२९॥

वरुणः पाशहस्तश्च सोमादित्यौ तथैव च।
अश्विनौ च महात्मानौ मरुतः शर्व एव च॥२३०॥

सिद्धिं सर्वाणि भूतानि भूतानां चैव यः प्रभुः।
दास्यन्ति मम ये चान्ये ह्यदृष्टा ये च गोचराः॥२३१॥

तदुन्नतं पाण्डुरदन्तमव्रणं शुचिस्मितं पद्मपलाशलोचनम्।
लोके तदार्यस्य मुखं कदा न्वहं प्रसन्नताराधिपतुल्यदर्शनम्॥२३२॥

यस्या हेतोर्विशालाक्ष्या हतो बाली महाबलः।
रावणप्रतिमो वीर्ये कबन्धश्च निपातितः॥२३३॥

विराधश्च हतः संख्ये राक्षसो भीमविक्रमः।
वने रामेण विक्रम्य महेन्द्रेणेव शम्बरः॥२३४॥

चतुर्दशसहस्राणि रक्षसां भीमकर्मणाम्।
निहतानि जनस्थाने शरैरग्निशिखोपमैः॥२३५॥

खरश्च निहतः संख्ये त्रिशिराश्च निपातितः।
दूषणश्च महातेजा राघवेण महौजसा॥२३६॥

ऐश्वर्यं वानराणां च दुर्लभं बालिपालितम्।
यस्या निमित्ते सुग्रीवः प्राप्तवान् लोकविश्रुतम्॥२३७॥

CC-0. Sampurnanand University Collection. Digitized by eGangotri

सागरश्च भयाक्रान्तः श्रीमान् नदनदीपतिः।
यस्या हेतोर्विशालाक्ष्याः पुरी चेयं निरीक्षिता।२३८॥

दुहिता धर्मशीलस्य मैथिलस्य महात्मनः।
सीता जनकराजस्य नित्यं भर्तृदृढव्रता॥२३९॥

उत्थितां मेदिनीं भित्त्वा क्षेत्रे हलमुखक्षते।
पद्मरेणुनिभैः कीर्णा शुभैः केदारपांसुभिः॥२४०॥

विक्रान्तस्यार्यशीलस्य संयुगेष्वनिवर्तिनः।
स्नुषा दशस्यन्दनस्य ज्येष्ठा राज्ञो यशस्विनी॥२४१॥

सा प्रिया धर्मशीलस्य कृतज्ञस्य महात्मनः।
यस्य रक्षो वशं याता येन पाता स पातु नः॥२४२॥

नाहं पश्यामि लोकान् त्रीन् नेमान् पुष्पफलद्रुमान्।
एकस्थहृदयः प्रीतो राममेवानुचिन्तये।॥२४३॥

तं पद्मदलपत्राक्षं सिंहविक्रान्तगामिनम्।
धन्याः पश्यन्ति मे नाथं कृतज्ञं सत्त्यवादिनम्॥२४४॥

सर्वथा तेन हीनस्य रामेण विदितात्मना।
तीक्ष्णं विषमिवास्वाद्य दुर्लभं मम जीवितम्॥२४५॥

कीदृशं तु मया पापं पुरा जन्मान्तरे कृतम्।
येनेदं प्राप्यते दुःखं मया घोरं सुदारुणम्॥२४६॥

जीवितं त्यक्तुमिच्छामि शोकेन महतावृतः।
निकृतः पुरुषैर्घोरै रामो नासाद्यते मया॥२४७॥

धिगस्तु खलु मानुष्यं धिगस्तु परवश्यताम्।
न शक्यं यत्परित्यक्तुमात्मच्छन्देन जीवितम्॥२४८॥

धिङ्मामनार्यमशुभं यो रामेण विना कृतः।
मुहूर्तमपि रक्षामि जीवितं पापजीवितः॥२४९॥

ख्यातः प्राज्ञः कृतज्ञश्च सानुक्रोशश्च राघवः।
सद्वृत्तो निरनुक्रोशो जातो मद्भाग्यसंक्षयात्॥२५०॥

CC-0. Sampurnanand University Collection. Digitized by eGangotri

राक्षसानां जनस्थाने सहस्राणि चतुर्दश।
येनैकेन निरस्तानि स किं मां नाभिरक्षति॥२५१॥

विराधो दण्डकारण्ये येन राक्षसपुङ्गवः।
रणे रामेण निहतः स किं मां नाभिरक्षति॥२५२॥

किं तत्कारणं येन स यो दृढपराक्रमः।
एवं दुःखपरामृष्टं मिष्टं नाभ्यवपद्यते॥२५३॥

अचिरेणैव कालेन प्राप्स्यामि स्वमनोरथम्।
दुष्प्रस्थानोऽयमाभाति परेषां मे विपर्ययः॥२५४॥

धन्या देवाः सगन्धर्वाः सिद्धाश्च परमर्षयः।
मम पश्यन्ति ये नाथं रामं राजीवलोचनम्॥२५५॥

अथवा नहि तस्यार्थो धर्मकामस्य धीमतः।
मया रामस्य राजर्षेर्भक्तेन परमात्मनः॥२५६॥

किं वा मय्यगुणाः केचित् किं वा भाग्यक्षयो मम।
योऽहं दीनानुकम्पेन रामेण समुपेक्षितः॥२५७॥

श्रेयो मे जीवितान्मृत्युर्विहीनस्य महात्मनः।
रामादक्लिष्टचारित्राच्छूराच्छत्रुनिबर्हणात्॥२५८॥

सोऽहमेवं गते काले मर्तुमिच्छामि सर्वथा।
न च मे विहितो मृत्युरस्मिन् काले हि वर्तते॥२५९॥

सोऽहं त्यक्तः प्रियार्हेण रामेण विदितात्मना।
प्राणाँस्त्यक्ष्यामि पापस्य कलेर्वशमुपागतः॥२६०॥

पाण्डुरर्षभयुक्तेन रथेनाष्टयुजा स्वयम्।
इहोपयातः काकुत्स्थः सीतया सह भार्यया॥२६१॥

लक्ष्मणेन सह भ्रात्रा सीतया सह वीर्यवान्।
आरुह्य पुष्पकं दिव्यं विमानं सूर्यसन्निभः॥२६२॥

उत्तरां दिशमालोक्य जगाम पुरुषोत्तमः।
एवं स्वप्ने मया दृष्टो रामो विष्णुपराक्रमः॥२६३॥

CC-0. Sampurnanand University Collection. Digitized by eGangotri

नहि रामो महातेजाः शक्यो जेतुं सुरासुरैः।
राक्षसैर्वाऽपि चान्यैर्वा स्वर्गः पापजनैरिव॥२६४॥

लङ्का दृष्टा मया स्वप्ने रावणेनाभिरक्षिता।
दग्धा रामस्य दूतेन वानरेण तरस्विना॥२६५॥

प्रणिपातप्रसन्ना हि मैथिली जनकात्मजा।
अलमेषा परित्रातुं सर्वान्नो महतो भयात्॥२६६॥

दद्यान्न प्रतिगृह्णीयात् सत्त्यं ब्रूयान्न चानृतम्।
अपि जीवितहेतोर्हि रामः सत्त्यपराक्रमः॥२६७॥

आदित्य इव तेजस्वी लोककान्तः शशी यथा।
राजा सर्वस्य लोकस्य देवो वैश्रवणो यथा॥२६८॥

विक्रमेणोपपन्नश्च यथा विष्णुर्महायशाः।
सत्त्यवादी मधुरवाग्देवो वाचस्पतिर्यथा॥२६९॥

रूपवान् सुभगः श्रीमान् कन्दर्प इव मूर्तिमान्।
स्थानक्रोधप्रहर्ता च श्रेष्ठो लोके महारथः॥२७०॥

बाहुच्छायामवष्टब्धो यस्य लोको महात्मनः।
तस्य रामस्य दासोऽहं नात्र कार्या विचारणा॥२७१॥

न चिराद् द्रक्ष्यते रामो लक्ष्मणश्च महाबलः।
मध्ये वानरकोटीनां सुग्रीवश्चामितप्रभः॥२७२॥

रामः कमलपत्राक्षः सर्वभूतमनोहरः।
रूपदाक्षिण्यसम्पन्नः प्रसूतो राघवे कुले॥२७३॥

तेजसाऽऽदित्यसङ्काशः क्षमया पृथिवीसमः।
बृहस्पतिसमो बुद्ध्या यशसा वासवोपमः॥२७४॥

रक्षिता जीवलोकस्य स्वजनस्य च रक्षिता।
रक्षिता स्वस्य वृत्तस्य धर्मस्य च परन्तपः॥२७५॥

रामः सुधामा लोकेऽस्मिन् चातुर्वर्ण्यस्य रक्षिता।
मर्यादानां च लोकस्य कर्ता कारयिता च सः॥२७६॥

CC-0. Sampurnanand University Collection. Digitized by eGangotri

अर्चिष्मानर्चितो नित्यं ब्रह्मचर्यव्रते स्थितः।
साधूनामुपकारज्ञः प्रचारज्ञश्च कर्मणाम्॥२७७॥

राजविद्याविनीतश्च ब्राह्मणानामुपासिता।
श्रुतवान् शीलसम्पन्नो विनीतश्च परन्तपः॥२७८॥

यजुर्वेदविनीतश्च वेदविद्भिः सुपूजितः।
धनुर्वेदे च वेदेषु वेदाङ्गेषु च निष्ठितः॥२७९॥

विपुलांसो महाबाहुः कम्बुग्रीवः शुभाननः।
गूढजत्रुः सुताम्राक्षो रामो नाम्ना जनैः श्रुतः॥२८०॥

दुन्दुभिस्वननिर्घोषः स्निग्धवर्णः प्रतापवान्।
समः समविभक्ताङ्गो वर्णं श्यामं समाश्रितः॥२८१॥

त्रिस्थिरस्त्रिप्रलम्बश्च त्रिसमस्त्रिषु चोन्नतः।
त्रिताम्रस्त्रिषु च स्निग्धो गम्भीरस्त्रिषु नित्यशः॥२८२॥

त्रिवलीमाँस्त्र्यवनतश्चतुर्व्यङ्गस्त्रिशीर्षवान्।
चतुष्कलश्चतुर्लेखश्चतुष्किष्कुश्चतुःसमः॥२८३॥

चतुर्दशसमद्वन्द्वश्चतुर्दंष्ट्रश्चतुर्गतिः।
महोष्ठहनुनासश्च पञ्चस्निग्धोऽष्टवंशवान्॥२८४॥

दशपद्मो दशबृहत् त्रिभिर्व्याप्तो द्विशुक्लवान्।
षडुन्नतो नवतनुस्त्रिभिर्व्याप्नोति राघवः॥२८५॥

सत्त्यधर्मपरः श्रीमान् सङ्ग्रहानुग्रहे रतः।
देशकालविभागज्ञः सर्वलोकप्रियंवदः॥२८६॥

धर्मापदेशात्त्यजतश्च राज्यं सीतामरण्यं नयतः पदार्तिम्।
नासीद् व्यथा यस्य न भीर्न शोकस्तं रामभद्रं शरणं गतोऽस्मि॥२८७॥

न चेश माता न पिता न चान्यः स्नेहाद्विशिष्टोऽस्ति न ते समो वा।
तावत्त्वहं नाथ जिजीविषेयं यावत्कथां ते शृणुयां प्रियस्य॥२८८॥

अहं सुनयनं वल्गु बिम्बोष्ठं चारुकुण्डलम्।
मुखं द्रक्ष्यामि रामस्य पूर्णचन्द्रमिवोदितम्॥२८९॥

CC-0. Sampurnanand University Collection. Digitized by eGangotri

उत्साहः पौरुषं सत्त्वमानृशंस्यं कृतज्ञता।
विक्रमश्च प्रभावश्च सन्त्येते राघवे गुणाः॥२९०॥

चतुर्दशसहस्राणि राक्षसानां जघान यः।
जनस्थाने विना भ्रात्रा भीतः कस्तं न संश्रयेत्॥२९१॥

श्रुता हि गीता बहुभिः पराक्रमा महात्मनस्तस्य रणावमर्दिनः।
न देवगन्धर्वभुजङ्गराक्षसा भवन्ति रामेण समा हि संयुगे॥२९२॥

सङ्कुरुष्वमहोत्साह कृपां मयि नरर्षभ।
त्वयाऽहं नाथवान् नाथ ह्यनाथ इव च स्थितः॥२९३॥

आनृशंस्यं परो धर्मस्त्वदुक्तो हि मया श्रुतः।
जानामि त्वां महावीर्यं महोत्साहं महाबलम्॥२९४॥

अपारपारमक्षोभ्यं गाम्भीर्यात्सागरोपमम्।
भर्त्तारं ससमुद्राया धरण्या वासवोपमम्॥२९५॥

एवमस्त्रविदां श्रेष्ठः सत्त्यवान् बलवानपि।
किमर्थं कलितो भीतं नाथ मां समुपेक्षसे॥२९६॥

न नागा नापि गन्धर्वा नासुरा न मरुद्गणाः।
रामस्य समरे वेगं शक्ताः प्रतिसमाहितुम्॥२९७॥

तस्य वीर्यवतः कश्चिद् यद्यस्ति मयि सम्भ्रमः।
किं न तीव्रेण रोषेण कलिं नयति संक्षयम्॥२९८॥

यदि तौ पुरुषव्याघ्रौ वाय्वग्निसमतेजसौ।
सुराणामपि दुर्धर्षौ किमर्थं मां न पश्यतः॥३९९॥

ममैव दुष्कृतं किञ्चिन्महदस्ति न संशयः।
समर्थावपि तौ यन्मां नावेक्षेते परन्तपौ॥३००॥

इमं मुहूर्तं दुःखानामन्तं द्रक्ष्यामि शोभनम्।
नूनं स पुरुषव्याघ्रो रामो मामभिपद्यते॥३०१॥

क्षिप्रमेष्यति काकुत्स्थो हर्यृक्षप्रवरैर्युतः।
यो मे युधि विजित्यारीन् शोकं व्यपनयिष्यति॥३०२॥

CC-0. Sampurnanand University Collection. Digitized by eGangotri

नहि पश्यामि मर्त्येषु नासुरेषु सुरेषु वा।
यस्तस्य क्षिपतो बाणान् स्थातुमुत्सहतेऽग्रतः।।३०३।।

अप्यर्कमपि पर्जन्यमपि वैवस्वतं यमम्।
स हि सोढुं रणे शक्तो विप्रस्य मम रक्षणे।।३०४।।

रामाद् विशिष्टः कोऽन्योऽस्ति कश्चित्सौमित्रिणा समः।
अग्निमारुतकल्पौ तौ भ्रातरौ मम संश्रयौ।।३०५।।

असह्यानि च दुःखानि वाचश्च हृदयच्छिदः।
मानवानां सुघोराणां त्वां दिदृक्षुः सहे ह्यहम्।।३०६।।

धारयिष्यामि तावत्तु जीवितं शत्रुसूदन।
यावत् त्वद्दर्शनाशा मे हृदये परिवर्तते।।३०७।।

घोरोऽधुना समाजोऽयं दृष्टिश्च न सुखा मयि।
त्वां तु ज्ञात्वा विषज्जन्तं न जीवेयमहं क्षणम्।।३०८।।

इमं च तीव्रं मम शोकवेगं नरैस्तथैतैः परिभर्त्सनञ्च।
ब्रूयात्तु कस्तस्य गतः समीपं यतः शिवः स्यान्मम मोक्षमार्गः।।३०९।।

जयत्यतिबलो रामो लक्ष्मणश्च महाबलः।
राजा जयति सुग्रीवो राघवेणाभिपालितः।।३१०।।

दासोऽहं कोसलेन्द्रस्य रामस्याक्लिष्टकर्मणः।
ब्राह्मणो भवभीमाब्धिं तीर्णः पूर्णमनोरथः।।३११।।

सर्वान् लोकान् सुसंहृत्य सभूतान् सचराचरान्।
पुनरेव तथा स्त्रष्टुं शक्तो रामो महायशाः।।३१२।।

देवासुरनरेन्द्रेषु यक्षरक्षोगणेषु च।
विद्याधरेषु सर्वेषु गन्धर्वेषूरगेषु च।।३१३।।

सिद्धेषु किं नरेन्द्रेषु पतत्रिषु च सर्वतः।
सर्वभूतेषु सर्वत्र सर्वकालेषु नास्ति सः।।३१४।।

यो रामं प्रतियुध्येत विष्णुतुल्यपराक्रमम्।
इत्यहं संप्रधायाशु शरण्यं शरणं गतः।।३१५।।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

देवाश्च दैत्याश्च महोरगाश्च गन्धर्वविद्याधरनागयक्षाः।
रामस्य लोकत्रयनायकस्य स्थातुं न शक्ताः समरेषु सर्वे॥३१६॥

ब्रह्मा स्वयंभूश्चतुराननो वा रुद्रस्त्रिनेत्रस्त्रिपुरान्तको वा।
इन्द्रो महेन्द्रः सुरनायको वा स्थातुं न शक्ता युधि राघवस्य॥३१७॥

श्रुताश्च दृष्टा मुनिभिः पराक्रमा महात्मनस्तस्य रणावमर्दिनः।
न देवगन्धर्वमनुष्यराक्षसाः स्थातुं समर्था युधि राघवस्य॥३१८॥

रामस्य च मया वृत्तं कीर्तितव्यं विजानता।
रामो धर्मभृतां श्रेष्ठो महेन्द्रसमविक्रमः॥३१९॥

प्रणिपातप्रसन्ना हि मैथिली जनकात्मजा।
अलमेषा परित्रातुं सर्वतो महतो भयात्॥३२०॥

न नागा नापि गन्धर्वा नासुरा न मरुद्गणाः।
तव राम रणे शक्तास्तथा प्रतिसमासि तु॥३२१॥

अरिघ्नं सिंहसंकाशं क्षिप्रं द्रक्ष्यामि राघवम्।
लक्ष्मणं च धनुष्पाणिं छाताद्वारमुपस्थितम्॥३२२॥

दद्यान्न प्रतिगृह्णीयात्सत्त्यं ब्रूयान्न चानृतम्।
अपि जीवितहेतोर्हि रामः सत्त्यपराक्रमः॥३२३॥

इमं च तीव्रं मम शोकवेगं भूतैस्तथैतैः परिधर्षणञ्च।
ब्रूयात्तु रामस्य गतः समीपं शिवश्च तेऽध्वाऽस्तु मनःप्रवीर॥३२४॥

सकृदेव प्रपन्नाय तवास्मीति च याचते।
अभयं सर्वभूतेभ्यो दद्याद् रामो न संशयः॥३२५॥

ब्राह्मणोऽहं शुचा दीनो भूतैश्चाप्यवमानितः।
राघवं सर्वभूतानां शरण्यं शरणं गतः॥३२६॥

परित्यक्ता मया काशी मित्राणि च धनानि च।
भवद्गता मे भूमिश्च जीवितं च सुखानि च॥३२७॥

सर्वभूतसखः शूरः श्यामः पद्मनिभेक्षणः।
इक्ष्वाकूणामतिरथो लोके विख्यातपौरुषः॥३२८॥

CC-0. Sampurnanand University Collection. Digitized by eGangotri

यस्मिन्न चलते धर्मो यो धर्मं नातिवर्तते।
यो ब्राह्ममस्त्रं वेदाँश्च वेदवेदविदां वरः॥३२९॥

यो भिन्द्याद्गगनं बाणैः पर्वतानपि दारयेत्।
यस्य मृत्योरिव क्रोधः शक्रस्येव पराक्रमः॥३३०॥

तमहं सर्वभूतानां सर्गस्थित्यन्तकारणम्।
वारणं सर्वविपदां शरण्यं शरणं गतः॥३३१॥

पुत्रो दशरथस्यैष सिंहसंहननो युवा।
दूषणो निहतो येन खरश्च त्रिशिरास्तथा॥३३२॥

नास्ति रामस्य सदृशो विक्रमे भुवि कश्चन।
विराधो निहतो येन कबन्धश्चान्तकोपमः॥३३३॥

वक्तुं न शक्तो रामस्य नरः कश्चिद्गुणान् क्षितौ।
जनस्थानगता येन तावन्तो राक्षसा हताः॥३३४॥

दीर्घवृत्तभुजः श्रीमान् महोरस्कः प्रतापवान्।
धन्वी संहननोपेतो धर्मात्मा भुवि विश्रुतः॥३३५॥

विक्रान्तो रक्षिता नित्यमात्मनश्च परस्य च।
लक्ष्मणेन सह भ्रात्रा कुशली नयशास्त्रवित्॥३३६॥

हन्ता परबलौघानामचिन्त्यबलपौरुषः।
रामो विजयते श्रीमान् शूरः शत्रुनिबर्हणः॥३३७॥

शोको मे विगतः सर्वः कल्याणं मामुपस्थितम्।
ध्रुवं मां भजते लक्ष्मीः प्रियः प्रीतिकरो मम॥३३८॥

न हि मानुषमात्रोऽसौ राघवो दृढविक्रमः।
येन बद्धः समुद्रस्य स सेतुः परमाद्भुतः॥३३९॥

जयत्यतिबलो रामो लक्ष्मणश्च महाबलः।
राजा जयति सुग्रीवो राघवेणाभिपालितः॥३४०॥

दासोऽहं कोसलेन्द्रस्य रामस्याक्लिष्टकर्मणः।
रघुनाथो भवाम्भोधिं लीलया तर्तुमुद्यतः॥३४१॥

CC-0. Sampurnanand University Collection. Digitized by eGangotri

व्यक्तमेव महायोगी परमात्मा सनातनः।
अनादिमध्यनिधनो महतः परमो महान्॥३४२॥

तमसः परमो धाता शङ्खचक्रगदाधरः।
श्रीवत्सवक्षा नित्यश्रीरजय्यः शाश्वतो ध्रुवः॥३४३॥

मानुषं वपुरास्थाय विष्णुः सत्त्यपराक्रमः।
सर्वैः परिवृतो देवैर्वानरत्वमुपागतैः।॥३४४॥

सर्वलोकेश्वरः साक्षाल्लोकानां हितकाम्यया।
सराक्षसपरीवारं रावणं हतवान् विभुः॥३४५॥

कर्ता सर्वस्य लोकस्य श्रेष्ठो ज्ञानवतां वरः।
उपेक्षसे कथं त्वं मां पतन्तं भवसम्प्लवे॥३४६॥

कथं देवगणश्रेष्ठमात्मानं नावबुध्यसे।
ऋतधामा वसुः पूर्वं वसूनां त्वं प्रजापतिः॥३४७॥

त्रयाणां त्वं हि लोकानामादिकर्ता स्वयम्प्रभुः।
रुद्राणामष्टमो रुद्रः साध्यानामसि पञ्चमः॥३४८॥

अश्विनौ चापि ते कर्णौ चन्द्रसूर्यौ च चक्षुषी।
अन्ते चादौ च लोकानां दृश्यसे त्वं परन्तप॥३४९॥

उपेक्षसे कथं त्वं मां मानुषः प्राकृतो यथा।
नैतत्तवोचितं राम शरण्यसमुपेक्षणम्॥३५०॥

भवान्नारायणो देवः श्रीमाँश्चक्रायुधो विभुः।
एकशृङ्गो वराहस्त्वं भूतभव्यसपत्नजित्॥३५१॥

अक्षरं ब्रह्म सत्यञ्च मध्ये चान्ते च राघव।
लोकानां त्वं परो धर्मो विष्वक्सेनश्चतुर्भुजः॥३५२॥

शार्ङ्गधन्वा हृषीकेशः पुरुषः पुरुषोत्तमः।
अजितः खड्गधृग् विष्णुः कृष्णश्चैव बृहद्बलः॥३५३॥

सेनानीर्ग्रामणीश्च त्वं बुद्धिः सत्त्वं क्षमा दमः।
प्रभवश्चाप्ययश्च त्वमुपेन्द्रो मधुसूदनः॥३५४॥

CC-0. Sampurnanand University Collection. Digitized by eGangotri

इन्द्रकर्मा महेन्द्रश्च पद्मनाभो रणान्तकृत्।
शरण्यं शरणं च त्वामाहुर्दिव्या महर्षयः॥३५५॥

सहस्रशृङ्गो वेदात्मा शतजिह्वो महर्षभः।
त्वं त्रयाणां हि लोकानामादिकर्ता स्वयंप्रभुः॥३५६॥

सिद्धानामपि साध्यानामाश्रयश्चासि पूर्वजः।
त्वं यज्ञस्त्वं वषट्कारस्त्वमोङ्कारः परन्तप॥३५७॥

प्रभवं निधनं वा ते न विदुः को भवानिति।
दृश्यसे सर्वभूतेषु ब्राह्मणेषु च गोषु च॥३५८॥

दिक्षु सर्वासु गगने पर्वतेषु वनेषु च।
सहस्रचरणः श्रीमान् शतशीर्षः सहस्रपात्॥३५९॥

त्वं धारयसि भूतानि वसुधाञ्च सपर्वताम्।
अन्ते पृथिव्याः सलिले दृश्यसे त्वं महोरगः॥३६०॥

त्रीन् लोकान् धारयन् राम देवगन्धर्वदानवान्।
अहं ते हृदयं राम जिह्वा देवी सरस्वती॥३६१॥

देवा गात्रेषु रोमाणि निर्मिता ब्रह्मणः प्रभो।
निमेषस्ते भवेद्रात्रिरुन्मेषस्ते भवेद्दिवा॥३६२॥

संस्कारास्तेऽभवन् वेदा न तदस्ति त्वया विना।
जगत्सर्वं शरीरं ते स्थैर्यं ते वसुधातलम्॥३६३॥

अग्निः कोपः प्रसादस्ते सोमः श्रीवत्सलक्षणः।
त्वया लोकास्त्रयः क्रान्ताः पुराणे विक्रमैस्त्रिभिः॥३६४॥

महेन्द्रश्च कृतो राजा बलिं बद्ध्वा महासुरम्।
सीता लक्ष्मीर्भवान् विष्णुर्देवः कृष्णः प्रजापतिः॥३६५॥

वधार्थं रावणस्येह प्रविष्टो मानुषीं तनुम्।
तदिदं च कृतं कार्यं त्वया धर्मभृतांवर॥३६६॥

निहतो रावणो राम त्वयैकेन विनिर्जितः।
अमोघं बलवीर्यं ते अमोघस्ते पराक्रमः॥३६७॥

CC-0. Sampurnanand University Collection. Digitized by eGangotri

अमोघं दर्शनं राम न च मोघस्तव स्तवः।
अमोघास्ते भविष्यन्ति भक्तिमन्तश्च ये नराः॥३६८॥

ये त्वां देवं ध्रुवं भक्ताः पुराणं पुरुषोत्तमम्।
प्राप्नुवन्ति सदा कामानिह लोके परत्र च॥३६९॥

इममार्षं स्तवं नित्यमितिहासं पुरातनम्।
ये नरा कीर्तयिष्यन्ति नास्ति तेषां पराभवः॥३७०॥

न मे स्वर्गो बहुमतः सम्मानश्च सुरर्षिभिः।
त्वया राम विहीनस्य सत्यं प्रतिशृणोमि ते॥३७१॥

एतत्तदुक्तमव्यक्तमक्षरं ब्रह्मनिर्मितम्।
देवानां हृदयं ह्येतद् गुह्यं रामः परन्तपः॥३७२॥

रामस्तवमिमं कृत्स्नं शृण्वतः पठतः सदा।
प्रीयते सततं रामः स हि विष्णुः सनातनः॥३७३॥

आदिदेवो महाबाहुर्हरिर्नारायणः प्रभुः।
साक्षाद् रामो रघुश्रेष्ठः शेषो लक्ष्मण उच्यते॥३७४॥

कुटुम्बवृद्धिं धनधान्यवृद्धिं स्त्रियश्च मुख्याः सुखमुत्तमञ्च।
श्रुत्वा शुभं स्तोत्रमिदं महार्घं प्राप्नोति सर्वां भुवि चार्थसिद्धिम्॥३७५॥

कुशलं नो महाबाहो सर्वत्र रघुनन्दन।
त्वां तु दिष्ट्या कुशलिनं पश्यामो हतशात्रवम्॥३७६॥

दिष्ट्या त्वया हतो राजन् रावणो लोकरावणः।
न हि भारः स ते राम रावणः पुत्रपौत्रवान्॥३७७॥

सधनुस्त्वं हि लोकाँस्त्रीन् विजयेथा न संशयः।
दिष्ट्या त्वया हतो राम रावणो राक्षसेश्वरः॥३७८॥

दिष्ट्या विजयिनं त्वाद्य पश्यामः सह सीतया।
लक्ष्मणेन च धर्मात्मन् भ्रात्रा त्वद्धितकारिणा॥३७९॥

मातृभिर्भ्रातृसहितं पश्यामोऽद्य वयं नृप।
दिष्ट्या प्रहस्तो विकटो विरूपाक्षो महोदरः॥३८०॥

CC-0. Sampurnanand University Collection. Digitized by eGangotri

अकम्पनश्च दुर्धर्षो निहतास्ते निशाचराः।
यस्य प्रमाणाद्विपुलं प्रमाणं नेह विद्यते॥३८१॥

दिष्ट्या ते समरे राम कुम्भकर्णो निपातितः।
त्रिशिराश्चातिकायश्च देवान्तकनरान्तकौ॥३८२॥

दिष्ट्या ते निहता राम महावीर्या निशाचराः।
दिष्ट्या त्वं राक्षसेन्द्रेण द्वन्द्वयुद्धमुपागतः॥३८३॥

देवतानामवध्येन विजयं प्राप्तवानसि।
संख्ये तस्य न किञ्चित्तु रावणस्य पराभवः॥३८४॥

द्वन्द्वयुद्धमनुप्राप्ते दिष्ट्या ते रावणिर्हतः।
दिष्ट्या तस्य महाबाहो कालस्येवाभिधावतः॥३८५॥

मुक्तः सुररिपोर्वीर प्राप्तश्च विजयस्त्वया।
अभिनन्दाम ते सर्वे संश्रुत्येन्द्रजितो वधम्॥३८६॥

अवध्यः सर्वभूतानां महामायाधरो युधि।
विस्मयस्त्वेष चास्माकं तं श्रुत्वेन्द्रजितं हतम्॥३८७॥

दत्त्वा पुण्यामिमां वीर सौम्यामभयदक्षिणाम्।
दिष्ट्या वर्धसि[१] काकुत्स्थ जयेनामित्रकर्शन॥३८८॥

भवान् नारायणो देवश्चतुर्बाहुः सनातनः।
राक्षसान् हन्तुमुत्पन्नो ह्यजय्यः प्रभुरव्ययः॥३८९॥

नष्टधर्मव्यवस्थानां काले काले प्रजाकरः।
उत्पद्यते दस्युवधे शरणागतवत्सलः॥३९०॥

य एष पुरुषः श्यामो हृदि तिष्ठति मामके।
एतेन दानवेन्द्राश्च तथाऽन्ये बलवत्तराः॥३९१॥

वशं नीता बलवता पूर्वे पूर्वतराश्च ये।
बद्धः सोऽहमनेनैवं कृतान्तो दुरतिक्रमः॥३९२॥

---

१. अनुदात्तेल्लक्षणात्मनेपदमनित्यमिति कृत्वा परस्मैपदम्।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

क एनं पुरुषो लोके वञ्चयिष्यति मानवः।
सर्वभूतापहर्ता वै य एष हृदि तिष्ठति॥३९३॥

कर्ता कारयिता चैव धाता च भुवनेश्वरः।
नाहं वेद न भूतानि भूतभव्यभवत्प्रभुः॥३९४॥

कलिश्चैवैष कालश्च सर्वभूतापहारकः।
लोकत्रयस्य सर्वस्य हर्ता स्रष्टा तथैव च॥३९५॥

संहरत्येष भूतानि स्थावराणि चराणि च।
पुनश्च सृजते सर्वमनाद्यन्तं महेश्वरः॥३९६॥

इष्टश्चैव हि दत्तश्च हुतश्चैव न संशयः।
सर्वमेव हि लोकेशो धाता गोप्ता जनार्दनः॥३९७॥

नैवंविधं महद्भूतं विद्यते भुवनत्रये।
मां चैव सर्वभूतानि ये चान्ये पूर्ववत्तराः॥३९८॥

नेता ह्येतद् महद्भूतं पशुं रशनया यथा।
वृत्रो दनुः शुकः शम्भुर्निशुम्भः शुम्भ एव च॥३९९॥

कालनेमिश्च प्राह्लादिः क्रूरो वैरोचनो मृदुः।
यमलार्जुनौ च कंसश्च कैटभो मधुना सह॥४००॥

त्वयैव निहता एते राम नैवात्र संशयः॥४०१॥

प्रादुर्भावं विकुरुते येनैतन्निधनं नयेत्।
पुनरेवात्मनात्मानमधिष्ठाय स तिष्ठति॥४०२॥

एवं त्वयैव देवेन दानवेन्द्रा महात्मना।
ते हि सर्वे क्षयं नीता बलिनः कामरूपिणः॥४०३॥

समरे च दुराधर्षाः श्रूयन्ते येऽपराजिताः।
तेऽपि नीता महद्भूताः कृतान्तबलचोदिताः॥४०४॥

प्रह्लादस्य समुत्पन्ने वादे लोकभयङ्करः।
सर्ववर्यस्य वीरस्य साधोरतुलतेजसः॥४०५॥

CC-0. Sampurnanand University Collection. Digitized by eGangotri

उत्पन्नो दैवतश्रेष्ठो नृसिंहाकृतिरूपधृक्।
तस्य रूपं परं दृष्ट्वा क्षुब्धं सर्वमशेषतः।।४०६।।

तत उद्धृत्य बाहुभ्यां नखैर्निन्ये यमक्षयम्।
एष तिष्ठति चित्तस्थो वासुदेवो निरञ्जनः।।४०७।।

इन्द्राणां च सहस्राणि सुराणामयुतानि च।
ऋषीणां चैव मुख्यानां शतान्यब्दसहस्रशः।।४०८।।

वशं नीतानि सर्वाणि य एष हृदि तिष्ठति।
एनं शरणमायामि सर्वभूतमहेश्वरम्।।४०९।।

त्वं त्रैलोक्यविधाता च हरिर्नारायणः प्रभुः।
अनन्तः कपिलो विष्णुर्नरसिंहो महाद्युतिः।।४१०।।

क्रतुधामा सुधर्मा च पाशहस्तो भयानकः।
द्वादशादित्यसदृशः पुराणपुरुषोत्तमः।।४११।।

नीलजीमूतसंकाशः सुरनाथः सुरोत्तमः।
ज्वालामाली महाबाहो योगी भक्तजनप्रियः।।४१२।।

त्वं हि धारयसे लोकान् त्वमेव सृजसे प्रभुः।
त्वं हि संहरसे चैव कालो भूत्वा महाबलः।।४१३।।

त्वं हि यज्ञश्च याज्यश्च चक्रायुधधरो हरिः।
सर्वदेवमयश्चैव सर्वभूतमयस्तथा।।४१४।।

सर्वलोकमयश्चैव सर्वज्ञानमयस्तथा।
सर्वरूपी महारूपी बलदेवो महाभुजः।।४१५।।

वीरहा वीरचक्षुष्मान् त्रैलोक्यगुरुरव्ययः।
त्वां वै मुनिगणाः सर्वे चिन्तयन्तीह मोक्षिणः।।४१६।।

य एनं वेत्ति पुरुषं न स पापैर्विलिप्यते।
स्मृत्वा स्तुत्वा तथेष्ट्वा च सर्वमस्मादवाप्यते।।४१७।।

अथ रुद्रमन्त्रः—

नमस्ते देवदेवेश सुरासुरनमस्कृत।
भूतभव्यमहादेव हरिपिङ्गललोचन।।१।।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

बालस्त्वं वृद्धरूपी च वैयाघ्रवसनच्छद।
अर्चनीयोऽसि देव त्वं त्रैलोक्यप्रभुरीश्वरः॥२॥

हरो हरितनेत्रश्च युगान्तदहनोऽनलः।
गणेशो लोकशम्भुश्च लोकपालो महाभुजः॥३॥

महाभागो महाशूली महादंष्ट्री महेश्वरः।
कालश्च बलरूपी च नीलग्रीवो महोदरः॥४॥

देवान्तगस्तपोऽन्तश्च पशूनां पतिरव्ययः।
शूलपाणिर्वृषः केतुर्नेता गोप्ता हरो हरिः॥५॥

जटी मुण्डी शिखण्डी च लकुटी च महायशाः।
भूतेश्वरो गणाध्यक्षः सर्वात्मा सर्वभावनः॥६॥

सर्वगः सर्वहारी च स्रष्टा च गुरुरव्ययः।
कमण्डलुधरो देवः पिनाकी धूर्जटिस्तथा॥७॥

माननीयश्च ओंकारो वरिष्ठो ज्येष्ठसामगः।
मृत्युश्च मृत्युभूतश्च पारियात्रश्च सुव्रतः॥८॥

ब्रह्मचारी गुहावासी वीणापणवतूणवान्।
अमरो दर्शनीयश्च बालसूर्यनिभस्तथा॥९॥

श्मशानवासी भगवानुमापतिरनिन्दितः।
भगस्याक्षिनिपाती च पूष्णो दशननाशनः॥१०॥

ज्वरहर्ता पाशहस्तः प्रलयः काल एव च।
उल्कामुखोऽग्निकेतुश्च मुनिर्दीप्तो विशाम्पतिः॥११॥

उन्मादो वेपनकरश्चतुर्थो लोकसत्तमः।
वामनो वामदेवश्च प्राक्प्रदक्षिणवामनः॥१२॥

भिक्षुश्च भिक्षुरूपी च त्रिजटी कुटिलः स्वयम्।
शक्रहस्तप्रतिष्टम्भी वसूनां स्तम्भनस्तथा॥१३॥

ऋतुर्ऋतुकरः कालो मधुर्मधुरलोचनः।
वानस्पत्यो वाजसनो नित्यमाश्रमपूजितः॥१४॥

CC-0. Sampurnanand University Collection. Digitized by eGangotri

जगद्धाता च कर्ता च पुरुषः शाश्वतो ध्रुवः।
धर्माध्यक्षो विरूपाक्षस्त्रिधर्मा भूतभावनः॥१५॥

त्रिनेत्रो बहुरूपश्च सूर्यायुतसमप्रभः।
देवदेवोऽतिदेवश्च चन्द्राङ्कितजटस्तथा॥१६॥

नर्तको लासकश्चैव पूर्णेन्दुसदृशाननः।
ब्रह्मण्यश्च शरण्यश्च सर्वजीवमयस्तथा॥१७॥

सर्वतुर्यनिनादी च सर्वबन्धविमोक्षकः।
मोहनो बन्धनश्चैव सर्वदानिधनोत्तमः॥१८॥

पुष्पदन्तो विभागश्च मुख्यः सर्वहरस्तथा।
हरिश्मश्रुर्धनुर्धारी भीमो भीमपराक्रमः॥१९॥

ब्रह्मप्रोक्तमिदं पुण्यं नामाष्टशतमुत्तमम्।
सर्वपापहरं पुण्यं शरण्यं शरणार्थिनाम्॥
जप्तमेतत् शुभं स्तोत्रं कुर्यात् शत्रुविनाशनम्॥२०॥

न ह्यन्यो देवदेवेश त्वदृते मधुसूदन।
गतिः परायणं चापि त्रैलोक्ये सचराचरे॥४१८॥

त्वं हि नारायणः श्रीमान् पद्मनाभः सनातनः।
त्वयेमे स्थापिता लोकाः शक्रश्चैव सुरेश्वरः॥४१९॥

त्वया सृष्टमिदं सर्वं त्रैलोक्यं सचराचरम्।
त्वामेव भगवन् सर्वे प्रविशन्ति युगक्षये॥४२०॥

वीर सौम्य प्रबुध्यस्व कौसल्याप्रीतिवर्धन।
जगद्धि सर्वं स्वपिति त्वयि सुप्ते नराधिप॥४२१॥

विक्रमस्ते यथा विष्णो रूपं चैवाश्विनोरिव।
बुद्ध्या बृहस्पतेस्तुल्यः प्रजापतिसमो ह्यसि॥४२२॥

क्षमा ते पृथिवी तुल्या तेजसा भास्करोपमः।
वेगस्ते वायुना तुल्यो गाम्भीर्यमुदधेरिव॥४२३॥

CC-0. Sampurnanand University Collection. Digitized by eGangotri

अप्रकम्प्यो यथा स्थाणुश्चन्द्रे सौम्यत्वमीदृशम्।
नेदृशाः पार्थिवाः पूर्वं भवितारो नराधिप॥४२४॥

यथा त्वमसि दुर्धर्षो धर्मनित्यः प्रजाहितः।
न त्वां जहाति कीर्तिश्च लक्ष्मीश्च पुरुषर्षभ॥४२५॥

श्रीश्च धर्मश्च काकुत्स्थ त्वयि नित्यं प्रतिष्ठितौ।
त्वं नागशयने सुप्तो हरिर्नारायणः पुरा॥४२६॥

त्वं हि सर्वगतो देवः सूक्ष्मोऽव्यक्तः सनातनः।
त्वया सर्वमिदं व्याप्तं त्रैलोक्यं सचराचरम्॥४२७॥

त्वं भूमौ दिवि पाताले पर्वतेषु वनेषु च।
स्थावरेषु च सर्वेषु नदीषु नगरीषु च॥४२८॥

ओंकारश्चैव सत्त्यश्च सावित्री पृथिवी तथा।
धराधरधरो देवो ह्यनन्त इति विश्रुतः॥४२९॥

अहश्च रात्रिश्च उभे च सन्ध्ये दिवाकरश्चैव यमश्च सोमः।
त्वमेव कालो ह्यनिलोऽनलश्च त्वं ब्रह्मरुद्रेन्द्रवपुस्त्वमापः॥४३०॥

विद्योतसे ज्वलसि भासि च पासि लोकान् सृजस्यथो संहरसि प्रशास्सि।
क्रीडां करोष्यव्ययलोकनाथो विष्णुः पुराणो भवनाशकैकः॥४३१॥

नीलोत्पलदलश्यामः किञ्जल्कारुणवाससा।
प्रावृट्काले विभासि त्वं सतडित्तोयदो यथा॥४३२॥

श्रीमान् मेघवपुःश्यामः शुभः पङ्कजलोचनः।
श्रीवत्सेनोरसा राजन् शशाङ्कशुभदर्शनः॥४३३॥

तव नित्यं शरीरस्था मेघस्येव शतह्रदा।
संग्रामरूपिणी लक्ष्मीर्देहमावृत्य तिष्ठति॥४३४॥

न शक्यस्त्वं सुरैर्द्रष्टुं नासुरैर्न च पन्नगैः।
यस्य प्रसादं कुरुषे स वै त्वां द्रष्टुमर्हति॥४३५॥

नहि यज्ञफलैस्त्वं वै न तपोभिस्तु संचितैः।
शक्यसे भगवन् द्रष्टुं ज्ञाननिर्दग्धकिल्विषैः॥४३६॥

CC-0. Sampurnanand University Collection. Digitized by eGangotri

कृते युगे व्यतीते वै मुखे त्रेतायुगस्य तु।
हितार्थं देवमर्त्यानां भविता नृपविग्रहः।।४३७।।

इक्ष्वाकूणाञ्च यो राजा भाव्यो दशरथो भुवि।
तस्य सूनुर्महातेजा रामो नाम भविष्यति।।४३८।।

महातेजा महाबुद्धिर्महाबलपराक्रमः।
महाबाहुर्महासत्त्वः क्षमया पृथिवीसमः।।४३९।।

आदित्य इव दुष्प्रेक्ष्यः समरे शत्रुभिस्सदा।
भविता हि तदा रामो नरो नारायणः प्रभुः।।४४०।।

पितुर्नियोगात्स विभुर्दण्डके विविधे वने।
विचरिष्यति धर्मात्मा भ्रात्रा सह महामनाः।।४४१।।

तस्य पत्नी महाभागा लक्ष्मीः सीतेति विश्रुता।
छायेवानुगता रामं निशाकरमिव प्रभा।।४४२।।

शीलाचारगुणोपेता साध्वी धैर्यसमन्विता।
सहस्रांशो रश्मिरिव ह्येका मूर्तिरवस्थिता।।४४३।।

भवान्नारायणो देवः शङ्खचक्रगदाधरः।
शार्ङ्गपद्मायुधो वज्री सर्वदेवनमस्कृतः।।४४४।।

श्रीवत्साङ्को हृषीकेशः सर्वदेवाभिपूजितः।
पद्मनाभो महायोगी भक्तानामभयप्रदः।।४४५।।

वधार्थं रावणस्य त्वं प्रविष्टो मानुषीं तनुम्।
किं न वेत्सि त्वमात्मानं यथा नारायणो ह्यहम्।।४४६।।

मा मुह्यस्व महाभाग स्मर चात्मानमात्मना।
गुह्याद् गुह्यतरस्त्वं तु ह्येवमाह पितामहः।।४४७।।

त्रिगुणश्च त्रिवेदी च त्रिधामा च त्रिराघव।
त्रिकालकर्मन् त्रैविद्य त्रिदशारिप्रमर्दन।।४४८।।

त्वयाऽऽक्रान्तास्त्रयो लोकाः पुराणैर्विक्रमैस्त्रिभिः।
त्वं महेन्द्रानुजः श्रीमान् बलिबन्धनकारणात्।।४४९।।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

अदित्यगर्भसंभूतो विष्णुस्त्वं हि सनातनः।
लोकाननुग्रहीतुं त्वं प्रविष्टो मानुषीं तनुम्॥४५०॥

सीता लक्ष्मी महाभागा संभूता वसुधातलात्।
त्वदर्थमिह चोत्पन्ना जनकस्य गृहे शुभे॥४५१॥

स्नेहो मे परमो राम त्वयि तिष्ठतु नित्यदा।
भक्तिश्च नियता वीरभावोनान्यत्र गच्छतु॥४५२॥

यावद्रामकथा वीर चरिष्यति महीतले।
तावच्छरीरे तिष्ठन्तु प्राणा मम न संशयः॥४५३॥

यच्चैतच्चरितं दिव्यं कथा ते रघुनन्दन।
तन्ममाचार्यवर्या मे श्रावयेयुर्नरर्षभ॥४५४॥

तच्छ्रुत्वाऽहं ततो वीर तव चर्यामृतं प्रभो।
उत्कण्ठां संहरिष्यामि मेघलेखामिवानिलः॥४५५॥

ममापि पद्मपत्राक्षं सिंहोरस्कं कृशोदरम्।
त्वरति हि मनो द्रष्टुं रामं रमयतां वरम्॥४५६॥

दृश्यते न च कार्यार्थी रामे राज्यं प्रशासति।
न कश्चिदब्रवीत्तत्र मम कार्यमिहाद्य वै॥४५७॥

नाधयो व्याधयश्चैव रामे राज्यं प्रशासति।
पक्वसस्या वसुमती सर्वौषधिसमन्विता॥४५८॥

न बालो म्रियते तत्र न युवा न च मध्यमः।
धर्मेण शासितं सर्वं न च बाधा विधीयते॥४५९॥

सर्वभूतशरण्याय रामायाक्लिष्टकर्मणे।
भयेष्वभयदात्रे च तस्मै वक्तुं समुत्सहे॥४६०॥

प्रवेष्टुं नात्र शक्नोमि धर्मो विग्रहवान् नृपः।
सत्यवादी रणपटुः सर्वसत्त्वहिते रतः॥४६१॥

षाड्गुण्यस्य पदं वेत्ति नीतिकर्ता स राघवः।
सर्वज्ञः सर्वदर्शी च रामो रमयतां वरः॥४६२॥

CC-0. Sampurnanand University Collection. Digitized by eGangotri

स सोमः स च मृत्युश्च स यमो धनदस्तथा।
वह्निः शतक्रतुश्चैव सूर्यो वै वरुणस्तथा॥४६३॥

राजा शास्ता हि सर्वस्य त्वं विशेषेण राघव।
त्रैलोक्यस्य भवान् शास्ता देवो विष्णुः सनातनः॥४६४॥

सुराणामसुराणाञ्च प्रधानस्त्वं मतो मम।
बृहस्पतेश्च शुक्राच्च विशिष्टोऽसि महाद्युते॥४६५॥

परावरज्ञो भूतानां कान्त्या चन्द्र इवापरः।
दुर्निरीक्ष्यो यथा सूर्यो हिमवाँश्चैव गौरवे॥४६६॥

सागरश्चैव गाम्भीर्ये लोकपालो यथा ह्यसि।
क्षान्त्या धरण्या तुल्योऽसि शीघ्रत्वे ह्यनलोपमः॥४६७॥

गुरुस्त्वं सर्वसम्पन्नः कीर्तियुक्तश्च राघव।
अमर्षी दुर्जयो जेता सर्वास्त्रविधिपारगः॥४६८॥

शृणुष्व मम वै राम विज्ञाप्यं नरपुङ्गव।
भवाम्भोधौ भ्रमन्नित्यं नानाविभ्रमसंयुतः॥४६९॥

यदृच्छंयाद्य त्वां प्राप्तो दुःखशोकसमन्वितः।
अविद्वान् कर्शितः क्लेशैर्मामुद्धर दयानिधे॥४७०॥

त्वं तु सर्वमयो देवो नारायण इवापरः।
या च ते सौम्यता राजन् सम्यक् प्रणिहिता विभो॥४७१॥

समं चरसि चान्विष्यते न सोमांशको भवान्।
क्रोधे दण्डे प्रजानाथो दाने पापभयापहः॥४७२॥

दाता हर्ताऽसि गोप्ताऽसि तेनेन्द्र इव नो भवान्।
अधृष्यः सर्वभूतेषु तेजसा चानलोपमः॥४७३॥

अभीक्ष्णं तपसे लोकाँस्तेन भास्करसन्निभः।
साक्षाद् वित्तेशतुल्योऽसि अथवा धनदाधिकः॥४७४॥

वित्तेशस्येव पद्मा श्रीर्नित्यं ते राजसत्तम।
धनदस्य तु कार्येण धनदस्तेन नो भवान्॥४७५॥

CC-0. Sampurnanand University Collection. Digitized by eGangotri

समः सर्वेषु भूतेषु स्थावरेषु चरेषु च।
शत्रौ मित्रे च ते दृष्टिः समतां याति राघव॥४७६॥

धर्मेण शासनं नित्यं व्यवहारविधिक्रमात्।
यस्य कुप्यसि वै राम तस्य मृत्युर्विधावति॥४७७॥

गीयसे तेन वै राम यम इत्यतिविक्रमः।
यश्चैष मानुषो भावो भवतो नृपसत्तम॥४७८॥

मायामयः स विज्ञेयो नैव सत्त्यः कदाचन।
अनाथानां च भूतानां नाथस्त्वं रघुसत्तम॥४७९॥

अतस्त्वां शरणं यामि मम दुःखमपानुद् ॥४८०॥

त्वं हि नारायणः श्रीमान् त्वयि सर्वं प्रतिष्ठितम्।
त्वं प्रभुः सर्वदेवानां पुरुषस्त्वं सनातनः॥४८१॥

भरणे हि भवान् शक्तः फल्गूनां महतामपि।
त्वं हि शक्तस्तारयितुं सेन्द्रानपि दिवौकसः॥४८२॥

मुहूर्तमपि राम त्वां येऽनुपश्यन्ति केचन।
पाविताः स्वर्गभूताश्च पूज्यास्ते त्रिदिवेश्वरैः॥४८३॥

ये च त्वां घोरचक्षुर्भिः पश्यन्ति प्राणिनो भुवि।
हतास्ते यमदण्डेन सद्यो निरयगामिनः॥४८४॥

ईदृशस्त्वं रघुश्रेष्ठ पावनः सर्वदेहिनाम्।
भुवि त्वां कथयन्तो हि सिद्धिमेष्यन्ति राघव॥४८५॥

यो वाराहीं दुःखदावाग्निदग्धां समाश्वस्तां विदधे भूतभर्ता।
यश्चक्रे स्वं भागरूपैश्चतुर्भिर्नराकारैराप काकुत्स्थगेहम्॥४८६॥

तं देवानां दैवतं वै खलानां वधोद्योगे सततं संप्रवृत्तम्।
गवाक्रन्दे भूसुराणां हितार्थे मायामयं विग्रहं संदधानम्॥४८७॥

अनादिमीशं परमं परायणं, पुराणमग्र्यं पुरुषं महान्तम्।
निरुद्धसर्वेन्द्रियवृत्तिराश्वहं व्रजामि रामं शरणं शरण्यम्॥४८८॥

CC-0. Sampurnanand University Collection. Digitized by eGangotri

य ऊनाब्दे षोडशे वर्तमानो मुनेर्दुरापं समवाप्य चास्त्रम्।
रक्षन् ऋषेर्यज्ञवाटं महान्तं महाबलौ ताडकेयौ जघान॥४८९॥

ततो गच्छन् कुतुकी चाप ऐशे तीर्त्वा गङ्गां प्राप्तवान् यो विशालाम्।
मुनेः पत्नीं दुर्गतां यो ह्यहल्यां हल्यां चक्रे तमहं सम्प्रपद्ये॥४९०॥

यः सायं संप्राप मौनेन सार्धं वाटं क्रतोर्मैथिलस्यार्यवृत्तः।
आरोपयन् धनुरैशं बभञ्ज प्रतिध्वानैर्यस्य लोकश्चकम्पे॥४९१॥

यो बभञ्जाद्भुतं शैवचापं पुरा जानकीञ्चोपयेमे मुदासंयुतः।
तं विदेहाङ्गणे सस्मितं सुस्थितं पौरनारीभिरावेष्टितं संभजे॥४९२॥

यः समादाय सीतां पथि प्रस्थितो भार्गवं कोपरक्तं निजग्राह यः।
यः समारोप्य चापे शरं वैष्णवे राम लोकान्निजघ्ने हरिं तं भजे॥४९३॥

य उत्तराणां किल कोसलानां राज्याय पित्रा गुरुणा नियुक्तः।
नैच्छन्महामानवगीतकीर्तिः प्रियं करिष्यन् भरतस्य मातुः॥४९४॥

तं सर्वदेवाग्रजमासुरीणां गण्डस्थलीपत्रविकारसारम्।
राह्वङ्गनालिङ्गनकापहारं भजे भवाब्धेः परपारतारम्॥४९५॥

यश्चित्रकूटे भरताय राज्यं निक्षेपरूपेण रघुप्रवीरः।
ददौ युगं पादुकयोश्च शास्तृ तं देवदेवं शरणं प्रपद्ये॥४९६॥

यश्चित्रकूटे परिशङ्कमानः पुनः पुनश्चागमनं नराणाम्।
साकेतकानां गहनं प्रविष्टः सङ्गं जिहीर्षुः खलु दण्डकानाम्॥४९७॥

तं ताडकाताडकमप्रमेयवीर्यं भरद्वाजविगीतकीर्त्तिम्।
सुरासुराणां चरकाचराणां शरण्यमीशं शरणं प्रपद्ये॥४९८॥

यो दण्डकेषु प्रचरन् प्रवीरो विराधमारात्पथि वर्तमानम्।
निहत्य तद् दर्शितमार्ग ईशस्तपोधनं शरभङ्गं प्रयातः॥४९९॥

तद्दर्शिताध्वा कलशीतनूजं तद्भ्रातरं द्रष्टुमगस्त्यमागात्।
ऐन्द्रं धनुश्चाक्षयबाणतूणी अवाप्य याम्यान्तु दिशं जगाम॥५००॥

पञ्चावट्यां पञ्चवट्यां सदारः कुटीं पर्णैः कारयित्वानुजेन।
रेवां रेमे गाहमानस्त्रिसन्ध्यं मौनं वृत्तं सेवमानो मनस्वी॥५०१॥

CC-0. Sampurnanand University Collection. Digitized by eGangotri

तत्रावसन् काम्यरूपोपपन्नां वृषस्यन्तीं भगिनीं रावणस्य।
नासाकर्णौ छेदयित्वा विरूपां चक्रेऽनुवाकेतयित्वाऽनुजेन॥५०२॥

तं निर्गुणं सर्वगुणोपपन्नमपाणिपादं बहुवक्त्रनेत्रम्।
सहस्रमूर्धानमनन्तरूपं प्रभुं प्रपद्ये नयनाभिरामम्॥५०३॥

यः खरं दूषणं च त्रिमूर्धं पुरः संचरन्तं रणे कालपाशावृतम्।
मौनमानद्वयात्तैः सहस्रैर्भटैर्वेष्टितं संजघानाशु तं संश्रये॥५०४॥

यः प्रियाप्रार्थितो हैममायामयं रङ्कुमग्रेचरन्तं द्रुतं प्रद्रुतम्।
अन्वधावत् पिनाकीव सज्यं धनुर्धारयन् रामभद्रं प्रभुं तं श्रये॥५०५॥

यो जघानाशु मारीचमायामृगं लक्ष्मणागच्छ मां पाहि वादेरतम्।
वातवेगेन धावन्तमभ्याशके तं प्रपद्ये प्रभुं पापतापापहम्॥५०६॥

हत्वा मायामयमृगमथो संनिवृत्तः कुटीरे
नैवापश्यज्जनकतनयां नैव पार्श्वे न दूरे।
वामोत्कम्पैर्व्यसनमतुलं शङ्कमानो निमित्तै-
र्गाढोत्कण्ठाकलितहृदयो पातु मां रामभद्रः॥५०७॥

यो विचिन्वन् प्रियां पर्वते पर्वतेऽरण्यकेऽरण्यके कन्दरे कन्दरे।
पर्यपश्यत् शुभां राम रामेति गां व्याहरन्तं द्विजं रक्तपङ्काङ्कितम्॥५०८॥

पर्यपृच्छत् प्रियां तद्दशां चाखिलां
केन विद्धो भवान् कस्य वाहा इमे।
कस्य चायं रथो भग्नको दृश्यते
ब्रूहि साधोऽखिलं ब्रूहि साधोऽखिलम्॥५०९॥

तं विनैवोत्तरं पुण्यलोकं गतं पितृसख्यं स्मरन् संददाहाग्निना।
पितृकार्याणि चक्रेऽस्य शोकावृतः सर्वभूतप्रियः पातु मां राघवः॥५१०॥

योऽग्रे गच्छन् पथि परिगतं मतङ्गगन्धं कबन्धं
प्रज्ञामान्द्यात् परुषवचनं दुर्निवारं वदन्तम्।
बाहूर्भित्त्वाऽनुजसहचरो संजघान श्वसन्तं
तं देवानां दयितममितं धाम रामं प्रपद्ये॥५११॥

CC-0. Sampurnanand University Collection. Digitized by eGangotri

यस्तद्वाक्यादधिगतपथः काननं लङ्घमानः
पम्पातीरं तरुपरिवृतं सानुजः प्राप धीरः।
तत्र भ्राम्यन् पवनतनयं प्राप्य तद्द्वारतो द्राक्
सख्यं लेभे हरिवृषभकेणाशु तं संप्रपद्ये॥५१२॥

यः पद्मिनीशस्य सुतेन सार्धं चक्रेऽग्निसाक्ष्ये परमं त्वजर्यम्।
तं सर्वभूताश्रयमीशमीड्यं प्रभुं प्रपद्ये शरणं शरण्यम्॥५१३॥

यः सप्ततालान् युगपच्छरेण विभेद गोत्रञ्च रसातलञ्च।
संदर्शयन् प्रत्ययमात्मवीर्ये स मां सदा रक्षतु रामभद्रः॥५१४॥

यो दुन्दुभेः कायमहामहीध्रमङ्गुष्ठकेनातिविदूरमुच्चैः।
चिक्षेप सम्यक् स्मयमान ईशः स मां सदा रक्षतु रामभद्रः॥५१५॥

यस्योत्सङ्गगता विदेहतनया पश्चात् स्थितो लक्ष्मणः,
छत्रं मूर्ध्नि समादधत् शशिनिभं पूर्णप्रभं वर्तुलम्।
वामे शत्रुहरः सुचामरकरो दक्षे तदग्निर्जनुः,
यस्याग्रे च विभाति मारुतसुतः सोऽव्यात्सदा राघवः॥५१६॥

यः शावरीं श्रमणां धर्मनिष्ठां गच्छन्तीं द्यामनुजग्राह धीरः।
आदाय मूलानि फलानि तस्य विशेषतो वदरीं प्रीतिदार्ढ्यम्॥५१७॥

स मे रघूणां प्रवरो बुधानां प्रियाकरः प्रीतिजुषां श्रितानाम्।
संसारपाशावसितस्य बन्धं सद्यः समुन्मूलयतान्महीशः॥५१८॥

यो बालिनं सख्यपाशावबद्धः प्रतिश्रुतिं पालयन् संजघान।
न विव्यथे नो जुगुप्सां जगाम प्रभुः स मां पातु दयानुबद्धः॥५१९॥

हरये हरिसज्यं यो हरीन्द्राय ददौ हरिः।
प्रतिश्रुतमवितथं कर्तुं रामः स मे गतिः॥५२०॥

यस्य कोपतुष्टिरक्षिवृत्तिमनेकचक्रपरिवर्तभीषणः।
अबुधिस्तनुमबन्धयत्स्वयं सोऽस्तु मे गतिरजात्मजात्मजः॥५२१॥

अम्बुधिं समवतीर्य सेतुना वार्धिकूलविनिविष्टगुल्मकः।
यः पुरीमवरुरोध सर्वतो रावणस्य स हि मे सदा गतिः॥५२२॥

CC-0. Sampurnanand University Collection. Digitized by eGangotri

यो विभीषणमुपागतं पुरः पादयोः पतितमार्तिसंभृतम्।
रावणानुजमथाभ्यषेचयद् भाविशत्रुविषये स मे गतिः॥५२३॥

यस्य त्रिलोकीभरगौरवं दधद्वपुः स्मरन्बालिसुतोऽप्यकम्पनः।
बभूव रक्षोऽधिपविस्मयावहः स मे रघूणामृषभः प्रसीदतु॥५२४॥

यस्य मूर्तिमनिलात्मजो हृदा संदधद्विगतभीतिविस्मयः।
गोष्पदं किल चकार वारिधिं वारणोऽद्भुतकरः स मे गतिः॥५२५॥

ध्यायन् हृदा यं गुरुभारसंभृतं गिरीन्द्रशृङ्गं समुदीर्य सत्त्वरम्।
ययौ दधद् बाहुयुगेन मारुती रणाङ्गणे लक्ष्मणरक्षणाय॥५२६॥

तं सर्वभूतावनतत्परं सदा भ्रमन्महामन्दरधृष्टकङ्कणम्।
नारायणं पृष्ठनिविष्टभूभरं भजामि रामं भवभीतिभञ्जनम्॥५२७॥

यो रावणस्याशु पुना रुहं शिरोव्रातं जहाराशुगपूगपातनैः।
पतत्पतङ्गप्रतिमैः सुदुःसहैः स मां मुदा पश्यतु रामभद्रः॥५२८॥

आपदामपहर्तारं दातारं सर्वसंपदाम्।
गुणाभिरामं श्रीरामं भूयो भूयो नमाम्यहम्॥५२९॥

यं न कर्माणि लिलिपुर्नासीत्कर्मफले स्पृहा।
तं कर्मलोपं भक्तानां बुधां राममहं श्रये॥५३०॥

राम रामेति रामेति मधुरं मधुराक्षरम्।
सदा वदन् कदा काले भवाब्धेः पदमाश्रये॥५३१॥

लक्ष्मणं लक्षणैर्युक्तं भरतं भरतानुजम्।
विभीषणञ्च सुग्रीवं रामभक्तानुपास्महे॥५३२॥

वन्यस्थलीपरिसरे भ्रमणेन शोणं,
शोणारविन्दसुषमापरिभावदक्षम्।
वन्दामहे पदयुगं बलिमूर्धभूषा,
भासा विभासितनखं रघुनन्दनस्य॥५३३॥

जङ्घायुगं स्थितिगती परिविभ्रदाशु,
लोलाब्जनालयुगलानुकृतिं दधानम्।
लोकत्रयीधरवपुर्गुरुभारखिन्नं,
स्विन्नं स्मरामि सततं रघुनन्दनस्य॥५३४॥

CC-0. Sampurnanand University Collection. Digitized by eGangotri

ऊरुद्वयं भगवतः सततं स्मरामि क्लिन्नं वसारुधिरकुङ्कुमकर्दमेन।
यत्रोपधाय युगलं मधुकैटभस्य देवश्चकर्त शितधारसुदर्शनेन॥५३५॥

मध्यं स्मरामि भवतो रघुनन्दनस्य पीताम्बरावृतमहो परिबद्धगोधम्।
गोधानिबद्धकरवालकरालकोशं शोषं भवाम्बुधिजलस्य निरस्तदोषम्॥५३६॥

नाभिं स्मरामि भवतो रघुनन्दनस्य यस्याः प्रभूतमतुलं जलजातपत्रम्।
यस्मिन्निषद्य परिवृंहितशक्तिरब्जश्चक्रे सुदुष्करमिदं मनसाऽप्यचिन्त्यम्॥५३७॥

यत्पादपद्मपरिधावनसंभृतेन नीरेण मूर्धविधृतेन शिवः शिवोऽभूत्।
तं गृध्रगौतमवधूगणिकाधिनाथं साशं व्रजामि शरणं रघुवंशनाथम्॥५३८॥

वक्षः स्मरामि सततं रघुनन्दनस्य श्रीकौस्तुभाश्रयमुपासकचित्तहारम्।
देवारिशस्त्रविहतीरितवज्रहारसङ्घर्षणोद्गतकिणं मधुकैटभारेः॥५३९॥

यत्पादुकाद्वयमवाप्य निवेश्य पीठे राज्यं चकार भरतः किल कोसलानाम्।
तद्रामपादयुगलं श्रितकामपूरं दूरं करोतु दुरितं हृदि सम्भृतं मे॥५४०॥

रामाय रामभद्राय रामचन्द्राय वेधसे।
रघुनाथाय नाथाय सीतायाः पतये नमः॥५४१॥

नवघनवनमध्ये चञ्चलेव प्रविष्टा वपुषि जलदनीले स्वर्णपीता हि सीता।
मधुमथनविवर्तः सर्वतः संसरद्भा हृतनिजजनशोकं राघवं स्तोकमीडे॥५४२॥

मुरमथनमुदारं सर्वथा चित्तहारं कलिकलुषविकाराकारसंहारकारम्।
रजनिचरनिकारं मूलमायापहारं शरणमुपगतोऽहं तापसानां विहारम्॥५४३॥

कोटिकामकमनीयविग्रहं विग्रहग्रहिलरावणद्रुहम्।
चिन्तये द्रुहिणसंभृतार्हणं राममद्भुतविकासविक्रमम्॥५४४॥

जानकीसजलवीक्षणेक्षितो विस्मयस्तिमितलोकवीक्षितः।
हर्षसंभृतविदेहनन्दितः पातु मां रघुसुतो धनुर्भृतः॥५४५॥

यो हि गाधिसुतयज्ञतत्त्वे वामनाश्रमपदं समभ्ययात्।
पूर्ववृत्तमनुसंस्मरन् हृदा पातु मां मुदितपौरुषो हरिः॥५४६॥

वैनतेयहृतपाशबन्धनो वैनतेयकृतपादवन्दनः।
वैनतेयरुचिरासनः सदा पातु वातरसनाश्रितो हरिः॥५४७॥

CC-0. Sampurnanand University Collection. Digitized by eGangotri

मन्दराद्रिशिरसि स्थितस्तदा मूलधारणापरायणोऽश्रमः।
नेत्रकर्षणविलोलकुण्डलो मङ्गलं दिशतु लक्ष्मणाग्रजः॥५४८॥

दुग्धदिग्धशबलं वपुर्दधद् नेत्रनागविषतामसीकृतम्।
पार्श्वसंस्थितसुरासुरस्तुतं मानसं श्रयतु राघवं महः॥५४९॥

यो गङ्गायाः परपारयियासुः कैवर्तेन प्लावितः सुप्रतीतः।
संसाराब्धेः प्रापयामास पारं तं देवानां दैवतं राममीडे॥५५०॥

यो हि कच्छपकठोरविग्रहो यो नृसिंह इति वित्तपौरुषः।
यो हि मत्स्यवपुरादधदम्बुधौ वेदमावतु स मां रघूत्तमः॥५५१॥

यस्ताडकाताडकेयान् विराधं रक्षःकबन्धं विददार धीरः।
तं कुम्भकर्णोरगनाथरक्षोविद्रावणं राममहं प्रपद्ये॥५५२॥

यो नारसिंहीमतनुं तनुं दधन्नखैर्ददारासुरमाशुगक्रमः।
सर्वात्मकं सर्वगतं शरण्यं तं सर्वनाथं शरणं प्रपद्ये॥५५३॥

नीलोत्पलश्याममुदारहासं पूर्णेन्दुबिम्बाधरणे विलक्षम्।
चूर्णालकालिप्रकरानुयातं रामस्य वन्दे रमणीयमास्यम्॥५५४॥

मूर्धजा जगति ते जयावहा रामभद्रशिरसि स्थिता हि ये।
सम्पतद् भ्रमरवृन्दवन्दिभिर्वन्दिताः सुरभिमाल्यमौलयः॥५५५॥

संपतामि तव पादपद्मयोर्नाथ नाथनपरायणः क्षणम्।
देहि धेहि मयि साश्रुदृग्द्वयं भक्तिसूक्तिमयि ते स्तवोद्गताम्॥५५६॥

राम त्वदीयपदपङ्कजपञ्जरान्तरद्यैव मे विशतु मानसराजहंसः।
प्राणप्रयाणसमये कफवातपित्तैः कण्ठावरोधनविधौ स्मरणं कुतस्ते॥५५७॥

येन मन्मथमनोहरे त्विषा ताडका हृदि विताडिता भृशम्।
गन्धवद्रुधिरे चन्दनोक्षिता जीवितेशवसतिं जगाम सा॥५५८॥

तं पुराणमजरं जरायुतं पृष्ठशायिनमथ स्तनन्धयम्।
यौवनोद्गमसुचारुविग्रहंराममाश्रयमुपाश्रयेऽन्वहम्॥५५९॥

मत्स्यकच्छपवराहरूपिणं श्रीनृसिंहपदवीमुपागतम्।
रामशब्ददहनैरुपस्तुतं राममद्भुतपराक्रमं भजे॥५६०॥

CC-0. Sampurnanand University Collection. Digitized by eGangotri

म्लेच्छवर्गदलनाय दीक्षितं भिक्षितं सकलकामदं प्रभुम्।
कल्किनं धवलघोटकाश्रयं राममद्भुतपराक्रमं भजे।।५६१।।

पितुर्नियोगात्सकलं समृद्धं राज्यं विहाय प्रगतो ह्यरण्यम्।
ददौ च सर्वस्वमथो द्विजेभ्यस्तं रामभद्रं शरणं गतोऽहम्।।५६२।।

श्वासवातपरिपीतविश्वकः श्वासवातकविसृष्टविश्वकः।
श्वासवातपरिपातविश्वकः पातु वातरसनाश्रितो हरिः।।५६३।।

रामभक्तपदपूतधात्रिका धूलिधूसरवपुर्धरा नराः।
दुर्लभा जगति भक्तिभाविते ह्यघुपासितभवत्पदाः सदा।।५६४।।

रामनाम करवालमद्भुतं भक्तिशक्तिमथ कल्मषोद्भिदाम्।
ध्यानमिष्वसनमाशुगं मनः संविधाय चरताभयं बुधाः।।५६५।।

रामं रावणमूर्धवर्गदलनं तापापहं पापहं
दृप्यद्राक्षससैन्यशूरशकलीकारक्रियाकोविदम्।
वैदेहीवदनेन्दुनिःसरदसंमातद्युतिद्योतितं
कोकं शोकनुदं श्रये श्रुतिशिखासंगीतपुण्यस्तवम्।।५६६।।

संसारकान्तारपरिभ्रमेण श्रान्तं मम स्वान्तमिदं नितान्तम्।
बिभर्तु फुल्लाम्बुजसन्निकाशं पदद्वयं श्रीरघुनन्दनस्य।।५६७।।

अहो मयाऽऽत्मा विफलीकृतोऽयं विसज्जता रूपरसादिकेषु।
वैहायसैः कुसुमैः सम्मितेषु रामाङ्घ्रिसेवैः परिवर्जितेषु।।५६८।।

वन्दारुजनमन्दारं भूमिजानन्दकन्दलम्।
राममिन्दीवरश्यामं परं धामाश्रयेऽन्वहम्।।५६९।।

यत्पदे पतितो जन्तुर्न पतत्यम्बुधौ भवे।
तं रामं वारिदश्यामं पुष्पके समुपास्महे।।५७०।।

धन्याः खलु वने वाताः कह्लाराः सुखशीतलाः।
राममिन्दीवरश्यामं पस्पृशुर्येऽनिवारिताः।।५७१।।

यत्तु गौतमवधूः शिलामयी प्राप्य दिव्यवपुरद्भुतं मुदा।
सङ्गता प्रियतमेन सादरं रामपादरजसामनुग्रहः।।५७२।।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

यद् जटायुरपि गृध्रयोनिजः प्राप तां गतिमहो सुदुर्लभाम्।
रामपादयुगलं विलोकयन् रामपादरजसामनुग्रहः॥५७३॥

ये च दूषणखरादयः परे राक्षसा अधमयोनिमाश्रिताः।
स्वर्ययुः समरशायिनो हता रामपादरजसामनुग्रहः॥५७४॥

पादपद्मयुगलं खरद्विषो मन्महे मनसि मोदतुन्दिलाः।
यन्नखेन्दुकिरणैर्विकस्वरं विश्वविस्वरहृदाश्रितं[१] सदा॥५७५॥

भूमिजालिङ्गितं चित्रचापाञ्चितं मौनमालाधरं कामसंवर्षिणम्।
भक्तकेकानुतं कङ्कमेकार्थितं चित्रकूटाश्रितं राममेघं श्रये॥५७६॥

रामनाममधुरं तु मोदकं जिह्वया सततमेव लेढि यः।
सोऽमृतो भवति मुक्तबन्धनो रामसंस्तवपरायणो नरः॥५७७॥

रामनामपरमासुधा बुधा या तुरीयदशभावदायिका।
शायिका सकलदोषसंततेः, धायिका धमनिकासु या मुदाम्॥५७८॥

राम पश्य करुणेन चक्षुषा राम पालय नतं जनं सदा।
राम तारय महोर्मिदुस्तरं शोकवारिपरिपूरितं भवम्॥५७९॥

निमज्जता नाथ भवार्णवेऽस्मिन् मया भवान् कूलमिवास्ति लब्धः।
त्वयाऽपि लब्धं भगवन्निदानीमनुत्तमं पात्रमिदं दयायाः॥५८०॥

मानुष्यनावमधिगम्य चिरादवाप्य
संतारकं च करुणाभरणं भवन्तम्।
यस्याभवद् भरवशस्तरितुं भवाब्धिं
सोऽहं व्रजामि यदि कस्य विडम्बनेयम्॥५८१॥

मत्स्यकच्छपवराहरूपकैः सम्प्रविश्य भुवने भवार्णवे।
क्रोधयोधकलुषीकृतं महः कामलोभहतमाशु पाहि माम्॥५८२॥

वेदवेद्ये परे पुंसि रामे दशरथात्मजे।
मतिर्मम सदा यातु भ्रमरीव महोत्पले॥५८३॥

---

१. 'क'-विश्वे सम्पूर्णे ये विस्वरा आक्षेपा अशुभास्तान् हरन्ति मर्षणेन दूरीकुर्वन्तीति विश्वविस्वरहृतो भक्तास्तेषु आश्रितं पादपद्मयुगलम् इति वक्तव्यम्।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

नान्या स्पृहा रघुपते हृदये मदीये नाथामि नाथ करुणावरुणालयोऽसि।
भक्तिं प्रयच्छ रघुपुङ्गव निर्भरां मे कामादिदोषरहितं कुरु मानसञ्च॥५८४॥

रामनामविपरीतवादिनो नूनमेव मृतका नराः सदा।
देवदुर्विलसितेन दुःस्थिता जन्मजन्मसु विपादिनः खराः॥५८५॥

रामो मूर्ध्नि निधाय काननमगान्मानमिवाज्ञां गुरोः,
रामं संभजताखिलस्य जगतः कर्तारमाद्यं प्रभुम्।
रामेणाभिहता निशाचरचमू रामाय तस्मै नमः,
रामे सर्वमिदं ततं त्रिभुवनं हे राम मां पालय॥५८६॥

अभूतपूर्वं मम भावि किं वा सर्वं सहे मे सहजं हि दुःखम्।
किन्तु त्वदग्रे शरणागतानां पराभवो नाथ न तेऽनुरूपः॥५८७॥

राजराजाङ्गणे शावकानां गणे धावदव्यक्तलीलास्मितद्योतितम्।
मौक्तिकं धारयद् बालकान् वारयद् धावतः सारयद् धाम वामं श्रये॥५८८॥

अनेजदेकं मनसो जवीयो यद्देवा नो आप्नुवन् पूर्वमर्षत्।
तत्सर्वेषामोक एकं बलीयो रामाभिधं धाम वामं प्रपद्ये॥५८९॥

अपाणिपादो जवनो ग्रहीता पश्यत्यचक्षुः स शृणोत्यकर्णः।
तद् वेत्ति वेद्यं न च तस्यास्ति वेत्ता तमाहुरेकं पुरुषं महान्तम्॥५९०॥

सहस्रशीर्षं जिह्वालेलिहानं जगज्जिघत्सन्तमथो सृजन्तम्।
दोष्णां सहस्रैर्धृतबाणासिचक्रं धनुर्धरं पुरुषं संप्रपद्ये॥५९१॥

जनावनायोद्यमिनं सतां मनः प्रसादयन्तं द्विषतां जनार्दनम्।
पुराणमाद्यं पुरुषं श्रियः पतिं व्रजामि रामं शिरसा चतुर्भुजम्॥५९२॥

यदेजति यन्नेजति यद् दूरे यद्वदन्तिके।
यदन्तरस्य सर्वस्य यदु सर्वस्यास्य बाह्यतः॥५९३॥

यत्प्रेषितं याति मनो भवेऽस्मिन् देवान् समारुह्य रसादिकेषु।
तं देवदेवं जनतापहारिणं मनोहरं राममहं प्रपद्ये॥५९४॥

यदक्षरं वेदविदो वदन्ति तपांसि सर्वाणि च यद्वदन्ति।
यदिच्छन्तो ब्रह्मचर्यं चरन्ति तद्वै पदं रामपदं भवन्ति॥५९५॥

CC-0. Sampurnanand University Collection. Digitized by eGangotri

स्वदेहमरणिं कृत्वा प्रणवं चोत्तरारणिम्।
ध्याननिर्मथनाभ्यासाद् रामं सन्द्रष्टुमर्हति।।५९६।।

अशब्दमस्पर्शमरूपमव्ययं तथाऽरसं नित्यमगन्धवच्च यत्।
नित्यं विभुं सर्वगतं सुसूक्ष्मं तद्वै बुधा रामपदं वदन्ति।।५९७।।

यदङ्के भाति निकषा स्निग्धा जनकनन्दिनी।
तं ज्ञानहेमनिकषं रामं श्याममुपास्महे।।५९८।।

मार्द्वीकं मधु रामनाममधुरं मोहप्रणाशाय यत्,
पीतं सम्प्रति यच्छति श्रुतिसुखं धर्मार्थकामान् शुभान्।
सिद्धिरष्टकमाशुलोकविततां मायां विधुन्वत्परम्,
तत्शश्वद् धयतामृतं यदि बुधाः प्रेप्सापरस्मिन् पदे।।५९९।।

रामनामपरमं रसायनं यज्जरामरणभीतिभञ्जनम्।
तद्बुधा धयत साधुसम्मतं यद्यभीप्सत् परं हरेः पदम्।।६००।।

यो बालिनं सन्निहत्यैकवीरो राज्यं ददौ सुहृदे वानराय।
सुग्रीवनाम्ने पुरुषोत्तमोऽसौ दासस्य मे तुष्यतु कोसलेन्द्रः।।६०१।।

विभीषणं भ्रातृनिकारतप्तं समागतं शरणं दीनदीनम्।
अपीपलद् दीर्घमायुश्च राज्यं वितीर्य मामवताद् दीनबन्धुः।।६०२।।

यो जानकीं लक्ष्मणं भ्रातृवर्गं प्रियान् सखीन् विततञ्चैव राज्यम्।
विहाय यातः सरयूसरण्या साकेतलोकं तमहं प्रपद्ये।।६०३।।

यमार्थगृह्यं निगृहीतवाचो वरं वरेण्यं कमनीयकामाः।
विमुक्तसङ्गा ऋषयः श्रयन्ते तं दीनदीनः शरणं प्रपद्ये।।६०४।।

तरत्यविद्यां विततां यस्मिन् हृदि निवेशिते।
योगमायाममेयाय तस्मै रामाय मे नमः।।६०५।।

भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः।
क्षीयन्ते चास्य कर्माणि यस्मिन् दृष्टे परावरे।।६०६।।

कर्माकर्मविकर्माणि यस्मिन् हृदि समाहिते।
पश्यन्ति ज्ञानिनस्तस्मै रामाय महसे नमः।।६०७।।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

आपूर्यमाणमचलप्रतिष्ठं समुद्रमापः प्रविशन्ति यद्वत्।
तद्वद् जीवा यं प्रविशन्ति सर्वे तस्मै परस्मै महसे नमामि॥६०८॥

यतः सर्वाणि भूतानि जायन्ते संविशन्ति च।
जीवन्ति यत्प्रसादेन तस्मै रामाय मे नमः॥६०९॥

इदमुदरमपूरं पूर्यते यस्य दृष्ट्या,
जनजनिधृतिभङ्गं जायते यस्य दृष्ट्या।
सुरपतिरपि कोपे संपतेद् यस्य दृष्ट्या
स मामवतु मम भूत्यै कोशलेशः सुदृष्ट्या॥६१०॥

बालोऽबालपराक्रमः शिवधनुर्योऽभङ्क्त सीतारुजा
सार्धं रामरुषा च पौरजनतासंतापमुन्मूलयन्।
विश्वामित्रमखस्य रक्षणविधौ दत्तावधानः क्षणं
तापं मे तिरयत्वविघ्नमसकौ भूपालचूडामणिः॥६११॥

नमः पुरस्तादथ पृष्ठतस्ते नमोऽस्तु ते सर्वत एव सर्व।
अनन्तवीर्यामितविक्रमस्त्वं सर्वं समाप्नोषि ततोऽसि सर्वः॥६१२॥

न वेदयज्ञाध्ययनैर्न दानैर्न च क्रियाभिर्न तपोभिरुग्रैः।
भक्त्या तु यं वेदपरं पुमांसं तं देवदेवं शरणं प्रपद्ये॥६१३॥

वायुर्यमोऽग्निर्वरुणः शशाङ्कः प्रजापतिस्त्वं प्रपितामहश्च।
नमो नमस्तेऽस्तु सहस्रकृत्त्वः पुनश्च भूयोऽपि नमो नमस्ते॥६१४॥

परं ब्रह्म परं धाम पवित्रं परमं भवान्।
पुरुषं शाश्वतं दिव्यमादिदेवमजं विभुम्॥६१५॥

आहुस्त्वामृषयः सर्वे देवर्षिर्नारदस्तथा।
असितो देवलो व्यासस्तस्मै रामाय ते नमः॥६१६॥

नहि ते भगवन् व्यक्तिं विदुर्देवा न दानवाः।
याभिर्विभूतिभिर्लोकानिमांस्त्वं व्याप्य तिष्ठसि॥६१७॥

ता अशेषा जन्मशतैः परिसंख्यातुमक्षमः।
भवन्तं शरणं यामि मायाशतसमासितः॥६१८॥

CC-0. Sampurnanand University Collection. Digitized by eGangotri

कथं विद्यामहं योगिंस्त्वां सदा परिचिन्तयन्।
केषु केषु च भावेषु चिन्त्योऽसि भगवन् मया॥६१९॥

इति चिन्तासमापन्नो मार्गं कञ्चिदलोकयन्।
भवन्तं शरणं यातो जगतः पितरं गुरुम्॥६२०॥

वामनाश्रमपदस्य गुप्तये यश्चकार सशरं शरासनम्।
ससुरासुरशिरोभिरर्चितः पातु मां सपदि कोसलेश्वरः॥६२१॥

यो विदेहहृदयं प्रहर्षयन् शैवचापमभनक् शुचिस्मितः।
देवमौनगणगीतसत्कथः पातु मां सपदि कोसलेश्वरः॥६२२॥

यो निषादमपि शूद्रयोनिजं सौहृदेन सममन्यताहृतः।
तं चराचरजगत्प्रभुं गुरुं मातरं पितरमन्वहं भजे॥६२३॥

त्रैविद्या यं सोमपाः पूतपापा यज्ञैरिष्ट्वा स्वर्गतिं प्रार्थयन्ते।
संप्राप्य पुण्यञ्च सुरेन्द्रलोकमश्रान्तदिव्यान् दिवि देवभोगान्॥६२४॥

तं कर्मणां सुकृतानां फलस्य ऋतस्य दातारमचिन्त्यवीर्यम्।
शेषं सदा शिष्यमाणं युगान्ते सर्वं गुरुं कपिलं राममीडे॥६२५॥

ध्येयं सदा परिभवघ्नमभीष्टदोहं तीर्थास्पदं शिवविरिञ्चिनुतं शरण्यम्।
भृत्यार्तिहं प्रणतपालभवाब्धिपोतं वन्दे महापुरुष ते चरणारविन्दम्॥६२६॥

त्यक्त्वा सुदुस्त्यजसुरेप्सितराजलक्ष्मीं धर्मिष्ठ आर्यवचसा यदगादरण्यम्।
मायामृगं दयितयेप्सितमन्वधावद् वन्दे महापुरुष ते चरणारविन्दम्॥६२७॥

येन सर्वं ततमिदं जगदव्यक्तमूर्तिना।
यत्स्थानि सर्वभूतानि तमहं शरणं गतः॥६२८॥

न च यत्स्थानि भूतानि न यो भूतेष्ववस्थितः।
भूतभृन्न च भूतस्थस्तमहं शरणं गतः॥६२९॥

यथाऽऽकाशस्थितो नित्यं वायुः सर्वत्रगो महान्।
तथा सर्वाणि भूतानि यत्स्थानि तमहं नतः॥६३०॥

यस्मिन् सर्वाणि भूतानि लीयन्ते कल्पसंप्लवे।
आविर्भवन्ति कल्पादौ यतस्तं शरणं गतः॥६३१॥

CC-0. Sampurnanand University Collection. Digitized by eGangotri

प्रकृतिं स्वामवष्टभ्य विसृजत्यवशं जगत्।
प्रकृतेर्वशतो योऽसौ राघवः सम्प्रसीदतु॥६३२॥

न च सर्वकर्माणि निबध्नन्ति कृतान्यपि।
उदासीनवदासीनमसक्तं तेषु कर्मसु॥६३३॥

येनाध्यक्षेण प्रकृतिः सूयते सचराचरम्।
हेतुनानेन सर्गादौ जगद्विपरिवर्तते॥६३४॥

अवजानन्ति यं मूढा मानुषीं तनुमाश्रितम्।
परं भावमजानन्तो यस्य भूतमहेश्वरम्॥६३५॥

मोघाशा मोघकर्माणो मोघज्ञाना विचेतसः।
राक्षसीमासुरीं चैव प्रकृतिं मोहिनीं श्रिताः॥६३६॥

महात्मानस्तु यं शश्वद् दैवीं प्रकृतिमाश्रिताः।
भजन्त्यनन्यमनसो ज्ञात्वा भूतादिमव्ययम्॥६३७॥

सततं कीर्तयन्तोऽयं यतमाना दृढव्रताः।
नमस्यन्तश्च यं भक्त्या नित्ययुक्ता उपासते॥६३८॥

तमहं सर्वभूतानां शरण्यं सुहृदं प्रभुम्।
प्रभवं प्रलयश्चैव सर्वदा शरणं गतः॥६३९॥

योऽविकल्पभिदर्थमण्डलं पश्यतीश निखिलं भवद्वपुः।
आत्मपक्षपरिपूरितं जगत्तस्य नित्यसुखिनः कुतो भयम्॥६४०॥

यस्य सर्वाणि भूतानि आत्मैव त्वां विजानतः।
तस्य शोको न मोहो वा एकत्वमनुपश्यतः॥६४१॥

यः क्रतुर्यः स्वधा यज्ञो मन्त्रो यश्चौषधं परम्।
आज्यमग्निर्हुतश्चैव तमहं शरणं गतः॥६४२॥

पिता यश्चास्य जगतो माता धाता पितामहः।
वेदं पवित्रमोंकारं ऋक्साम यजुरेव च॥६४३॥

गतिर्भर्त्ता प्रभुः साक्षी निवासः शरणं सुहृत्।
प्रभवः प्रलयं स्थानं निधानं बीजमव्ययम्॥६४४॥

CC-0. Sampurnanand University Collection. Digitized by eGangotri

यस्तपत्यनिशं वर्षं निगृह्णात्युत्सृजत्यपि।
अमृतं चैव मृत्युश्च सदसच्चैव यः प्रभुः॥६४५॥

तं प्रमेयांसं प्रेयसां साधुवित्तं चित्ते कृत्वा साधुभिः सम्प्रगीतम्।
कायाधवोद्गीतयशोवितानं मायाधवं शरणं यामि रामम्॥६४६॥

अनन्याश्चिन्तयन्तो यं साधवः पर्युपासते।
यश्च नित्याभियुक्तानां योगक्षेमं वहत्यपि॥६४७॥

सर्वेषां यज्ञकल्पानां यो भोक्ता प्रभुरेव च।
यं तत्त्वेनाविजानन्तः तिमिरे प्रपतन्ति हि॥६४८॥

पत्रं पुष्पं फलं तोयं यो दत्तं प्रयतात्मभिः।
भक्त्या समुपगृह्णाति तमहं शरणं गतः॥६४९॥

वदरं शबरीदत्तं बुभुजे प्रीतिसंयुतः।
निषादं चानुजग्राह स मे तुष्यतु राघवः॥६५०॥

धनुर्धराणामजिताजितो यो विद्याधराणां गुरुसंस्तुतो यः।
वेदैरविज्ञातगतिः परो यः पुमान् स मे तुष्यतु राघवेन्द्रः॥६५१॥

एको देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतान्तरात्मा।
सर्वाध्यक्षः सर्वभूताधिवासः साक्षीचेताः केवलो निर्गुणश्च॥६५२॥

यः सर्वज्ञः सर्वविद् यस्य शक्तिर्माया प्रोक्ता बहुधा वर्तमाना।
तपो यस्य ज्ञानरूपं क्रतुश्च स मां देवः सुधिया संयुनक्तु॥६५३॥

कृतं भुक्तं हुतं दत्तं तपस्तप्तं समर्पितम्।
यस्य विमुक्तिफलदं तस्मै रामाय ते नमः॥६५४॥

संन्यासयोगयुक्तात्मा परमं पुरुषं पुमान्।
यं चिन्तयन् विमुच्येत तस्मै रामाय ते नमः॥६५५॥

समो यः सर्वभूतेषु न द्वेष्यो नैव यत्प्रियः।
भजन्तं यस्तु भजते तस्मै रामाय ते नमः॥६५६॥

अपि यं सुदुराचारो भजन् भक्त्या त्वनन्यया।
क्षिप्रं भवति धर्मात्मा तस्मै रामाय ते नमः॥६५७॥

CC-0. Sampurnanand University Collection. Digitized by eGangotri

भक्त्या समुपाश्रित्य शूद्रा वैश्यास्तथा स्त्रियः।
पापात्मानोऽपि मुच्यन्ते तं वन्दे रघुनन्दनम्॥६५८॥

अनिर्वाच्या विद्या द्वितयसचिवस्य प्रभवतो
विवर्ता यस्यैते वियदनिलतेजोऽब्वह्नयः।
यतश्चाभूद्विश्वं चरमचरमुच्चावचमिदं
नमामस्तद्ब्रह्मापरिमितसुखज्ञानममृतम्॥६५९॥

मनः प्रबोधये नित्यं भज रामपदाम्बुजम्।
अनित्ये चासुखे लोके नास्ति ते गतिरन्यथा॥६६०॥

तन्मना भव तद्भक्तस्तद्याजी तं नमस्कुरु।
तमेवैष्यसि युक्त्वैवमात्मानं तत्परायणः॥६६१॥

सुरा यस्य समुत्पत्तिं न विदुर्न महर्षयः।
तमादिभूतं सर्वेषां पुरुषं परमं नुमः॥६६२॥

अनादिं लोकभर्तारं रामं वेत्ति तत्त्वतः।
असम्मूढः स मर्त्येषु सर्वपापैः प्रमुच्यते॥६६३॥

बुद्धिर्ज्ञानमसम्मोहः क्षमा सत्यं दमः शमः।
सुखं दुःखं भवोऽभावो भयं चाभयमेव च॥६६४॥

अहिंसा समता तुष्टिस्तपोदानं यशोऽयशः।
रामाद् भवन्ति भूतानां भावा एते पृथग्विधाः॥६६५॥

हृदि स्थितं मूढजनाः कान्तारे गिरिगह्वरे।
तीर्थेषु मृगयन्ते तं शश्वद्भातं नरं नुमः॥६६६॥

महर्षयः सप्तपूर्वे चत्वारो मनवस्तथा।
यत्सङ्कल्पात्समुद्भूतास्तस्मै रामाय ते नमः॥६६७॥

रामात्सर्वं भवत्येतत्रामात्सर्वं विचेष्टते।
इति मत्वा भजन्ते यं बुधास्तस्मै नमो नमः॥६६८॥

यच्चित्ता यद्गतप्राणा बोधयन्तः परस्परम्।
कथयन्तश्च यं नित्यं तुष्यन्ति च रमन्ति च॥६६९॥

CC-0. Sampurnanand University Collection. Digitized by eGangotri

तेषां सततयुक्तानां भजतां प्रीतिपूर्वकम्।
ददाति योगं बुद्धिं च यः पदप्राप्तिकारकम्॥६७०॥

तेषामेवानुकम्पार्थं योऽविद्याप्रभवं तमः।
नाशयत्यात्मभावस्थो ज्ञानदीपेन भास्वता॥६७१॥

परं ब्रह्म परं धाम पूतो यः परः पुमान्।
पुरुषं शाश्वतं दिव्यं तमहं शरणं गतः॥६७२॥

यदविद्याविलासेन भूतभौतिकसृष्टयः।
नानाविधा भवन्त्येतास्तमहं शरणं गतः॥६७३॥

यस्य व्यक्तिं न विदुर्देवा नैव दानवराक्षसाः।
स्वयमेव वात्मनाऽऽत्मानं यो वेत्ति पुरुषोत्तमः॥६७४॥

य आत्मा सर्वभूतानामाशये समवस्थितः।
य आदिश्चैव भूतानां मध्यं चैवान्त एव च॥६७५॥

आदित्यानां तु यो विष्णुरुपेन्द्रो बलिबन्धकृत्।
ज्योतिषामंशुमाली यो भास्करस्तिग्मदीधितिः॥६७६॥

मरीचिर्मरुतां प्रोक्तो नक्षत्राणां तु यः शशी।
वेदानां सामवेदो यो देवानाञ्चैव वासवः॥६७७॥

इन्द्रियाणां मनः प्रोक्तो भूतानां यस्तु चेतना।
रुद्राणां शङ्करो यस्तु वित्तेशो यक्षरक्षसाम्॥६७८॥

वसूनां पावकः प्रोक्तो मेरुः शिखरिणां तथा।
पुरोधसां च सर्वेषां मुख्यो यस्तु गिरांपतिः॥६७९॥

सेनानीनां कार्तिकेयः सरसां यश्च सागरः।
भृगुर्महर्षिमुख्येषु गिरां चैवैकमक्षरम्॥६८०॥

यज्ञानां जपयज्ञो यः स्थावराणां हिमालयः।
अश्वत्थः सर्ववृक्षाणां देवर्षीणाञ्च नारदः॥६८१॥

गन्धर्वाणां चित्ररथः सिद्धानां कपिलो मुनिः।
उच्चैःश्रवास्तुरङ्गाणां नराणाञ्च नराधिपः॥६८२॥

CC-0. Sampurnanand University Collection. Digitized by eGangotri

आयुधानान्तु यो वज्रं धेनूनाञ्चैव कामधुक्।
प्रजने यश्च कन्दर्पः सर्पाणां यश्च वासुकिः॥६८३॥

अनन्तो यश्च नागानां वरुणो यादसान्तु यः।
पितॄणामर्यमा यश्च यमः संयमतां तथा॥६८४॥

प्रह्लादो यश्च दैत्यानां कालः कलयतां चयः।
मृगाणां च मृगेन्द्रो यो वैनतेयश्च पक्षिणाम्॥६८५॥

पवनः पवतां यस्तु रामः शस्त्रभृतां तु यः।
झषाणां यश्च मकरः स्रोतसां यस्तु जाह्नवी॥६८६॥

सर्गाणामादिरन्तश्च मध्यं चैवास्ति यः प्रभुः।
अध्यात्मविद्या विद्यानां वादः प्रवदतां तु यः॥६८७॥

अक्षराणामकारो यः समासे द्वन्द्व एव च।
यश्चाक्षयः कालरूपो जन्तूनां क्षयकारकः॥६८८॥

मृत्युः सर्वहरो यस्तु धाता यः सर्वतोमुखः।
भविष्यतामुद्भवो यो नास्ति यस्योद्भवः प्रभोः॥६८९॥

कीर्तिः श्रीर्वाक् च नारीणां स्मृतिर्मेधा धृतिः क्षमा।
बृहत्साम तथा साम्नां गायत्री छन्दसां तु यः॥६९०॥

मासानां मार्गशीर्षो यः ऋतूनां कुसुमाकरः।
द्यूतं छलयतां यश्च तेजस्तेजस्विनां तथा॥६९१॥

जयश्च व्यवसायश्च सत्त्वं सत्त्ववतां च यः।
वृष्णीनां वासुदेवो यः पाण्डवानां धनञ्जयः॥६९२॥

मुनीनां व्यासरूपो यः कवीनामुशनाकविः।
दण्डो दमयतां यश्च नीतिश्चैव जिगीषताम्॥६९३॥

मौनं यश्चैव गुह्यानां ज्ञानं ज्ञानवतां तु यः।
बीजं यः सर्वभूतानां येन व्याप्तं चराचरम्॥६९४॥

तमहं सर्वभूतानां भूतिमाश्रयमुत्तमम्।
प्रभवं प्रलयञ्चैव शरण्यं शरणं गतः॥६९५॥

CC-0. Sampurnanand University Collection. Digitized by eGangotri

आदित्या वसवश्चैव रुद्रा यस्याश्विनौ मरुतश्चैव देहे।
अदृष्टरूपं तमनन्तमाद्यं बह्वाश्चर्यं पुरुषं सम्प्रपद्ये।।६९६।।

अनेकवक्त्रनयनमनेकाद्भुतदर्शनम्।
अनेकदिव्याभरणं दिव्यानेकोद्यतायुधम्।।६९७।।

दिव्यमाल्याम्बरधरं दिव्यगन्धानुलेपनम्।
सर्वाश्चर्यमयं देवमनन्तं विश्वतोमुखम्।।
शरणं सर्वभूतानां शरण्यं समुपाश्रये।।६९८।।

देवाः समस्तास्तव देव देहे सर्वे तथा भूतविशेषसंघाः।
ब्रह्मा तथेशः कमलासनस्थो महर्षयो भुजगाश्चैव दिव्याः।।६९९।।

अनेकबाहूदरवक्त्रनेत्रं वन्दामहे सर्वतोऽनन्तरूपम्।
नान्तं न मध्यं न पुनस्तवादिं विद्मो वयं शश्वदेवामृशन्तः।।७००।।

किरीटिनं गदिनं चक्रिणं च तेजोराशिं सर्वतो दीप्तिमन्तम्।
वन्दामहे दुर्निरीक्ष्यं समन्ताद् दीप्तानलार्कद्युतिमप्रमेयम्।।७०१।।

त्वमक्षरं परमं वेदितव्यं त्वमस्य विश्वस्य परं निधानम्।
त्वमव्ययः शाश्वतधर्मगोप्ता सनातनस्त्वं पुरुषो मतो मे।।७०२।।

अनादिमध्यान्तमनन्तवीर्यमनन्तबाहुं शशिसूर्यनेत्रम्।
वन्दामहे दीप्तहुताशवक्त्रं स्वतेजसा विश्वमिदं तपन्तम्।।७०३।।

द्यावापृथिव्योरिदमन्तरं हि व्याप्तं त्वयैकेन दिशश्च सर्वाः।
विराजमुग्रं पुरुषं महान्तं वन्दामहे सर्वतो वर्तमानम्।।७०४।।

सर्वे हि त्वां सुरसंघा नमन्ति, केचिद्भीताः प्राञ्जलयो गृणन्ति।
स्वस्तीत्युक्त्वा सिद्धमहर्षिसंघाः स्तुवन्ति त्वां स्तुतिभिः पुष्कलाभिः।।७०५।।

रुद्रादित्या वसवो ये च साध्या विश्वेऽश्विनौ मरुतश्चोष्मपाश्च।
गन्धर्वयक्षासुरसिद्धसंघा वीक्षन्ते त्वां विस्मताश्चैव सर्वे।।७०६।।

रूपं महत्ते बहुवक्त्रनेत्रं महाबाहो बहुबाहूरुपादम्।
बहूदरं बहुदंष्ट्राकरालं निरीक्षितुं नैव शक्तं मनो मे।।७०७।।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

नभःस्पृशं दीप्तमनेकवर्णं व्यात्ताननं दीप्तविशालनेत्रम्।
श्रुत्वा हि त्वां प्रव्यथितान्तरस्य द्रष्टुं स्पृहा पुरुषं चारुरूपम्।।७०८।।

दंष्ट्राकरालानि च ते मुखानि श्रुत्वैव कालानलसंनिभानि।
उद्भिन्ननष्टचित्तस्य भयातुरस्य द्रष्टुं स्पृहा पुरुषं दिव्यरूपम्।।७०९।।

यथा नदीनां बहवोऽम्बुवेगाः समुद्रमेवाभिमुखा द्रवन्ति।
तथा तवामी जगतो हि जीवा विशन्ति वक्त्राण्यभिविज्वलन्ति।।७१०।।

यथा प्रदीप्तं ज्वलनं पतङ्गा विशन्ति नाशाय समृद्धवेगाः।
तथैव नाशाय विशन्ति लोकास्तवापि वक्त्राणि समृद्धवेगाः।।७११।।

लेलिह्यसे ग्रसमानः समन्ताल्लोकान् समग्रान् वदनैर्ज्वलद्भिः।
तेजोभिरापूर्य जगत्समग्रं भासस्तवोग्राः प्रतपन्ति विष्णो।।७१२।।

आख्याहि मे को भवानुग्ररूपो नमोऽस्तु ते देववर प्रसीद।
विज्ञातुमिच्छामि भवन्तमाद्यं नहि प्रजानामि तव प्रवृत्तिम्।।७१३।।

ज्ञातो भवान् काल इव प्रवृद्धो लोकान् समाहर्तुमिह प्रवृत्तः।
ऋते भक्तान् न भविष्यन्ति सर्वे येऽवस्थिता जीवलोकेषु जीवाः।।७१४।।

तस्माद्याचे शरणं त्वां शरण्यं शत्रून् बुद्ध्या शुभया संयुनक्तु।
स्वकर्मणा निहतान् नो जहि त्वं प्रसीद मे देववर प्रसीद।।७१५।।

स्थाने हृषीकेश तव प्रकीर्त्या जगत्प्रहृष्यत्यनुरज्यते च।
रक्षांसि भीतानि दिशो द्रवन्ति सर्वे नमस्यन्ति च सिद्धसंघाः।।७१६।।

कस्माच्च ते न नमेरन् महात्मन् गरीयसे ब्रह्मणोऽप्यादिकर्त्रे।
अनन्तदेवेश जगन्निवास त्वमक्षरं सदसत्तत्परं यत्।।७१७।।

त्वमादिदेवः पुरुषः पुराणस्त्वमस्य विश्वस्य परं निधानम्।
वेत्ताऽसि वेद्यञ्च परं च धाम त्वया ततं विश्वमनन्तरूप।।७१८।।

वायुर्यमोऽग्निर्वरुणः शशाङ्कः प्रजापतिस्त्वं प्रपितामहश्च।
नमो नमस्तेऽस्तु सहस्रकृत्वः पुनश्च भूयोऽपि नमो नमस्ते।।७१९।।

नमः पुरस्तादथ पृष्ठतस्ते नमोऽस्तु ते सर्वत एव सर्व।
अनन्तवीर्यामितविक्रमस्त्वं सर्वं समाप्नोषि ततोऽसि सर्वः।।७२०।।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

पिताऽसि लोकस्य चराचरस्य त्वमस्य पूज्यश्च गुरुर्गरीयान्।
न त्वत्समोऽस्त्यभ्यधिकः कुतोऽन्यो लोकत्रयेऽप्यप्रतिमप्रभाव।।७२१।।

तस्मात्प्रणम्य प्रणिधाय कायं प्रसादये त्वामहमीशमीड्यम्।
पितेव पुत्रस्य सखेव सख्युः प्रियः प्रियायासि तदेव सोढुम्।।७२२।।

किरीटिनं गदिनं चक्रहस्तमिच्छामि त्वां द्रष्टुमहं सदैव।
तेनैव रूपेण चतुर्भुजेन सहस्रबाहो भव विश्वमूर्ते।।७२३।।

त्वत्कर्मकृत् त्वत्परमस्त्वद्भक्तः सङ्गवर्जितः।
निर्वैरः सर्वभूतेषु राम त्वामेति पूरुषः।।७२४।।

त्वय्यावेश्य मनो ये त्वां नित्ययुक्ता उपासते।
श्रद्धया परयोपेतास्ते मे युक्ततमा मताः।।७२५।।

ये त्वक्षरमनिर्देश्यमव्यक्तं पर्युपासते।
सर्वत्रगमचिन्त्यञ्च कूटस्थमचलं ध्रुवम्।।७२६।।

संनियम्येन्द्रियग्रामं सर्वत्र समबुद्धयः।
तेऽप्याप्नुवन्ति त्वामेव सर्वभूतहिते रताः।।७२७।।

क्लेशोऽधिकतरस्तेषामव्यक्तासक्तचेतसाम्।
अव्यक्ता हि गतिर्दुःखं देहवद्भिरवाप्यते।।७२८।।

ये तु कर्माणि सर्वाणि संन्यस्य त्वत्परास्त्वयि।
अनन्येनैव योगेन त्वां ध्यायन्त उपासते।।७२९।।

तेषां त्वं हि समुद्धर्ता मृत्युसंसारसागरात्।
भवसि ह्यविलम्बेन त्वय्यावेशितचेतसाम्।।७३०।।

आदधानास्त्वयि मनस्त्वयि बुद्धिं च कुर्वते।
त्वय्येव निवसिष्यन्ति अत ऊर्ध्वं न संशयः।।७३१।।

अभ्यासयोगेन सुदुर्लभेन त्वत्कर्मणो क्रियया वाऽपि लोके।
त्यागेन वा कर्मफलस्य बुद्ध्या त्यागेन वा कर्मणामाशु धीराः।।७३२।।

त्वद्ध्यानतो वा तव नामतो वा तवावदानस्मरणेन वाऽपि।
विशुद्धचित्ता विगतस्पृहास्त्वां विशन्ति बुद्धास्त्वयि बद्धभावाः।।७३३।।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

अद्वेष्टा सर्वभूतानां मैत्रः करुण एव च।
निर्ममो निरहंकारः समदुःखसुखः क्षमी।।७३४।।

संतुष्टः सततं योगी यतात्मा दृढनिश्चयः।
त्वय्यर्पितमनोबुद्धिस्त्वां समभ्येति राघव।।७३५।।

यस्मान्नोद्विजते लोको लोकान्नोद्विजते च यः।
हर्षामर्षभयोद्वेगैर्मुक्तः यः स च ते प्रियः।।७३६।।

अनपेक्षः शुचिर्दक्षः उदासीनो गतव्यथः।
सर्वारम्भपरित्यागी यस्त्वद्भक्तः स ते प्रियः।।७३७।।

यो न हृष्यति न द्वेष्टि न शोचति न काङ्क्षति।
शुभाशुभपरित्यागी भक्तिमान् यः स ते प्रियः।।७३८।।

समः शत्रौ च मित्रे व तथा मानापमानयोः।
शीतोष्णसुखदुःखेषु समः सङ्गविवर्जितः।।७३९।।

तुल्यनिन्दास्तुतिर्मौनी सन्तुष्टो येन केनचित्।
अनिकेतः स्थिरमतिर्भक्तिमान् यः स ते प्रियः।।७४०।।

ये तु धर्म्यामृतमिदं यथोक्तं पर्युपासते।
श्रद्दधानास्त्वपरमा भक्तास्तेऽतीव ते प्रियाः।।७४१।।

रामनामकमनीयकार्मुकं लक्ष्यमस्य विषयो रसादिकः।
लुब्धको रघुपतिप्रियो जनः तं सदा नृपतये मुमुक्षवः।।७४२।।

अनादिमत्परं ब्रह्म न सत् त्वं नासदुच्यसे।
सर्वतः पाणिपादस्त्वं सर्वतोऽक्षिशिरोमुखः।।७४३।।

सर्वेन्द्रियगुणाभासः सर्वेन्द्रियविवर्जितः।
सर्वतः श्रुतिमान् लोके सर्वमावृत्य तिष्ठसि।।७४४।।

असक्तः सर्वभृच्चैव निर्गुणो गुणभोजकः।
बहिरन्तश्च भूतानामचरश्चर एव च।।७४५।।

सूक्ष्मत्वात् त्वमविज्ञेयो दूरस्थश्चान्तिके तथा।
अविभक्तश्च भूतेषु विभक्त इव च स्थितः।।७४६।।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

प्रभविष्णुर्ग्रसिष्णुश्च भूतभर्ता च मे मतः।
ज्योतिषां परमं ज्योतिस्तमसः पर उच्यसे॥७४७॥

उपद्रष्टाऽनुमन्ता च भर्ता भोक्ता महेश्वरः।
परमात्मेति चाप्युक्तो देहेऽस्मिँस्त्वं परः पुमान्॥७४८॥

समं सर्वेषु भूतेषु तिष्ठन्तं परमेश्वरम्।
विनश्यत्स्वविनश्यन्तं यस्त्वां वेद स पण्डितः॥७४९॥

यदा भूतपृथग्भावमेकस्थमनुपश्यति।
तत एव च विस्तारस्तदा त्वां प्रतिपद्यते॥७५०॥

अनादित्वान्निर्गुणत्वात्परमात्मा त्वमव्ययः।
शरीरस्थोऽपि देव त्वं न करोषि न लिप्यसे॥७५१॥

यथा सर्वगतं सौक्ष्म्यादाकाशं नोपलिप्यते।
सर्वत्रावस्थितो देहे तथा त्वं नोपलिप्यसे॥७५२॥

यथा प्रकाशयत्येकः कृत्स्नं लोकमिमं रविः।
क्षेत्रं क्षेत्री तथा कृत्स्नं प्रकाशयसि राघव॥७५३॥

क्षेत्रक्षेत्रयोरेतदन्तरं ज्ञानचक्षुषा।
भूतप्रकृतिमोक्षञ्च ये विदुर्यान्ति ते पदम्॥७५४॥

ध्यानेनात्मनि पश्यन्ति केचित् त्वां शुद्धया धिया।
अन्ये सांख्येन योगेन कर्मयोगेन चापरे॥७५५॥

अन्ये त्वेवमजानन्तः श्रुत्वाऽन्येभ्य उपासते।
तेऽपि चातितरन्त्येव मृत्युं श्रुतिपरायणाः॥७५६॥

यावत्सञ्जायते किञ्चित्सत्त्वं स्थावरजङ्गमम्।
क्षेत्रेण भवतो योगात् त्वं हि बीजप्रदः पिता॥७५७॥

सङ्कल्परूपं बीजं ते महद् ब्रह्मणि वर्धते।
सम्भवः सर्वभूतानां ततो भवति राघव॥७५८॥

सर्वयोनिषु काकुत्स्थ मूर्तयः सम्भवन्ति याः।
तासां ब्रह्म महद्योनिस्त्वं हि बीजप्रदः पिता॥७५९॥

CC-0. Sampurnanand University Collection. Digitized by eGangotri

नान्यं गुणेभ्यः कर्तारं यदा भक्तोऽनुपश्यति।
गुणेभ्यस्त्वां परं वेत्ति तदा त्वद्भावमृच्छति॥७६०॥

समदुःखसुखः स्वस्थः समलोष्टाश्मकाञ्चनः।
तुल्यप्रियाप्रियो धीरस्तुल्यनिन्दात्मसंस्तुतिः॥७६१॥

मानापमानयोस्तुल्यस्तुल्यो मित्रारिपक्षयोः।
सर्वारम्भपरित्यागी गुणातीतः स ते प्रियः॥७६२॥

त्वां च योऽव्यभिचारेण भक्तियोगेन सेवते।
स गुणान् समतीत्यैतान् ब्रह्मभूयाय कल्पते॥७६३॥

ब्रह्मणो हि प्रतिष्ठा त्वममृतस्याव्ययस्य च।
शाश्वतस्य च धर्मस्य सुखस्यैकान्तिकस्य च॥७६४॥

अहं पदं तत् परिमार्गयामि यस्मिन् गता न परायन्ति भूयः।
त्वामेव चाद्यं पुरुषं प्रपद्ये यतः प्रवृत्तिः प्रसृता पुराणी॥७६५॥

निर्मानमोहा जितसङ्गदोषा अध्यात्मनित्या विनिवृत्तकामाः।
द्वन्द्वैर्विमुक्ताः सुखदुःखसंज्ञैर्गच्छन्त्यमूढाः पदमव्ययं ते॥७६६॥

न तद्भासयते सूर्यो न शशाङ्को न पावकः।
यद् गत्वा न निवर्तन्ते तद्धाम परमं तव॥७६७॥

तवैवांशो जीवलोके जीवभूतः सनातनः।
मनः षष्ठानीन्द्रियाणि प्रकृतिस्थानि कर्षति॥७६८॥

यतमाना योगिनस्त्वां पश्यन्त्यात्मन्यवस्थितम्।
यतमाना अपि परं नैव पश्यन्त्यचेतसः॥७६९॥

यदादित्यगतं तेजो जगद् भासयतेऽखिलम्।
यच्चन्द्रमसि यच्चाग्नौ तत्तेजो वेद्मि तावकम्॥७७०॥

गामाविश्य च भूतानि बिभर्षि त्वं स्वतेजसा।
पुष्णासि चौषधीः सर्वाः सोमो भूत्वा रसात्मकः॥७७१॥

त्वं हि वैश्वानरो भूत्वा प्राणिनां देहमाश्रितः।
प्राणापानसमायुक्तः पचस्यन्नं चतुर्विधम्॥७७२॥

CC-0. Sampurnanand University Collection. Digitized by eGangotri

सर्वस्य च त्वं हृदि सन्निविष्टस्त्वत्तः स्मृतिर्ज्ञानमपोहनञ्च।
वेद्यैश्च वेद्यो भगवन् त्वमेव वेदान्तकृद् वेदविदेव च त्वम्।।७७३।।

द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च।
क्षरः सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते।।७७४।।

उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदीरितः।
यो लोकत्रयमाविश्य विभर्त्यव्यय ईश्वरः।।७७५।।

यस्त्वामेवमसम्मूढो जानाति पुरुषोत्तमम्।
स सर्वविद् त्वां भजते सर्वभावेन राघव।।७७६।।

बुद्ध्या विशुद्धया युक्तो धृत्यात्मानं नियम्य च।
शब्दादीन् विषयांस्त्यक्त्वा रागद्वेषौ व्युदस्य च।।७७७।।

विविक्तसेवी लघ्वाशी यतवाक्कायमानसः।
ध्यानयोगपरो नित्यं वैराग्यं समुपाश्रितः।।७७८।।

अहङ्कारं बलं दर्पं कामं क्रोधं परिग्रहम्।
विमुच्य निर्ममः शान्तस्त्वां ब्रह्म प्रतिपद्यते।।७७९।।

ब्रह्मभूतः प्रसन्नात्मा न शोचति न काङ्क्षति।
समः सर्वेषु भूतेषु त्वद्भक्तिं लभते पराम्।।७८०।।

भक्त्या त्वामभिजानाति यावान् यश्चासि तत्त्वतः।
ततस्त्वां तत्त्वतो ज्ञात्वा विशते तदनन्तरम्।।७८१।।

सर्वकर्माण्यपि सदा कुर्वाणस्त्वद्व्यपाश्रयः।
त्वत्प्रसादादवाप्नोति शाश्वतं पदमव्ययम्।।७८२।।

त्वत्परः सर्वकर्माणि त्वयि सन्न्यस्य चेतसा।
बुद्धियोगमुपाश्रित्य त्वां राघव सदाश्रये।।७८३।।

त्वच्चित्तस्त्वद्गतप्राणस्त्वत्प्रसादात्तु राघव।
आपदः प्रतरिष्यामि सर्वाः संसारसम्भवाः।।७८४।।

त्वमीश्वरः सर्वभूतहृदब्जान्यधितिष्ठसि।
भ्रामयन् सर्वभूतानि यन्त्रारूढानि मायया।।७८५।।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

त्वामेव शरणं यामि सर्वभावेन राघव।
त्वत्प्रसादात्परां शान्तिं स्थानं प्राप्स्यामि शाश्वतम्॥७८६॥

सर्वधर्मान् परित्यज्य यस्त्वां शरणमृच्छति।
स सर्वपापनिर्मुक्तस्त्वद्भावं प्रतिपद्यते॥७८७॥

त्वयि सर्वाणि कर्माणि संन्यस्याध्यात्मचेतसा।
निराशीर्निर्ममो यस्तु स ते धाम प्रपद्यते॥७८८॥

अजोऽपि सन्नव्ययात्मा भूतानामीश्वरोऽपि सन्।
प्रकृतिं स्वामधिष्ठाय संभवस्यात्ममायया॥७८९॥

यदा यदा हि धर्मस्य ग्लानिर्भवति राघव।
अभ्युत्थानमधर्मस्य तदावतरसि प्रभो॥७९०॥

परित्राणाय साधूनां विनाशाय च दुष्कृताम्।
धर्मसंस्थापनार्थाय प्रभवस्यात्ममायया॥७९१॥

जन्म कर्म च ते दिव्यमेवं यो वेत्ति तत्त्वतः।
त्यक्त्वा देहं पुनर्जन्म नैति त्वामेति राघव॥७९२॥

वीतरागभयक्रोधास्त्वन्मयास्त्वामुपाश्रिताः।
बहवो ज्ञानतपसा पूतास्त्वद्भावमागताः॥७९३॥

ये यथा त्वां प्रपद्यन्ते भजसे त्वं तथैव तान्।
तव वर्त्मानुवर्तन्ते मनुष्याः सर्व एव हि॥७९४॥

चातुर्वर्ण्यं त्वया सृष्टं गुणकर्मविभागशः।
कर्तारं तस्य सर्वस्य वेद्मि कर्तारमव्ययम्॥७९५॥

न त्वां कर्माणि लिम्पन्ति न ते कर्मफले स्पृहा।
इति त्वां योऽभिजानाति कर्मभिर्न स बध्यते॥७९६॥

एवं ज्ञात्वा कृतं कर्म पूर्वैरपि मुमुक्षुभिः।
अतः करोमि कर्माहं पूर्वैः पूर्वतरैः कृतम्॥७९७॥

निराशीर्यतचित्तात्मा त्यक्तसर्वपरिग्रहः।
त्वदर्थं कर्म कुर्वाणो नरो नाप्नोति किल्विषम्॥७९८॥

CC-0. Sampurnanand University Collection. Digitized by eGangotri

यदृच्छालाभसन्तुष्टो द्वन्द्वातीतो विमत्सरः।
समः सिद्धावसिद्धौ च स्मरँस्त्वां न निबध्यते॥७९९॥

गतसंज्ञस्य मुक्तस्य ज्ञानावस्थितचेतसः।
त्वदर्थं कुर्वतः कर्म समग्रं प्रविलीयते॥८००॥

ब्रह्मार्पणं ब्रह्महविर्ब्रह्माग्नौ ब्रह्मणा हुतम्।
ब्रह्मैव तेन गन्तव्यं ब्रह्म त्वां कर्म जानता॥८०१॥

दक्षिणं भुजगभोगभीषणं संस्मरामि शयनमद्भुतं हरेः।
यो न्यपातयदसिं सुदारुणं शूद्रतापसगले द्विजन्मने॥८०२॥

अपि चेत् सर्वपापेभ्यः पुरुषः पापकृत्तमः।
यस्य ज्ञानाद् विमुच्येत वृजिनात्तं श्रये हरिम्॥८०३॥

श्रद्धया तत्परत्वेन पुरुषः संयतेन्द्रियः।
यं विजानाति तत्त्वेन तमहं राममाश्रये॥८०४॥

त्वद्बुद्धयस्त्वदात्मानस्त्वन्निष्ठास्त्वत्परायणाः।
गच्छन्त्यपुनरावृत्तिं ज्ञाननिर्धूतकल्मषाः॥८०५॥

विद्याविनयसम्पन्ने ब्राह्मणे गवि हस्तिनि।
शुनि चैव श्वपाके च त्वां प्रपश्यन्ति पण्डिताः॥८०६॥

योऽन्तःसुखोऽन्तरारामस्तथान्तर्ज्योतिरेव यः।
स त्वां ध्यायन् परं ब्रह्म ब्रह्मभूतोऽधिगच्छति॥८०७॥

लभन्ते ब्रह्मनिर्वाणमृषयस्त्वां हतैनसः।
छिन्नद्वैधा यतात्मानः सर्वभूतहिते रताः॥८०८॥

कामक्रोधवियुक्तानां यतीनां यतचेतसाम्।
अभितो ब्रह्मरूपस्त्वं वर्तसे विदितात्मनाम्॥८०९॥

स्पर्शान् कृत्वा बहिर्बाह्यान् चक्षुश्चैवान्तरे भ्रुवोः।
प्राणापानौ समौ कृत्वा नासाभ्यन्तरचारिणौ॥८१०॥

यतेन्द्रियमनोबुद्धिर्मुनिर्मोक्षपरायणः।
विगतेच्छाभयक्रोधो ध्यायँस्त्वां प्रविमुच्यते॥८११॥

CC-0. Sampurnanand University Collection. Digitized by eGangotri

भोक्तारं यज्ञतपसां सर्वलोकमहेश्वरम्।
सुहृदं सर्वभूतानां ज्ञात्वा त्वां शान्तिमृच्छति।।८१२।।

प्रशान्तात्मा विगतभीर्ब्रह्मचारिव्रते स्थितः।
मनः संयम्य युक्तो हि त्वच्चित्तस्त्वत्परायणः।।८१३।।

युञ्जन्नेवं सदात्मानं योगी नियतमानसः।
शान्तिं निर्वाणपरमां त्वत्संस्थामधिगच्छति।।८१४।।

राघवस्य पदपद्मगोयुगं चिन्तयामि भवभीतिभञ्जनम्।
यद्रजःकणनिपातपावितः प्रस्तरोऽभवदपूर्वसङ्गमः।।८१५।।

यस्त्वां पश्यति सर्वत्र सर्वञ्च त्वयि पश्यति।
तस्य त्वं न प्रणष्टोऽसि, स च ते न प्रणश्यति।।८१६।।

सर्वभूतस्थितं यस्त्वां भजत्येकत्वमास्थितः।
सर्वथा वर्तमानोऽपि स योगी त्वयि वर्तते।।८१७।।

आत्मौपम्येन सर्वत्र समं पश्यति योऽजित।
सुखं वा यदि वा दुःखं स योगी परमो मतः।।८१८।।

योगिनामपि सर्वेषां त्वद्गतेनान्तरात्मना।
श्रद्धावान् भजते यस्त्वां स मे युक्ततमो मतः।।८१९।।

त्वय्यासक्तमना राम योगं युञ्जन् त्वदाश्रयः।
असंशयं समग्रं त्वां यथावत् प्रतिपद्यते।।८२०।।

मनुष्याणां सहस्रेषु कश्चिद्यतति सिद्धये।
यततामपि सिद्धानां कश्चित्त्वां वेत्ति तत्त्वतः।।८२१।।

भूमिरापोऽनलो वायुः खं मनो बुद्धिरेव च।
अहङ्कार इतीयं ते भिन्ना प्रकृतिरष्टधा।।८२२।।

अपरेयमितस्त्वन्या प्रकृतिः परमा हि ते।
जीवभूता तु भगवन् ययेदं धार्यते जगत्।।८२३।।

एतद्योनीनि भूतानि सर्वाणि प्रभवन्ति च।
त्वं हि कृत्स्नस्य जगतः प्रभवः प्रलयस्तथा।।८२४।।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

त्वत्तः परतरं नान्यत् किञ्चिदस्ति रघूद्वह।
त्वयि सर्वमिदं प्रोतं सूत्रे मणिगणा इव॥८२५॥

रसस्त्वमप्सु काकुत्स्थ प्रभाऽसि शशिसूर्ययोः।
प्रणवः सर्ववेदेषु शब्दः खे पौरुषं नृषु॥८२६॥

पुण्यो गन्धः पृथिव्याश्च तेजश्चासि विभावसोः।
जीवनं सर्वभूतेषु तपश्चासि तपस्विषु॥८२७॥

बीजं त्वां सर्वभूतानां वेद्मि राघव शाश्वतम्।
तेजस्तेजस्विनां त्वं हि बुद्धिर्बुद्धिमतामसि॥८२८॥

बलं बलवतां त्वं हि कामरागविवर्जितम्।
धर्माविरुद्धो भूतेषु कामोऽसि पुरुषोत्तम॥८२९॥

ये चैव सात्त्विका भावा राजसाः तामसाश्च ये।
त्वत्त एवेति तान् वेद्मि न त्वं तेषु न ते त्वयि॥८३०॥

त्रिभिर्गुणमयैर्भावैरेभिः सर्वमिदं जगत्।
मोहितं नाभिजानाति त्वामेभ्यः परमव्ययम्॥८३१॥

दैवी ह्येषा गुणमयी तव माया दुरत्यया।
त्वामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते॥८३२॥

न त्वां दुष्कृतिनो मूढाः प्रपद्यन्ते नराधमाः।
माययाऽपहृतज्ञाना आसुरं भावमाश्रिताः॥८३३॥

चतुर्विधा भजन्ते त्वां जनाः सुकृतिनः प्रभो।
आर्तो जिज्ञासुरर्थार्थी ज्ञानी चैव रघूद्वह॥८३४॥

तेषां ज्ञानी नित्ययुक्त एकभक्तिर्विशिष्यते।
प्रियो हि ज्ञानिनोऽत्यर्थं त्वं स चैव तव प्रियः॥८३५॥

उदाराः सर्व एवैते ज्ञानी त्वात्मैव ते मतः।
आस्थितः स हि युक्तात्मा त्वामेवानुत्तमां गतिम्॥८३६॥

बहूनां जन्मनामन्ते ज्ञानवान् त्वां प्रपद्यते।
वासुदेवः सर्वमिति स महात्मा सुदुर्लभः॥८३७॥

CC-0. Sampurnanand University Collection. Digitized by eGangotri

कामैस्तैस्तैर्हृतज्ञाना: प्रपद्यन्तेऽन्यदेवता:।
तं तं नियममास्थाय प्रकृत्या नियता: स्वया॥८३८॥

यो यो यां यां तनुं भक्तः श्रद्धयाऽर्चितुमिच्छति।
तस्य तस्याचलां श्रद्धां त्वमेव विदधासि ताम्॥८३९॥

स तया श्रद्धया युक्तस्तस्याराधनमीहते।
लभते च ततः कामान् त्वयैव विहितान् हि तान्॥८४०॥

अन्तवत्तु फलं तेषां तद्भवत्यल्पचेतसाम्।
देवान् देवयजो यान्ति त्वद्भक्तास्त्वां व्रजन्ति हि॥८४१॥

अव्यक्तं व्यक्तिमापन्नं मन्यन्ते त्वामबुद्धयः।
परं भावमजानन्तस्तवाव्ययमनुत्तमम्॥८४२॥

न त्वं प्रकाशः सर्वस्य योगमायासमावृतः।
मूढोऽयं नाभिजानाति लोकस्त्वामजमव्ययम्॥८४३॥

रे! चित्त चिन्तय चिरं चरणौ खरारेः
पारं गमिष्यसि ततो भवसागरस्य।
पुत्राः कलत्रमितरे नहि ते सहाया
व्यर्थं विलोकय सखे मृगतृष्णिकाभम्॥८४४॥

वेद त्वं समतीतानि वर्तमानानि राघव।
भविष्याणि च भूतानि त्वां तु वेद न कश्चन॥८४५॥

इच्छाद्वेषसमुत्थेन द्वन्द्वमोहेन राघव।
सर्वे जीवास्तु संमोहं सर्गे यान्ति तमोवृताः॥८४६॥

येषां त्वन्तगतं पापं जनानां पुण्यकर्मणाम्।
ते द्वन्द्वमोहनिर्मुक्ता भजन्ते त्वां दृढव्रताः॥८४७॥

जरामरणमोक्षाय त्वामाश्रित्य यतन्ति ये।
ते ब्रह्मतद्विदुः कृत्स्नमध्यात्मं कर्म चाखिलम्॥८४८॥

साधिभूताधिदैवं त्वां साधियज्ञञ्च ये विदुः।
प्रयाणकालेऽपि च ते त्वां विदुर्युक्तचेतसः॥८४९॥

CC-0. Sampurnanand University Collection. Digitized by eGangotri

अक्षरं ब्रह्म परमं स्वभावोऽध्यात्ममुच्यते।
भूतभावोद्भवकरो विसर्गः कर्मसंज्ञितः॥८५०॥

अधिभूतं क्षरो भावः पुरुषश्चाधिदैवतम्।
अधियज्ञस्त्वमेवात्र देहेऽस्मिन्पुरुषः परः॥८५१॥

त्वामेव चान्तकाले तु स्मरन्मुक्त्वा कलेवरम्।
यः प्रयाति स ते रूपं याति नास्त्यत्र संशयः॥८५२॥

यं यं वापि स्मरन् भावं त्यजत्यन्ते कलेवरम्।
तं तमैति काकुत्स्थ सदा तद्भावभावितः॥८५३॥

तस्मात् सर्वेषु कालेषु भक्तस्त्वामनुसंस्मरन्।
त्वय्यर्पितमनोबुद्धिस्त्वामेवैष्यत्यसंशयम्॥८५४॥

अभ्यासयोगयुक्तेन चेतसा नान्यगामिना।
परमं पुरुषं दिव्यं याति त्वामनुचिन्तयन्॥८५५॥

कविं पुराणमनुशासितारमणोरणीयांसमनुस्मरेद्यः।
सर्वस्य धातारमचिन्त्यरूपमादित्यवर्णं तमसः परस्तात्॥८५६॥

प्रयाणकाले मनसाऽचलेन भक्त्या युतो योगबलेन चैव।
भ्रुवोर्मध्ये प्राणमावेश्य सम्यक् स त्वां परं पुरुषमुपैति दिव्यम्॥८५७॥

यदक्षरं वेदविदो वदन्ति विशन्ति यद्यतयो वीतरागाः।
यदिच्छन्तो ब्रह्मचर्यं चरन्ति तत्ते पदं प्रणवं प्राहुरार्याः॥८५८॥

सर्वद्वाराणि संयम्य मनो हृदि निरुध्य च।
मूर्ध्न्याधायात्मनः प्राणमास्थितो योगधारणाम्॥८५९॥

ओमित्येकाक्षरं ब्रह्म व्याहरन् त्वामनुस्मरन्।
यः प्रयाति त्यजन् देहं स याति परमां गतिम्॥८६०॥

अनन्यचेताः सततं यस्त्वां स्मरति नित्यशः।
तस्य त्वं सुलभो राम नित्ययुक्तस्य योगिनः॥८६१॥

त्वामुपेत्य पुनर्जन्मदुःखालयमशाश्वतम्।
नाप्नुवन्ति महात्मानः संसिद्धिं परमां गताः॥८६२॥

CC-0. Sampurnanand University Collection. Digitized by eGangotri

आब्रह्मभुवनाल्लोकाः पुनरावर्तिनो मताः।
त्वामुपेत्य तु काकुत्स्थ पुनर्जन्म न विद्यते॥८६३॥

सहस्रयुगपर्यन्तमहर्यद् ब्रह्मणो विदुः।
रात्रिं युगसहस्रान्तां तेऽहोरात्रविदो जनाः॥८६४॥

अव्यक्ताद्व्यक्तयः सर्वाः प्रभवन्त्यहरागमे।
रात्र्यागमे प्रलीयन्ते तत्रैवाव्यक्तसंज्ञके॥८६५॥

भूतग्रामः स एवायं भूत्वा भूत्वा प्रलीयते।
रात्र्यागमेऽवशो राम प्रभवत्यहरागमे॥८६६॥

परस्तस्मात्तु भावोऽन्योऽव्यक्तो व्यक्तात्सनातनः।
यः स सर्वेषु भूतेषु नश्यत्सु न विनश्यति॥८६७॥

अव्यक्तोऽक्षर इत्युक्तस्तमाहुः परमां गतिम्।
यं प्राप्य न निवर्तन्ते तद्धाम परमं तव॥८६८॥

पुरुषस्त्वं परः राम भक्त्या लभ्यस्त्वनन्यया।
यस्यान्तःस्थानि भूतानि येन सर्वमिदं ततम्॥८६९॥

अग्निर्ज्योतिरहःशुक्लः षण्मासा उत्तरायणम्।
तत्र प्रयाता गच्छन्ति ब्रह्म ब्रह्मविदो जनाः॥८७०॥

धूमो रात्रिस्तथा कृष्णः षण्मासा दक्षिणायनम्।
तत्र चान्द्रमसं ज्योतिर्योगी प्राप्य निवर्तते॥८७१॥

शुक्लकृष्णे गती ह्येते जगतः शाश्वते मते।
एकया यात्यनावृत्तिमन्ययाऽऽवर्तते पुनः॥८७२॥

नैते सृती राम जानन् भक्तो मुह्यति कश्चन।
तस्मात्सर्वेषु कालेषु भक्तियुक्तो भवाम्यहम्॥८७३॥

वेदेषु यज्ञेषु तपःसु चैव दानेषु यत्पुण्यफलं प्रदिष्टम्।
अत्येति तत्सर्वमिदं विदित्वा भक्तः परं स्थानमुपैति चाद्यम्॥८७४॥

त्वया ततमिदं सर्वं जगदव्यक्तमूर्तिना।
त्वत्स्थानि सर्वभूतानि न च त्वं तेष्ववस्थितः॥८७५॥

CC-0. Sampurnanand University Collection. Digitized by eGangotri

न च त्वत्स्थानि भूतानि चित्रस्ते योग ऐश्वरः।
भूतभृन्न च भूतस्थस्तवात्मा भूतभावनः॥८७६॥

यथाऽऽकाशस्थितो नित्यं वायुः सर्वत्रगो महान्।
तथा सर्वाणि भूतानि त्वत्स्थानीत्युपधारय॥८७७॥

सर्वभूतानि काकुत्स्थ प्रकृतिं यान्ति तावकीम्।
कल्पक्षये पुनस्तानि कल्पादौ विदधासि च॥८७८॥

प्रकृतिं स्वामवष्टभ्य विदधासि पुनः पुनः।
भूतग्राममिमं कृत्स्नमवशं प्रकृतेर्वशात्॥८७९॥

न च त्वां तानि कर्माणि निबध्नन्ति कृतान्यपि।
उदासीनवदासीनमसक्तं तेषु कर्मसु॥८८०॥

त्वयाध्यक्षेण प्रकृतिः सूयते सचराचरम्।
हेतुनाऽनेन काकुत्स्थ जगद् विपरिवर्तते॥८८१॥

मूढास्त्वामवजानन्ति मानुषीं तनुमाश्रितम्।
परं भावमजानन्तस्तव भूतमहेश्वरम्॥८८२॥

मोघाशा मोघकर्माणो मोघज्ञाना विचेतसः।
राक्षसीमासुरीञ्चैव प्रकृतिं मोहिनीं श्रिताः॥८८३॥

महात्मानस्तु राम त्वां दैवीं प्रकृतिमाश्रिताः।
भजन्त्यनन्यमनसो ज्ञात्वा भूतादिमव्ययम्॥८८४॥

सततं कीर्तयन्तस्त्वां यतन्तश्च दृढव्रताः।
नमस्यन्तश्च भक्त्या त्वां नित्ययुक्ता उपासते॥८८५॥

ज्ञानयज्ञेन चाप्यन्ये भजन्तस्त्वामुपासते।
एकत्वेन पृथक्त्वेन बहुधा विश्वतोमुखम्॥८८६॥

प्रजहाति यदा कामान् सर्वान् राम मनोगतान्।
आत्मन्येवात्मना तुष्टस्त्वां प्राप्य प्रविमुच्यते॥८८७॥

दुःखेष्वनुद्विग्नमनाः सुखेषु विगतस्पृहः।
वीतरागभयक्रोधो मुनिस्त्वां प्राप्य मुच्यते॥८८८॥

CC-0. Sampurnanand University Collection. Digitized by eGangotri

यः सर्वत्रानभिस्नेहस्तत्तत्प्राप्य शुभाशुभम्।
नाभिनन्दति न द्वेष्टि स त्वां प्राप्य विमुच्यते॥८८९॥

यदा संहरते चायं कूर्मोऽङ्गानीव सर्वशः।
इन्द्रियाणीन्द्रियार्थेभ्यस्तदा त्वां प्राप्य मुच्यते॥८९०॥

विषया विनिवर्तन्ते निराहारस्य देहिनः।
रसवर्जं रसोऽप्यस्य त्वां दृष्ट्वा विनिवर्तते॥८९१॥

यततो ह्यपि राम त्वां द्रष्टुं पुंसो विपश्चितः।
इन्द्रियाणि प्रमाथीनि हरन्ति प्रसभं मनः॥८९२॥

तानि सर्वाणि संयम्य ध्यायन् त्वां त्वत्परो भवेत्।
वशे हि यस्येन्द्रियाणि स त्वां प्राप्नोति पूरुषः॥८९३॥

ध्यायतो विषयान् पुंसः संगस्तेषूपजायते।
संगात्संजायते कामः कामात्क्रोधोऽभिजायते॥८९४॥

क्रोधाद्भवति संमोहः संमोहात्स्मृतिविभ्रमः।
स्मृतिभ्रंशाद् बुद्धिनाशो बुद्धिनाशात्प्रणश्यति॥८९५॥

रागद्वेषवियुक्तैस्तु विषयानिन्द्रियैश्चरन्।
आत्मवश्यैर्विधेयात्मा प्रसादमधिगच्छति॥८९६॥

प्रसादे सर्वदुःखानां हानिरस्योपजायते।
प्रसन्नचेतसो ह्याशु बुद्धिः पर्यवतिष्ठते॥८९७॥

नास्ति बुद्धिरयुक्तस्य न चायुक्तस्य भावना।
न चाभावयतो राम शान्तिस्त्वत्प्राप्तिरेव वा॥८९८॥

इन्द्रियाणां हि चरतां यन्मनोऽनुविधीयते।
तदस्य हरति प्रज्ञां वायुर्नावमिवाम्भसि॥८९९॥

तस्माद् यस्य सदा राम निगृहीतानि सर्वतः।
इन्द्रियाणीन्द्रियार्थेभ्यः स त्वां प्राप्नोति पुरुषः॥९००॥

या निशा सर्वभूतानां तस्यां जागर्ति संयमी।
यस्यां जाग्रति भूतानि सा निशा त्वां तु पश्यतः॥९०१॥

CC-0. Sampurnanand University Collection. Digitized by eGangotri

सर्वधर्मान् परित्यज्य त्वां राम शरणं गतः।
अतस्त्वं सर्वपापेभ्यो मामुद्धर दयानिधे॥९०२॥

राम राम तव नाम संस्मरन् विस्मरन् विषयसङ्गमात्मनः।
विस्मयो विगतभीर्गतस्पृहः क्रोडकोटरगतो भवामि ते॥९०३॥

भोगिभोगासनासीनं नमामस्त्वां दिवौकसम्।
तत्फणामण्डलोदर्चिर्मणिद्योतितविग्रहम्॥९०४॥

श्रियः पद्मनिषण्णायाः क्षौमान्तरितमेखले।
अङ्के निक्षिप्तचरणमास्तीर्णकरपल्लवे॥९०५॥

प्रबुद्धपुण्डरीकाक्षं बालातपनिभांशुकम्।
दिवसं शारदमिव प्रारम्भसुखदर्शनम्॥९०६॥

प्रभानुलिप्तश्रीवत्सं लक्ष्मीविभ्रमदर्पणम्।
कौस्तुभाख्यमपां सारं बिभ्राणं बृहतोरसा॥९०७॥

बाहुभिर्विटपाकारैर्दिव्याभरणभूषितैः।
आविर्भूतमपां मध्ये पारिजातमिवापरम्॥९०८॥

दैत्यस्त्रीगण्डलेखानां मदरागविलेपिभिः।
हेतिभिश्चेतनावद्भिरुदीरितजयस्वनम्॥९०९॥

मुक्तशेषे विरोधेन कुलिशव्रणलक्ष्मणा।
उपस्थितं प्राञ्जलिना विनीतेन गरुत्मता॥९१०॥

योगनिद्रान्तविशदैः पावनैरवलोकनैः।
भृग्वादीननुगृह्णन्तं सौख्यशायनिकान् ऋषीन्॥९११॥

नमो विश्वसृजे पूर्वं विश्वं तदनुबिभ्रते।
अथ विश्वस्य संहर्त्रे तुभ्यं त्रेधा स्थितात्मने॥९१२॥

रसान्तराण्येकरसं यथा दिव्यं पयोऽश्नुते।
देशे देशे गुणेष्वेवमवस्थास्त्वमविक्रियः॥९१३॥

अमेयोऽमितलोकस्त्वमनर्थी प्रार्थनावहः।
अजितो जिष्णुरत्यन्तमव्यक्तो व्यक्तकारणम्॥९१४॥

CC-0. Sampurnanand University Collection. Digitized by eGangotri

हृदयस्थमनासन्नमकामं त्वां तपस्विनम्।
दयालुमनघस्पृष्टं पुराणमजरं विदुः॥९१५॥

सर्वज्ञस्त्वमविज्ञातः सर्वयोनिस्त्वमात्मभूः।
सर्वप्रभुरनीशस्त्वमेकस्त्वं सर्वरूपभाक्॥९१६॥

सप्तसामोपगीतं त्वां सप्तार्णवजलेशयम्।
सप्तार्चिर्मुखमाचख्युः सप्तलोकैकसंश्रयम्॥९१७॥

चतुर्वर्गफलं ज्ञानं कालावस्थाश्चतुर्युगाः।
चतुर्वर्णमयो लोकस्त्वत्तः सर्वं चतुर्मुखात्॥९१८॥

अभ्यासनिगृहीतेन मनसा हृदयाश्रयम्।
योगिनस्त्वां विचिन्वन्ति ज्योतीरूपं विमुक्तये॥९१९॥

अजस्य गृह्णतो जन्म निरीहस्य हतद्विषः।
स्वपतो जागरूकस्य याथार्थ्यं वेद कस्तव॥९२०॥

शब्दादीन् विषयान् भोक्तुं चरितुं दुश्चरं तपः।
पर्याप्तोऽसि प्रजाः पातुमौदासीन्येन वर्तितुम्॥९२१॥

बहुधाप्यागमैर्भिन्नाः पन्थानः सिद्धिहेतवः।
त्वय्येव निपतन्त्योघा जाह्नवीया इवार्णवे॥९२२॥

त्वय्यावेशितचित्तानां त्वत्समर्पितकर्मणाम्।
गतिस्त्वं वीतरागाणामभूयः सन्निवृत्तये॥९२३॥

प्रत्यक्षोऽप्यपरिच्छेद्यो मह्यादिर्महिमा तव।
आप्तवागनुमानाभ्यां साध्यं त्वां प्रति का कथा॥९२४॥

केवलं स्मरणेनैव पुनासि पुरुषं यतः।
अनेन वृत्तयः शेषा निवेदितफलास्त्वयि॥९२५॥

उदधेरिव रत्नानि तेजांसीव विवस्वतः।
स्तुतिभ्यो व्यतिरिच्यन्ते दूराणि चरितानि ते॥९२६॥

अनवाप्तमवाप्तव्यं न ते किञ्चन विद्यते।
लोकानुग्रह एवैको हेतुस्ते जन्मकर्मणोः॥९२७॥

CC-0. Sampurnanand University Collection. Digitized by eGangotri

महिमानं यदुत्कीर्त्य तव संह्रियते वचः।
श्रमेण तदशक्त्या वा न गुणानामियत्तया॥९२८॥

यमुद्गीथं सामगाः संगिरन्ते प्रोपासीना अक्षरं ब्रह्मरूपम्।
तं त्वामीशं प्रणवस्याभिधेयं गेयं सतां पुरुषं सम्प्रपद्ये॥९२९॥

यो रसानां रसतमः परार्ध्यः परमः पुमान्।
उद्गीथोऽष्टम इत्युक्तस्तं वन्दे रघुनन्दनम्॥९३०॥

आप्तिर्गुणो यस्य विदि प्रसिद्धो वाक्प्राणयोनिर्मिथुनप्रसूतः।
समृद्धिहेतुः समुपासकस्य तदक्षरोद्गीतमहं प्रपद्ये॥९३१॥

आश्रावयति यत्कृत्वा यत्कृत्वा चैव शंसति।
उद्गायति च यत्कृत्वा तदहं शरणं भजे॥९३२॥

आश्रावणं शंसनञ्चोद्गानं कर्मत्रयं बुधाः।
यस्यापचित्यै कुर्वन्ति तदक्षरमहं भजे॥९३३॥

भेजे यदङ्गिराः सामोद्गीथं यच्च बृहस्पतिः।
अयास्यश्चैव यद् भेजे तद्ध्येयं सम्भजे हरिम्॥९३४॥

वको दाल्भ्यो विदाञ्चक्रे यदुद्गीथं पुरा मुनिः।
कामांश्च नैमिशीयानामगायच्चाविलम्बयन्॥९३५॥

तेन गेयञ्च तद्ध्येयं तद्वाच्यं चैव यद् भवेत्।
तदहं ब्रह्म परमं रघुनन्दनमाश्रये॥९३६॥

यो उदयन् प्रतपति सर्वलोकान् प्रजाकामान् पूरयन्नेति खे यः।
भयं तमो योऽपहन्त्येव चोद्यन् तद् भानवं धाम रामं प्रपद्ये॥९३७॥

उष्णः प्राणः सूर्य एवास्ति चोष्णः समौ देवौ शिरसा संनमन्तः।
तयोर्द्विधा निहितं राघवस्य सामोद्गीथं धाम कामं प्रपन्नाः॥९३८॥

प्राणोऽपानस्तथा व्यानो यानुद्गीथं प्रचक्षते।
तदक्षरस्य यद्वाच्यं तं वन्दे रघुनन्दनम्॥९३९॥

उत्प्राणो गीश्च वाक् प्रोक्ताथ मन्त्रं यस्य कीर्तितम्।
तदक्षरस्य यो वाच्यस्तं वन्दे रघुनन्दनम्॥९४०॥

CC-0. Sampurnanand University Collection. Digitized by eGangotri

धीरेवेदमन्तरिक्षं गीः पृथिवीयमुदीरिता।
यस्योद्गीथाक्षरस्याहं तद् रामं ब्रह्म संश्रये॥९४१॥

आदित्य एवोद्गीर्वायुरग्निस्थं समुदीरितः।
यस्योद्गीथाक्षरस्याहं तद् रामं ब्रह्म संश्रये॥९४२॥

सोमैवोद्गीर्यजुवेद ऋग्वेदस्थमुदीरितः।
यस्योद्गीथाक्षरस्याहं तद् रामं ब्रह्म संश्रये॥९४३॥

यदक्षरं मृत्युभयत्रस्ता देवा उपासते।
तद्वाच्यं परं ब्रह्म रामं देवमुपास्महे॥९४४॥

असंख्येया गुणा यस्य निर्गुणस्य चिदात्मनः।
तं सर्वगुणसम्पन्नं सिंहं राममाश्रये॥९४५॥

यस्य बिभ्यति देवाश्च जातरोषस्य संयुगे।
तं सर्वगुणसम्पन्नं नृसिंहं राममाश्रये॥९४६॥

आदित्यः प्रणवश्चैव प्राणोग्निर्वायुरेव च।
द्यौश्चान्तरिक्षं यस्यैतत्सप्तकं साम कथ्यते॥९४७॥

उपास्यमानो य एभिर्भेदैर्नानाफलप्रदः।
प्रणवाक्षरविज्ञेयो रामो मे संप्रसीदतु॥९४८॥

भानुभानुस्थिते शुक्लकृष्णरूपे विमिश्रिते।
सामरूपतया गीते रामरूपतया भजे॥९४९॥

य एष आदित्यगतः पुरुषोऽस्ति हिरण्मयः।
उदितः सर्वपाप्मभ्यस्तं नौमि रघुनन्दनम्॥९५०॥

पुण्डरीकाणि मे नेत्रे नाम यस्योदितिस्मृतम्।
उदितः सर्वपाप्मभ्यो यस्योपास्त्या प्रजायते॥९५१॥

यः परापरलोकानां कामेश्वर उदीरितः।
उद्गीथरूपं तद्ब्रह्म प्रपद्ये रघुनन्दनम्॥९५२॥

वाक्प्राणयोर्य ऋक्सामरूपयोर्विदितः पुमान्।
नेत्रात्मनोः श्रोत्रमनो गोयुगे य उपास्यते॥९५३॥

CC-0. Sampurnanand University Collection. Digitized by eGangotri

अक्ष्णः शुक्ले च नीले च तेजसि प्रतिसंस्थितः।
यः सामरूपः पुरुषो रामं तमहमाश्रये।।९५४।।

यः एष दक्षिणे नेत्रे ब्रह्मविद्भिरुपास्यते।
सर्वस्य साक्षी सर्वेशस्तं वन्दे रघुनन्दनम्।।९५५।।

प्रस्तावमन्वायत्ता या देवता प्राणरूपिणी।
तं रामरूपां वन्देऽहं सर्वभूतेष्ववस्थिताम्।।९५६।।

उद्गीथमन्वायत्ता या देवताऽऽदित्यरूपतः।
तस्याः प्रकाशकं धाम रामं कामं श्रयामहे।।९५७।।

प्रतिहारेऽन्नरूपेण य उपास्यो विचक्षणैः।
तं सर्वानुगतं ब्रह्म रामं कामं श्रयामहे।।९५८।।

यं बहिष्पवमानेन स्तुवन्तः समुपासते।
रविरूपेणान्नकामास्तमहं राममाश्रये।।९५९।।

स्तोभाक्षरेषु बहुभिर्देवरूपैरुपास्यते।
य एको बहुधा भूतो रामस्तमहमाश्रये।।९६०।।

लोकेषु वृष्टौ तोये च ऋतुषु पशुषु प्रभुः।
उपास्यते सामभेदैः पञ्चभिस्तमहं श्रये।।९६१।।

यो वाचि सप्तभिर्भेदैः साम्नां सम्यगुपास्यते।
यः सर्वज्ञः सर्वमयः तं वन्दे रघुनन्दनम्।।९६२।।

हिंकारः प्रथमः प्रोक्तः प्रस्तावश्च द्वितीयकः।
तृतीय आदिरित्युक्तः उद्गीथस्तु तुरीयकः।।९६३।।

पञ्चमः प्रतिहारस्तु षष्ठश्चोपद्रवः स्मृतः।
सप्तमं निधनं प्राहुरार्याः सामविदो जनाः।।९६४।।

हुंकारो यः स हिंकारः प्रस्तावः प्रतिसंस्तुतः।
आकार आदिरुच्छन्द उद्गीथः परिकीर्तितः।।९६५।।

प्रतीतिप्रतिहारस्तु उपेत्युक्त उपद्रवः।
नीति यत्तत्तु निधनमेवं सामानि चक्षते।।९६६।।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

एतैरुपाधिभिर्यस्तु परिच्छिन्नः परेश्वरः।
गीयते सप्तभिः सामभेदै रामः स मे गतिः॥९६७॥

यत्र सूर्यो नोदयते न ह्यस्तं चैव गच्छति।
यस्य मध्ये स्थितः सूर्यस्तं रामं ब्रह्म संश्रये॥९६८॥

एतावान् राममहिमा ततो ज्यायाँश्च सश्रुतः।
पादः सर्वाणि भूतानि त्रिपादस्यामृतं दिवि॥९६९॥

यत्पूर्णमप्रवर्त्ये तदाकाशं परिदृश्यते।
यच्चान्तर्हृदये तद्वै रामदृष्ट्या श्रयामहे॥९७०॥

यो ब्रह्म पुरुषैर्नित्यं द्वारपैः पर्युपास्ते।
ब्रह्माण्डे चैव पिण्डे च रामं तं हृद्गतं भजे॥९७१॥

यद् द्योतते परं ज्योतिर्दिवः परमवस्थितम्।
सर्वस्य हृद्गतश्चैव रामरूपं तदाश्रये॥९७२॥

यदुष्णस्पर्शतो नित्यं कायेषु परिगृह्यते।
यत्कर्णयोर्नादरूपं रामरूपं तदाश्रये॥९७३॥

यद् दृष्टश्च श्रुतश्चैव योगिभिर्गृह्यते हृदि।
तद्रामरूपं परमं ज्योतिः शश्वदहं श्रये॥९७४॥

मनोमयः प्राणशरीर एको भारूप आत्मा हृदये निविष्टः।
यः सत्त्यसङ्कल्प इति प्रतीतो वियद्वपुः सर्वकर्मेति गीतः॥९७५॥

सर्वगन्धः सर्वरसः सर्वं व्याप्तश्च सर्वदा।
अवाक्यानादरो यस्तु स मे रामः प्रसीदतु॥९७६॥

अणोरणीयान् पुरुषः सर्वेषां हृदि यः स्थितः।
ज्यायान् पृथिव्या वियतो लोकेभ्यश्चैव यः प्रभुः॥९७७॥

एष मे हृदयस्यान्तर्वर्तमानः सनातनः।
श्रीरामरूपः पुरुषः कामरूपं तमाश्रये॥९७८॥

अन्तरिक्षोदरः कोशो भूमिबुध्नो न जीर्यति।
दिशो यस्य स्मृताः कोणा द्यौर्यस्योत्तरं विलम्॥९७९॥

CC-0. Sampurnanand University Collection. Digitized by eGangotri

यस्मिन् स्थितं विश्वमिदं वसुधानं तु यद्विदुः।
यस्य प्राची जुहूर्नाम सहमाना च दक्षिणा॥९८०॥

राज्ञी नाम प्रतीची च सुभूता चोत्तरा मता।
वायुर्वत्सो दिशामासां तमरिष्टं हरिं श्रये॥९८१॥

मनो ब्रह्म वियद् ब्रह्म रविर्ब्रह्मेति ये विदुः।
ते वेदान्तविदः प्रज्ञा राममेव तथा विदुः॥९८२॥

स्वदेहमरणिं कृत्वां प्रणवं चोत्तरारणिम्।
ध्याननिर्मथनाभ्यासाद्यं प्रपश्यन्ति योगिनः॥९८३॥

दिवि सूर्यसहस्रस्य भवेद् युगपदुत्थिता।
यदि भाः सदृशी सा स्याद् भासो यस्य महात्मनः॥९८४॥

तं वयं ब्रह्मपरमं सर्वभूतेष्ववस्थितम्।
रामं नवघनश्यामं कामरूपमुपास्महे॥९८५॥

द्वौ सुपर्णौ सयुजौ सखायौ समानं वृक्षं परिषस्वजाते।
तयोरेकः पिप्पलं स्वाद्वत्त्यनश्नन्नन्योऽभिचाकशीति॥९८६॥

निवृत्ततर्षैरुपगीयमानं भवौषधं श्रोत्रमनोभिरामम्।
यस्योत्तमश्लोकमणेर्निधानं गुणाभिधानं प्रणमामि रामम्॥९८७॥

यमाप्तकामाः परिपूर्णकामा निवृत्तकामा मनसा स्मरन्तः।
बुद्ध्याऽवरुध्याखिलवृत्तिजालं पश्यन्ति तं देववरं नतोऽस्मि॥९८८॥

यस्योदये प्रजायन्ते साधुघोषाः समन्ततः।
उलूकवस्तमादित्यं रामरूपमुपास्महे॥९८९॥

वातादिदेवतानां य आत्मा संवर्ग उच्यते।
प्रजानां जनको यश्च रभसः स्वर्णदंष्ट्रकः॥९९०॥

अनसूरिर्महान् यस्य महिमा गीयते बुधैः।
अनद्यमानोऽनन्नं यद् रामं तमहमाश्रये॥९९१॥

यस्य वेदकलाः पादौ बहुधा वेदविश्रुतः।
प्रकाशवाँस्तु प्रथमोऽनन्तवानपरः श्रुतः॥९९२॥

CC-0. Sampurnanand University Collection. Digitized by eGangotri

तृतीयो यस्य चरणो ज्योतिष्मानिति गीयते।
तुरीयस्त्वायतनवान् स मे रामः प्रसीदतु॥९९३॥

पृथिवीवह्निरन्नञ्च सूर्यश्च तनवः श्रुताः।
य आदित्ये पुमान् रामः स मेऽस्तु सततं हृदि॥९९४॥

आपादिश्च तनवो नक्षत्राणीन्दुरेव च।
यस्य चन्द्रे स्थितस्याहं तं रामं सर्वथा श्रये॥९९५॥

प्राणो वियद् द्यौर्विद्युच्च यस्यैतास्तनवः श्रुताः।
यश्चञ्चलायां पुरुषो रामं तमहमाश्रये॥९९६॥

अस्ति यः पुरुषो दृष्टेर्द्रष्टा सन्दृश्यते बुधैः।
शान्तैर्विवेकिभिः पुंभिरमृतं ब्रह्म निर्भयम्॥९९७॥

यं हि सर्वाणि वामानि संयान्ति प्रार्थनां विना।
संयद् वामपदेनाहं विदितं तमुपाश्रये॥९९८॥

यश्च सर्वाणि वामानि प्राणिभ्यो नयति ध्रुवम्।
वामनीपदविख्यातं वयं राममुपास्महे॥९९९॥

यश्च सर्वेषु लोकेषु भाति भाभरसंयुतः।
भामनीपदसंवित्तं रामं तमहमाश्रये॥१०००॥

वैश्वानरात्मनो यस्य द्यौर्मूर्धा संप्रकीर्तिता।
सुतेजा इति सम्प्रोक्ता स देवः सम्प्रसीदतु॥१००१॥

विश्वरूपं श्रुतं चक्षुः प्राणो वायुः पृथक्सृतिः।
सन्देहो बहुलः प्रोक्तो वस्तिरेव तथा रयिः॥१००२॥

क्षोण्येव पादौ वक्षस्तु वेदिर्लोमानि दर्भकाः।
हृदयं गार्हपत्योऽग्निरास्यमाहवनीयकम्॥१००३॥

मनोऽन्वाहार्यपचनो यस्य प्रोक्तं पुरातनैः।
स एष देवः सर्वात्मा सर्वभुक् सर्वरूपभृत्॥१००४॥

वेदैश्च सर्वैः संवेद्यो रामरूपः सनातनः।
अजरश्चामरश्चैव सर्वदा संप्रसीदतु॥१००५॥

CC-0. Sampurnanand University Collection. Digitized by eGangotri

रामः सर्वमिदं सर्वं राम एव न संशयः।
रामात्परं न चैवास्ति नापरश्चापि विद्यते॥१००६॥

इति संपश्यतो बुद्ध्या त्यक्तसङ्गस्य निर्विदः।
प्रयान्तु दिवसाः शेषा राम रामेति जल्पतः॥१००७॥

निष्ठुरं हि मनो राम क्षात्रधर्माश्रितस्य ते।
यदेवं क्रोशते मह्यं प्रतिवाचं ददासि नो॥१००८॥

नास्ति चान्या गतिर्मेऽतश्चरणौ न जहामि ते।
पश्यतः सर्वलोकस्य सहे दुःखं पुरस्तव॥१००९॥

अभूतपूर्वं मम भावि किं वा सर्वं सहे मे सहजं हि दुःखम्।
किन्तु त्वदग्रे शरणागतानां पराभवो राम न तेऽनुरूपः॥१०१०॥

सकृदेव प्रपन्नाय तवास्मीति च याचते।
अभयं सर्वभूतेभ्यो ददाम्येतद् व्रतं मम॥१०११॥

इति ते विस्मृता सन्ध्या पातकान्मम विभ्यतः।
तव शक्तिरमोघा मे पातकेन पराजिता॥१०१२॥

नाथ नाथ निरीक्षस्व पतितं मां पदोस्तव।
आश्रितस्य परित्यागो न युक्तं ते रघूद्वह॥१०१३॥

एवं विलप्य बहुधा विरमामि पुरस्तव।
त्वामाश्रितस्य मे त्यागे तवाकीर्तिर्भविष्यति॥१०१४॥

रामस्तवमिमं पुण्यं पवित्रं पापनाशनम्।
यः शृणोति नरो भक्त्या तस्य रामः प्रसीदति॥१०१५॥

॥इति श्रीब्रह्मीभूतकाशीनाथतनयसौभद्रेयरघुनाथकृतौ श्रीरामस्तवे
पद्यानां सहस्रं षोडशाधिकं सम्पूर्णम्॥

CC-0. Sampurnanand University Collection. Digitized by eGangotri

सारस्वती सुषमा

सम्पूर्णानन्दसंस्कृतविश्वविद्यालयानुसन्धानपत्रिका

१. एषा देशे विदेशे च लब्धप्रसरा त्रैमासिकी संस्कृतपत्रिका।

२. अस्याः प्रकाशनं प्रतिवर्षं ज्येष्ठ-भाद्रपद-मार्गशीर्ष-फाल्गुनपूर्णिमासु भवति।

३. अस्याः प्रधानमुद्देश्यं संस्कृतज्ञेषु स्वोपज्ञानुसन्धानप्रवृत्तेः समालोचना-प्रवृत्तेश्चोद्बोधनं प्रोत्साहनं चास्ति।

४. अस्यां सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्थानामन्येषां च विदुषां स्वोपज्ञ-विचारपूर्णा अनुसन्धानप्रधाना निबन्धाः प्रकाश्यन्ते।

५. प्रकाशितनिबन्धस्य प्रतिमुद्रणानां पञ्चविंशतिः, पत्रिकायाश्च सोऽङ्को दीयते, यस्मिंस्तदीयो निबन्धः प्रकाशितो भवति।

६. अस्यां पत्रिकायां विशिष्टानां हिन्दीसंस्कृताङ्ग्लग्रन्थानां समालोचनाः प्रकाश्यन्ते। तदर्थं ग्रन्थकृद्भिर्ग्रन्थस्य द्वे प्रतिकृती प्रेषयितव्ये।

७. **''वित्त अधिकारी, सम्पूर्णानन्द-संस्कृत-विश्वविद्यालय, वाराणसी-२२१००२** (उ.प्र.)'' इति सङ्केतेन ('बैङ्कड्राफ्ट' अथवा 'पोस्टल-आर्डर' इत्येतेनैव) मूल्यं प्रेषणीयम्।

८. पत्रिकासम्बन्धी सर्वविधः पत्रव्यवहारः **''सम्पादक, सारस्वती सुषमा, सम्पूर्णानन्द-संस्कृत-विश्वविद्यालय, वाराणसी-२२१००२** (उ.प्र.)'' इति सङ्केतेन विधेयः।

●

CC-0. Sampurnanand University Collection. Digitized by eGangotri

रजिस्टर्ड न्यूजपेपर्स एक्ट के अन्तर्गत

विज्ञप्ति

१.	प्रकाशन का नाम	**सारस्वती सुषमा**
२.	प्रकाशन की तिथि	त्रैमासिक
३.	प्रकाशक का नाम	**प्रो. नरेन्द्रनाथ पाण्डेय**
	राष्ट्रियता	भारतीय
	पता	सम्पूर्णानन्द संस्कृत विश्वविद्यालय, वाराणसी
४.	सम्पादक का नाम	**प्रो. नरेन्द्रनाथ पाण्डेय**
	राष्ट्रियता	भारतीय
	पता	सम्पूर्णानन्द संस्कृत विश्वविद्यालय, वाराणसी
५.	मुद्रक का नाम	**श्री अनूप कुमार नागर**
	राष्ट्रियता	भारतीय
	पता	श्रीजी प्रिण्टर्स, नाटी इमली, वाराणसी
६.	स्वामित्व	सम्पूर्णानन्द संस्कृत विश्वविद्यालय, वाराणसी

मैं नरेन्द्रनाथ पाण्डेय घोषित करता हूँ कि उल्लिखित विज्ञप्ति मेरी जानकारी के अनुसार बिलकुल ठीक है।

हस्ताक्षर

नरेन्द्रनाथ पाण्डेय

निदेशक, अनुसन्धान-संस्थान

सम्पूर्णानन्द संस्कृत विश्वविद्यालय

वाराणसी - २२१००२

CC-0. Sampurnanand University Collection. Digitized by eGangotri

CC-0. Sampurnanand University Collection. Digitized by eGangotri

सम्पूर्णानन्द-संस्कृत-विश्वविद्यालय

श्रुतम् मे गोपाय

CC-0. Sampurnanand University Collection. Digitized by eGangotri

CC-0. Sampurnanand University Collection. Digitized by eGangotri

सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयः

श्रुतम् मे गोपाय

श्रीजी प्रिण्टर्स, वाराणसी

CC-0. Sampurnanand University Collection. Digitized by eGangotri